Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीलब्धिसूरीश्वरजैनग्रन्थमाला [ ३८ ]

राजगच्छीय-श्रीविनयचन्द्रसूरिविरचितम्

# मुनिसुव्रतस्वामिचरितम्।

सम्पादक-संशोधकौ

पन्न्यासविक्रमविजयगणि-मुनिभास्करविजयौ।

साहाय्योपदेशकः

पाठकवर श्रीमद्-जयन्तविजयजीगणिवरः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीलब्धिसूरीश्वरजैनग्रन्थमालाया अष्टात्रिंशत्तमो मणिः [ ३८ ]

राजगच्छीय - आचार्यश्रीविनयचन्द्रसूरिविरचितम्

# मुनिसुव्रतस्वामिचरितम् ।

सम्पादक - संशोधकौ

आचार्यश्रीमद्विजयलब्धिसूरीश्वरचरणचञ्चरीकौ पंन्यासविक्रमविजयगणि - मुनिभास्करविजयौ ।

साहाय्यकाः

पूज्यपादपाठकप्रवरश्रीमज्जयन्तविजयजीगणिवरसदुपदिष्टाः सम्यक् - श्रुतभक्त्यभिलाषिणो भावुकाः सज्जनाः ।

वीरसं० २४८३ * विक्रमसं० २०१३ * आत्मसं० ६१ * इस्वीसन् १९५७

प्रथमसंस्करणम् — मूल्यं पञ्च रूप्यकाः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकाशकः—चन्दुलाल जमनादास शाह

संचालक—श्रीलब्धिसूरीश्वरजैनग्रन्थमाला छाणी (वडोदरा)

प्रशमविमलनेत्रं कर्णपीयूषसत्रं, नवनवरसपात्रं सर्वसौख्यैक-मित्रम्।
नवभवसुपवित्रं सुव्रतस्यातिमात्रं, भवजलनिधिपात्रं नन्दतात्सच्चरित्रम्॥

मुद्रकः लक्ष्मीबाई नारायण चौधरी

निर्णयसागर प्रेस, २६।२८ कोलभाट स्ट्रीट, मुंबई २

For Private and Personal Use Only

## ધન્યવાદ અને આભાર

વર્તમાન અવસર્પિણીના વીસમા તીર્થપતિ શ્રીમુનિસુવ્રતસ્વામીના ચરિત્રના આ સંસ્કૃત-કાવ્યગ્રન્થના પ્રકાશનને શ્રુતાનુરાગિ સજ્જનોના હસ્તકમલમાં સમર્પિત કરતાં અત્યન્ત હર્ષ થાય છે. આ પ્રકાશન દ્વારા શ્રુતભક્તિના માર્ગમાં એક કદમ અમે આગલ વધીયે છીએ.

આ ગ્રન્થના પ્રકાશનમાં, પૂ. ગુરૂદેવના શિષ્યરત્ન પૂ. પાઠક-પ્રવર શ્રીમદ્‌જયન્તવિજયજી ગણિવરના સદુપદેશ અને પ્રેરણ દ્વારા નિમ્ન લિખિત સદ્‌ગૃહસ્થોએ અમને દ્રવ્યસાહાય્ય કરી છે. શ્રુતારાધનના સહભાગી મહાનુભાવોનાં નામો નીચે મુજબ છે :—

### સાહાય્યક સજ્જનોનાં શુભનામો

| | | |
|---|---|---|
| ૫૦૧ | શા. શંકરલાલ જેઠાલાલ | બારામતી. |
| ૫૦૦ | વિજયાબેન નિહાલચંદ | ખંભાત. |
| ૫૦૦ | શા. વેણીચંદ કેશવજી મહેતા | ઈડર. |
| ૩૫૦ | શા. મણીલાલ પ્રેમચંદ કીનખાબવાલા. હા. જયંતિલાલ મણીલાલ | ખેતરપાલની પોળ, અમદાવાદ. |
| ૩૦૦ | શા. નેમચંદ પાનાચંદ ચોકશી | ખંભાત. |
| ૨૫૦ | શા. બેચરભાઈ હરીચંદ પાલનપુરવાલા | મુંબઈ. |
| ૨૦૦ | શા. શાંતિલાલ ભોગીલાલ દલાલ | ખંભાત. |
| ૨૦૦ | શા. રમણલાલ છોટાલાલ રાળજવાલા | ખંભાત. |
| ૨૦૦ | ભણસાલી ગીરધરલાલ રતનલાલ | ગામ કરમાનશવાલા ( મારવાડ ) હાલ ખંભાત. |

ઉક્ત મહાનુભાવોની સાહાય્યના બલવડે જ આવી મોંઘવારીમાં પણ આવું સુંદર પ્રકાશન થઈ શક્યું છે. ઉપદેશક પૂ. પાઠકપ્રવરનો તથા સાહાય્યક સજ્જનોનો, ધન્યવાદપ્રદાન કરવા પૂર્વક અમે અન્તઃકરણથી આભાર માનીએ છીએ.

—પ્રકાશક.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# પ્રાસ્તાવિક



આચાર્ય શ્રીવિનયચન્દ્રસૂરિજી વિરચિત શ્રીમુનિસુવ્રતચરિત-સંસ્કૃત કાવ્યગ્રન્થ વિદ્વાન્ વાંચકોના કરકમલમાં સાદર કરતાં અતીવ આનન્દાનુભવ થાય છે.

કથા સાહિત્ય એ એક એવો આરો છે કે-જેને કાંઠે બેસીને, ધર્મ, નીતિ દેશ કે એવા બીજા કોઈ પણ ભેદ વિના સમસ્ત માનવજાત આનાં ઉપદેશ-સંસ્કારરૂપ શીતલ વારિને નિરાંતે આરોગી શકે છે. સામાન્ય પ્રજા મુખ્યતયા એવી કુશાગ્રમતિવાલી હોતી નથી કે-જેથી તે વિવિધવિષયક ગ્રન્થોનું અવલોકન-અવગાહન કરી શકે. આવા પ્રાકૃતજનોને માટે તો કથા-સાહિત્ય એજ એક એવી વસ્તુ છે કે-જે દ્વારા તેઓ જીવનનો રસ માણી શકે છે અને વ્યવહાર તથા પરમાર્થને સ્હમજી માનવ-જીવનને કૃતકૃત્ય બનાવી શકે છે. એટલે તો પૂર્વમહર્ષિઓએ અને વિદ્વાનોએ, કથા, ઉપકથા, આખ્યાન, આખ્યાયિકાઓ આદિ વિવિધ પ્રકારો દ્વારા, કથાનુયોગનું સર્જન કર્યું છે. આથી જ જૈનપરંપરાની જેમ વૈદિક, બૌદ્ધ આદિ પરંપરાઓમાં અને ભારતની જેમ બીજા પણ વિદેશોમાં વિપુલ પ્રમાણમાં કથાનકો ઉપલબ્ધ થાય છે. જ્ઞાનની વિવિધ શાખાઓ-તત્ત્વજ્ઞાન, વિજ્ઞાન, ખગોલ, ભૂગોલ, આયુર્વેદ ઈત્યાદિનાં વિવિધ રહસ્યો કથાના માધ્યમ દ્વારા સહેલાઈથી આમ જનતા સુધી પહોંચાડી શકાયાં છે. ત્યાગ, તપ, ધૈર્ય, ક્ષમા, ઋજુતા, અહિંસા, સત્ય, નિઃસ્પૃહતા, ઇન્દ્રિયજય આદિ સદ્‌ગુણોની પ્રેરણા પણ, એ રીતિએ જનતાને હૃદયંગમ કરાવી શકાઈ છે. કોઈ અનુભવીએ સાચું જ કહ્યું છે કે—"**कथाच्छलेन बालानां नीतिस्तदिह कथ्यते**"

શ્રીજૈનપ્રવચનમાં પણ, ધર્મકથાનુયોગનું વિશિષ્ટ સ્થાન છે. દ્રવ્યાનુયોગ, ગણિતાનુયોગ, ચરણકરણાનુયોગ અને ધર્મકથાનુયોગઃ આમ ચાર વિભાગમાં શ્રીજૈનપ્રવચન વહેંચાયેલું છે. જેમાં આત્મા, પરમાત્મા, જીવ-અજીવ આદિ તત્ત્વો, કર્મ, વિશ્વસ્વરૂપ વિગેરે વર્ણવવામાં આવ્યાં હોય તે દ્રવ્યાનુયોગ છે. ભૂગોલ, ખગોલ આદિને વર્ણવતું સાહિત્ય ગણિતાનુયોગ ગણાય છે. આચારધર્મનાં નિયમો અને તેને આચરણમાં મૂકવાની પ્રક્રિયાઓના વર્ણનનું નામ ચરણકરણાનુયોગ છે. આ આચારાદિ વિધિ-વિધાનોનું અનુપાલન કરનાર મહાનુભાવોના, તેમને પ્રાપ્ત લાભો અને વેઠવી પડેલી મુસીબતો આલેખતા ઐતિહાસિક કે કથાત્મક



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

જીવન પ્રસંગોનું વર્ણન, એ કથાનુયોગ કહેવાય છે. યાકિની-મહત્તરા-ધર્મપુત્ર આચાર્યપ્રવર શ્રીહરિભદ્રસૂરિજી મહારાજાએ, સમરાઇચ્ચ-કહામાં, કથાનાં ચાર પ્રકારો વર્ણવ્યાં છે. અર્થકથા, કામકથા, ધર્મકથા અને સંકીર્ણકથાઃ આમાંથી ધર્મકથા કથાનુયોગમાં સમાવિષ્ટ થાય છે.

## પ્રસ્તુત મુનિસુવ્રતસ્વામીચરિત:

સંસ્કૃતજ્ઞ વિદ્વાન્ વાંચકોના કરકમલમાં સાદર થતું. અને પ્રથમવાર મુદ્રિત થઈ પ્રકાશન પામતું પ્રસ્તુત 'શ્રીમુનિસુવ્રતસ્વામીચરિતમ્' પણ, ધર્મકથાનુયોગનો એક મહત્ત્વનો ગ્રન્થ છે. પ્રસ્તુત શ્રીમુનિસુવ્રતસ્વામીચરિતમાં, વર્તમાન અવસર્પિણીમાં થયેલાં ઋષભાદિ ચોવીસ તીર્થંકરદેવો પૈકી, વીસમા શ્રીમુનિસુવ્રતસ્વામી ભગવાનનું જીવનચરિત્ર વિસ્તૃત રીતિએ આલેખવામાં આવ્યું છે. એ તારક તીર્થપતિના સમ્યકત્વપ્રાપ્તિના ભવથી આરંભી, નવભવોનું વર્ણન આ ચરિત્રમાં કરાયું છે. પ્રત્યેક ભવોમાં તેમને સમ્પ્રાપ્ત થયેલાં વૈભવ-સમ્પત્તિ આદિનું તથા તેઓશ્રીનાં અપૂર્વ એવા પરોપકારવૃત્તિ, ધર્માનુરાગિતા આદિ અનેકાનેક વિધવિધ ગુણોનું યથાર્થ વર્ણન તથા તેઓશ્રીને પ્રાપ્ત થયેલી પદવીઓ આદિનાં વૃત્તાન્તો સાથે, તે તે ભવમાં સંબદ્ધ અનેક અવાન્તર કથાઓ આપી, વિદ્વાન્ ચરિત્રકારે આ ચરિત્ર-ગ્રન્થને વધુ રોચક બનાવ્યો છે. શ્રીતીર્થંકરભગવંત તરીકેના ભવમાં, પ્રભુના જન્માદિ પાંચેય કલ્યાણકોના દેવ-દેવેન્દ્રો આદિએ કરેલા મહોત્સવો, કૈવલ્યપ્રાપ્તિ પછી સમવસરણની રચના, તીર્થસ્થાપના તથા ગણધરાદિ પરિવાર અંગે પણ, વિસ્તૃત વર્ણન આપવામાં આવ્યું છે. સમવસરણમાં બિરાજી, દાન, શીલ, તપ, અને ભાવઃ ધર્મના મુખ્ય એ ચાર ભેદો તથા અન્ય પણ અનેક વિષયો ઉપર પ્રભુએ આપેલી હૃદયઙ્ગમ દેશના અને તે ઉપર કહેલી કથાઓ, સાચે જ તે તે ધર્માનુષ્ઠાનમાં અપૂર્વ પ્રેરણા અર્પે તેવી છે. એ સિવાય પણ અનેકાનેક પ્રકૃત વિષયોનું આયોજન આ ગ્રન્થના વિદ્વાન્ ગ્રન્થકારે સ્થલે સ્થલે કર્યું છે. મૂર્તિવિધાનશાસ્ત્રનું રહસ્ય પણ એક સ્થલે મૂર્તિવિધાન અંગેના ઉપદેશમાં સપ્રમાણ અને સુસ્પષ્ટ રીતે રજુ કર્યું છે, જે ગ્રન્થકારના શિલ્પશાસ્ત્રના ઊંડા અભ્યાસ અને પરિશીલનનું પરિચાયક છે. શ્રીજિનમન્દિરમાં બિરાજમાન કરાતી જિનપ્રતિમાની દૃષ્ટિ કયાં અને કેવી રીતે રાખવી તે અંગે પણ ઉલ્લેખ ગ્રન્થકારે કર્યો છે.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





જ્યોતિષ, વૈદ્યક આદિના કેટલાક અનુભવો પણ પ્રાસ્તાવિક વર્ણનોમાં આલેખ્યાં છે. [1]સાધર્મિક-બન્ધુના વાત્સલ્ય અને ભક્તિ અંગેનું તેઓશ્રીનું વિધાન, આજના સમયમાં વિશેષ રીતે ખૂબજ ઉપકારક છે.

શ્રીમુનિસુવ્રતસ્વામી ભગવંતના જીવનને અનુલક્ષીને રચાયેલાં, પ્રસ્તુત ચરિત્રથી ઈતર, નીચે મુજબ ગ્રન્થકારોના ચરિત્રો પ્રાપ્ત થાય છે. આ ચરિત્રોનું તુલનાત્મક અન્વેષણ, તે તે ચરિત્ર ગ્રન્થોના વિશિષ્ટ અધ્યયન અને પરિશીલન દ્વારા અમે કરી શક્યા નથી. પ્રસ્તુત ચરિત્ર આમાંથી કોની સાથે વધારે સામ્ય ધરાવે છે, તે કહેવાની સ્થિતિમાં આજે અમે નથી. શ્રીમુનિસુવ્રતસ્વામી-ચરિત્રના ગ્રન્થો નીચે મુજબ હાલ ઉપલબ્ધ થાય છે.

૧ કલિકાલસર્વજ્ઞશ્રીહેમચન્દ્રાચાર્યવિરચિત ત્રિષષ્ટિશલાકાપુરૂષચરિત્રાન્તર્ગત.

૨ ચન્દ્રકુલના વિબુધપ્રભના શિષ્ય શ્રીપદ્મપ્રભપ્રણીત રચના સંવત્ ૧૨૯૪. ૫૫૫૫ શ્લોકપ્રમાણ.

૩ હર્ષપુરીયગચ્છીયમલધારી શ્રીહેમચન્દ્રસૂરિશિષ્ય શ્રીચન્દ્રસૂરિવિરચિત. પ્રાકૃતભાષામય ૧૦૯૯૪ ગાથા પ્રમાણ આ ચરિત્ર, વિ. સં. ૧૧૯૩ માં આસાપલ્લિપુરી ( વર્તમાન અમદાવાદ )માં, શ્રીમાલકુલના શ્રેષ્ઠશ્રાવક શ્રેષ્ઠિ નાગિલના સુપુત્રોના ઘરમાં નિવાસ કરીને રચ્યું હતું. ( પાટણ જૈન ભંડાર ગ્રન્થસૂચી. ભા૦ ૧ પૃ૦ ૨૧૯ )

૪ અમમસ્વામીચરિત્ર આદિ ગ્રન્થોના કર્તા પૂર્ણિમાગચ્છીય શ્રીમુનિરત્નસૂરિકૃત, સંસ્કૃત ભાષામય ૬૮૦૬ શ્લોક સંખ્યાપ્રમાણ આ ગ્રન્થ આઠ સર્ગમાં વિભક્ત છે. પ્રત્યેક સર્ગ અનુષ્ટુપ છન્દમાં છે. સર્ગના અન્તમાં અન્ય છન્દનો ઉપયોગ કર્યો છે. સર્ગાન્તે પ્રત્યેક શ્લોકમાં, ગ્રન્થકર્તાએ પોતાનો નામનિર્દેશ કરવારૂપ 'વિનય' શબ્દનો પ્રયોગ કર્યો છે. મતલબ કે કાવ્ય 'વિનયાઙ્ક' છે. આ એક ચરિત્રવર્ણનાત્મક મહાકાવ્ય છે. મહાકાવ્યમાં હોવા જોઈતાં અનેકો લક્ષણો આ કાવ્યમાં પણ દૃષ્ટિગોચર થાય છે. કાવ્યના લક્ષણ અંગે, કાવ્યશાસ્ત્રના વિદ્વાનોમાં સતત મતભેદ ચાલે છે. 'काव्यं रसात्मकं वाक्यं' એ મત ઘણા વિદ્વાનોને સંમત છે.

---

१ चक्रे तेन जिनार्चनं स विदधे सम्यग्गुरूपासनं, तत्त्वं तेन जिनागमस्य कलितं, सङ्घोन्नतिं स व्यधात् । सत्यङ्कारितमेव तेन सुधिया निर्वाणस्वर्गाद्भुतं, यः साधर्मिकगौरवं वितनुते हृष्टो गुरूणामिव ॥ ( प्रस्तुतचरित्र, सर्ग २, श्लो० ६०३ ) साधर्मिकं हि यत् क्षेत्रं, सप्तक्षेत्र्यां विशेष्यते ॥ ( सर्ग २, श्लो० ६०५ )

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

આ લક્ષણ આ કાવ્યને મહદંશે લાગુ પડે છે. જૈન મહર્ષિઓ ભૌતિકવાસનાઓથી પરે હોઈને, તેમની કાવ્યરચનાનો હેતુ લોકરંજન ન રહેતાં, લોકશિક્ષણ અને પ્રભુસ્તુતિ દ્વારા પ્રાપ્ત થતો નિજાનન્દ છે. જૈનસાહિત્યની વિશાલતર રચનાઓને 'પ્રચારલક્ષી' કહેનારાં વાસ્તવિક નથી. સત્ય, અહિંસા, નીતિ અને સદાચારનાં ઉપદેશોને જો કેવલ પ્રચારજ કહેવામાં આવશે તો સાહિત્ય દ્વારા થતું લોકઘડતર નિરર્થક બનશે. કોઈ પણ ગ્રન્થકારને પોતાનું કથયિતવ્ય તો રહેવાનું જ પોતાનાં એ કથયિતવ્યને બિરદાવવામાં પોતાની તમામ શક્તિનો ઉપયોગ સ્વસર્જનમાં કર્યા વિના, કોઈ સર્જક રહી શકે નહિ. આ ન્યાયે તો જગતભરનાં તમામ શિષ્ટગ્રન્થો 'પ્રચારલક્ષી' એવા આક્ષેપનો ભોગ બન્યા વિના નહિ રહે. આ રીતે જગતસાહિત્યના ઉત્કૃષ્ટ ગ્રન્થોનો અનાદર અન્યોન્ય થતો જ રહે તો, સાહિત્યદ્વારા થતી મહાન નિષ્પત્તિને ગુમાવ્યા વિના છૂટકો જ નથી.

સામાન્ય રીતે, ચરિત્રકથાનાં વર્ણનોમાં, અલંકારોનો ઉપયોગ કરવો અતિ કઠિન હોય છે. તેમ છતાં આ ગ્રન્થના વિદ્વાન કર્તાએ અનેક સ્થલોએ ઉપમા, અન્યોક્તિ, અનુપ્રાસ, વક્રોક્તિ, વિરોધાભાસ ઇત્યાદિ શબ્દાલંકારો અને અર્થાલંકારોનો ઉપયોગ કરી, વિશિષ્ટ કાવ્યગ્રન્થનું નિર્માણ કર્યું છે. ચરિત્રવર્ણનાત્મક કાવ્યસાહિત્યમાં, આ ગ્રન્થ પોતાનું માનભર્યું સ્થાન પ્રાપ્ત કરે તેવો છે એ જરા પણ શંકાસ્પદ નથી.

**ગ્રન્થકાર શ્રીવિનયચન્દ્રસૂરિજી :**

પ્રસ્તુત શ્રીમુનિસુવ્રતસ્વામીચરિતના કર્તા શ્રીવિનયચન્દ્રસૂરિજી છે. આ ગ્રન્થના અન્તમાં તેમણે પોતાની પ્રશસ્તિ આપી નથી. પ્રતિસર્ગાન્તે 'इत्याचार्यश्रीविनयचन्द्रविरचित–' આ મુજબ કેવલ પોતાના નામમાત્રનોજ ઉલ્લેખ કર્યો છે. પ્રસ્તુત ચરિતની આદિમાં, 'उत्कीर्त्य स्वामिनो मल्लेश्चरितमतिपावनम् । क्रमागतमहं वच्मि सुव्रतस्य जगद्गुरोः' મલ્લીનાથચરિત્રની રચના કરીને, ક્રમપ્રમાણે આવેલા સુવ્રતચરિતને કહું છું.' આ પ્રમાણે જણાવેલું હોવાથી, તેમના રચેલા શ્રીમલ્લીનાથચરિત્રના આધારે, ટૂંકામાં તેમનો પરિચય પ્રાપ્ત થાય છે. શ્રીમલ્લીનાથચરિત્રની પ્રશસ્તિમાં પણ, પોતાની ગુરૂપરંપરા શિવાય અન્ય કશો વિશિષ્ટ ઉલ્લેખ તેમણે કર્યો નથી.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



બૃહત તપાગચ્છીય સૈદ્ધાન્તિક [1]શ્રીમુનિચન્દ્રસૂરિજીના શિષ્ય શ્રીરત્નસિંહસૂરિજી, તેમના ગુરૂ છે. ગ્રન્થકારની 'કાલિકાચાર્યકથા' નામની અન્ય કૃતિ છે. તેમાં, અન્તમાં, [2]'सिरिरविपहसूरीणं सीसेणं विणयचंदनामेणं' એ રીતે, શ્રીરવિપ્રભસૂરિજીના શિષ્ય તરીકે પોતાને ગણાવ્યા છે. ઉદયાસિંહસૂરિજીકૃત 'ધર્મવિધિ' ગ્રન્થનું સંશોધન, શ્રીવિનયચન્દ્રસૂરિજીએ કર્યું છે. તેનો નામોલ્લેખ કરતાં, ધર્મવિધિકાર પણ, 'श्रीमत्पूज्यरविप्रभमुनिपतिपदकमलमण्डनमरालः ।' આમ જણાવી, શ્રીરવિપ્રભસૂરિનો નામોલ્લેખ કરે છે. શ્રીવિનયચન્દ્રસૂરિજી, અન્યાન્ય ગુજરાતી કૃતિઓમાં તથા શ્રીદીપાલિકાકલ્પમાં, શ્રીરત્નસિંહસૂરિના શિષ્ય તરીકે સ્પષ્ટપણે પોતાને જણાવે છે. એ પરથી અમારૂં એવું અનુમાન છે કે–શ્રીરવિપ્રભસૂરિજી ગચ્છપતિ હશે એટલે તેમનો પણ ગુરૂ તરીકેનો ઉલ્લેખ કવચિત્ ગ્રન્થોમાં કર્યો હશે. તેમનાં ગુરૂતો શ્રીરત્નાસિંહસૂરિજી[3] હોવાં જોઈએ, એવું અમારૂં મન્તવ્ય છે.

તેમણે સંશોધિત કરેલી 'ધર્મવિધિ' વિ. સં. ૧૨૮૬ માં રચાયેલી છે. તેમની પોતાની કૃતિ 'કલ્પનિરૂક્ત' સં. ૧૩૨૫ માં' અને 'દીપાલિકાકલ્પ' સં. ૧૩૪૫ માં રચાયેલ હોવાથી, શ્રીવિનયચન્દ્રસૂરિજીનો સત્તા સમય, વિક્રમની તેરમી શતાબ્દિનો ઉત્તરાર્ધ અને ચૌદમી શતાબ્દિનો પૂર્વાર્ધ છે.એ સુનિશ્ચિત છે.

શ્રીમલ્લિનાથચરિત, મુનિસુવ્રતસ્વામિચરિત અને શ્રીપાર્શ્વનાથચરિત ( અપ્રકટ ) નામક ચરિત્રો ઉપરાંત, અન્ય તીર્થંકર દેવોના ચરિત્રોની પણ રચના તેઓ શ્રીમદે કરેલી હોય તેમ અનુમાન થાય છે. આ સિવાય કલ્પનિરૂક્ત, કાવ્યશિક્ષા, કાલકાચાર્યકથા, દીપાલીકાકલ્પ ઈત્યાદિ અનેક ગ્રન્થોનું ગુમ્ફન તેમણે કર્યું છે. 'વિંશતિપ્રબંધકાર' તરીકેની તેમની ખ્યાતિ, અન્ય ગ્રન્થો પણ હશેજ એમ સૂચવી જાય છે. ગુજરાતી કાવ્યો પણ તેમણે રચ્યાં છે. નેમિનાથચતુષ્પદિકા અને ઉપદેશમાલાકથાનકછપ્પય નામક બે કાવ્યોની નોંધ જૈનગુર્જર કવિઓ. ભા. ૧ માં લેવાયેલી છે.

---

૧ શ્રીનેમિચન્દ્રસૂરિએ તેમને આચાર્યપદારૂઢ કર્યા હતા. તેમના વિદ્યાગુરૂ વિનયચન્દ્ર પાઠક હતા. બાલકુમારપણે દીક્ષા લઈ અખંડ બ્રહ્મવ્રતનું પાલન કર્યું હતું. તેઓ વિદ્વાન તથા વાદી હોવા ઉપરાંત ઉગ્ર તપસ્વી પણ હતા, સૌવીર ( કાંજી ) પીને તેઓ રહેતા એટલે 'સૌવીરપાયી' કહેવાતા. તેમની આજ્ઞામાં, પાંચસો શ્રમણો અને અનેક સાધ્વીઓ હતી. પાટણમાં સં. ૧૧૭૮ માં, તેમનો સ્વર્ગવાસ થયો હતો. ૨ પત્તનસ્થપ્રાચ્યભાંડાગારીયગ્રન્થસૂચી. પ્રથમ ભાગ પૃ. ૨૬૧. ૩ આમણે, ટીકા સહિત પુદ્ગલષટ્ત્રિંશિકા - નિગોદષટ્ત્રિંશિકા આદિ ગ્રન્થો બનાવ્યાં છે.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## સંશોધન, સંપાદન અને ઉપયુક્ત હસ્તપ્રતિઓ :

આ પુસ્તકના સંશોધન-સંપાદનમાં, નીચે મુજબની ત્રણ હસ્તલિખિત પ્રતિઓનો ઉપયોગ કર્યો છે.

૧ પ્રાચીન પુસ્તકોના સમૃદ્ધ ભંડાર માટે પ્રસિદ્ધ 'ડહેલાનો ઉપાશ્રય' અમદાવાદની પ્રતિ. પત્રસંખ્યા ૮૩. પ્રત્યેક પૃષ્ઠમાં ૧૬ થી ૧૯ પંક્તિઓ છે. આ પ્રતિ, સમયની દૃષ્ટિએ અતિપ્રાચીન છે. ગ્રન્થરચના પછી, પહેલા સેકામાં લખાયેલી છે. લીપી પડિમાત્રા છે. પ્રતિ, પ્રમાણમાં ઘણી શુદ્ધ છે. આ પ્રતિમાં અવગ્રહ તથા ઇ. ઉ વિગેરે સ્વરોની પૂર્વના સ્વર-વ્યંજન સાથે થયેલી સંધીને સમજવાનાં ચિહ્નો પણ ઘણે સ્થલે લખ્યાં છે. સંશોધન અને પાઠશુદ્ધિ માટે આ પ્રતિનો જ અમે વિશેષ ઉપયોગ કર્યો છે. આ પ્રતિની લેખન-પુષ્પિકા આ પ્રમાણે છે.

''स्वस्ति संवत १४४७ वर्षे माघ सुदि १३ गुरुवासरेऽद्येह श्रीभृगुक्षेत्रे महामलिक श्रीइशाख विजयराज्ये कायस्थज्ञातीय महं तुंगासुत महं शउलेन श्रीमुनिसुव्रतस्वामिचरित्रस्य पुस्तकं लिखितं शुभं भवतु कल्याणं भूयात् लेखकपाठकयोः श्रीसंघस्य मांगल्यमस्तु । श्रीः श्रीः श्रीः ( ११ ) श्रीभृगुकच्छवासि प्राग्वाटज्ञातीय सालीमाकेन श्रीज्ञानदर्शनचारित्राराधनार्थं लेखयामास । शुभं भवतु श्रीसंघस्य ॥

૨ સુબાજી રવચંદ જેચંદ જૈનવિદ્યાશાલા-અમદાવાદ સ્થિત પૂ. તપોનિધિ આચાર્યદેવ શ્રીમદ્વિજયસિદ્ધિસૂરીશ્વરજી મહારાજના સંગ્રહની પ્રતિ. પત્ર સંખ્યા ૧૦૧. આ પ્રતિ નવીન લખાયેલી છે. પૂ. આચાર્યશ્રીમદ્વિજયસિદ્ધિસૂરીશ્વરજી મહારાજાની કૃપાથી આ પ્રતિ પ્રાપ્ત થઈ હતી. લેખનપુષ્પિકા આ પ્રમાણે છે :—

''इति श्रीमुनिसुव्रतस्वामीचरित्रम् संपूर्णम् । विक्रम सं. १९९२ मिति चैत्र शुक्ल १५ वार सोमवार नगर नागौरमध्ये लिखितम् । पुस्तकमिदं षोडशजिनेशप्रसादादि अनुप्रमित जिनालयविभूषित श्रीवीरमग्रामनगरनिवासिना श्राद्धवरेण भूराभाइतनुजेन केशवलालेति नाम्ना लेखयित्वा स्थापितमाचार्यश्रीमद्विजयसिद्धिसूरीश्वरजी शास्त्रसंग्रहे ॥ छ ॥ छ ॥ छ ॥

૩ જૈનાનન્દ પુસ્તકાલય-સુરતમાં રાખવામાં આવેલા 'આચાર્યશ્રીમદ્ વિજય કમલસૂરીશ્વરજી 'પ્રાચીન हस्तलिखित पुस्तकोद्धार ફંડ'ની નં. ૧૦૩૮ પત્રસંખ્યા ૧૪૭ વાલી પ્રતિ. આ પ્રતિ પણ નવીન લખાયેલી છે. સં. ૧૯૯૮ ના પોષ સુદિ ૧૧ ના રોજ સુરતમધ્યે લહિયા વલ્લભજોશીએ લખી હતી.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ઉપરિ નિર્દિષ્ટ ત્રણ પ્રતિઓમાંથી, પહેલી અને બીજી પ્રતિનો, પ્રેસ કૉપી, સંપાદન અને સંશોધનાદિમાં વધારે ઉપયોગ કર્યો છે. ડહેલાના ઉપાશ્રયની પ્રતિ, પાઠનિર્ણય કરવામાં ઘણી સહાયભૂત થઈ છે. અમારી પાસે આવેલી પ્રતિઓમાં મહત્ત્વના પાઠભેદો ન હોવાથી, અમે અહીં પાઠાન્તરો આપ્યાં નથી. જે પ્રતિનો પાઠ અમને વધારે શુદ્ધ અને સંગત લાગ્યો તે અમે ત્યાં જ આપી દીધો છે. અનુસ્વાર અને કાનો–માત્રા તો અનેક સ્થલે અમારે મૂકવાં પડ્યાં છે. ગ્રન્થમાં આવતાં કઠિન શબ્દો ઉપર, તેના સરલ પર્યાય શબ્દોની ટિપ્પણી પણ, કેટલાંક સ્થલોએ આપી છે. પ્રત્યેક પૃષ્ઠ ઉપર તે પાનાના મુખ્ય વિષયની નોંધ આપેલી હોવાથી, અનુક્રમણિકા આપવાનું અમને યોગ્ય લાગ્યું નથી.

**આભાર–દર્શન અને ક્ષમાયાચના**

પ્રસ્તુત ગ્રન્થનું પ્રકાશન, પૂ. પાઠક પ્રવર શ્રીમદ્જયંતવિજયજી ગણિવરની શ્રુતભક્તિની ભાવનાના કારણે જ શક્ય બન્યું છે. ગ્રન્થ પ્રકાશન માટે આવશ્યક દ્રવ્ય–સાહાય્ય પણ તેઓશ્રીએ પોતાના સદુપદેશ દ્વારા, આ ગ્રન્થની પ્રકાશક સંસ્થાને અપાવી છે.

આ ગ્રન્થના સંપાદનકાર્યમાં, પ્રુફોના સંશોધનમાં, તથા ટીપ્પણોના આલેખનમાં, અમારા પરમપૂજ્ય ગુરૂદેવ શ્રીમદ્વિજય-લબ્ધિસૂરીશ્વરજી મહારાજાએ પ્રદાન કરેલી સાહાય્યની નોંધ લખવી પડે ખરી ? જેમનો ઉપકાર સાર્વત્રિક અને સાર્વદિક હોય, તેનો ઉલ્લેખ કરવાને શબ્દો શક્તિમાન હોતા નથી.

ગ્રન્થકારના આશયથી વિરૂદ્ધ જતું કાંઈ પણ સંશોધન, મતિમંદતાદિના યોગે થઇ ગયું હોય તો, ગ્રન્થકારમહર્ષિની ક્ષમા યાચીયે છીએ.

આ ગ્રન્થના સંપાદનાદિમાં રહેલી અપૂર્ણતાઓને સુધારીને, શ્રીજિનેશ્વરદેવના ચરિત્રામૃતનું પાન કરી, વાચકો શાશ્વતા-નન્દના ભોગી બનો એજ શુભાભિલાષા સદાય સેવીએ છીએ.

અમરજૈનશાલા, ટેકરી; ખંભાત.<br>
વિ. સં. ૨૦૧૩ પોષ સુદિ ૬.<br>
વીર સં. ૨૪૮૩, આત્મ સં. ૬૧.

પૂ. આચાર્યદેવશ્રીમદ્વિજયલબ્ધિસૂરીશ્વરચરણચઞ્ચરીક,<br>
**પં૦ વિક્રમવિજય ગણી.**<br>
**મુનિ ભાસ્કરવિજય.**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीशङ्खेश्वरपार्श्वनाथाय नमः ।

श्री आत्म-कमल-लब्धिसूरीश्वरेभ्यो नमः ।

चन्द्रगच्छीय-आचार्यश्रीविनयचन्द्रसूरिनिर्मितम्

# श्रीमुनिसुव्रतस्वामिचरितम् ।

## प्रथमः सर्गः ।

स जिनः पातु यस्यांस-स्थलकुन्तलवल्लयः । नित्यं फलन्ति कल्याण-फलभारैर्विवेकिनाम् ॥ १ ॥

अश्वतुष्टिरभूद्यस्य, सरसैर्देशनायवैः । भृगुकच्छपुरे क्षेत्रे, तं वन्दे मुनिसुव्रतम् ॥ २ ॥

अञ्जनद्युतिरनञ्जनमूर्तिः, कामभित्प्रणतकामविधायी ।

सुव्रतो जयति माननिहन्ता, व्यक्त-विंशतिशरासनमानः ॥ ३ ॥

स मां वीरजिनः पातु, महामोहमहाबलम् । जित्वा येनाऽद्वितीयेन, जगृहे सिद्धिवल्लभा ॥ ४ ॥

येषां नवनिधानानि, पुरस्थानीव रेजिरे । नवस्वर्णाम्बुजव्याजात्ते, जिनाः स्युः श्रिये सताम् ॥ ५ ॥

अकृत्रिमपदश्रेणिं, निःश्रेणिं संयमौकसः । प्रस्तौमि गौतमोपज्ञं, सिद्धान्तं बुद्धिशुद्धये ॥ ६ ॥

१ °मावज्ञं क० ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





उत्कीर्त्य स्वामिनो मल्लेश्चरित्रमतिपावनम् । क्रमागतमहं वच्मि, सुव्रतस्य जगद्गुरोः ॥ ७ ॥
तथा हि—गङ्गासिन्धूरुनाडीकः, सप्तक्षेत्राङ्गभासुरः । गजदन्तचतुर्दन्तो, जम्बूद्वीपो द्विपायते ॥ ८ ॥
तत्रैरावतनामाऽस्ति, क्षेत्रं भरतविस्तरम् । माकन्दीनगरी तत्र, नान्दीव बहुलक्षणा ॥ ९ ॥
निधानानीव पुण्यानां, कुण्डानीव यशोऽर्णसाम् । पद्मानीव श्रियां यस्या-मर्हच्चैत्यानि रेजिरे ॥ १० ॥
मणिकुट्टिमसंक्रान्तो, यत्र पौरीमुखैर्जितः । प्रविशन्निव पातालं, व्रीडाद्भाति निशापतिः ॥ ११ ॥
अपर्वण्यपि यत्रोच्चै-रानीलमणिकुट्टिमे । विधुर्विधुन्तुदग्रस्तो, नागरीभिरमन्यत ॥ १२ ॥
परोपकारधौरेयाः, सदाचारप्रियंवदाः । [1]वदान्या नागरा यत्र, सुषमाकालजातवत् ॥ १३ ॥
मणिमाली नृपस्तत्र, गुणमाली [2]परन्तपः । श्रीणां [3]केलिकिलः, सर्वकलाकुलनिकेतनम् ॥ १४ ॥
भाविता इव कर्पूरै-र्मल्लीभिरिव वासिताः । कीर्तिभिर्भूषिता यस्य, दिशः सुरभिता बभुः ॥ १५ ॥
अम्भोधिभिर्गभीरत्वे, पारीन्द्रैश्च पराक्रमे । कल्पक्षितिरुहैर्दाने, जाने यस्याधमर्ण्यते ॥ १६ ॥
मणिकान्ता प्रिया मुख्या, शीलरत्नमहाखनिः । तस्याऽजनि श्रुतेर्वेत्ता, विश्वभूतिः पुरोहितः ॥ १७ ॥
विश्वदत्ता गृहिण्यस्य, पतिमार्गप्रवर्तिनी । शिवकेतुस्तयोः पुत्रो, विनयी नयवत्सलः ॥ १८ ॥
अधीतब्रह्मसिद्धान्तो, गुणरागी महोद्यमी । पित्रोर्भक्तिपरो देव-गुरुपूजापरायणः ॥ १९ ॥
[ युग्मम् ]

---

१ उदाराः । २ शत्रुपीडकः । ३ परिहासकः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्येद्युर्बहिरुद्याने, गतः शान्ताकृतिं स्थिरम् । धर्मध्यानरतं जैनं, मुनि-मेकमलोकत ॥ २० ॥
तं दृष्ट्वास्य समुत्पेदे, हृद्यानन्दकदम्बकः । येनाऽऽत्मानं सुधापूर-निमग्नं [1]स्म विवेद सः ॥ २१ ॥
बहून् हास्यपटून् दूरे, मुक्त्वा निर्मलभावनः । नमन्मौलिर्ननामामु-मुवाचापि महामुनिम् ॥ २२ ॥
रूपेऽप्यप्रतिरूपेऽस्मिन्, लावण्ये च समुज्ज्वले । कथं त्यक्त्वा गृहस्थत्वम्, भवद्भिर्जगृहे व्रतम् ? ॥ २३ ॥
द्योतयन्निव दन्तांशु-[2]डम्बरैरम्बरं मुनिः । अथ गम्भीरनिर्घोषं, व्याजहारेति कोमलम् ॥ २४ ॥

तथा ह्यत्रैव सुक्षेत्रे, विपुलेति महापुरी । आसीद्दासीकृताराति-भूपतिर्जयकेसरी ॥ २५ ॥
मित्रसेना प्रिया तस्य, सेना कुसुमधन्विनः । मेघवाहन इत्याख्यस्तयोरजनि नन्दनः ॥ २६ ॥
सोऽप्यन्येद्युर्विभावर्यां स्मृताभीप्सितदेवतः । सुष्वाप भूपभूस्तल्पे, मरालः [3]पुलिने यथा ॥ २७ ॥
चरमे यामिनीयामे, केनचित् कुल्यवैरिवत् । उत्पाट्य कानने मुक्तः सशय्यो घनवाहनः ॥ २८ ॥
स निद्राच्छेदमासाद्या-पश्यदुत्पक्ष्मलोचनः । न स्वावासं सुखावासं, दृशां नवरसायनम् ॥ २९ ॥
किं स्वप्नो ? मनसः किं वा भ्रमः क्लमकरो मम ? । किमिन्द्रजालं ? किं नेत्र-दोषपोषमुपागतः ? ॥ ३० ॥
क्व सा राज्यस्थितिः ? क्वैषा महावनविभीषिका ? । क्व च बन्दिजनालापः ? क्वेदं शार्दूलबूत्कृतम् ? ॥ ३१ ॥
अथ वा भाग्यनिर्णाशे जायते सर्वमन्यथा । रज्जुः फणी सुधा [4]क्ष्वेडः पयो वह्निः सुहृद्रिपुः ॥ ३२ ॥
तथापि व्यसनव्यालजाङ्गुलीमन्त्रसन्निभम् । प्रकाश्यं सत्त्वमेवोच्चैः, पुरुषेण जिगीषुणा ॥ ३३ ॥

---

१ 'स्म' इति पादपूरणे । २ °समूहैः । ३ द्वीपे । ४ विषम् ।



For Private and Personal Use Only

विमृश्येति करे कृत्वा, करवालं स्वधैर्यवत् । अद्रिमुपाद्रवत्पद्धचां, निर्भयो घनवाहनः ॥ ३४ ॥
घृष्टौ यस्य पतत्पादौ, कर्कशैः कर्करोत्करैः । चित्रं तथाप्यसृग्बिन्दु-स्रवणाद्रागमागतौ ॥ ३५ ॥
यूथभ्रष्टैणवद्भ्राम्यन्नसावुन्मुखलोचनः । अपश्यत्काननं क्रीडो-द्यानं पितृपतेरिव ॥ ३६ ॥
तन्मध्ये योगपट्टेन परीतं रुद्धमारुतम् । अक्षसूत्रकरं दिव्या-लङ्कृतिं घ्राणगेक्षणम् ॥ ३७ ॥
मौलिबद्धशिखाबन्धं, मृगचर्मोपरिस्थितम् । परंज्योतिः प्रपश्यन्तं, स निरैक्षिष्ट योगिनम् ॥ ३८ ॥
[ युग्मम् ]

प्रथमः भवः मेघवाहन-वृत्तान्तः

अमुं नत्वा निविष्टेऽस्मिन्, समाधिमवमुच्य सः । अपृच्छत्कुशलं तस्मै, सर्वस्याभ्यागतो मतः ॥ ३९ ॥
सोऽप्यूचे स्वागतं स्वामिँ-स्तव दर्शनमङ्गलात् । साधूनां दर्शनं सद्भिर्जङ्गमं तीर्थमिष्यते ॥ ४० ॥
जगादैष सुतं राज्ञो-ऽतिथिरद्यासि मेऽधुना । अतः किमु करोम्युच्चै-रक्षयं स्वागतं तव ॥ ४१ ॥
अधीताः कोटिशो विद्याः, प्रदत्ताः कुत्रकुत्रचित् । परमद्यापि न प्रापि, सुपात्रं तव सन्निभम् ॥ ४२ ॥
सुपात्रे योजिता विद्या, मनो रमयतेतराम् । जायते वारिदैर्वारि, मुक्तं शुक्तिषु मौक्तिकम् ॥ ४३ ॥
उक्त्वेति पाठतः सिद्धां, तस्मै सर्वार्थसाधिनीम् । विद्यां प्रदत्तवानेष, कृतार्थश्च मनस्यभूत् ॥ ४४ ॥
अथ योगिनमानम्य, भ्राम्यन्नुपमहीधरम् । शुश्राव करुणध्वानम-कस्माद्विस्मयावहम् ॥ ४५ ॥
मां मा निरागसं नाथ ! वधीरल्पशरीरकम् । मम राज्येन नो कार्यं न च तातस्य सम्पदा ॥ ४६ ॥

१ यमस्य । २ जहि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वगोत्ररुधिरं ताव-द्राज्यलुब्धः कदर्थयन् । अधर्म्मकर्म्मपाकेभ्यः श्वपाकेभ्योऽतिरिच्यसे ॥ ४७ ॥
इति श्रुत्वा गिरां[1], मेघवाहनो वीरशेखरः । प्राविक्षत्काननस्यान्त-र्निष्कोशतं[2]रवारिभृत् ॥ ४८ ॥
क्षीरकण्ठं महीपीठे, लुण्ठितं मृतरङ्कवत् । विलोक्य भूपतेः पुत्रो बभूव करुणाद्दतः ॥ ४९ ॥
भिन्दानः करवालेन, वेताल इव बालकम् । नैष धत्ते[3] कथं लज्जां, निजदोर्वीर्यदुर्म्मदः ॥ ५० ॥
निगद्येत्यगदद्बालघातकं मेघवाहनः । अरे ! सज्जं कुरुष्वास्त्रं, स्मराभीष्टां कुलेश्वरीम् ॥ ५१ ॥
श्रुत्वेति तद्वचः क्रुद्धः, पातकी वातकीव सः । एवमूचे विस्वचीभिर्वाचाभिर्नृपनन्दनम् ॥ ५२ ॥
एतस्यायुःक्षये जातस्तव मृत्युरसंशयम् । व्यसने रजकस्यापि, रासभस्य यथा मृतिः ॥ ५३ ॥
मेघवाहनमुक्त्वाशु, चिक्षेपास्त्रं स बालभित् । बभूव तत्तदा मोघमन्यायिषु कुतो जयः ? ॥ ५४ ॥
करालकरवालेन, [4]महिषध्वजबन्धुना । भूपभूः फलवत्तस्य, क्षितौ मौलिमपीपतत् ॥ ५५ ॥
बन्धानथ स बालस्य, बिभेदाम्भोजनालवत् । [5]अन्वकम्पयदेनं तु, गिरा प्रेमतरङ्गया ॥ ५६ ॥
कस्त्वं कस्मादिहाऽऽयातः, कुतस्ते व्यसनागमः ? । कोऽयमेष ? कृतद्वेष इति ब्रूहि ममाग्रतः ॥ ५७ ॥
अथाभ्यधादसौ नाथ ! बङ्गदेशनिवेशनम् । पुरं मणिपुरं नाम, कुलधाम श्रियामिव ॥ ५८ ॥
तत्र प्रतापी भूपालो, नाम्ना समरकेसरी । विद्युद्गतिः प्रिया तस्य, विद्युद्विद्युद्वतो यथा ॥ ५९ ॥
रणे केसरिसोदर्यः, पितृव्यो मम सन्मते ! । अयं चित्रगतिर्नाम, विचित्राधमचेष्टितः ॥ ६० ॥

प्रथमः भवः
मेघवाहन-
वृत्तान्तः

१ गिरं सि० डे० । २ °तरु० क० सि० डे० । ३ °त्से० डे० । ४ यमराजसहोदरेण । ५ अनुकम्पामकरोत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रणकेसरिपुत्रोऽहं, नाम्ना कमललोचनः । राज्यभारं स्वयं धर्तुं, मां प्रहर्तुं प्रवर्तितः ॥ ६१ ॥
मद्धातकममुं ज्ञात्वा, मत्तातो नीतिवारिधिः । एकस्तम्भस्थितं चारु, महासौधमकारयत् ॥ ६२ ॥
तत्राहं स्थापितो देव ! धात्र्या विहितसन्निधिः । चतुर्दिक्षु भटैः कीर्णः, आकृष्टतरवारिभिः ॥ ६३ ॥
स्वसौधादेष दुष्टात्मा, सुरङ्गामागृहान्मम । प्रच्छन्नं कारयामास, राज्यार्थी कुरुते न किम् ? ॥ ६४ ॥
स्तम्भमुत्कीर्तयामास, घुणवत्क्रमशोऽखिलम् । तेन छिद्रेण यामिन्यामाकृष्टोऽहं प्रमीलितः ॥ ६५ ॥
अत्रानीत इमां घोरां, लम्भितो विषमां दशाम् । इतस्त्वम् तत्र भगवन् ! मद्भाग्यादाययाविह ॥ ६६ ॥
अथोचे भूपजो राज्य-लोभिनः किं न कुर्वते ? । मारयन्ति सुतं बालं, भ्रातरं निर्दयाशयाः ॥६७॥
यतः– "तावद् ज्ञानं कलास्तावत्तावत्कार्यविवेचनम् । यावल्लोभगजः स्वान्त-विन्ध्यशैले न खेलति " ॥६८॥
तात ! तृष्णातुरः कामं जलं पायय शीतलम् । एवमभ्यर्थितो मेघ-वाहनः क्षामया गिरा ॥ ६९ ॥
सप्तवत्सरदेशीय-ममुमादाय पाणिना । गिरिनिर्झरवारीणि, पाययामास धार्म्मिकः ॥ ७० ॥
तात ! क्षुधातुरो जात एवमुक्तो नृपात्मजः । ददौ वनफलश्रेणिं निशोध्य क्वापि दूरतः ॥ ७१ ॥
मार्गश्रान्तममुं मेघः स्कन्धपीठे चकार च । कदाचन कटीभागेऽङ्गुलीलग्नं कदाचन ॥ ७२ ॥
कोमले पादराजीवे, लग्नांस्तीक्ष्णाग्रकण्टकान् । कण्टकैरुद्धरन्नेषोऽ–क्षिपत्कर्णमलादिकम् ॥ ७३ ॥
तद्दुःखेन निजं दुःखं, विस्मृतं तस्य सर्वथा । विरलाः परदुःखेऽपि, जायन्ते हन्त दुःखिनः ॥ ७४ ॥
एतेन सार्द्धमुर्वीश-नन्दनस्तदनन्तरम् । बभ्राम पक्षमेवैकं, कान्तारे तत्र दुस्तरे ॥ ७५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतश्च समरो राजा, भ्रातरं स्वं च पुत्रकम् । अनेक्षमाणो दध्यौ मे, नन्दनस्तेन मारितः ॥ ७६ ॥
तस्याथ शुद्धये सर्वं, प्रेषितं भूभुजा बलम् । पुत्रापहारदुःखं हि, दुस्सहं नरकादपि ॥ ७७ ॥
तद्बलेन ततः प्राप्तः, ससुतो मेघवाहनः । प्रवेशितश्च सोत्साहं, पुरे मणिपुरे वरे ॥ ७८ ॥
मेघवाहनमुर्वीशः, परोपकृतिकर्म्मठम् । एवं तुष्टाव गुरुव-द्धानः करकुड्मलम् ॥ ७९ ॥
जगत्त्रयपवित्रेण, त्वच्चरित्रेण चारुणा । उत्तंसेनेव[1] मे कर्णौ, सकर्ण ! सुभगीकृतौ ॥ ८० ॥
नूनं विश्वोपकारैक-दीक्षितोऽसि दयानिधे ! । अन्यथा कथमेतस्य, सञ्जातो जीवितप्रदः ॥ ८१ ॥
ततः पद्माङ्गजां तेन, रणो राजा व्यवाहयत् । समा[2] द्वादश तत्राऽस्थात्, सौख्यभाग् मेघवाहनः ॥ ८२ ॥
जयकेसरिपादाना-मुक्तोऽथ स्वपुरं प्रति । श्वशुरादेशतोऽचालीद्भूपभूर्बलभूषितः ॥ ८३ ॥
(इतश्च) रणकेसरिसोदर्य-पुत्रेण गिरिवासिना । गच्छन् मेघबलं द्रव्य-बलेन किल भेदितम् ॥ ८४ ॥
मनसाऽपि दुष्प्रधर्षं, यद्वाचां च न गोचरम् । नोद्भटैः सुभटैः साध्यं द्रविणैर्गृह्यते हि तत् ॥ ८५ ॥
केनचिन्मन्त्रिपुत्रेण, तद्रहस्यं प्रकाशितम् । यत्क्रियतेऽपवरके, लोके तदपि कीर्त्यते ॥ ८६ ॥
ज्ञात्वेति स्वबलादेष, प्रियामादाय निर्गतः । समये समयज्ञस्यापक्रमोऽपि हि विक्रमः ॥ ८७ ॥
गच्छन्पथि तृषाक्रान्तां, पत्नीं मुक्त्वा तरोरधः । पयोगवेषणायासौ, बभ्रामाभ्रान्तमानसः ॥ ८८ ॥
गृहीत्वा सलिलं तस्मि-न्नायासीन्मेघवाहनः । नाद्राक्षीत्प्रेयसीं साक्षा-दुर्वशीप्रतिमामसौ ॥ ८९ ॥

प्रथमः भवः
मेघवाहन-वृत्तान्तः

१ कर्णाभूषणेन । २ वर्षाणि ।

For Private and Personal Use Only

हा! प्रिये! पद्मिनीपत्र-नेत्रे! पावनदर्शने!। कथमेकाकिनं मुक्त्वा, गता निष्ठुरमानसे! ॥ ९० ॥
केनापि ह्रियमाणेयं, किं न दृष्टा वनेश्वराः!। नाज्ञातं वः समस्त्युच्चै-रवधिज्ञानवैभवात् ॥ ९१ ॥
विलप्येति सुतो राज्ञः, श्रान्तः सुप्तस्तरोस्तले। निद्रां शिश्राय निद्रा हि, खेदच्छेदकरी सखी ॥ ९२ ॥
इतश्च नाहलैर्लोलैः कालरात्रिसुतैरिव। सुप्तोऽप्येष धृतो धीरो, निद्रितः किं करोति हि? ॥ ९३ ॥
बद्धो मयूरबन्धेन, गाढमेभिर्दुरात्मभिः। परहस्तगतानां स्यात्, किं न कष्टं शरीरिणाम्? ॥ ९४ ॥
हताजमहिषव्रात-रक्तालिप्तवितर्दिकम् । बद्धाभिः [ क्षुद्र ] घण्टाभिर्दश्यमानाभिरावृतम् ॥ ९५ ॥
अस्थिव्यूहकृतत्रासं, दह्यमानपलङ्कषम् । मार्यमाणलुलायोद्यन्नाशभग्नवरण्डकम् ॥ ९६ ॥
एकत्र लम्बमानोरुवराहपललाविलम् । एकत्र निहतद्वीपत्वचा-व्याकीर्णपादपम् ॥ ९७ ॥
निधानमिव भीतानां, पिधानमिव सम्मुदाम्। निरयस्येव सौदर्यं, यमक्रीडागृहोपमम् ॥ ९८ ॥
वेतालव्यालरूपाली-करालविपुलाङ्गणम् । स नीतश्चण्डिकावेश्म, तैरुद्दण्डक्रियोद्भटैः ॥ ९९ ॥
[ पञ्चभिः कुलकम् ]

प्रथमः भवः मेघवाहन-वृत्तान्तः

चण्डिकाप्राङ्गणे बद्धा-न्नवान्दीनाऽऽननान्नव । कृतान्तनगरोद्यान-सहायाताध्वगानिव ॥ १०० ॥
क्रन्दन्तो रुदतः कामं, स्मरन्तो गोत्रदेवताः। याचमानान्पयःपान-मद्राक्षीदेष पूरुषान् ॥१०१॥ [ युग्मम् ]
न्यूनपूरणताकारी, सम्पन्नोऽयं हहा! नरः । इत्यचिन्त्यत तै-र्बद्धैरमुं दृष्ट्वा नरोत्तमम् ॥ १०२ ॥

१ भिल्लैः । २ नोदितः क० सि० डे० । ३ वितर्दिका-वेदिका । ४ लुलायः-महिषः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतश्च नाहलाधीश - पत्नीं जातस्तनन्धयाम् । सखीजनोच्चार्यमाण - चण्डिकागीतमालिकाम् ॥ १०३ ॥
कणवीरप्रसूनौघ — पूर्णचङ्गेरिकागणाम् । सहानीताजकस्थूल - बर्करव्यग्रसेवकाम् ॥ १०४ ॥
गुणबद्धसहानीत - श्वानसन्दोहभीषणाम् । राक्षसीमिव दुष्प्रेक्ष्या - मपश्यन्मेघवाहनः ॥ १०५ ॥
[ त्रिभिर्विशेषकम् ]
इतश्च कश्चिदभ्येत्य, प्रोचेऽमुं मेघवाहनम् । मोचितोऽसि मम स्वामि-पत्न्या पुण्यमहोदधे ! ॥ १०६ ॥
इत्युक्त्वा बर्हिबन्धांस्तान्, कालपाशानिवायतान् । चिच्छेद स कुमारस्य, कुमारस्तमुवाच च ॥ १०७ ॥
बद्धोन्मुक्तस्त्वया चक्रे, यथाऽहं स्वामिशासनात् । तथा कुर्वेपि निःशेषान्, पङ्क्तिभेदे हि पातकम् ॥१०८॥ प्रथमः भवः मेघवाहन-वृत्तान्तः
हंहो भद्र ! मम स्वामि - पत्नी सामीप्यवर्तिनी । एका सुलोचना तस्या, आग्रहान्मोचितो ननु ॥१०९॥
निदेशादधिकं भद्र ! सेवको विदधाति न । आज्ञाभङ्गे हि नाथाना-मगदं मरणं किल ॥११०॥
अथ स्मित्वाऽवदन् मेघो, मा वादीः सुहृदीदृशम् । अवश्यमेकदा मृत्यु- र्भविष्यति यथा तथा ॥ १११ ॥
यद्यमीषां भवेन् मृत्यु-स्तदा सम्पद्यतां मम । एकमार्गप्रवृत्तानां, गतिरेकैव पान्थवत् ॥ ११२ ॥
एतद्विस्मयकृद्वाक्यं, श्रुत्वा नाहलपूरुषः । उवाच स्वामिनः स्वस्य, पुरतस्तत्सविस्तरम् ॥ ११३ ॥
अहो ! दयापरः कोऽपि, निराकाङ्क्षो वपुष्यपि । कृतत्राणपरप्राण-प्रयाणे क्षत्रियाग्रणीः ॥ ११४ ॥
सर्वेषामपि [1]लौलत्वं, भवेज्जीवितरक्षणे । लोकोत्तरश्चमत्कार-परः कोऽप्यस्य विक्रमः ॥ ११५ ॥

१ लोलुपता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रथमः भवः मेघवाहन-वृत्तान्तः

अथ पद्मा ऽवददेव ! ममायं प्राणवल्लभः । परोपकारनिष्णातः, सञ्ज्ञया मेघवाहनः ॥ ११६ ॥
तदाकर्ण्य पुलीन्द्रोऽपि, जामिं पद्मामुवाच च। गुरुः स्वसृपतिर्मेऽसौ, गत्वा सम्भावयाम्यमुम् ॥११७॥
तत्रैत्य प्रणिपत्यैनं, सोऽमुञ्चन्नवभिः समम् । किमेतदिति पप्रच्छ, पल्लीशं मेघवाहनः ॥ ११८ ॥
कस्मादमी नराः साधु–धर्म्मसंख्याः प्रमीलिताः। कस्माच्चण्डीपदाम्भोज–पूजाऽथ न्यगदच्च सः ॥११९॥
जामीश ! मम गेहिन्या, एवमौपायिकं कृतम् । यदि मे नन्दनो भावी, नयनानन्ददायकः ॥१२०॥
ततस्ते पुरतो देवि ! नृणां दशकमञ्जसा । हनिष्याम्यजवत् कामं, कृतपूजामहोत्सवम् ॥ १२१ ॥
[ युग्मम् ]
तस्मान्नृदशकं भद्र ! मीलितं पूजनोत्सवे । उपयाचितविघ्ने हि, भवेद्धातः स्तनन्धये ॥ १२२ ॥
इत्युदित्वा सपत्नीक–मम्मुं नीत्वा निजे गृहे । पूजयित्वा सुसाहाय्यं, प्रेषयामास पल्लिपः ॥ १२३ ॥
अथापृच्छदयं स्वच्छ–मानसो घनवाहनः। प्राणप्रियतमे ! पल्ल्यां, कथं त्वं समुपागता ? ॥ १२४ ॥
साऽप्यूचे बृहतीं वेलां, यावदस्थां वने प्रिय ! । तावन्नागाजवात् भाग्य–पूरे दूरे गते मम ॥ १२५ ॥
ततः शून्यमनाः स्वामिँ–स्तत्र चक्रप्रियोपमा। चक्रभ्रमेण भ्राम्यन्ती, स्थिताऽहं दिवसाऽष्टकम् ॥ १२६ ॥
नवमे दिवसे नाथ !, धृता नाहलपूरुषैः । अर्पिता स्वामिनः स्वस्यै-तस्य सन्मार्गगामिनः ॥ १२७ ॥
मां दृष्ट्वा नाहलस्वामी, नमश्चक्रे स्वजामिवत्। प्रायश्चोक्षेतराश्चोक्षा-द्विशिष्यन्ते क्रियाक्रमैः॥ १२८ ॥
अतः परं विजानासि, परन्तप ! ततः परम् । विधिरेव प्रगल्भोऽस्ति, वियोगघटनाकृते ॥ १२९ ॥



For Private and Personal Use Only

अथाविशन्नदीतीरं, सप्रियो घनवाहनः । इतश्च कूलिनीकूलम - कस्मादन्यपतत्तराम् ॥ १३० ॥
ततस्ताम्रमयं चारु - करण्डं पुण्यपिण्डवत् । पादयोः पुरतः प्राप्तम - पश्यन्मेघवाहनः ॥ १३१ ॥
तर्जयन्निव दारिद्र्यं, तत्कुच्छ्रादुदघाटयत् । नेपथ्यं[1] नु स्फुरत्कान्ति, दृष्टवान् सूर्यबिम्बवत् ॥ १३२ ॥
तदादाय पुरीमध्ये, मुक्त्वा चैत्ये क्वचित् प्रियाम् । नाडिन्धमा[2]ङ्कवीथीषु, गच्छति स्म नृपात्मजः ॥ १३३ ॥
स्वर्णकृता तदुद्वीक्ष्य, कुतो यूयं क्व वासिनः ? । इत्युक्ते प्राञ्जलत्वेन, जगाद वदतांवरः ॥ १३४ ॥
मेघवाहन इत्याख्यं, विद्धि मां स्वर्णकारक ! । त्वमाख्याहि पुनः साधो !, किं पुरं नृपतिश्च कः? ॥१३५॥
शृणु भद्र ! पुरं भद्र - सञ्ज्ञमेतन्मनोहरम् । तत्रासीज्जगदम्भोज - भानुर्भोजक्षमापतिः ॥ १३६ ॥
सूनुस्तस्य नृपो भीमः, काश्यपीं पाति साम्प्रतम् । न सेहे चौरनामापि, यः स्वप्नेऽपि परन्तपः ॥ १३७ ॥
इत्युक्त्वा च तलाध्यक्ष - मुपेत्याकथयच्च तम् । स्वर्णकारे न विश्वासो, विधेयो हन्त शिल्पिषु ॥१३८॥
अदृश्यदस्युवत्तेन, विधृतो घनवाहनः । सम्पदो विपदश्चाप्य - रघट्टीयघटीयिताः ॥ १३९ ॥
भोजनामाङ्कितं सर्वं, नेपथ्यं पृथिवीभुजः । अदर्शयत्तलाध्यक्षस्तं च स्तेयविधिप्रियम् ॥ १४० ॥
कौतस्कुतोऽसि किं नाम, कुतः प्राप्तमिदं त्वया ? । समीचीनं समाख्याहि, जीवितुं यदि वाञ्छसि ॥१४१॥
इत्युक्ते भूभुजा व्यक्तं, नाऽवादीदेष किञ्चन । महत्त्वेन महात्मानः, स्वचरित्रं गदन्ति न ॥१४२॥
अभाषिष्टतरां रुष्टस्तत्क्षणान्मण्डलेश्वरः । मौनी निगृह्यतामेष, मौनं रक्षेदसूँस्तव ॥ १४३ ॥

---

१ आभूषणादिकम् ।   २ नाडिन्धमः - सुवर्णकारः ।

नृपादेशादसौ क्षिप्त-स्तलाध्यक्षेण चारके। न भवेदन्यथाभावः, पूर्वोपार्जितकर्मणाम् ॥१४४॥
(यतः–) "यस्यां यस्यामवस्थायां, यद्यत्कर्म करोति यः। तस्यां तस्यामवस्थायां, तत्तत्फलमवाप्नुते" ॥१४५॥
ततः पद्मा चिरं तस्थौ, चैत्ये पत्युः समागमम्। आकाङ्क्षन्ती रुदत्युच्चैः, मूर्च्छन्ती विललाप च ॥१४६॥

इतो धनावहः श्रेष्ठी, तत्रागाद्देवपूजने। रुदतीं सुदतीं दृष्ट्वा–ऽवादीदस्मि पिता तव ॥ १४७ ॥
कथमेकाकिनी पुत्रि! कस्मादत्र समागता?। इति ब्रूहि ममाशेषं, भियं मुक्त्वा यथातथम् ॥ १४८ ॥
अथावोचत पद्माक्षी, पद्मा पद्मानना सती। मेघवाहनकान्ताऽहम्, रणभूपालनन्दिनी ॥ १४९ ॥
दैवाद्राज्यपरिभ्रष्टा, महाकष्टेन पूरिता। अभ्यागां कूलिनीकूलं, पत्या जनक! सम्प्रति ॥ १५० ॥
तटिनीतटतो भ्रष्टं, तदा रत्नसमुद्गकम्। अवाप वल्लभो मेघ-स्तद्विक्रेतुं परन्तपः ॥ १५१ ॥
गतस्य सुचिरः काल-स्तस्याभूत् करुणापर!। प्रायः स्वजनचेतांसि, रिष्टाऽऽशङ्कीनि सर्वदा ॥१५२॥
ततः सकरुणं श्रेष्ठी, न्यगदत् पुत्रि! साम्प्रतम्। जामाता मामको मेघ-वाहनः सुभटैर्धृतः ॥१५३॥
भोजराजाभिधानेनाङ्कितां रत्नावलीं, सुते!। विक्रीणन् दस्युवद्बद्धो नाशो भाव्यस्य किं भवेत्?॥१५४॥
अधृतिं मा कृथा वत्से! मोचयिष्यामि तं खलु। कोटिं दत्त्वापि हेम्नो हि, वित्तं दुःखापहारकृत् ॥१५५॥
आगच्छ स्वेच्छया तन्वि! मया साकं गृहे मम। सत्यप्येकाकिनी रामा, भवेद्वाच्येत दूषिता ॥१५६॥
एनां धनावहः श्रेष्ठी गृहे निन्ये विनीतधीः। स्वयं राजकुलं प्राप नार्त्तः कालमुपेक्षते ॥ १५७ ॥

इतश्च भूपतेः पुत्री, सोमा सोमानना ततः। उपोद्यानमभिप्राप, पुष्पधन्वनमस्यया ॥ १५८ ॥

प्रथमः भवः
मेघवाहन-वृत्तान्तः



For Private and Personal Use Only

योगिनीव मुक्तकेशा, गोमायुरिव फेत्करी । कालरात्रिरिवात्यन्तं, नृत्यति विकटैः पदैः ॥ १५९ ॥
यथा जातेव निर्मुक्तनेपथ्याम्बरदामिनी । अभूत् भूपसुता चेदृग्, सापायं किल जीवितम् ॥ १६० ॥
अभाषिष्ट जहासोच्चै-रनृत्यत् क्षणमात्रतः । क्षणात् शुष्वाप च जगौ, क्षणात्केलिं व्यधत्त च ॥ १६१ ॥
अनर्गला ददौ गाली-रचालीच्च यथातथा । एकाप्यनेकरूपाऽभून्मायाजालिकपङ्क्तिवत् ॥ १६२ ॥
नृशतैरपि दुर्ग्राह्या, दुर्भाष्या मान्त्रिकैरपि । दुर्धार्या मत्तमातङ्गै-रपि प्रोद्दण्डशुण्डिभिः ॥ १६३ ॥
[पञ्चभिः कुलकम्]

ईदृग्रूपां सुतां भूपः, स्वप्राणेभ्योऽपि वल्लभाम् । निरीक्ष्य शून्यचित्तोऽभूत्, दुःसहं दुःखमात्मजे ॥१६४॥
आहूता मान्त्रिकाः सर्वे, मन्त्रतन्त्राणि चक्रिरे । सम्पेदिरे वृथा तानि, दुर्जेया भवितव्यता ॥ १६५ ॥
यः कोऽप्येनां करोत्युच्चै-रुल्लाघामघवर्जितः[1] । स स्वीकरोतु राज्यार्द्ध-मेवं व्याहृतवान्नृपः ॥ १६६ ॥
तलाध्यक्षमुखादेतदश्रौषीन्मेघवाहनः । विद्यां सस्मार योगीन्द्र-प्रदत्तामपि मानसे ॥ १६७ ॥
कोकूयमानां खरवत्, वार्यमाणां जनैरपि । बध्यमानां सावधानैः सुदृढं कोशतन्तुभिः ॥ १६८ ॥
आनैषीत्तस्य विद्यैनां, चारके भूभुजा सह । अचिन्त्यवैभवं हन्त ! मन्त्रशक्तेर्विजृम्भितम् ॥१६९॥
बर्हिबन्धेन बध्नाति, सैनां वारिदवाहनः । आराटयत् कूटगिरा[2], ताड्यमानोष्ट्रिकामिव ॥ १७० ॥
अहं म्रिये म्रिये नाथ ! मुञ्च मुञ्च त्यज त्यज । कृपापर ! विजानीहि, त्वद्दासीमङ्कितामिव ॥ १७१ ॥

प्रथमः भवः मेघवाहन-वृत्तान्तः

१ रोगरहिताम् । २ उत्कटवाण्या ।



For Private and Personal Use Only

व्यन्तरीं भूचरीनाम्ना, नगरोद्यानवासिनीम् । चतुर्वक्त्रां चतुर्नेत्रां, विद्धि मां मठवाहिनीम्[1] ॥१७२॥
इयं तिष्ठेव निष्ठ्यूतं, ममोपरि दुरात्मिका । अतो हेतोर्मया मन्त्रिन्! सङ्गृहीता पुरो वने ॥ १७३ ॥
मान्त्रिकस्त्वादृशः स्फूर्ज-त्प्रभावो बुबुधे नहि। अतो मन्तुं क्षमस्वैकं, सन्तो यन्नतवत्सलाः ॥१७४॥
इत्युक्त्वा व्यन्तरी व्योम, विहायैनामगादथ । बलिभ्योऽपि बलीयांसो, विपुला विपुला यतः ॥१७५॥
अथोवाच महीपालः, कुमारं प्रति सादरम् । परोपकारधौरेय! मनोध्येयपराक्रम! ॥ १७६ ॥
अस्माभिः कृतमीदृक्षं, निर्मितं त्वयेदृशम् । ईदृग् लक्षणमेवाभू-दपकारोपकारयोः ॥ १७७ ॥
सुप्तोत्थितेव भूपाल-पुत्री चक्षुः क्षिपत्यथ । क्षेपीयो[3] दिक्षु संक्षोभाद-क्षुण्णमगदद्वचः ॥ १७८ ॥
तात! तात! कथं लोको, मिलितश्चारकौकसि?। कोऽयमेष कृतध्यानः, सावधानमनोऽम्बुजः॥ १७९ ॥
अथाभ्यधान्महीपालो, जातं तेऽङ्गमपाटवम् । अनेन ध्यानिनोल्लाघं, विदधे मन्त्रवैभवात् ॥ १८० ॥
अथ राजा निजावासे, गृहीत्वा घनवाहनम् । शुभे मुहूर्ते संवृत्ते पर्यणाययदङ्गजाम् ॥ १८१ ॥

इतः श्रेष्ठी धनो नाम, पद्मामादाय सव्रतः । अर्पयामास मेघस्य, पुण्यलक्ष्मीमिवाङ्गिनीम् ॥ १८२ ॥
अथ तस्य कृतज्ञोऽसौ, प्रसादं विदधे बुधः । नृपदत्तश्च राज्यार्द्धम्, बुभुजे च यथानयम् ॥ १८३ ॥
देवभूयं गते राज्ञि, मन्त्रिभिर्नयपारगैः । राज्ये प्राज्ये गतव्याजे, विन्यस्तो मेघवाहनः[2] ॥ १८४ ॥
भुञ्जानस्य महीपीठं, मेघवाहनभूभुजः । निमेषा इव हर्षेण, प्रययुः प्रचुराः समाः ॥ १८५ ॥

प्रथमः भवः
मेघवाहन-
वृत्तान्तः

---

१ °ट० डे० ।   २ धात्री ।   ३ अतिशीघ्रम् ।



For Private and Personal Use Only

अन्यदाऽऽस्थानमासीनो, मेघवाहनभूपतिः। एवं लोकप्रवादेन, श्रुतवानिदमद्भुतम् ॥ १८६ ॥
विपुलायां महापुर्यां, राजाऽऽभूज्जयकेसरी। मित्रसेना प्रिया तस्य, तत्सुतो मेघवाहनः ॥१८७॥
मन्त्रिणा जयसेनेन, योगीन्द्रो भैरवाभिधः। आनन्दितो महादानैः, सोऽप्यूचे कार्यमादिश ॥ १८८ ॥
एनं केनाप्युपायेन, भगवन्! घनवाहनम्। निष्काशय यथा मे स्यादाधिपत्यमखण्डितम् ॥ १८९ ॥
तेनावस्वापिनीं विद्यां, दत्त्वा रात्रौ महावने। विमुक्तः शयितो मेघ-वाहनो गतवाहनः ॥ १९० ॥
राजापि तद्वियोगेन, कालधर्म्ममुपागतः। जयसेनोऽभवद्राजा दुर्ज्ञेयं दुष्टचेष्टितम् ॥ १९१ ॥
जयसेननृपः सुप्तो, दष्टः फणभृता करे। गतासुः समभूत्स्वामिद्रोहिणां जीवितं कुतः? ॥ १९२ ॥
अथ प्रकृतिभिर्न्यस्तो, दौहित्रो भूपतेः पदे। ईदृशाः स्वपदे न्यस्याः, कुल्याभावे हि नापरे ॥१९३॥
प्रभूतैः प्राभृतैर्मेघ-वाहनः प्रीतिवाहनः। दौहित्रं नृपतिं प्रेम्णा, सचक्रे क्रमविद्वरः ॥ १९४ ॥
शिवकेतो! कुलकेतो! एवंरूपकथोऽस्म्यहम्। यन्मे संसारवैराग्यं, तत्सर्वं कथयिष्यते ॥ १९५ ॥
अन्येद्युर्गाथकीगेय-दत्तकर्णः सुहृद्वृतः। तुङ्गप्रासादमारूढः, साकं क्रीडन् पुरन्ध्रिभिः ॥ १९६ ॥
नभस्यभिनवाम्भोद-मम्भोभारभृतोदरम्। विद्युता हृद्यमद्राक्षं, कषपट्टमिवासितम् ॥ १९७ ॥ [युग्मम्]
अहो! चारुत्वमस्येति, ध्यायतो मम वायुना। सद्यो व्यघट्यताऽम्भोदो, मूर्खनिर्दिष्टमन्त्रवत् ॥ १९८ ॥
तं वीक्ष्याचिन्तयमहं, यथैष जलदः क्षणात्। दृष्टनष्टोऽभवत्सर्वं, तथाऽन्यदपि संसृतौ ॥ १९९ ॥
यथैष बिभिदेऽम्भोदः पवनेन तरस्विना। तथैव देहिनां देहो, रोगाभोगेन सर्वतः ॥ २०० ॥

प्रथमः भवः
मेघवाहन-वृत्तान्तः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अनित्यं सर्वमप्येतत्, पयःपूर्णाऽऽमकुम्भवत् । ममत्वमिति तत्रोच्चैस्तन्मोहस्य विजृम्भितम् ॥ २०१ ॥
पुत्रमित्रकलत्रेषु, याऽऽत्मीयमिति वासना । पित्तोद्रेकवतां सेयं, शङ्खादिषु सुवर्णधीः ॥ २०२ ॥
न दुःखैः खिद्यते प्राणी, न सुखैरपि तुष्यति । तस्मान्मुमुक्षुभिः किन्न, भूयते द्वन्द्वहारिभिः? ॥ २०३ ॥
य एव रूपान्नारीणां, कन्दर्पं तनुतेतराम् । स एव वार्द्धके प्राप्ते, कं दर्पं संविधास्यति ? ॥ २०४ ॥
य एव मन्द्रनादेन, भारतीवल्लकी यथा । स एव श्लेष्मणा हन्त !, भाषमाणोऽस्घट्टति ॥ २०५ ॥
यैरेव श्यामलैः स्निग्धैः, केशपाशैः प्रशस्यते । तैरेव तूलपूलप्र-स्पर्द्धिभिः परिभूयते ॥ २०६ ॥
य एव सुरभिद्रव्यैश्चलत्कर्पूरवृक्षति । स एव कुष्ठसम्भूत-व्रणगन्धैः शवायते ॥ २०७ ॥
चारित्रमोहनीये तु, क्षयोपशममीयुषि । इत्यादि ध्यायतः कामं, ममावधिरजायत ॥ २०८ ॥
सुतं महेन्द्रं सल्लग्ने, न्यस्य राज्ये ततः परम् । मुनिचन्दनपादान्ते – ऽगृह्णां तीर्थङ्करव्रतम् ॥ २०९ ॥
चन्दनमुनिना सार्कं, हृदयानन्ददायिना । विहरन् वसुधापीठ-मत्रागां बोधने तव ॥ २१० ॥
ततो दृष्टो मयानन्तः, संसारो विरसात्मकः । यस्मिंश्चक्रेतरां शश्वदेहिरेयाहिरेक्रिया ॥ २११ ॥
शिवकेतुरथोवाच, यौष्माकचरितश्रुतेः । संवेगरसभृङ्गार्या, व्यावृत्तो भववासतः ॥ २१२ ॥
साम्प्रतं प्रष्टुमिच्छामि, पितरौ तन्नियोगतः । गृहीष्यामि परिव्रज्यां, पित्रायत्ता हि सूनवः ॥ २१३ ॥
अथ गत्वान्तिके पित्रोः, शिवकेतुरवोचत । निर्वाणसाधनपटु-र्जिनधर्मो मया श्रुतः ॥ २१४ ॥
तमहं कर्तुमिच्छामि, युष्मदादेशतोऽधुना । भृकुटीभङ्गमाधाय, दम्पती वदतः स्म तौ ॥ २१५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अरे ! किं भाषसे मद्यमत्तवाक्योपमं वचः । नानुमन्यावहे, जैनं दर्शनं तत्त्वदर्शिनौ ॥ २१६ ॥
शिवकेतुरथ स्माह, जिनधर्मोऽस्ति निश्चितम् । यस्मिन् जीवदयातत्त्वं, कथ्यते क्रियतेऽन्वहम् ॥ २१७ ॥
आत्मनो दर्शने जीव-रक्षैव हि निगद्यते । परं न क्रियते जीव-हननाद्यज्ञकर्मणि ॥ २१८ ॥
विश्वभूतिरथोवाच, जिनधर्मोऽस्ति चेद्वरः । तथापि त्वां न मोक्ष्यामि, तद्व्रते तव सम्मते ॥ २१९ ॥
शिवकेतुरथ स्माह, भोक्तव्यं मे तदा खलु । यदा गृहीतचारित्रो, भविष्यामि द्विजाग्रणीः ! ॥ २२० ॥
ततो दिनद्वयं याव-दुपवासपरोऽजनि । मुखबन्धे हि कार्याणि, प्रायः सिद्ध्यन्ति नान्यथा ॥२२१॥
ततस्तृतीयदिवसे, मेघर्षौ विहृतेऽन्यतः । आगतौ भुवनतुङ्ग-सूरेस्तौ चरणान्तिके ॥ २२२ ॥
ऊचे सूरिर्दयाधर्म-स्तं विना विफलं परम् । विहाय लोचने सर्व-मङ्गोपाङ्गं हि पङ्गुवत् ॥ २२३ ॥
जटी मुण्डी तपस्वी च, वल्कली सुतपा अपि । शोभते न दयां मुक्त्वा, जलहीनं यथा सरः ॥ २२४ ॥
श्रुत्वेति विश्वभूतिश्चामंस्तामुष्य गुरोर्वचः । इतः शिवोऽपि तत्राऽऽगात्, गुरुपादनमस्यया ॥ २२५ ॥
विश्वभूतिरुवाचेदं ममायं नन्दनो गुरो ! । भवद्व्रतं विधाय्यस्ति, मेघवाहनबोधितः ॥ २२६ ॥
परतन्त्रः परं देव ! राज्ञोऽहं मणिमालिनः । तमापृच्छ्य सुतं सम्यक्, कारयिष्यामि सद्व्रतम् ॥ २२७ ॥
अथोवाच गुरुर्भद्र ! प्रमादी भव मा क्वचित् । द्वाविंशतिर्दिनान्यस्य, स्थितिरस्तीति चिन्तय ॥ २२८ ॥
अथोवाच द्विजो हृष्टः, प्रत्ययः कोऽत्र सद्गुरो ! । अथो सूरिरुवाचेदमुपराजं गतस्य ते ॥ २२९ ॥
लेखः सेनापतेरस्य, आगन्ता विजयाङ्कितः । तत्तुष्टिदाने राडस्मै, लक्षमेकं प्रदास्यति ॥ २३० ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ततो गत्वा गुरुं नत्वा, राज्ञस्तद्वृत्तमाख्यत । इतः सेनापतेर्लेखपाणिः पुरुष आययौ ॥ २३१ ॥
स्वरूपं तस्य विज्ञाय, लक्षमेकं ददौ नृपः । द्विजस्वान्ते चमत्कारो, नितरामजनि स्फुटः ॥ २३२ ॥
राजापि सत्वरं सूरेः, पार्श्वेऽगात्सपरिच्छदः । ऊचे चामुं गुरो! शैक्षं, कुरु कृत्वा व्यवस्थितिम् ॥ २३३ ॥
ऊचे सूरिरथ ब्रूत, व्यवस्थां क्षितिवल्लभ! । ऊचेऽसौ यावदेषोऽत्र, चारित्री प्राणिति स्फुटम् ॥ २३४ ॥
तावत्पूज्यैर्न गन्तव्यं, स्थातव्यमिह सुस्थिरैः । शिवोपकारवृद्ध्यर्थ-मामेत्यूचे मुनीश्वरः ॥ २३५ ॥
शिवकेतुः प्रवव्राजा-नुज्ञातो मणिमालिना । चक्रे च त्रिविधाहार-परिहारं यथाविधि ॥ २३६ ॥
महर्षीणां चरित्रेषु, क्षामणासु च पाप्मनाम् । सूरिणा कीर्त्यमानासु, शिवकेतुर्महातपाः ॥ २३७ ॥
विशुद्धीभूतचेतस्को, द्वाविंशतितमे दिने । परमेष्ठिनमस्कारं, ध्यायन्निधनमभ्यगात् ॥ २३८ ॥ युग्मम् ॥
ऊर्ध्वदेहिककृत्यानि, चक्रे साधोः क्षितीश्वरः । क्रमाद्विगतशोकोऽभूदुपदेशान्मुनीशितुः ॥ २३९ ॥
महीशो विश्वभूतिश्च, प्रपन्नश्रावकव्रतौ । जग्मतुः प्रथमं कल्प-मनल्पत्रिदशालयम् ॥ २४० ॥

इति प्रथमो भवः ।



ततश्च शिवजीवोऽपि, कल्पे सौधर्मशासिते । विमाने च द्रुमावर्ते, सिद्धायतनसुन्दरे ॥ २४१ ॥
अनेककिङ्किणीक्वाण-शब्दिताम्बरमण्डपे । गुरुण्यसावुपपाद-शय्यायां समजायत ॥२४२॥ [युग्मम्]
अन्तर्मुहूर्तनिष्पन्नः सम्पन्नोऽवधिबन्धुरः । अचिन्त्यशक्तिविस्फूर्तिः, सर्वाङ्गीणविभूषणः ॥ २४३ ॥
अणिमादिगुणैर्मूर्तैः, पुण्यैरिव विभूषितः । कामरूपी सुसंस्थानो, विमुक्तः सप्तधातुभिः ॥ २४४ ॥



For Private and Personal Use Only

वज्रकायः स्फुरत्कान्तिः, कमनीयोऽपनीय सः । देवदूष्यं विमानं स्व-मुपविष्टो मुदैक्षत ॥ २४५ ॥
[ त्रिभिर्विशेषकम् ]
इतो मङ्गलतूर्याणां, नादैर्जयजयैरिव । तद्विमानं जगर्जाशु, किन्न स्यात् स्वामिसङ्गमे ॥ २४६ ॥
किमेतदिति सम्भ्रान्तं, तं वीक्ष्य त्रिदशोत्तमम् । एवं विज्ञपयामासुर्देव्यः प्रमदमेदुराः ॥ २४७ ॥
प्रभोर्जय जगद्भद्र ! जगद्रक्ष ! चिरं जय । अजितं विजयस्वोच्चैर्जितं पालय पालय ॥ २४८ ॥
स्वामिन् ! सौधर्मकल्पोऽयमनल्पसुरसद्मभाक् । अस्मिन्नाम्ना द्रुमावर्तं, विमानमिदमुत्तमम् ॥ २४९ ॥
त्वत्सभाभूषणं चैते देवाः सेवाविधायिनः । अमूनि देवरत्नानि, निरीक्ष्यन्तां त्वया प्रभो ! ॥ २५० ॥
सिद्धायतनमेतच्च, सुधर्मेयं सभोत्तमा । इदं मज्जनवेश्मालङ्कुरुष्व त्रिदशाग्रणीः ! ॥ २५१ ॥
ततो दत्तोपयोगोऽसा-वत्रधिज्ञानवैभवात् । दिवेव ह्यस्तनं जन्म, स्मरति स्म पुरातनम् ॥ २५२ ॥
शिवकेतुरहं साधु-र्जिनधर्मे कृतोद्यमः । श्रामण्यस्य प्रभावेणाऽऽदिमं कल्पं समासदम् ॥ २५३ ॥
एवं स्मृत्वा समुत्थाय, गत्वाऽसौ मज्जनौकसि । स्फूर्जज्जयजयाऽऽरावं, सिंहासनमथाऽऽसदत् ॥ २५४ ॥
अथाभ्यषिच्यत स्वर्ण-कुम्भाम्भोभिः सुगन्धिभिः । तालतन्त्रीततोद्दामं, स गन्धर्वैरगीयत ॥ २५५ ॥
देवदूष्ये ततो रम्ये, परिधाय स वाससी । अङ्गरागं न्यधादङ्गे, क्रमशो भूषणानि च ॥ २५६ ॥
व्यवसायसभां प्राप्या-वाचयत् पुस्तकं ततः । स्वयं पुष्पाद्यमादाय, सिद्धागारार्हतोऽनमत् ॥ २५७ ॥
अथ श्वेतातपत्रेण, भ्राजिष्णुः सेवितः सुरैः । अगात्सुधर्मामास्थानीं, नानारत्नविनिर्मिताम् ॥ २५८ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नानविधाभिः क्रीडाभि-र्नानानाट्यविलोकनैः । एवं देवश्रियं रम्यां, भुञ्जानः शिवनाकसत् ॥२५९॥
अन्येद्युः सुहृदा साकं, द्वीपे नन्दीश्वरेऽगमत् । धर्मकार्येषु देवा हि त्वरन्ते दर्शनप्रियाः ॥२६०॥
[ युग्मम् ]
शिवस्य सुहृदा देव-प्रतिमायाः करस्थितम् । जगृहे परिपाकेणा-तीवरम्यं फलं महत् ॥ २६१ ॥
शिवकेतुसुरोऽवादीद्, भृकुटीभङ्गभीषणः । कथमेतत् त्वया मूढ !, गृह्यते देवतार्पितम् ॥ २६२ ॥
तस्य प्रबोधमाधातुं, शिवकेतुर्महासुरः । केवलज्ञानिनं धर्म-शेखरं मुनिमानमत् ॥ २६३ ॥
उवाच केवली भद्र ! यः स्तोकं देवताधनम् । गृह्णाति हन्त भुङ्क्ते च, तस्य स्याद्दुर्गतिस्थितिः ॥ २६४ ॥
स्तोकचैत्यधनेन स्या-दपारो भवसागरः । भवे भवे च दारिद्र्यं, संकाशस्येव जायते ॥ २६५ ॥
तथाहि भरतक्षेत्रे, नगरी गन्धिलावती । सङ्काशः काशसङ्काश-यशस्वी तत्र भावुकः ॥ २६६ ॥
त्रिसन्ध्यं पूजयामास, जिनेशप्रतिमां त्रिधा । षडावश्यककर्म्माणि, यश्चकार तपःपरः ॥ २६७ ॥
तत्र शक्रावताराख्यं, चैत्यं शैत्यकरं दृशाम् । प्रसिद्धं सिद्धायतनं, देवलोकादिव च्युतम् ॥ २६८ ॥
तत्राऽऽर्हतजनो नन्तु-मेति स्म प्रतिवासरम् । अक्षताद्यैर्धनं प्राज्यं, तस्मिन्नुत्पद्यतेतराम् ॥ २६९ ॥
संकाशस्तत्र सोऽर्थार्थि, चकार परमाशयः । अवर्द्धयद्धनं जैनं, सकलं च कलान्तरैः ॥ २७० ॥
स्वयमेव चकारोच्चै-र्लेख्यकानि निरन्तरम् । विश्वासात् श्रावकास्त्वन्ये, वार्तामपि न कुर्वते ॥ २७१ ॥

द्वितीयो भवः संकाशकथानकम्



१ शिवनामा देवः ।

For Private and Personal Use Only

इत्थं गच्छति काले च, दुष्कृतोदयसङ्गमात् । धनं चैत्यस्य तेनापि, बुभुजे निजवित्तवत् ॥ २७२ ॥
तावत्कलाकलापज्ञस्तावद्धर्म्मपरायणः । तावच्चैत्यधनत्यागी, यावन्न स्याद्विगोष्टिकः ॥ २७३ ॥
मुहुराकुश्यमाणोऽपि, गालीभिः श्रावकैः किल । नानुतापमसौ चक्रे लुब्धो हि सहतेऽखिलम् ॥२७४॥
राजाज्ञाविधृतोऽप्येष, लङ्घनं विदधेतराम् । न पुनर्भक्षितं देव-द्रव्यमर्प्पयति स्फुटम् ॥ २७५ ॥
न च गर्हां चकारैष, न तद्दातुं मनो व्यधात् । सङ्काशोऽजनि निःशङ्को, हि लोभः कर्मबन्धकृत् ॥२७६॥
तद्बोधयितुमायातै-र्भूरिभिर्गणभृद्वरैः । अन्वशिक्ष्यत सिद्धान्त-वचनैः पेशलैरिति ॥ २७७ ॥
भोक्ता चैत्यधनस्यो-च्चैर्गन्ता दुर्गतिपत्तने । वृद्धिकृच्चैत्यवित्तस्य, निर्वाणपदजाङ्घिकः ॥ २७८ ॥
चैत्यवित्तविनाशेन, साध्व्या अभिगमेन च । कृतेन मुनिघातेन, बोधिलाभः सुदुर्लभः ॥ २७९ ॥
इति शिक्षां वृथा कृत्वा, बद्धा दुष्कर्म्म भूरिशः । मृत्वा सङ्ख्यातिकान् जन्म-पुञ्जान् बभ्राम दुर्गतौ ॥२८०॥
(तथाहि—) नरकेऽसौ समुत्पन्नो, लघुद्वारघटीतटे । परमाधार्मिकैर्वङ्ग-शलाकावदकृष्यत ॥ २८१ ॥
कदाचिदेष यन्त्रेषु तिलेक्षुवदपीड्यत । रजकेनेव वसनं, प्रास्फाल्यत शिलातले ॥ २८२ ॥
वह्निज्वालाकरालेऽसौ रथे लोहमयेऽनिशम् । स्फुलिङ्गवालुकामार्गे, योजयित्वाप्यवाह्यत ॥ २८३ ॥
अकार्यत प्रतप्तायाः कामिन्याः परिरम्भणम् । भटित्र्यक्रियत ज्वाला-मालासु पशुमांसवत् ॥ २८४ ॥
तिर्यक्ष्वेष समुत्पन्नः, कर्णपुच्छादिभेदनम् । सहते स्म कसाघात-बन्धने दमनाङ्कने ॥ २८५ ॥

द्वितीयो भवः सङ्काशकथानकम्

१ श्रावकः । २ रङ्गशलाकावत् । ३ 'भडथो' इति भाषायाम् ।

नरजन्मनि सञ्जातो, मूकत्वं श्रवणच्छिदाम् । कारागारप्रवेशं च, लभते स भवे भवे ॥ २८६ ॥
आभियोगिकदेवत्वे, स्वल्पर्द्धिः परदास्यभृत् । ताडितः पविनेन्द्रेण, परदारापहारतः ॥ २८७ ॥
एवं चतुर्गतिगतो, दुःखान्यनुभवन्नसौ । नगर्यां नगराख्यायामि-भ्यपुत्रतयाऽजनि ॥ २८८ ॥
तत्कर्मांशस्य दोषेण, निर्वित्तोऽजनि तत्पिता । पित्रोर्लक्ष्मीरलक्ष्मी स्यात्, प्रायोऽपत्यप्रभावतः ॥२८९॥
शैशवेऽस्य मृता माता, विच्छिन्ना ज्ञातयोऽखिलाः । एकाकी समभूत्पापी, निर्भाग्याणां शिरोमणिः ॥२९०॥
चकार नीचकर्म्माणि, परोच्छिष्टं जघास च । सुष्वाप शून्यगेहेषु, ममार्जेभ्याङ्गणानि च ॥ २९१ ॥
अमुष्य भवति स्नानम्, घनवृष्ट्या गिरेरिव । अमुष्य जातमात्रस्या-भ्यङ्गोऽभूज्जन्मवासरे ॥ २९२ ॥
रथ्यापतितवासांसि, नित्यं परिदधेऽसकौ । अबध्नात् केशपाशेषु, न पुष्पं[1] नेत्रयोः परम् ॥ २९३ ॥
ततः स दध्यौ खिन्नात्मा, यन्नात्मम्भरिरप्यहम् । धन्यास्ते पुण्यभाजस्ते, ये कुक्षिम्भरयो नृणाम् ॥२९४॥
(यदूचे —) बन्धनस्थोऽपि मातङ्गः, सहस्रभरणक्षमः । काकः स्वच्छन्दचारोऽपि, स्वोदरेणापि दुःखितः ॥२९५॥
तस्यैवं निन्द्यमानस्या-भूवन् रोगपरम्पराः । दुर्बलायां वृतौ[2] छिद्रम्, कर्तुं को नाम न क्षमः ॥२९६॥
अन्येद्युः केवलज्ञानी, कोऽपि तत्रागमन्मुनिः । तं वन्दितुमगुः पौराः, कः सेवेत न रोहणम् ॥ २९७ ॥
सोऽपि दारिद्र्यमुद्रावान्, सज्ज्ञानमिव मूर्तिमत् । नत्वा मुनिमुवाचाथ, प्रभो ! मे पातकं वद ॥ २९८ ॥
इभ्यपुत्रोऽपि निःस्वोऽहं कर्मणा येन कारितः । तदहं प्रष्टुमिच्छामि, यूयं सर्वविशारदाः ॥ २९९ ॥



---

१ 'फुलु' इति भाषायाम् । २ 'वाडमां' इति भाषायाम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः सविस्तरं तत्र, भगवान्पर्षदि स्थितः । उवाच गन्धिलावत्यां, सङ्काशस्त्वमुपासकः ॥ ३०० ॥
विज्ञातजिनधर्मोऽपि, देववित्तस्य भक्षणात् । ईदृग्विपाकस्तदभू-चतुर्गतिगतस्य ते ॥ ३०१ ॥
तन्निशम्यैष संवेग-रसस्नपितमानसः । आरेभे निन्दितुं काम-मात्मनो दुष्कृतं कृतम् ॥ ३०२ ॥
हा ! मया देववित्तानि, भक्षितानि कुबुद्धिना । तैरहं पातकाजीर्णे, पातितोऽस्मि सविस्तरम् ॥ ३०३ ॥
प्रभो ! प्रसादमाधाय, पापाजीर्णच्छिदे वरम् । देहि धर्मोपदेशाख्य - मौक्तिकं किञ्चनोत्कटम् ॥ ३०४ ॥
ततो जगाद भगवान्, यथासम्पत्ति सर्वदा । चैत्येषु योजयस्व स्वं, तथेति च जगाद सः ॥ ३०५ ॥
यदैव जगृहेऽनेना-भिग्रहः कर्मबन्धनैः । तदैवात्रुट्यत क्रूरैः, क्वाशुभं साधुसन्निधौ ? ॥ ३०६ ॥
अथ वित्तस्य सम्पत्ति-स्तस्याभूत् क्रमशो बहुः । विशेषेणार्हते चैत्येऽयोजयद्धनमात्मनः ॥ ३०७ ॥
यथा यथा स सङ्काश-जीवो वित्तव्ययं व्यधात् । तथा तथा स्पर्द्धयेव, शश्वल्लक्ष्मीर्व्यवर्द्धत ॥ ३०८ ॥
देवपूजारतो नित्यं, कारयित्वा जिनार्चनाः । स विशोध्य मलं सर्वं, क्रमात्रिदिवमासदत् ॥ ३०९ ॥
सङ्काशस्य कथामेनां, श्रुत्वा केवलिनोदिताम् । शिवकेतुसुहृदेव उवाचाऽऽनम्य सन्मुनिम् ॥ ३१० ॥
निवृत्तो देववित्तेभ्यो, बिडालेभ्य इवाखुकः । देवकीयमिदं मुक्तं, परिपाककलं फलम् ॥ ३११ ॥
शिवकेतुसुरोऽस्माकं, मित्रं येन मम ध्रुवम् । त्वत्तो विधापितो बोधो-ऽपरथा दुर्गतौ गतिः ॥ ३१२ ॥
सङ्काशस्य कथावृत्तम्, स्मरन्तौ तत्त्वरङ्गितौ । अथ तौ मुनिमानम्य, जग्मतुस्त्रिदशालयम् ॥ ३१३ ॥
कुर्वन्नन्दीश्वरे यात्रां, जिनभक्तितरङ्गितः । पञ्चपल्योपमान्येष, निजायुः पर्यपूरयत् ॥ ३१४ ॥

इति द्वितीयो भवः ।

द्वितीयो भवः
सङ्काशकथा-
नकम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इह पूर्वविदेहेषु, विजयः पुष्कलावती । तत्र विश्वपुरं नाम, पुरं भूतिमनोहरम् ॥ ३१५ ॥
विश्वकान्तो नृपस्तत्र, विश्वारातियशोहरः । विश्वकान्ता प्रियाऽमुष्य, विश्वे ख्यातिमती भृशम् ॥ ३१६ ॥
तयोर्वैषयिकं सौख्यं, विविधं सेवमानयोः । अगान्निष्पुत्रयोः कालः, कियानपि कलाविदोः ॥ ३१७ ॥
विश्वकान्ताऽन्यदा देवी, चिन्ताचान्ता सुतार्थिनी । आगात्कुबेरदत्तस्य, यक्षस्य रुचिराश्रये ॥३१८॥
पूजयित्वा जगादेदं, यदि मे भविता सुतः । तदा ते नाम दास्येऽहं, यात्रां कर्तास्मि पुष्कलाम् ॥३१९॥
उपयाचितमेतत्सा, कृत्वाऽगान्निजमन्दिरम् । देवी स्वरोदये स्वप्ने, यक्षमैक्षत पूजितम् ॥ ३२० ॥
तं दृष्ट्वा प्रतिबुद्ध्याथ, विश्वकान्तस्य भूभुजः । सा स्वप्नं कथयामास, प्रमोदोत्फुल्ललोचना ॥ ३२१ ॥
भूमिनाथोऽवदद् भद्रे!, तत्ते सूनुर्भविष्यति । साऽबध्नात् शकुनग्रन्थिम्, मङ्गल्यात् को न हृष्यति ॥ ३२२ ॥ तृतीयो भवः
शिवकेतुसुरश्च्युत्वा, तस्याः कुक्षाववातरत् । उत्पेदे स सुतत्वेन, शुभसम्पूर्णदोहदः ॥ ३२३ ॥
भूमिपतिः कुबेरस्य, यक्षस्यार्चां न्यधात्तराम् । यात्राश्च महतीं चक्रे, सिद्धेऽर्थे को विलम्बते? ॥३२४॥
नाम स्वप्नानुसारेण, कुबेरदत्त इत्यभूत् । वर्धमानः क्रमादेष, यौवनं समुपागमत् ॥ ३२५ ॥
कन्यकानां शतं राजा, पर्यणाययदङ्गजम् । स भोगान् बुभुजे तेन, पुमर्थत्रयबन्धुरः ॥ ३२६ ॥
जैने गृहे ययावेष, पूर्वाभ्यासवशादिव । अन्येनाभण्यमानोऽपि, संस्कारात् पूर्वसम्भवात् ॥ ३२७ ॥ 
यौवराज्यपदे राज्ञा, विन्यस्तः शुभवासरे । मङ्गलपुरदेशोऽस्मै, ददे नन्दनभुक्तये ॥ ३२८ ॥
सुबुद्धेर्नन्दनो बुद्धि-धनो नाम्ना सुमन्त्रिराट् । मुमुचे देशरक्षायै, स्वयं राजान्तिकस्थितः ॥ ३२९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्येद्युः सीमभूमीश-प्रेषितं वाजिपुङ्गवम् । महावेगपरीक्षाया-यध्याशिष्ट नृपात्मजः ॥ ३३० ॥
चित्रन्यस्त इवात्यन्तं, स्तम्भितो मान्त्रिकैरिव । तस्थौ निश्चलसर्वाङ्ग-श्चर्मयष्टिहतोऽप्यलम् ॥ ३३१ ॥
दयां विना यथा धर्मो, यथा चन्द्रं विना निशा । तथा वेगं विना वाजी, राजार्हो जायते न हि ॥ ३३२ ॥
मत्वेदं हृदि यावत्स, उत्तितीर्षुर्नृपाङ्गजः । तावच्चचाल वेगेना-कृष्टवल्गस्तुरङ्गमः ॥ ३३३ ॥
सरिद्ग्रामगिरीन् वेगा-न्नभस्वानिव लङ्घयन् । अभ्यगात्काननं किञ्चि-देष भीमं यमास्यवत् ॥ ३३४ ॥
रश्मिर्मुक्ता करक्रोडात्, खिन्नाङ्गेन कथञ्चन । आदिष्ट इव केनापि, तथा तस्थौ तुरङ्गमः ॥ ३३५ ॥
कुबेरदत्तः खिन्नाङ्गः, उत्ततार तुरङ्गमात् । क्षणात्सौख्यं क्षणादुःखं जायते भववर्तिनाम् ॥३३६॥
दर्शं दूतीमिव प्रेष्य, पुरस्ताद् वनसम्पदम् । वीक्ष्यमाणः कुमारः स, वनमध्यं विवेश च ॥ ३३७ ॥
वनलक्ष्मीः कुमारस्य, मौलौ पुष्पाणि पञ्चधा । प्रसरत्तरुशाखाग्रै-र्निचिक्षेप करैरिव ॥ ३३८ ॥
अथ काञ्चित्तरुच्छायां, प्राप्याऽस्वापीन्नृपात्मजः । श्रमार्त्तानां हि जन्तूनां,
विना निद्रां कुतः सुखम्? ॥ ३३९ ॥
निद्राविराममासाद्य, कुमारस्तरुपल्लवान् । नानाविधान्निरैक्षिष्ट, बहुस्पृक् छेकदग्यतः ॥ ३४० ॥
ततो भ्राम्यन् सरस्तीरं, नलिनीवनभासुरम् । नभः सिश्वदिवादित्य-तप्तं कल्लोलपाणिभिः ॥ ३४१ ॥
पुण्डरीकवरच्छाया-राजमानैर्मृदुस्वरैः । राजहंसैर्निरुद्धान्तं, राजागारमिवोच्चकैः ॥ ३४२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रेक्ष्य तत्र पयः पीत्वा, श्रममुत्सृज्य मार्गजम् । आरुरोह सरःपालीं, द्रुमालिपर्यलङ्कृताम् ॥ ३४३ ॥
[ त्रिभिर्विशेषकम् ]
तत्र चारित्रपूताङ्गं, कायोत्सर्गमुपागतम् । कुबेरदत्तो निर्ग्रन्थ-वरं मुनिमलोकत ॥ ३४४ ॥
निर्माणुषे वनेऽमुष्मिन्, कथमेष महातपाः ? । अथवा नगराराम-विभागोऽमूदृशां न हि ॥ ३४५ ॥
ध्यात्वेति गत्वा निर्ग्रन्थ-पदपद्ममवन्दत । मुनेः सम्वाहयन्नङ्गी, स पुरस्तादुपाविशत् ॥ ३४६ ॥
इतश्च वारुणीसङ्गात्, पश्चिमाचलशृङ्गतः । अचेतन इवाम्भोधौ, न्यपतत्पद्मिनीपतिः ॥ ३४७ ॥
रक्ताम्बरपरिधानं, कुरुते पश्चिमाङ्गना । प्रिये लोकान्तरं याते, रुदती पक्षिणां रुतैः ॥ ३४८ ॥
केशप्राग्भारवत् कृष्णो-ऽन्धकारः प्रससार च । रुदत्याः पूर्वकामिन्या, गते रुचिपतौ ततः ॥ ३४९ ॥
लिप्तं नीलीरसेनेव, भूयसा तमसा जगत् । उदये मलिनानां हि, निर्मलत्वं कुतो भवेत् ? ॥ ३५० ॥
ततो ध्यानं विमुच्याऽसौ, धर्मलाभाशिषं ददौ । अमुष्य राजपुत्रस्या-शीर्वादो [१]लिङ्गिनां धनम् ॥ ३५१ ॥
मुने ! तव मुखं रम्यं, न पश्यामि तमस्ततौ । न दीपिका ममाभ्यर्णे, रत्नं किञ्चन न स्फुटम् ॥ ३५२ ॥
इत्युक्तेऽथ कुमारेण, मुनिर्भावविवृद्धये । स्वनिष्ठ्यूतेन पाण्यग्र-मलिम्पत महातपाः ॥ ३५३ ॥
तेनार्कस्फुटितेनेव, विद्योतोऽजनि सर्वतः । ददर्शाऽसौ मुखं तस्य, स्मेरकैरविणीसमम् ॥ ३५४ ॥
प्रभो ! कथं महारण्ये, स्थितवानसि सोऽब्रवत् । भावि नं प्रतिबोधं ते, विज्ञायाहमिहागमम् ॥ ३५५ ॥

---

१ साधूनाम् ।





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मित्रमस्मि महाभाग ! शिवकेतुसुरस्य ते । देववित्तापहारोऽहं, बोधितो मुनिसङ्गमात् ॥ ३५६ ॥
ततश्च्युत्वा विदेहेषु, राजपुत्रः कुमारिलः । अभूवं क्रमशः प्रापं, दीक्षां सर्वज्ञभाषिताम् ॥ ३५७ ॥
तुर्यं मे ज्ञानमुत्पेदे, मनःपर्यायसञ्ज्ञकम् । येन गर्भजजीवानां, जाने चेतांसि सर्वतः ॥ ३५८ ॥
तत्प्रभावागमो मेऽत्र, ज्ञात्वा त्वां तुरगाहृतम् । भाविनं भरतक्षेत्रे, तीर्थेशं सुव्रताभिधम् ॥ ३५९ ॥
कुबेरदत्त ऊचेऽथ, यदि मे बोधिदायकः । तदाऽऽदिश जिनोपज्ञं, धर्म्मं मोक्षाध्वदर्शकम् ॥ ३६० ॥
ततः सम्यक्त्वपूर्वाणि, व्रतानि द्वादशावदत् । स सम्यगग्रहीद् भक्त्या, भावः पात्रेषु वर्द्धते ॥ ३६१ ॥
प्रभो ! परार्थप्रगुणा, ये भवन्ति भवादृशाः । तेषां कथानकं ब्रूत, सतां पापहरा कथा ॥ ३६२ ॥ तृतीयो भवः
अथ तत्त्वपयोधीन्दु-र्मुनिर्मानविमर्दनः । ऊचे भूमिपतेः पुत्र ! त्वं युक्तं पृष्टवानसि ॥ ३६३ ॥
(यतः–) छायाया न कथा वृथा च कुसुमस्तोमः कथा नोन्नतेः, शाखाश्रीर्न च तादृशी फलभरभ्राजिष्णुता दूरतः ॥
निर्गुण्डीति विवेश विघ्नविहतौ वैश्वानरं सादरम्, कर्तव्यो ह्युपकार एव जगतां दग्ध्वापि देहं निजम् ॥३६४॥
निष्पेषोऽस्थिचयस्य दुःसहतरः प्राप्तस्तुलारोहणम्, ग्राम्यस्त्रीनखलुञ्चनव्यतिकरस्तन्त्रीप्रहारव्यथा ॥
मातङ्गोक्षितमण्डवारिकणिकापानं च कूर्चाहतिः, कार्पासेन परार्थसाधनविधौ किं किं च नाङ्गीकृतम् ? ॥३६५॥
परार्थप्राणने येषां, मतिः स्फुरति मानसे । ते श्रियो भाजनं भव्या, अभयङ्करचक्रिवत् ॥ ३६६ ॥ अभयङ्कर-कथानकम्
(तथाहि–) विदेहेष्वपरेष्वस्ति, विजया पुष्कलावती । सम्पदामास्पदं तत्र, नगरी पुण्डरीकिणी ॥३६७॥
तत्र क्षेमङ्करः क्षेम-ङ्करः प्रणयिनां नृपः । महिष्यमरसेनेति, जज्ञे तस्य पतिव्रता ॥ ३६८ ॥

For Private and Personal Use Only

चतुर्दशमहास्वप्न-सूचितं नृपतिप्रिया । असूत सुतरत्नं सा विभवं राजनीतिवत् ॥ ३६९ ॥
अभयङ्कर इत्यस्य, नाम पित्रा विनिर्मितम् । क्रमाच्च यौवनं प्राप, मीनकेतुमहावनम् ॥ ३७० ॥
सुमना एष निद्रान्ते, भीमकाननमध्यगम् । चरिमे यामिनीयामे-ऽपश्यदात्मानमन्यदा ॥ ३७१ ॥
न तत्पुरं वरं तन्न, गृहं शय्यागृहं श्रियः । स नावासो दृशां पाशः, सर्वं नवमिवाभवत् ॥ ३७२ ॥
इतश्च विस्मिते तस्मिन्, दिव्यः कोऽपि नरः पुरः । भूत्वोचे विस्मितं मा गा, ज्ञातास्यपहृतिं स्वयम् ॥३७३॥
निशम्येति कुमारोऽपि, यावत् किञ्चन भाषते । तावदन्तर्दधे सोऽपि कोऽपि क्षणदया सह ॥ ३७४ ॥
अथोत्थाय कुमारोऽपि वीक्षमाणो महावनम् । इतस्ततश्च बभ्राम, प्रदोषे चक्रवाकवत् ॥ ३७५ ॥
मध्येवनं सरः स्मेर-कनकाम्भोजभासुरम् । स बान्धवमिवाम्भोधे-रद्राक्षीत् क्षितिशक्रभूः ॥ ३७६ ॥
अथास्य सरसो नीरै-रुचितां शुचितां तनौ । विधाय विपिनेऽभ्राम्य-न्निर्भीको नगरे यथा ॥ ३७७ ॥
अथाग्रे मठमद्राक्षीत् स्वर्गखण्डमिव श्रिया । आरुरोह कुमारस्तम्, प्रमोदप्रेरिताशयः ॥ ३७८ ॥
क्रमादुपरि भूभागे, दिव्यरूपधरं नरम् । दर्शनीयं ददर्शाशु योगपट्टविभूषितम् ॥ ३७९ ॥
निवारितं मरुन्मार्गम्, नश्यन्तं परमं पदम् । नासाग्रन्यस्तशस्ताक्ष-मक्षसूत्रपवित्रितम् ॥ ३८० ॥
[ युग्मम् ]
प्रणिपत्योपविष्टेऽस्मिन्, समाधिमवमुच्य सः । ऊचे वाचा मधुमुचा, कर्णयोरमृताभया ॥ ३८१ ॥



१ निशया ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभयङ्कर! रूपेण, प्रियङ्कर! शिवङ्कर!। स्वागतं ते मयाऽऽनीत, इहासि हितहेतवे ॥ ३८२ ॥
सोऽप्यूचे स्वागतं मेऽभू-द्यत्ते दर्शनमद्भुतम्। साधूनां दर्शनं सार-मसारे भवसागरे ॥ ३८३ ॥
इत्थमस्य ब्रुवाणस्य, स दधौ ध्यानमञ्जसा। ततो रसवती दिव्या, स्वरिवागात् सुधामयी ॥ ३८४ ॥
अवद्योगवित्पुत्राऽतिथिरद्यासि मेऽधुना। कुमार! कुरु तद्भुक्तिं, भोजनं प्रथमं फलम् ॥ ३८५ ॥
ततः स्वर्णमयं स्थालं, स्वयमेव व्यवस्थितम्। यथारुचि तयोर्भोज्य-मुपायुज्यत तत्क्षणम् ॥ ३८६ ॥
तयोः कृते भोजनेऽथ, तत्तत्सर्वं तिरोदधे। अगृह्णीतां च ताम्बूलं कर्पूरागुरुमिश्रितम् ॥ ३८७ ॥
अथो यथोचितं पीठं, एतयोर्विनिविष्टयोः। वीणावेणुमृदङ्गाद्यै-रभवत्ताण्डवक्षणः ॥ ३८८ ॥
तालमानलयग्राम-मूर्च्छनायतिभूषितम्। दिव्यं तत्राऽभवद्गीतं, श्रोतृश्रोत्ररसायनम् ॥ ३८९ ॥
एवं विनोदैर्दिवसो, मुहूर्तमिव निर्गतः। दूरदेशात्तमःपुर, इतश्च प्रासरद्भुवि ॥ ३९० ॥
अथ पृथ्वीपतेः सूनु-मूचे योगविदाम्वरः। अधीता विधिवद्विद्या, अनवद्याः सहस्रशः ॥ ३९१ ॥
यथा पात्रं मया क्वापि, क्वापि क्वापि नियोजिताः। खड्गसिद्धिकरी विद्या, दातुमेकाऽवशिष्यते ॥ ३९२॥
अस्या भूरिप्रभावेण, जयवाही रणे नरः। अचिन्त्यो मणिविद्यानां, भवेद्भावो विवृद्धये ॥ ३९३॥
तथाविधसुपात्रस्या-लाभे चिन्ताकुलोऽभवम्। अयोजिता हि पात्रेषु, विद्या व्यत्ययते मम ॥ ३९४ ॥
अपात्रे योजिता विद्या, भवत्यशिवकारिणी। ऊषरक्षेत्रविन्यस्त-ममृतं हि विषायते ॥ ३९५ ॥
अल्पमायुः परं पात्रं, दुष्प्राप्यमिति चिन्तयन्। इति कर्तव्यतामूढो, यावदस्मि नृपाङ्गज! ॥ ३९६ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तावद्विद्याऽनवद्याङ्गी, स्वयमेत्य पुरोऽवदत् । चिन्तां मा कुरु, सत्पात्र-मानेष्यामि कुतश्चन ॥ ३९७ ॥
तस्मिँस्त्रिजगतीरत्ने, मां निवेश्य यथाविधि । मुक्तभार इवात्यन्तं, शरीरेण सुखी भव ॥ ३९८ ॥
चेटकानथ सम्प्रेष्य, समानीतस्त्वमेतया । अङ्गीकुरुष्व तद्विद्यां, खड्गसिद्धिनिबन्धनाम् ॥ ३९९ ॥
अथावददसौ पूज्य! विद्यालाभो ममाजनि । यद्दृष्टं तत्रभवतां, भवतां क्रमपङ्कजम् ॥ ४०० ॥
योगीन्द्रोऽप्यगदद्भद्र! सत्यमेतत्परं शृणु । यद्भवन्तो हि भूभागे परोपकृतिकर्म्मठाः ॥ ४०१ ॥
परं तथापि मद्विद्यां गृहाण प्रीणयापि माम् । अर्थिनां प्रार्थनां सन्तो, नान्यथा किल कुर्वते ॥४०२॥
इत्युक्त्वा खड्गसिद्धाख्या-मसौ विद्यामपाठयत् । कुमारं प्रेषयामास सत्वरं पितुरन्तिकम् ॥ ४०३ ॥
अकस्मादागतं दृष्ट्वा, सुतं भूमिपतिस्ततः । नगरं रचयामास, पताकाराजिराजितम् ॥ ४०४ ॥
क्षेमङ्करनरेन्द्रेण, परलोकं प्रयित्सुना । अनिच्छतेऽप्यथैतस्मै, ददे राज्यं शुभे दिने ॥ ४०५ ॥
क्षेमङ्करनृपोऽगृह्णा-त्तीर्थङ्करमहाव्रतम् । अभयङ्करभूपालः पालयामास च प्रजाः ॥ ४०६ ॥
नीतिभिः प्रीणयन्पौरान् यशोभिः कुसुमैरिव । सर्वाः सुरभयन्नाशाः, शशास वसुधातलम् ॥ ४०७ ॥
सभास्थमेनमन्येद्युः, प्रतीहारो व्यजिज्ञपत् । देव! पुष्पपुरस्वामी नृसिंहस्त्वां दिदृक्षते ॥ ४०८ ॥
प्रवेशयदमुं राजा, सोऽपि सप्रश्रयं जगौ । तापदुःखापनोदाय, द्वावेवाम्भोदसज्जनौ ॥ ४०९ ॥
निष्कलः प्रतिपक्षेण, क्षयं नीतः शशाङ्कवत् । भवन्तं त्रिजगन्मित्रं, शरण्यं शरणं श्रितः ॥ ४१० ॥
निष्कारणरिपुर्देव! तगरानगरीश्वरः । छली बली विगृह्योच्चै-श्चक्रे मां पादचारिणम् ॥ ४११ ॥

तृतीयो भवः अभयङ्कर-कथानकम्



For Private and Personal Use Only

त्वत्खङ्गविद्यालाभेन, लब्धराज्यो भवाम्यहम् । तथा कुरु महीनाथ ! मन्मनःपान्थपादप ! ॥ ४१२ ॥
एवं विज्ञापितो भूमान-ङ्गीकृत्य तथैव तत् । वेत्रिणा वासयामास, तं निवासनिवेशनम् ॥ ४१३ ॥
अथाख्यत्सुमतिर्मन्त्री, पात्रशुद्धिं विचारय । खङ्गसिद्धिं न दातुं ते, युज्यतेऽस्मै यथा तथा ॥ ४१४ ॥
चतुरैस्तुरगैर्मत्तै-र्वारणैश्च रथैर्वरैः । पादातिभिश्च कोशैश्च, कृतार्थीकुरु पार्थिवम् ॥ ४१५ ॥
भूयो भूपोऽभ्यधत्तैवं, त्वद्वचो युक्तिमङ्गति । किन्तु ज्ञातस्य कर्त्तव्या, परोपकृतिरुत्तरा ॥ ४१६ ॥
(यदूचे–)जायन्ते जन्तवः कुक्षि-म्भरयो भूरयो न किम् ? । परार्थाः सिद्धयो यस्य, स जातः स च जीवति॥४१७॥
इति सम्बोध्य मन्त्रीशं, सुमुहूर्त्ते शुभे दिने । खङ्गसिद्धिमदात्तस्मै, किमदेयं महात्मनाम् ? ॥४१८॥
सत्यीभूतो नृसिंहोऽथ, सिद्धविद्यः समुद्यतः । तगरानगरीनाथम-जैषीत्सङ्गराजिरे ॥ ४१९ ॥
क्षीणशक्तित्रयः सोऽभू-न्नृसिंहादिव दानवः । भाग्यायत्तानि शर्माणि, भाग्यायत्ता हि सिद्धयः ४२०
भ्रष्टाहङ्कृतिराज्योऽहं, दुःस्थावस्थः करोमि किम् ? । अभयङ्करभूमीशम-थवानुसरामि किम् ? ॥४२१॥
इति निश्चिय चित्तान्त-स्तदा पुष्पपुरेश्वरः । व्यजिज्ञपत् नृपं प्राप्य, नगरीं पुण्डरीकिणीम् ॥४२२॥
अभयङ्करभूपाल ! सत्यार्थो भव मेऽचिरात् । अथवा नाममात्रं स्यादिन्द्रगोपककीटवत् ॥ ४२३ ॥
अस्म्यहं तगराधीशो, भूपतिर्दधिवाहनः । त्वत्प्रसादान्नृसिंहेण, हृतराज्यः समन्ततः ॥ ४२४ ॥
तन्मे राज्यं त्वया छिन्नं, मे त्वमेव प्रदास्यसि । पयः शोषयते सूर्यः, सूर्य एव हि वर्षति ॥४२५॥

१ समराङ्गणे ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(यदूचे–) जगदुस्स्वामिनः सन्तः, समाः स्वपरपक्षयोः। नासावंश इवोत्तुङ्गो, वामदक्षिणनेत्रयोः ॥४२६॥
ममोपरि ममत्वं त्वं बिभ्राणाभयभूपते!। राज्यलक्ष्मीं पुनर्दातुं, दानशौण्डीर! चिन्तय ॥ ४२७ ॥
अथाभयङ्करः स्माह, ह्रिया नतमुखाम्बुजः। गृहाण निखिलं राज्यं, मेऽपराधस्तु मृष्यताम् ॥ ४२८ ॥
देश-कोश-बलैः पूर्णं, राज्यं प्रार्थनया समम्। अलङ्कृत्य सुखीकृत्य, भूयास्त्वं शरदां शतम् ॥ ४२९ ॥
उक्त्वेत्यभिषेकयितुं यावदुद्यमवान्नृपः। तावद् बुद्धिसखः प्रोचे, साधिक्षेपं सनिष्ठुरम् ॥ ४३० ॥
अविचार्यकारितेयं, वारम्वारं त्वयि प्रभो!। पूर्वजैरर्जितं राज्यं, त्यज्यते तृणवत्त्वया ॥ ४३१ ॥
पुत्राय ननु पौत्राय, राज्यं देदीयते नृपैः। परश्च वार्द्धके प्राप्ते, दुष्प्रापं राज्यमङ्गिनाम् ॥ ४३२ ॥
अपदे राज्यमुत्सृज्य, गच्छन् पादप्रचारतः। कथं निजाननं राजन्!, दर्शयिष्यसि पावनम्! ॥४३३॥
यावल्लक्ष्मी नृपास्तावद्-न्यथा बाममात्रतः। पर्यस्ताः शिरसः केशा, ही लुठन्ति महीतले ॥४३४॥
(यतः–) स पुरस्क्रियते वर्णैः, सर्वैर्यः श्रीपुरस्कृतः। शून्याकृतिरपि प्रायो, विसर्गोऽत्र निदर्शनम् ॥ ४३५ ॥
अधिकाभ्युदयाय स्यु-र्वित्तवन्तः पुरस्कृताः। बिन्दुरग्रे कृतोऽङ्कानां, धत्ते दशगुणोन्नतिम् ॥ ४३६ ॥
अलम्भि बकुलेन श्रीः, शब्दोऽन्त्येऽपि यदद्भुतः। अतो गुणाधिवासत्वं हृदये परिसर्पति ॥ ४३७ ॥
तथाह पृथिवीनाथो, लोकोत्तरपराक्रमः। विनश्वर्यः श्रियो लोला, धृतिं तासु कुरुष्व मा ॥ ४३८ ॥
(यदूचे–) अहमस्याः पतिः सेयं, ममैवेत्यभिमानिनः। क्षुवा[1] भोगार्थिनः के वा, वेश्ययेव न वञ्चिताः? ॥४३९॥
पत्रपात्रीव[2] धात्रीयं, भुक्त्वोत्सृष्टा महात्मभिः। विगृह्य गृह्यते लुब्धैः, कुर्कुरैरिव ठक्कुरैः ॥ ४४० ॥

१ पृथिव्या। २ 'पतराली' इति भाषायाम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्बोध्येति महामात्यं, भूपतिर्दधिवाहनम् । राज्ये निवेश्य कोशश्च, देशश्च निखिलं ददौ ॥ ४४१ ॥
ततोऽभयङ्करो राजाऽनुगान्पौरान्निवर्त्य च । अमात्यादीनपि कृच्छ्रात्, पादचारेण निर्गतः ॥४४२॥
अन्यदा काननं काला-ननं भ्राम्यन् महानिशि । शुश्राव करुणध्वानं, दैन्यनाट्यविभूषकम् ॥ ४४३ ॥
शब्दानुसारतो गच्छन् विवेश गिरिगह्वरम् । प्रज्वलत्खदिराङ्गार–प्रचण्डं कुण्डमैक्षत ॥ ४४४ ॥
तदन्ते वनितामेकां, नवीनाधिकयौवनाम् । भूचरीं रूपलावण्यैः, शापभ्रष्टामिवामरीम् ॥ ४४५ ॥
लम्बितालकजालेन, पिहिताननपङ्कजाम् । भयलोलदृशं चिल्लीं, श्येनचञ्चुगतामिव ॥ ४४६ ॥
करवीरारुणस्रग्भि-रर्चिताश्चितयाश्चिताम् । असौ ददर्श लोलाक्षीं, पुरस्थमपि योगिनम् ॥ ४४७ ॥
॥ त्रिभिर्विशेषकम् ॥
ब्राह्मणीमिव माम-स्मान्निषादादिव दारुणात् । कोऽपि गोपायते वीरः, परोपकृतिकर्मठः ॥ ४४८ ॥
मृतिर्भूयाद्यतो देही, कालधर्म्मवशंवदः । परमीदृक्प्रकारेण, मा भूयान्मृतिरङ्गिनाम् ॥ ४४९ ॥
अहो ! मे क्षीणपुण्याया, वीरः कोऽपि क्षमातले । अद्यापि नैव जागर्ति, वीरवन्ध्या किमु क्षमा ? ॥४५०॥
विलपन्तीमिति श्रुत्वा, वनितां करुणस्वनैः । अथासौ योगिनं प्रोचे, विश्वरक्षणदीक्षितः ॥ ४५१ ॥
सुमते ! तव सन्मूर्तिः लक्षणानि शुभान्यहो ! । राजेव भाति धत्से किं निन्दितां योगिमात्रताम् ? ॥४५२॥
प्रेत्यामुत्र विरुद्धोऽय-मर्थः किं क्रियते त्वया ? । सन्तो भवन्ति सर्वेषां मार्गामार्गैकदेशिनः ॥४५३॥
वायुस्तिष्ठेद्व्रजेन्मेरुः कम्पतां हन्त वात्यया । तथापि सत्त्ववान्नैवं, विमुखो जीवरक्षणे ॥ ४५४ ॥

१ वायूनां समूहेन ।

तृतीयो भवः
अभयङ्कर-
कथानकम्

For Private and Personal Use Only

एकं रामा परं बाला, भवांश्च विजिगीषुराट् । कर्तुमेतत्कथङ्कारं, तव बाहुः प्रसर्प्पति ? ॥ ४५५ ॥
इमां सल्लक्षणां हत्वा, विद्या चेत्तव सिद्ध्यति । तदस्याः स्थानके मां त्वं, कुरु प्रार्थितपूरुष ! ॥ ४५६ ॥
इत्युक्तवन्तं भूपालं, योगीन्द्रः स्माह विस्मितः । चरित्रेण पवित्रेण, पुनासि मम मानसम् ॥४५७॥
चक्रवर्तीव वपुषा, श्रीपुषा व्यज्यसे मया । भवेदन्यस्य कस्येदं, पररक्षा-महाव्रतम् ॥४५८॥
अकृत्याऽऽचरणे वीर ! निदानं शृणु सादरः । अस्ति वैताढ्य इत्यद्रि-स्तत्र विद्याधरोऽस्म्यहम् ॥४५९॥
उत्तरश्रेणिपो विद्यामू-र्जितामपराजिताम् । तथाऽऽराधयितुं यत्नं, कृतवानस्मि सस्मयः ॥४६०॥
यथा दिनेष्वपूर्णेषु, पुरो भूयो जगाद सा । तुष्टाऽस्मि वत्स ! किंतु त्वं, सेवामर्हसि चोत्तराम् ॥४६१॥
द्वात्रिंशल्लक्षणां रामां, नरं वा पूर्णलक्षणम् । हुत्वा हुताशे याचस्व, वरं किञ्चन चिन्तितम् ॥४६२॥
अथान्यथा विधातासि, स्फुटिष्यति शिरः स्फुटम् । इत्युक्त्वान्तर्दधे देवी, ततो भ्रान्तो महीमहम् ॥४६३॥
इहाऽऽनयमिमां दृष्ट्वा, सुतां सिंहपुरेशितुः । अस्या प्राणपरित्राणात्, मम विघ्नो भवानभूत् ॥४६४॥
अथाऽऽख्यत्सस्मितं राजा, द्रुतमेषा विमुच्यताम् । हुत्वाग्नौ मम मूर्द्धानं, भव पूर्णार्थसाधकः ॥४६५॥
अथो विहस्य सोऽप्यूचे, विचारविमुखः खलु । अर्थैर्दारैरपि प्राणा, रक्ष्यन्ते हि शरीरिणा ॥४६६॥
अथोचे भूपतिः स्मित्वा, गत्वरैरसुभिः सखे ! । चिरस्थायि यशः सद्भि-रर्जनीयं प्रयत्नतः ॥४६७॥
आक्षिप्य पापिनः पाणेः, कृपाणं पृथिवीपतिः । मूर्ध्नि व्यापारयामास, छेत्तुं मुदितमानसः ॥ ४६८ ॥
अथो रोमोद्गमो देहे, प्रससार विशाम्पतेः । विधातुमिव साहाय्यं, वीरो रस इवाङ्गवान् ॥ ४६९ ॥

अथ पृथ्वीपतेर्बाहु-र्बभूव स्तम्भितस्ततः । तेनान्तस्तापवान्मन्त्र-बन्धेनेव महोरगः ॥ ४७० ॥
असमर्थः स्वयं छेत्तुं, राजाऽभाषिष्ट योगिनम् । अहो स्वयं स्वहस्तेन, मूर्द्धानं छिन्धि मेऽचिरात् ॥४७१॥
तथाकर्तुं प्रवृत्तेऽस्मि-न्निर्दयानां शिरोमणौ । स महात्मा महीपीठेऽ-लोठीद्देषोऽपि दैवतः ॥४७२॥
(इतश्च-)पार्वणीन्दुमुखाम्भोजा मुक्ताहारेण हारिणा । भूषितोरस्थला देवी, प्रादुरासीत्पुरस्तदा ॥४७३॥
अमृतच्छटया सिक्तं, सा भूपमिदमब्रवीत् । वत्स ! त्वत्साहसात्तुष्टां, विद्धि मामपराजिताम् ॥४७४॥
अथ प्रणम्य राज्ञोचे, हस्तस्तम्भस्य कारणम् । निवारय यथा छेत्तु-मलंभूष्णुर्भवाम्यहम् ॥ ४७५ ॥
एवं प्रतिज्ञानिर्वाह-व्रतं मे स्यादखण्डितम् । धनराज्यादिभिः कार्यं न मे किञ्चन विद्यते ॥ ४७६ ॥
नैतत्कर्तुं समस्तीच्छा, ततोऽस्मै सिद्धिमादिश । दर्शनं किल देवीनां, साधीयः सिद्धिसाधने ॥४७७॥
अथ देवी पुनः प्रोचे, नास्य स्त्रीवधपापिनः । प्राणानपि प्रयच्छामि दूरे सिद्धिरभीप्सिता ॥४७८॥
अथाऽऽचचक्षे क्षोणीशः, स्त्रीवधः पापिनाऽमुना । कृतो युष्मद्गिरा देवि ! परित्यज्य [१]विवेचनम् ॥४७९॥
विहस्य न्यगदद्देवी, क्षूणयिष्यति नो सुत ! । तव सत्त्वपरीक्षार्थं, समादिष्टं मयाऽस्य तत् ॥ ४८० ॥
अथोचे देवता वत्स! मुत्त्वार्थममुमुच्चकैः । अन्यद् शृणु महाभाग ! ह्यमोघं देवदर्शनम् ॥ ४८१ ॥
अथावादीन्महीनाथः, किं वृथा वचनक्रमः ? । अग्निशौचाम्बरमिव, प्रवेक्ष्यामि हुताशने ॥ ४८२ ॥
इत्युक्त्वाथ ददौ झम्पा-मभयङ्करभूपतिः । किमशक्यं कदाप्यस्ति बत सत्त्ववतां सताम्? ॥४८३॥
सुता सिंहपुरेशस्य, दृष्ट्वैनं स्फुटसाहसम् । अर्धविच्छिन्नवल्लीव, पपात पृथिवीतले ॥ ४८४ ॥

तृतीयो भवः
अभयङ्कर-
कथानकम्

१ विचारम् ।

बलादथ महीपाल-मनले लुलितं तदा । आकृष्य देवताऽवादी-द्विस्मेरवदनाम्बुजा ॥ ४८५ ॥
तव साहसमालोक्य, वत्स! तुष्टाऽस्मि सर्वथा । जीवितं लम्भितो भद्र! तव वाचाऽधमोऽप्ययम् ॥४८६॥
अभिषिच्य सुधापूरैः, कुमारीमपि देवता । स्वयमुज्जीवयाश्चके, घनाली कन्दलीमिव ॥ ४८७ ॥
अथो जीवितमालोक्य, भूपतिं भूपपुत्रिका । पतिं सङ्कल्पजं चक्रे, स्वान्तभ्रान्तमनोभवा ॥ ४८८ ॥
अमुष्य सत्त्वरत्नं सम्वीक्षितुं किल कौतुकी । प्रत्यक्षोऽभूज्जगच्चक्षुः, क्षुण्णक्षोणीतमस्ततिः ॥ ४८९ ॥
इतश्चाकाशतूर्याणां, नादैर्जयजयैरिव । व्यानशे रोदसीकूपः, कोऽपि कोलाहलोऽजनि ॥ ४९० ॥
अस्यानुसारतोऽपश्यत्, पृथ्वीशः पृतनां पृथुम् । किमेतदिति सम्भ्रान्तं कोऽप्येत्यैनं व्यजिज्ञपत् ॥४९१॥
देवास्मदीशितुः सैन्यं वैरिकेसरिभूभुजः । अपुत्रे त्रिदिवं प्राप्ते, तत्रेदं स्वामिवर्जितम् ॥ ४९२ ॥
आराध्य विधिना गोत्र-देवतामपराजिताम् । तदादेशेन तदिदं, भवन्तमभिगच्छति ॥ ४९३ ॥
वैरिकेशरिसाम्राज्य-श्रियाः प्राणेश्वरो भव । फलेग्रहिर्भव-त्वस्मन्मनोरथमहातरुः ॥ ४९४ ॥
वैरिकेशरिराजस्य, प्रजालोकोऽभिधानतः । क्रमिकः सचिवोऽस्म्येष, सार्थां मत्प्रार्थनां कुरु ॥४९५॥
तथा सविधवर्तिन्या, स्वयं देवतया तया । अभिषिक्तो नरेन्द्रत्वे, सुकृतं सहचारि यत् ॥ ४९६ ॥
धारयामास तन्मूर्ध्नि, देवताऽऽतपवारणम् । प्रेरितं भूरिसत्त्वेन, पूर्वप्रीतेरिवागतम् ॥ ४९७ ॥
कुमार्या मङ्गलस्नान-पूर्वमुद्वाहमङ्गलम् । विदधे देवता राज्ञ-स्तिरोऽभूदथ तत्क्षणम् ॥ ४९८ ॥
अथ लक्ष्मीपुरं प्राप्य, सलक्ष्मीकः क्षमापतिः । अतर्पयत्प्रजां प्रीत्या, पाथोद इव पाथसा ॥४९९॥

अथ सिंहपुरस्वामी, समेत्य स्वयमेव सः । अभयङ्करभूपालं, सच्चक्रे प्राभृतैर्नवैः ॥ ५०० ॥
कन्याद्यैः प्राभृतैर्हृद्यै-र्नभश्चरमहीचराः । भूभुजोऽपूपुजन्नेन-ममूलं पुण्यकार्म्मणम् ॥ ५०१ ॥
स्वपदस्थापितः स्वस्यां, नगर्यां दधिवाहनः । तैस्तैरुपायनैरेनं, सिषेवे भावपेशलम् ॥ ५०२ ॥
अन्यदा तस्य दिव्यांशुभासुरं रविबिम्बवत् । चक्रमायुधशालाया-मुत्पेदे सम्पदां पदम् ॥ ५०३ ॥
तस्य चक्रस्य माहात्म्यात्, प्रबलीभूतविक्रमः । वसुधां साधयामास, षट्खण्डामपि हेलया ॥ ५०४ ॥
भुक्तभोगश्चिरं प्राप्य, व्रतं तीर्थङ्करोदितम् । पदं लोकोत्तरं प्रापा-भयङ्करमहामुनिः ॥ ५०५ ॥
समस्तसम्पदां मूलं, महोद्यानं यशस्तरोः । परोपकारः कर्त्तव्यो, हर्तव्यः कलिकल्मषः ॥ ५०६ ॥
एवं निशम्य दृष्टान्त-मभयङ्करचक्रिणः । परोपकारपीयूष-वार्द्धेः पीयूषरोचिषः ॥ ५०७ ॥
चमत्कारकरीमेनां, कथां दुष्कृतकर्तिनीम् । श्रुत्वा कुबेरदत्तोऽथ, जगाद वदतां वरः ॥ ५०८ ॥
एकं तव मुखप्रोक्ताऽपरश्चक्रभृतः कथा । कामधेनुपयःसिक्त-कल्पद्रोः साम्यमृच्छति ॥ ५०९ ॥
एनसां मे ततिः साधो! रजनीव क्षयं गता । मानसे पद्मवद्बोधः, प्रबोधमधुरोऽजनि ॥ ५१० ॥
इतस्तुरङ्गपादेन, राजसैन्यमुपागमत् । कुमारो मुनिमानम्य, साकं तेन पुरं ययौ ॥ ५११ ॥
प्रवेशितो महोत्साह-पूर्वकं जगतीभुजा । इष्टे प्रणष्टे सम्प्राप्ते, हर्षः शतगुणो भवेत् ॥५१२॥
इतश्च विमलाचार्यो, वराऽऽरामे समागमत् । राजा तु वन्दितुमगा-द्धर्मपूर्ण्णा हि भाविनः ॥५१३॥
उवाच विमलाचार्यो, ज्ञानज्ञाततदाशयः । प्रतिबोधपरा जैनाः, सर्वेष्वपि हि लिङ्गिषु ॥ ५१४ ॥

तृतीयो भवः अभयङ्कर-कथानकम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्य कार्ये जनैर्मूढै-रकार्यं क्रियतेऽन्वहम् । शरीरं सान्वयं तच्च, वारंवारं विशीर्यते ॥ ५१५ ॥
असारेऽस्मिन्शरीरेऽपि, सारो धर्म्म इति श्रुतिः । अस्थिरेण शरीरेण, स्थिरो धर्म्म इति श्रुतिः ॥५१६॥
वार्द्धक्योपहता येऽपि, न स्युर्धर्मपरायणाः । मूढाः परं भवं ते न, लभन्ते शुभभासुरम् ॥ ५१७ ॥
यौवनेऽपि विधातव्यो, धर्मस्तीर्थकरोदितः । को जानाति कदा दैव-दण्डः पतति मस्तके? ॥ ५१८ ॥
(यतः–)तारुण्येऽपि दृढस्याङ्गि येन धर्माय नोद्यतम् । तन्मुण्डे पलितव्याजात्, क्षिप्तं भस्मैव वेधसा ॥ ५१९ ॥
श्रुत्वेति विश्वकान्तोऽपि, राज्ये न्यस्य तनूद्भवम् । समभूद्विमलाचार्य-समीपे व्रतवानसौ ॥५२०॥
पपाठाङ्गानि सर्वाणि, द्विधा शिक्षां विशेषयन् । व्यहरद्विश्वं राजर्षिः, प्रज्ञालः सर्वकार्यवित् ॥५२१॥
सूरिणा स्वपदे न्यस्तो, विश्वकान्तो महामुनिः । महीयांसो हि सर्वान् प्र-कुर्वते चिन्तितानिव ॥५२२॥



कुबेरदत्तभूपालो, ग्रामे ग्रामे पुरे पुरे । सिद्धा[1]यतनकान्तानि, जिनचैत्यान्यकारयत् ॥ ५२३ ॥
कुबेरदत्तभूपस्य, देवी मदनमञ्जरी । असूत नन्दनं नेत्रा-नन्दनं चन्दनोपमम् ॥ ५२४ ॥
अमरदत्त इत्याख्याम-स्य चक्रे विशाम्पतिः । यतः स्वप्नेऽमरो दृष्टो देव्या चञ्चलकुण्डलः ॥ ५२५ ॥
अभूत्कव[2]चहारोऽयं परिणीतनृपाङ्गजः । क्रमेण यौवनं प्राप, नेत्रसारङ्गवागुराम् ॥ ५२६ ॥
अन्येद्युर्विहरन्विश्व-कान्तः सूरिमहत्तमः । उद्याने समवासार्षी-ज्जिनधर्म्म इवाङ्गवान् ॥ ५२७ ॥
ज्ञात्वाऽस्याऽऽगममाङ्गल्य-मुद्यानेऽगाद्विशाम्पतिः । श्रुत्वा च देशनां पूतां, भवे वैरङ्गिकोऽभवत् ॥५२८॥
आगत्याऽमरदत्तोऽपि, न्यस्तो राज्ये महीभुजा । जगृहे च व्रतं जैनं, साधुः स्वार्थपरायणः ॥ ५२९ ॥

१ सिद्धायतनस्येव मनोहराणि । २ कवचं हरति येन वयसा ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रणत्यामरदत्तोऽपि, भूमिपालो गुरुद्वयीम् । वहमानो मुदं प्राप सौधं विविधभावनः ॥ ५३० ॥
कुबेरदत्तराजर्षि,-[1]वर्षीयानिव संयमम् । कुर्वन्सूरिपदे न्यस्तो, भव्यं लिङ्गिषु तत्पदम् ॥ ५३१ ॥
विश्वकान्तो गुरुः कृत्वा, पर्यन्ताऽनशनं त्रिधा । स्वर्गं जगाम माहेन्द्रं, तस्माच्च परमं पदम् ॥५३२॥
यतिपञ्चशती तस्य, परिवारे स्वदीक्षिता । गुरोर्बोधयतः पृथ्वी-पद्मिनीं देशनांशुभिः ॥ ५३३ ॥
कुबेरदत्तसूरीन्द्रो, मृत्वा पण्डितमृत्युना । सनत्कुमारमापोच्चैः, कल्पं कल्पितधर्मधीः ॥ ५३४ ॥
अस्याऽऽयुरभवत्सप्त-सागराणि सुधाभुजः । प्रव्रज्यायाः कियद्दूरे, स्वर्गः संशुद्धचेतसाम्? ॥५३५॥
कदाचिद् विदधे यात्रां द्वीपे नन्दीश्वरे सुरः । प्रभावनान्वितां, गुर्वी भावनातः प्रभावना ॥५३६॥

इति विनयविनम्रः शाश्वतान्वीतरागान्, प्रसृमरगुरुभावः पूजयन्स्मेरपुष्पैः ।
नवनवरतिलीलाकल्पिताऽऽनन्दसम्पद्गमयति परिवर्तान्वासराणां सुधाभुक् ॥ ५३७ ॥

चतुर्थो भवः

इत्याचार्यश्रीविनयचन्द्रविरचिते श्रीमुनिसुव्रतस्वामिचरिते महाकाव्ये विनयाङ्के श्रीमेघवाहन-राजर्षिदेवविवित्तफलानुगसङ्कासश्रावकपरोपकारतत्परश्रीअभयङ्करचक्रधरकथानकगर्भितः
प्रथम-द्वितीय-तृतीय-चतुर्थभववर्णनो नाम प्रथमः सर्गः ॥ छ ॥
अनेन कविना चक्रे, श्रीमत्पार्श्वजिनेशितुः । चरित्रं स्वर्धुनीवारिपवित्रं स्वस्य बोधये ॥

[1] अतिशयेन वृद्धः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





## द्वितीयः सर्गः ।

इहाऽपरविदेहेषु, महर्द्धिर्विजयो जयी। गन्धावतीति विख्यातः, षड्भिः खण्डैरखण्डितैः ॥ १ ॥
तत्राऽस्ति नगरं रम्यं, नामतो गन्धमादनम्। वज्रनाभाभिधस्तत्र, चक्री शक्र इवौजसा ॥ २ ॥
प्रिया शुभावती तस्य, सर्वान्तःपुरमण्डनम् । साऽन्येद्युरैक्षत स्वप्ने, शक्रं दशशतेक्षणम् ॥ ३ ॥
पविं पाणौ च बिभ्राणं वामे नामितशात्रवे । अपरस्मिन्करे चञ्चन्-मणिकुण्डलमुज्ज्वलम् ॥ ४ ॥ [युग्मम्]
उपराजं जगामासौ, तं जगाद नृपाङ्गना । सोऽवादीन्निश्चितं भद्रे! त्वत्पुत्रो भविता हरिः ॥ ५ ॥
दर्शनं लोकपालानां, लोकपालत्वसूचकम् । स्वप्नमेतन्मनोहारि, दुःप्रापं सुकृतैरपि ॥ ६ ॥
श्रुत्वेति मुदिता देवी, निजं तल्पं जगाम च। स्मरन्ती देवतापादौ, हृष्यन्ति च क्षणे क्षणे ॥ ७ ॥
ततः कुबेरदत्तस्य, जीवस्तुर्यसुरालयात्। च्युत्वा तस्या अवातरीत्, कुक्षौ कक्षीकृताङ्कः ॥ ८ ॥
सम्पूर्णे दिवसेऽसूत, दारकं द्युतिहारकम्। वज्रकुण्डल इत्यस्याऽभिधानं जनको व्यधात् ॥ ९ ॥
पित्रोर्मनोरथशतै-रवर्धिष्ट नृपात्मजः । परिणिन्ये महीशानां, कन्यानां शतपञ्चकम् ॥ १० ॥
शृङ्गाररसवापीभि-र्वनिताभिर्दिवानिशम्। साकं चिक्रीड राज्यस्य, चिन्तां नैव चकार सः ॥ ११ ॥
कदाचिच्चषकै[1]र्हैमै-रञ्चितैः स्मेरपङ्कजैः । रामाभिः सह मैरेयं[2] पिबति स्म सविस्मयः ॥ १२ ॥
कदाचिदुद्यानगतः, पुष्पावचयमादरात्। योषिद्भिः सह कुर्वाणो, वसन्ते खेलति स्म सः ॥ १३ ॥

पञ्चमो भवः

१ मदिरापानपात्रैः । २ मदिराम् ।



For Private and Personal Use Only

वर्षासु कृतहर्षासु, सौधोत्सङ्गे नरेन्द्रसूः । मेघरागं सरागाभि-रगायत्तुम्बुरूपमः ॥ १४ ॥
कदाचित्क्रीडावापीषु, शृङ्गीभिर्लोललोचनाः । असिञ्चत्कामतप्ताङ्गीः, स करीव करेणुकाः ॥ १५ ॥
एवं विषयसेवां स, वितन्वानो दिवानिशम् । दिवसान्गमयामास, हर्षोत्कर्षमयानिव ॥ १६ ॥
अन्येद्युर्मन्त्रविद्वज्र-कुण्डलं रहसि स्थितम् । एवं विज्ञपयामास, मृद्वीकाकाम्यया गिरा ॥ १७ ॥
स्वप्नदृष्टं यथा पुंसः, क्षणमात्रं सुखायते । प्रबुद्धस्य न तत्किञ्चि-देवं विषयजं सुखम् ॥ १८ ॥
शब्दादिविषयासक्ता, विरक्ता धर्मकर्मणः । अजरामरवन्मूढा-श्चेष्टन्ते नष्टचेतनाः ॥ १९ ॥
विषयेषु विषीदन्तो, न जानन्ति हिताहितम् । शृण्वन्ति न हितं वाक्य-[2]मेडमूका इवाऽनिशम् ॥ २० ॥
आदौ हृद्यरसास्वादाः, पर्यन्ते परितापिनः । विषयाश्चिन्तनादेव, बहुधा च विनाशकाः ॥ २१ ॥ पञ्चमो भवः
प्राप्ता अपि नरैः कामा, दुःखं ददति देहिनाम् । क्षणान्नष्टाः क्षणात् दृष्टा, गन्धर्वनगरोपमाः ॥ २२ ॥
विषयेषु प्रसक्तानां, कन्दर्प्पाज्ञाविधायिनाम् । लोकद्वयविघातिन्यो, जायन्तेऽनर्थवीचयः ॥ २३ ॥
दृष्टान्तोऽगडदत्तस्य, शुश्रुवे येन न क्वचित् । सोऽभङ्गं रमणीसङ्गं, कुरुतान्नरकस्पृही ॥ २४ ॥
वज्रकुण्डल ऊचेऽथ, कोऽसावगडदत्तकः? । मदग्रे चरितं यस्य, त्वया हर्षाद्वितन्यते ॥ २५ ॥
अथ मन्त्री जगादाशु, वज्रकुण्डलसन्मुखम् । एतन्निदर्शनं यस्य, रामावैरङ्गिको जनः ॥ २६ ॥
तथाहि भरतक्षेत्रे, पुरं शङ्खपुरं वरम् । तत्राऽऽसीत्सुन्दरो नाम, भूपतिः सुन्दराकृतिः ॥२७॥ अगडदत्तकथा
सुलसा प्रेयसी तस्या-नलसा शीलकर्मणि । तयोरगडदत्ताख्यो, नन्दनश्चन्दनो दृशाम् ॥ २८ ॥

१ तन्नामागन्धर्वोपमः । २ श्रुतिरहित एडो-बधिरश्चासौ मूकः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स क्रमाज्जाततारुण्यः, शरण्यः प्राणिनां न हि । सप्त व्यसनोपहतः, प्रयतः परविग्रहे ॥ २९ ॥
जग्राहान्यकलत्राणि, विटवच्चेष्टते स्म सः । सह चिक्रीड वेश्याभि-र्भाषते स्म यथा तथा ॥ ३० ॥
अशान्तिकक्रियाभिश्च, मारणैः क्षुद्रकर्म्मभिः । पुरमुच्चाटयामास, दुर्मन्त्रैरिव मान्त्रिकः ॥ ३१ ॥
अन्यदा नागरा नत्वा, काश्यपीशं व्यजिज्ञपत् । देव! दर्शय पानीय-स्थानकं पुरवासिनाम् ॥ ३२ ॥
श्रुत्वेत्यपृच्छदुर्वीशः, सम्भ्रमोत्तालभालभृत् । भाषन्ते किमिदं पौराः दुःखपूर्णा इवोच्चकैः ? ॥ ३३ ॥
निःश्वस्य नागराः प्राहुः स्वामी वेत्ति न किं स्वयम् ? । पुरः स्थमिव राजान-श्चरैः पश्यन्ति दूरतः ॥ ३४ ॥
स्मित्वा स्माऽऽह महाराज, आज्ञा मे पूर्वभूभुजाम् । किम्वदन्त्या वदन्त्यापि, यथाऽहं वेद्मि किञ्चन ॥ ३५ ॥
अथ ते जगदुः पौराः, कौमारं वृत्तमद्भुतम् । ब्रुडितायां नासिकायां, ब्रुडेन्नाऽऽशाशतं नु किम् ? ॥३६॥
श्रुत्वा कुमारवृत्तान्तं दुःश्रवं प्रथमागतम् । भूभुजो हृदयस्यान्तः, शोकशङ्कुरजायत ॥ ३७ ॥
ध्यातवानिति भूनाथः, किमेतेनाङ्गजन्मना । किं तेन कुण्डलेनापि, येन च्छेदो हि कर्णयोः ॥ ३८ ॥
पितुर्माङ्गल्यनैर्मल्यात्, समुद्द्योतकृतोऽपि च । भवेन्मालिन्यकृत्पुत्रो, दीपादिव मषीलवः ॥ ३९ ॥
नीचादपि पितुः पुत्रो, जायते मण्डनाग्रणीः । क्षारवारांनिधेर्नीरात्, मुक्तामणिरिवोज्ज्वलः ॥ ४० ॥
क्षीयते क्षुद्रपुत्रेण, पूर्वजोपार्जितं यशः । वडवादहनेनोच्चै-र्वारि वारिनिधेरिव ॥ ४१ ॥
श्रुत्वेति भूपतिर्भाल-भृकुटीभङ्गभीषणः । अनार्यं सुतमाकार्य, प्रियाप्रियमवोचत ॥ ४२ ॥
पुत्र ! जातोऽसि नः पुण्यैः, प्रजाः पासीति चिन्तितः । परमीदृक्तवाऽवस्था, मम भाग्यविपर्ययात् ॥ ४३ ॥

पञ्चमो भवः

अगडदत्तकथा



For Private and Personal Use Only

कुमार ! तत्र वृत्तान्तः, कुमारः पुरवासिनः । प्रजारञ्जनतो राजा, तद्वत्पुत्रोऽपि कीर्तितः ॥ ४४ ॥
यदीदृक् चेष्टसे दुष्टं, मत्पुत्रोऽपि विवेक्यपि । ततः सुधारुचेर्बिम्बात्, कृशानुकणवर्षणम् ॥ ४५ ॥
राज्यं त्यज भजारण्यं, व्रज व्रज दृशोर्मम । दर्शयसे कथङ्कार-माननं मानमर्दन ! ॥ ४६ ॥
श्रुत्वेति भूभुजा प्रोक्तं, सरुषा परुषाक्षरम् । तस्मादगडदत्तोऽपि, निर्ययौ मानिनां गुरुः ॥ ४७ ॥
कृतदेशपरित्यागो, रङ्गन्नगपुरादिषु । पुरीं वाराणसीं प्राप, श्रेयसीं तीर्थमालया ॥ ४८ ॥
असौ भ्राम्यन्कलाचार्यं, पुर्यामार्यप्रियङ्करम् । अधीयानबहुच्छात्रैः, सेवितक्रमपङ्कजम् ॥ ४९ ॥
नामतः पवनचण्डं, चण्डं वादिपराजयैः । द्वासप्ततिकलाम्भोधेः, पारावारीणमैक्षत ॥ ५० ॥
॥ युग्मम् ॥

पञ्चमो भवः

प्रणन्तरि पुरःस्थेऽस्मिन्, स्वागतप्रश्नपूर्वकम् । कौतःकुतोऽसि किन्नाम, वृत्तं स्वमिति सोऽवदत् ॥ ५१ ॥

अगडदत्तकथा

ऋजुस्वभावं तं ज्ञात्वा, यथातथमुवाच सः । कलाचार्ये गुरौ मित्रे, भाव्यं सूनृतवादिभिः ॥ ५२ ॥
तत्सत्यवचनात्तुष्टः तुष्टः प्रीतितरङ्गितैः । अभाषिष्ट सुतस्त्वं मे, त्वदायत्तं धनादिकम् ॥ ५३ ॥
तथेति प्रतिपद्याऽसौ, शिक्षमाणः कलां कलाम् । अक्रीडन्नगरोद्याने, गीर्वाण इव भूमिगः ॥ ५४ ॥
[1]समयोद्यानमावासः श्रेष्ठिनस्तुङ्गजालकः । तत्राऽऽसीच्छ्रेष्ठिनः पुत्री, नाम्ना मदनमञ्जरी ॥ ५५ ॥
प्रत्यहं वीक्षमाणा सा, कुमारं मारसुन्दरम् । सानुरागाऽभवत्तत्र, माकन्द इव षट्पदी ॥ ५६ ॥
वीक्षमाणः कुमारस्तां, प्रेमोत्कर्षस्पृशा दृशा । स[2]व्यलीकमिवानङ्ग-स्ताडयामास मार्गणैः ॥ ५७ ॥

१ उद्यानसमीपम् । २ सापराधमिव ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





परन्तु त्रपया गूढ-मन्मथोऽजनि राजभूः । साऽपि कन्दर्पदर्पात्ता,ऽभवत्पल्लवशायिनी ॥ ५८ ॥
तयाऽथ प्रेषिता दूती, सा गत्वैनमवोचत । स्वामिन्! मदनमञ्जर्या, भव जीवितदायकः ॥ ५९ ॥
हन्यमानां कामबाणै-र्बालिकामबलां बलात् । उपेक्षमाणो गीर्वाण-रूपो निर्घृणधीरसि ॥ ६० ॥
श्रुत्वेदं राजसूरूचे, युक्तमुक्तं त्वयाऽनघे! । केयमुद्वाहिता किं वाऽनूढा प्रौढकुलोद्भवा? ॥ ६१ ॥
सोचे स्वामिन्! वणिक्ख्यातश्रेष्ठिनः श्रेष्ठचेतसः। दुहिता बन्धुदत्तस्य, नाम्ना मदनमञ्जरी ॥ ६२ ॥
इहैवोद्वाहिता देव! तव रूपानुरागिणी । भवन्तं वीक्षते विष्व-ग्विष्णुमूर्तिमिवाऽपरम् ॥ ६३ ॥



यद्दिनादेव! दृष्टोऽसि, कलावल्लीघनाघन! । तद्दिनादेव रागद्रु-रुद्गतो हृदयस्थले ॥ ६४ ॥
अनया सह संयोगं, न कर्तासि भविष्यसि । घातकी सुभटत्वस्य, रमणीवधपातकी ॥ ६५ ॥



श्रुत्वेति निबिडोत्पन्ना-नुरागां श्रेष्ठिनः सुताम् । ज्ञात्वापि देशकालज्ञो, भावज्ञ एवमूचिवान् ॥ ६६ ॥
जानीहि सुन्दरि! क्षोणी-पालसुन्दरसम्भवम्। नामतोऽगडदत्ताख्यं कलाभ्यासार्थमागतम् ॥ ६७॥
कलाचार्यसमीपेऽहं, कलाभ्यासं समाप्य च । गमनाहे ग्रहीष्यामि, स्वपुरं यान् सखीं तव ॥ ६८ ॥
कतिचिद्दिवसानुच्चैः, त्वत्सखी गमयत्वलम् । दुःखकामाभिभूतानां, प्रत्याशा हि बलीयसी ॥ ६९ ॥
तस्यै नेपथ्यवासांसि, दत्त्वा प्रत्याय्य दूतिकाम् । प्रापयत् तत्समीपेऽथ, तत्सङ्गममचिन्तयत् ॥ ७० ॥
अन्यदा तुरगारूढः, स गच्छन् राजवेश्मनि । उच्चैः कलकलं भीमं, शुश्राव श्रवणाऽप्रियम् ॥ ७१ ॥
उद्वेलः किमु पाथोधिः?, किं वाग्निर्ज्वलितःपुरे? । किं वा प्राप्तं द्विषत्सैन्यं? निर्घोषो वाऽशनेः किमु? ॥७२॥



For Private and Personal Use Only

एवं विकल्पजालानि, कल्पयन्यावदस्ति सः। गंजाजीवैः परित्यक्तो, भिषग्भिः कालरोगिवत् ।।७३।।
भञ्जयन्पुरवृक्षौघान्, वरण्डानपि खण्डयन्। आलानस्तम्भमुन्मूल्य, तावत्कुम्भी समाययौ ।। ७४ ।।
।। युगलम् ।।
कुमारेणाऽथ तेनाशु, परित्यज्य तुरङ्गमम्। करीश्वरः समाहूतः, प्रत्यक्ष इव दण्डवत् ।। ७५ ।।
कुमाररवमाकर्ण्य, क्रुद्धः कुम्भी भयङ्करः। झरन्मदसरित्तूर्णं, दधावे तं प्रति क्रुधा ।। ७६ ।।
स संवेष्ट्योत्तरपटीं, भूतले कटुकाकृतिम्। विमुच्यानुस्थपुच्छेना-रुरोहैष महागजम् ।। ७७ ।।
प्रज्वलन्नथ कोपेन, दवेनारण्यवृक्षवत्। पटीमुल्लालयामास, पुरस्थापणवस्तुवत् ।। ७८ ।।
कुम्भीकुम्भस्थले तेन, मुष्टिनाऽऽहत्य दुष्टधीः। निर्दयं भ्रमितश्चक्र-भ्रमेण भ्रमहारिणा ।। ७९ ।।
वशीकृतः कुमारेण, गजेन्द्रो गजशिक्षया। गृहीतावलिभिर्बाढं, कूर्दते स्थविरेव यत् ।। ८० ।।
दर्शं दर्शमिमां शिक्षां, कुञ्जरस्य नृकुञ्जरः। विसिस्मिये गवाक्षस्थः, सर्वोऽप्याश्चर्यविस्मयी ।। ८१ ।।
राजोचे मन्त्रिणं कोऽय-मथासावुक्तवानिति। कलाचार्यसमीपेऽसौ, पठन्नालोक्यते मया ।। ८२ ।।
वेद्मि नातः परं नाथ! स समाकार्य पृच्छयताम्। नृपाऽऽदेशादसौ प्राप्तो, यथातथमुवाच सः ।। ८३ ।।
देवायं सुन्दरक्षोणी-पालसूनुरनूनधीः। अगडो नाम रोषित्वा, मम पार्श्वमुपागतः ।। ८४ ।।
पृथग्मार्गा अपि गुणा, यस्मिन्नेकत्र संस्थिताः। नानाविभावविभवे, नटीरूपे यथा दृशः ।। ८५ ।।
इदं वाराणसीनाथः, श्रुत्वाऽस्य चरितं वरम्। प्रीत्या कुमारमाह्वातुं, प्रतीहारं व्यसर्जयत् ।। ८६ ।।

१ हस्तिपकैः। २ साद्भुतविस्मयवान्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विज्ञप्तस्तेन विनया-दागतो गजपृष्टिकः । सोऽथ भूमीश्वरादेशा-द्दर्यालमालानितं व्यधात् ॥ ८७ ॥
अथ भूपतिसामीप्य-माप्यैष प्रणतिं व्यधात् । आलिलिङ्गाथ राजापि, चिरागतवयस्यवत् ॥ ८८ ॥
अथोचे भूपतिर्भद्र!, लोकम्प्रीणा गुणास्तव । रूपं स्वरूपं कामस्य, वाणी पीयूषवर्षिणी ॥ ८९ ॥
गजशिक्षासु कौशल्या-त्कला बुबुधिरे मया । ज्ञायते तं सुसिद्धं-यदेकस्यिक्थावलोकनात् ॥९०॥
एवं हर्षपरो राजा, यावत्तिष्ठति तुष्टधीः । तावन्महाजनो लोको, निखिलोऽपि समाययौ ॥ ९१ ॥
प्राभृतं पुरतो न्यस्तं, मुक्तामणिगणोज्ज्वलम् । कुमाराय ददावेष, नान्यथा प्रीतिरेधते ॥ ९२ ॥
अवोचत्काश्यपीनाथः, कार्यज्ञैः कार्यमुच्यताम् । तेषां मुख्योऽवदद्वाग्मी, सधैरं गिरमुज्ज्वलाम् ॥ ९३ ॥
सद्रव्योऽपि तव द्रङ्गो, मुषितः पश्यतः सतः । सुधाभुग्मथिताम्भोधि-साम्यमश्नाति साम्प्रतम् ॥ ९४ ॥
श्रुत्वेदं भूपतिः क्रुद्धो, रे रे नगररक्षक ! । अनाथमिव मे मुष्टं, पश्यतस्तव पत्तनम् ॥ ९५ ॥
तलारक्षोऽप्यभाषिष्ट, स्वामिंस्तस्य ग्रहे मया । उपायाश्चक्रिरेऽनेके, दृष्टो नात्मेव यान्नु ॥ ९६ ॥
चौरस्य निग्रहं कर्तु-मसमर्थोऽस्मि भूपते ! । मन्निग्रहो दस्युरिव, पूज्यपादैर्विधीयते ॥ ९७ ॥
विहस्योचे महाराजः, किमेतद्भवतोदितम् । नान्यस्य वारकेऽप्यन्य-त्कृतान्तेनापि नीयते? ॥९८॥
अत्रान्तरेऽगडः प्रोचे, ससौष्ठवमनिष्ठुरम् । आदेशं देहि तं चौरं, त्वत्पादान्तमुपानये ॥ ९९ ॥
मध्ये सप्तदिनानां तं, न लेभे यदि दैवतः । प्रज्वलज्ज्वलने देव ! तत्पतामि पतङ्गवत् ॥ १०० ॥
सप्रतिज्ञं वचः श्रुत्वा, कौमारं शक्तिभासुरम् । अचिरेण तवाभीष्टं, सिद्ध्येदित्यूचिवान्नृपः ॥ १०१ ॥

पञ्चमो भवः

अगडदत्तकथा

१ हस्तिनम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ जीर्णसुरागार-वेश्मकूपनदीषु च । उद्यानेषु निपानेषु, चत्वरेषु मठेष्वपि ॥ १०२ ॥
ईक्षमाणोऽन्वहं चौरं परिभ्राम्यन्नृपात्मजः । दिवसानतिचक्राम, विक्रमैकधनः स षट् ॥ १०३ ॥
सप्तमे दिवसे प्राप्ते, गृहीतश्चिन्तयासकौ । न मया तस्करो लेभे, तद्वार्ताऽपि न संश्रुता ॥ १०४ ॥
किं व्रजामि विदेशेऽहम्! किंवाऽश्नि गरलं खलु? । धृत्वा तां योषितं यामि, किं वाऽरण्ये सुदुर्गमे ॥ १०५ ॥
अयुक्तमेतन्नः कर्तुं, निर्मलान्वयजन्मिनाम् । जिह्वया यत्प्रतिज्ञातं तत्कार्यमचिरादपि ॥ १०६ ॥
कण्ठपीठे कुमारेण, बाध्यतामसुबन्धनम् । न प्रतिज्ञातवाक्यानि, समुज्झन्ति महाधियः ॥१०७॥
( यतः— )
सकृदपि यत्प्रतिपन्नं तत्कथमपि न त्यजन्ति सत्पुरुषाः। नेन्दुस्त्यजति कलङ्कं नोज्झति वडवानलं सिन्धुः॥१०८॥
इत्थं विकल्पमाधाय, पराह्णे नगराद् बहिः । परिभ्राम्यंस्तरोर्मूले शाड्वलस्य निषेदिवान् ॥ १०९ ॥
इतश्च मुण्डितशिराः, काषायी कुण्डिकाकरः । परिव्राट् तत्र पर्याटीत्, कर्तृकानटनोत्कटः ॥ ११० ॥
तं दृष्ट्वा ध्यातवानेष, चौरोऽयं पुरमोषकः । मुनिर्यदि कथङ्कारम्, कर्तृकां बिभृयात्करे? ॥ १११ ॥
इतः पाखण्डिना तेन, प्रोक्त एवं कुतो भवान्! । कथमेकः कथं शून्य-चेतस्क इव लक्ष्यसे? ॥ ११२ ॥
सेङ्गिताकारकौशल्या-दजल्पीदेवमल्पवाक् । दारिद्र्याऽपहृतो द्रव्य-नामापि हि न शुश्रुवे ॥ ११३ ॥
सोऽभ्यधादथ मा खेदं निधेहि हृदये सुधीः! । अद्रवत्तव दारिद्र्यं, यदाप्तं मम दर्शनम् ॥ ११४ ॥
अथैनं स बभाषे स्म, सर्वं त्वत्तो भविष्यति । कल्पपादपसेवायां, न भवेदीहितं किमु? ॥ ११५ ॥



१ करवाल० ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





(इतश्च–)रविर्दस्युभयेनेव, वसुमानिति वारिधौ। विवेश ध्वान्तमप्युच्चैः, प्रसृतं तत्सखोपमम् ॥ ११६ ॥
धारालं करवालं स, कोशादाकृष्य वित्तहृत् । कुमारेण सहाऽयासीत् , त्वरितं त्वरितैः क्रमैः ॥ ११७ ॥
कस्यचिद्धनिनः खात्रं, श्रीवत्साकृतिवेश्मनि । दत्त्वा वित्तं स जग्राह, कुमारायाऽऽर्पयत्ततः ॥ ११८ ॥
गतप्रत्यागतैर्द्वाभ्या-मित्थमाकृष्य वेश्मनः । जीर्णागारे कृतो भूया-नुत्करः कामितप्रदः ॥ ११९ ॥
देशकुट्यां ततः सुप्तान् , वैदेशिकजनानसौ । भारोद्वाहकृते वित्त-मुत्थाप्यादत्त भूरि च ॥ १२० ॥
कुमारोऽचिन्तयच्चित्ते, यान्तमेतैरिमं समम् । छलेन मारयाम्यद्य, धौतेन तरुवारिणा ॥ १२१ ॥
अथवा च्छलतो हन्तुं न युक्तं राजजन्मिनाम् । छलघातप्रदातारो, यान्त्येव नरकावनिम् ॥ १२२ ॥
पुरीबहिर्गतो रात्रौ, सस्नेहं तानवोचत । स्वपन्तु वाहकाः सर्वे रजन्यस्ति गरीयसी ॥ १२३ ॥
विश्वस्ता वाहकास्तस्मिन्नशेरत तरोरधः । एतौ द्वावपि कापट्य-निद्रया स्वपितस्तराम् ॥ १२४ ॥
परित्राट् निर्घृणः सुप्तान् , चित्रन्यस्तानिवाखिलान् । अवधीदवधिः पापकर्मणां वान्तशर्मणाम् ॥ १२५ ॥
कुमारः करवालं स्वं विधाय करकुड्मले । द्रौमीं निषेदिवान् छाया-मतुच्छातुच्छविक्रमः ॥ १२६ ॥
स्रस्तरेऽथ कुमारस्य, यावदागादसौ लघु । तावदैक्षत रिक्तं तं, विस्मितो मानसे भृशम् ॥ १२७ ॥
विश्वस्तघातकी ! पाप-वातकी ! घोरपातकी ! । अयं न भवसि क्षुद्र !, यातासि यमवेश्मनि ॥ १२८ ॥
एवं द्विस्त्रिर्वदन् राज-नन्दनः करवालभृत् । जघान जङ्घायुगलं जङ्घालार्जितकीर्तिभृत् ॥ १२९ ॥
स पपात महीपीठे, वज्राहत इव द्रुमः । प्राणशेषं परिज्ञाया-त्मानमेवमवोचत ॥ १३० ॥



For Private and Personal Use Only

तुष्टस्त्वद्विक्रमाच्छिष्ट! मां विजानीहि तस्करम् । भुजङ्गं नाम लोकानां, भुजङ्गं गमनाक्षमम् ॥१३१॥
भद्र! श्मशानेऽस्मिन्नस्ति, भूमिगेहे वटादधः । मम वीरमतिं जामिं, गच्छोद्वह कुलोद्वह! ॥ १३२ ॥
गृहाण द्रविणं देहि, दारिद्र्यस्य जलाञ्जलिम् । उपकारपरैर्भाव्यं, प्राणान्ते हि विवेकिभिः ॥१३३॥
एवं जल्पन्नसौ राज-सूनुनाऽऽश्वासितो मृतः । तदर्पितं करात्प्राप्य, करवालमगाद्वटम् ॥ १३४ ॥
गम्भीरेऽथ कृते रावे द्वारमुद्धाट्य चाऽनया । न्यवेश्यताऽऽसने रम्ये, तद्रूपेण व्यमोहत ॥ १३५ ॥
कुतः कार्यादिहाऽऽयातः, कुतो जानासि मद्गृहम्? । इत्युक्तः सौन्दरिः प्रोचे, यथावृत्तं यथातथम् ॥१३६॥
तच्छ्रुत्वा रुषिता योषि-द्विधायाऽऽकारगोपनम् । पातालालयमानीत-स्तोषयित्वा सुभाषितैः ॥१३७॥
सप्रश्रयमुवाचैषा, तव भार्यास्मि सुन्दर! । इदं धनादि मे भ्रात्रा, त्वदर्थे चिरमर्जितम् ॥ १३८ ॥
नीत्वा वासगृहे सोचे, तावत्तिष्ठ गुणाकर! । यावद्विलेपनं गत्वा नयामि भवदन्तिके ॥ १३९ ॥
इत्युक्त्वा साऽगमद्दूरं, कुमारो ह्यचिन्तयत् । अलीकं मूढता माया, मारणं योषितां धनम् ॥ १४० ॥
परिभाव्येति तत्रात्म-प्रतिरूपं विमुच्य सः । अन्यत्र संस्थितो जाग्र-न्नास्ति जागरतां भयम् ॥१४१॥
शयनोपरि तन्माना,-शिला न्यस्ताऽथ यन्त्रतः । सा तया सत्वरं मुक्ता, विश्वासो नास्ति योषितः ॥१४२॥
विज्ञाय चूर्णितमम्रुं, हृष्टाऽभाषिष्ट दुष्टधीः । गतोऽसि मामकभ्रातु-र्मार्गं मदनगर्दभः ॥ १४३ ॥
श्रुत्वेति कुपितः कृष्ट्वा, स केशैस्तामदोऽवदत् । कः क्षितौ चण्डि! मां हन्तुं भटः प्रौढपराक्रमः ? ॥१४४॥

१ अगडदत्तः ।

पञ्चमो भवः

अगडदत्तकथा



For Private and Personal Use Only

तां तल्लक्ष्मीमिवादाय, गतः क्षोणीपतेः पुरः । तास्करं वृत्तमाचख्यौ, तज्जामिग्रहणावधि ॥ १४५ ॥
पूर्वं प्रदर्शितं राज्ञो वटाधो भूमिमन्दिरम् । ग्राहितं नागरं द्रव्य-मर्पितं नामतोऽङ्किनाम् ॥ १४६ ॥
तुष्टेनाथ महीभर्त्रा, कमलेव पयोधिना । दत्ता कमलसेनाऽस्मै पुत्री [1]रूपवनीधरा ॥ १४७ ॥
गजेन्द्राणां शतं ग्राम-सहस्रं [2]मुद्गभोजिनाम् । सहस्रदशकं पत्ति-लक्षं चैकं ददौ नृपः ॥ १४८ ॥
एवं प्राप्तबहुश्रीको, न तुतोष नृपात्मभूः । विना तां श्रेष्ठिनः पुत्रीं, तोषो हि प्रियसङ्गमात् ॥१४९॥

पञ्चमो भवः

अगडदत्तकथा

इतश्च काचिदभ्येत्य, नृपसूनुं व्यजिज्ञपत् । प्रेषिता श्रेष्ठिनः पुत्र्या, पार्श्वे तव गुणानघ ! ॥१५०॥
कथमेनां कुलोत्तंस ! लब्धशंस ! जगत्यपि । बाणैः कुसुमबाणस्य, भिद्यमानामुपेक्षसे ? ॥ १५१ ॥
श्रुत्वेत्यगडदत्तोऽपि त्वत्सखीं सुखिनीं खलु । विधास्याम्यचिरादत्र, शपथाः पूर्वभूभुजाम् ॥१५२॥
वस्त्रालङ्करणैरेनां परितोष्य व्यसर्जयत् । इतश्चाऽऽगुः समादिष्टा, नराः सुन्दरभूभुजा ॥ १५३ ॥
प्रणतस्तैः कुमारोऽथ, हर्षबाष्पालिशालिभिः । असौ स्वागतमङ्गल्यं प्रेम्णा पप्रच्छ सौन्दरः ॥ १५४ ॥
तैरूचे स्वागतं देव ! तव पादप्रसादतः । स्वागतापृच्छकं शीघ्रं, सुन्दरं कारयेश्वरम् ॥ १५५ ॥
पित्रोस्ते विरहे प्राप्ते, ब्राह्मकल्पोपमं दिनम् । घटी दुःखभटी नूनं, त्रियामा त्रियुगायिता ॥ १५६ ॥
श्रुत्वेति पितुरुक्तोऽथ, नृपमापृच्छ्य काशिपम् । प्रयाणैः प्रस्थितो रात्रौ, लात्वा मदनमञ्जरीम् ॥१५७॥
प्रयाणैरुत्प्रयाणैश्च, लङ्घयन्विषयाँल्लघु । विकटामटवीमाट, [3]चाटकैरकटुध्वनिम् ॥ १५८ ॥



---

१ रूपसमूहधारिणी । २ वाजीनाम् । ३ लघुचटकानां कटुध्वनिः यस्यां ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(इतश्च–)अनामया मृतिः स्वान्ते, पाथोदसमयोऽजनि । यस्मिन् गिरिनदीवेगा, वर्द्धयन्ति जलाविलाः॥ १५९॥
एकं वर्षाः परं पल्ली, परं धान्यस्य तुच्छता । एकं मरुः परं ग्रीष्म, इति सत्यं तदाऽभवत् ॥ १६० ॥
इतो नाहलजालानि, चेलुस्तस्य जिघृक्षया । प्रस्तरैर्गोलकैश्चापि, समागत्योपदुद्रुवुः ॥ १६१ ॥
प्रबलं बलमप्यस्य, नाहलौघेन सर्पता । चतुर्दिक्षु विनिक्षिप्तं, वातेनेवाब्दमण्डलम् ॥ १६२ ॥
एकेन स्यन्दनेनाथ स्थितेन नृपजन्मिना । बलाद्भिल्लबलं भग्नं, दुर्जेया एव तादृशाः ॥ १६३ ॥
पलायमानं तद्वीक्ष्य, पल्लीशो रणरङ्गितः । अभियोद्धुमढौकिष्ट, परितोत्साहवर्मितः ॥ १६४ ॥
बाणाबाणि खड्गाखड्गि, कुन्ताकुन्ति तलातलि । भल्लाभल्लि दण्डादण्डि, तयोरित्थमभूद्रणम् ॥ १६५ ॥ पञ्चमो भवः
असमर्थो विजेतु तं, राजसूर्ध्यातवानिति । छलेनापि रिपुर्जेयो, बलीयानबलीयसा ॥ १६६ ॥ अगडदत्तकथा
ध्यात्वेति प्रेयसी न्यस्ता, रथाग्रे स्मरजीवनी । तद्रूपेण विमूढोऽसौ, नारीशस्त्रं हि दुर्जयम् ॥१६७॥
इतो मर्मविघातेनाऽसकौ बाणेन बाधितः । पपात पृथिवीपीठे, मन्मथादिव मूर्च्छितः ॥ १६८ ॥
कुसुमायुधबाणेन, भिन्नोऽहं भवतानघ! । भिद्यते को न कामेन? जितं येन जगत्त्रयम् ॥ १६९ ॥
वदन्निति भटाधीशो, बभूव गतजीवितः । प्रेक्षामास कुमारोऽपि न तुरङ्गरथानपि ॥ १७० ॥
अथैकरथतोऽचालीत् कुमारः पुरसन्मुखम् । विलङ्घ्यनरण्यानी-मेकं व्रजमुदैक्षत ॥ १७१ ॥
इतो व्रजान्नरौ प्राप्तौ, सुन्दरात्मजसन्निधौ, । क्व गन्तासि गुणाम्भोधे! सोऽवादीच्छङ्खपत्तने ॥१७२॥
अथोचतुर्महाभाग ! गच्छावस्त्वत्प्रसादतः । सोऽप्यूचे भवतादेवं भवन्तौ गच्छतां पुरः ॥ १७३ ॥

For Private and Personal Use Only

तयोरेकतरोऽवादी-चौरो दुर्योधनो पटुः। मतङ्गजो महामत्तो, व्यालो दृष्टिविषः किल ॥ १७४ ॥
अन्येऽपि श्वापदाः क्रूराः, कृतान्तानुचरा इव। मार्गेऽस्मिन् भद्र! खेलन्ति, मेलयन्ति यमस्य च ॥१७५॥
कुमारः प्राह भो भद्रौ! मा भैष्टां शिष्टचेष्टितौ। सुखेन कुशलेनापि नये वां शङ्खपत्तने ॥ १७६ ॥
इति तस्य वचः श्रुत्वा, विमुक्तत्रासभासुरौ। चेलतुः राजतुः प्रीत्या, नेमतुस्तत्पदाम्बुजम् ॥ १७७ ॥
अन्येऽपि बहवस्तस्य, मिलिताः पथिकोत्कराः। प्रायः सार्थपसामर्थ्यं सर्वेऽपि हि समीक्ष्यते ॥१७८॥
(इतश्च–)भासितो भसितेनोच्चै-र्जटाजूटेन मण्डितः। सशिष्यनिकरो लिङ्गी, भुजङ्ग इव भीषणः ॥१७९॥
एकः कोऽपि तदाऽऽयात-स्तेनायं भणितो मृदु। त्वया साकं पुरे यामि, शङ्खपुरे मनोहरे ॥ १८० ॥
अपरं मम दीनाराः, प्रदत्ताः पूजकैरलम्। बहवः सन्ति तान् वत्स! गृहाण विभयोऽभवम् ॥ १८१ ॥
व्रजामि तव सार्थेन, मा भैर्मत्तः कदाचन। अथोचे राजसूरेवं, गुरोर्वित्तं न कल्पते ॥ १८२ ॥
इमैर्वाक्यैरसौ दुष्टा-भिप्राय इव लक्षितः। इत्यादयो यतः शङ्कां टीकते हि विवेकिनाम् ॥ १८३ ॥
परिभाव्येति तेनोच्चैः प्रेरिताः प्राँजनैर्हयाः। प्राप्तो महाटवीं भीमां, भयानकरसाऽऽकराम् ॥ १८४ ॥
पाणी संयोज्य सोऽप्यूचे, भो! भो! सार्थस्य पूरुषाः!। मामकीनं वचश्चारु, शृण्वन्तु श्रवणप्रियम् ॥१८५॥
एकं गोकुलमत्रास्ति, गोधनेन समाकुलम्। चतुर्मासकमत्रैव, मयैतद्भद्र! निर्मितम् ॥ १८६ ॥
मयैको गोकुलस्वामी, सोमाख्यः प्रतिबोधितः। अध्वगेभ्यः प्रदत्ते स, भोज्यं दधिपयोयुतम् ॥१८७॥

पञ्चमो भवः

अगडदत्तकथा

१ क्रूरः। २ भस्मना। ३ कशाभिः।



For Private and Personal Use Only

दापयिष्ये ततो भोज्यं, निमन्त्र्येति स कूटधीः । तदर्थमातिथेयार्थी स्वयं वव्राज स व्रजे ॥ १८८ ॥
तद्वृत्तान्तो निषिद्धास्ते, मुहुर्नेत्रनिरीक्षणात् । कुमारेण घृणाढ्येण साधोर्मूलं दयाधनम् ॥ १८९ ॥
सोऽभ्येत्य तत्तदानीय, कुमारं प्रति चावदत् । आतिथेयं गृहाणेदं, भुक्तौ नेति न गद्यते ॥ १९० ॥
कुमारः स्माह मे पर्व-दिनमस्ति प्रशस्तधीः । भुञ्जे भोज्यं यतो नैव, धर्मो नियमपालनात् ॥ १९१ ॥
अथ सार्थनरैः पीतं, पयस्तस्य विषान्वितम् । अज्ञातवित्तशीलाना-मन्नं मार्गे न भुज्यते ॥१९२॥
पयः पीतैरमीभिस्स्वं, जीवितं तत्यजे क्षणात् । तेनापि जगृहे सर्व-महो ! विश्वस्तमारणम् ॥१९३॥
वर्षन् बाणावलीमेष, दधावे भूपजं प्रति । कुमारेणापि बाणेन हतो मर्मणि तस्करः ॥ १९४ ॥
स हतोऽवददुच्चैस्तं रञ्जितस्त्वत्प्रहारतः । परासोर्मम काष्ठानि, त्वया देयानि निश्चितम् ॥ १९५ ॥
अपरं सरितोर्मध्ये, प्रोत्तुङ्गं देवतागृहम् । विभागे तस्य पाश्चात्ये, चतुरस्रा गुरुः शिला ॥ १९६ ॥
तामुत्पाट्य गृहं गच्छे-र्भूमेः सोमवरानन ! । ममास्ति प्रेयसी तत्र, जयश्रीर्नामधेयतः ॥ १९७ ॥
ततो द्रव्यं गृहीत्वोच्चैः, कुरुष्व स्वोचितां क्रियाम् । असावित्यूचिवान्प्राणै-र्मुमुचे व्यथयातुरैः ॥१९८॥
तदुक्तं तत्तथा चक्रे, गतो भूमिगृहेऽसकौ । प्रेक्षितुं तां प्रवृत्तोऽथ, दृशा प्रेमप्रगल्भया ॥ १९९ ॥
ततो मदनमञ्जर्या, कोपारुणितनेत्रया । अप्रशस्तपरीणामा-द्रोषादेषोऽपहस्तितः ॥ २०० ॥
तव कार्ये मया त्यक्तं, पुरं पुरमिवाऽऽत्मनः । त्यक्ता माता पिता बन्धु-स्तव चेष्टेदृशी परम् ॥ २०१ ॥
श्रुत्वेत्यमुष्या वचनं, गुरुवाक्यमिवापरम् । ततोऽचालीद्रथारूढो, नान्यथा प्रेम वर्द्धते ॥ २०२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स गच्छन् विपिने घोर, - उत्त्रासितजनङ्गमे । पूर्ववत् कुञ्जरं वन्यं, वशीचक्रे पराक्रमी ॥ २०३ ॥
इतश्च प्रेक्ष्यत व्यात्तमुखं व्याघ्रं भयङ्करम् । अकृत स्ववशं स्वस्मात्, पौरुषादुल्मुकादिव ॥ २०४ ॥
(इतश्च–)भीयमानां द्विजिह्वार्त्तां, रक्षन्नेष भुजङ्गमम् । सुचिरं खेलयामास, सर्वशिक्षासु कोविदः ॥२०५॥
इत्थं विजितदुर्जयः, पौरुषेयक्रियोत्तरः । प्राप्तः शङ्खपुरे भूपं, प्रणमन्नतमस्तकः ॥ २०६ ॥
आलिङ्गितो भोजितश्च, पृष्टो वृत्तं यथाभवम् । स सर्वं कथयामास, किं गोप्यं तादृशे जने ? ॥ २०७ ॥
पितृभक्तिं वितन्वानो, मन्वानः परमां मुदम् । हायनानतिचक्राम, विक्रमाक्रान्तशात्रवः ॥ २०८ ॥

अन्येद्युर्वसन्तर्त्तुमुद्याने सेवितुं नृपः । कुमारेण सहाऽचालीत् जयन्तेनेव वासवः ॥ २०९ ॥ पञ्चमो भवः
श्रूयते चञ्चरी यत्र, मानिनीमानमर्दनम् । प्रयाणे पञ्चबाणस्य, भेरी भाङ्कारभासुरा ॥ २१० ॥ अगडदत्तकथा
तत्रोद्याने स चिक्रीड नृपचूडामणिः स्वयम् । अपराह्णे कुमारोऽपि वृक्षस्याधो निषेदिवान् ॥ २११ ॥
मृदुपल्लवतल्पेषु, सुप्ता मदनमञ्जरी । विलासभ्रमराऽऽधारा माकन्दस्येव मञ्जरी ॥ २१२ ॥
मूर्तिमानिव कीनाशो, विषद्रुरिव जङ्गमः । सर्पः सदर्प्पो निद्राणां वामपाणौ ददंश ताम् ॥ २१३ ॥
उ इति व्याहरन्त्युच्चै - रटन्ती कटुकध्वनिम् । कम्पमाना छिन्नपुच्छ - मूलेव गृहगोधिका ॥ २१४ ॥
अतुच्छविषमूर्च्छाभि - घूर्ण्यमानविलोचना । अथो मद्यप्रमत्तेव, तस्याङ्के न्यपतत्तराम् ॥ २१५ ॥
लेप्यभूरिव निश्चेष्टा, क्षणादजनि भामिनी । अप्यसौ तद्विषावेग - निमग्नवदचेष्टत ॥ २१६ ॥

१ ज्वलदङ्गारेणेव । २ जामिनी क० ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षणादात्मानमाश्वास्य, कुमारो ध्यातवानिति । राजा स्वयं पुरे प्राप्त - स्तुच्छः परिकरो मम ॥ २१७ ॥
शीघ्रमेनां विधास्यामि, भस्मसादात्मना समम् । यदि ज्ञास्यति भूपालो, निषेधं मे विधास्यति ॥२१८॥
ध्यात्वेति प्रतिषेध्योच्चैः परिवारं कथञ्चन । स चितां प्रगुणीचक्रे, ज्वलज्ज्वलनभीषणाम् ॥ २१९ ॥
सचेलं स्नानमाधाय, बिभ्राणोऽङ्के सुलोचनाम् । सोऽग्नौ प्रवेष्टुमीष्टे स्म, सम्भाव्यं प्रेमतोऽखिलम् ॥२२०॥
विद्याभृद्युगलं तत्र, प्रबलं सबलं धिया । अवाततार नभसा, रभसा विजितानिलम् ॥ २२१ ॥
ताभ्यामुक्तः कुमारोऽथ, किमिदं भो विचेष्टसे । आत्मानं प्रक्षिपन्नग्नौ, पतङ्ग इव लक्षितः ॥ २२२ ॥
आवामिदं कलत्रं ते, करिष्यावो गलद्विषम् । मा मुञ्च जीवितं स्वीयं, केयं विषबिभीषिका ? ॥ २२३ ॥
इत्युक्त्वा त्रिर्जलेनेय - माच्छोट्य विषमोटिताम् । वेगेन निर्विषीचक्रे, मन्त्रात्सर्वं हि सिध्यति ॥२२४॥
सुप्तोत्थितेव सोत्तस्थौ संवृण्वाना वपुर्लताम् । प्रारब्धं किमिदं नाथ !, भाषमाणेति कोमलम् ॥२२५॥
यावत् कुमारो हृष्टोऽसौ, निरैक्षिष्ट सुलोचनाम् । भीतं प्रत्युपकारात्त - द्युगलं व्योम्नि सर्प्पितम् ॥२२६॥
इतश्च रजनी जज्ञे, कुमारोऽपि प्रियावृतः । आसन्ने देवतागारे, स्थितो मुक्तपरिच्छदः ॥ २२७ ॥
अञ्जनाद्रेरिवोत्पन्नं, पातालविवरादिव । सूचीभेद्यं तदा ध्वान्तं, प्रससार रसातले ॥ २२८ ॥
वल्लभे ! निर्भयीभूय, तावदाऽऽस्स्व सुरौकसि । यावत्तमोपहं वह्नि - मानये दूरदेशतः ॥ २२९ ॥
उक्त्वेति सत्वरं गत्वा, यावदागात्सुरौकसि । उद्योतो ददृशेऽनेन, विद्युद्दीप्तिरिवाऽपरः ॥ २३० ॥
प्रियेऽत्र कथमुद्योतः, साशङ्कमिति सोऽवदत् । सोचे देव ! तव कर - वह्नेरुद्योतविस्तरः ॥ २३१ ॥

For Private and Personal Use Only

अर्पयत्करवालं स, प्रियायाः स्वकराम्बुजात् । भूमीविन्यस्तजानुः स, धमितुं तं समुद्यतः ॥ २३२ ॥
तावत्कोशपरिभ्रष्टः, सशब्दस्तत्कराम्बुजात् । मेदिन्यां न्यपतत् खड्गो, वज्राशनिरिवाञ्जसा ॥ २३३ ॥
सम्भ्रान्तोऽपृच्छदेनां तु स्वभावसरलाशयः । कथं कोशपरिभ्रष्ट-खड्गोऽयं पतितो भुवि ॥ २३४ ॥
सोचे नाथ ! महामोहा-दधः कोशो मया धृतः । तदेष तरवारिर्मे, पतितः करकुड्मलात् ॥ २३५ ॥
अथ निर्भ्रान्तचेतस्कः, प्रज्वाल्य ज्वलनं तदा । रजनीं वाहयामास, भव्यैर्नव्यै-रतोत्सवैः ॥ २३६ ॥
प्रातः प्राप्तः पुरे राज-प्रसूः प्रमुदिताशयः । तया सार्कं सिषेवेऽथ, सुखं विषयसम्भवम् ॥ २३७ ॥



अन्यदा तुरगेणैष, शिक्षया विपरीतया । वाह्याल्यामपजह्रे द्रा-ग्यथा तूलो नभस्वता ॥ २३८ ॥
निन्ये महाटवीं वाजी, कुमारं देवतासखम् । अचिन्तितो भवेद्विघ्नो, यथा मृत्युरचिन्तितः ॥ २३९ ॥
विमुच्य तुरगं वेगा-द्दुःशिक्षितमिवात्मजम् । भ्राम्यन् वने महाघोरे, जिनागारमुदैक्षत ॥ २४० ॥
तत्राद्राक्षीन्मुनिं शान्तं, विजितेन्द्रियपञ्चकम् । चारणं चारुचारित्रं, चञ्चच्चामीकरच्छविम् ॥ २४१ ॥
साहसगतिरित्याख्या-विख्यातं क्षितिमण्डले । तन्वानं देशनां स्फूर्जन्महापङ्कनदीरयाम् ॥२४२॥युग्मम्॥
प्रणिपत्य मुनिं भक्त्या, न्यविक्षन्नृपनन्दनः । आसाद्यावसरं प्रोचे, किमेते पञ्चपूरुषाः ॥ २४३ ॥
निसर्गरूपसुभगा युवानो नलिनाननाः । कथमिच्छन्ति चारित्रं, तदाऽऽवेदय धीधन ! ॥ २४४ ॥
अथोवाच महासत्त्वः, सत्त्वराशिहितोद्यतः । भीमानामेति पल्ल्यस्ति, चौरहल्लीसकाऽऽकुला ॥ २४५ ॥
क्षत्रियान्वयसम्भूतः पल्लीशो धरणीधरः । भिल्लैः परिवृतः पल्लीं, पपौ विपुलविक्रमः ॥ २४६ ॥

अन्येद्युर्नृपभूः कोऽपि, पल्यामागाद्रथस्थितः । सार्धं तेन महायुद्धं, प्रावर्तत शराशरि ॥ २४७ ॥
असमर्थो बलाज्जेतुं, कुमारश्छलकूटधीः । रथाग्रे स्थापयामास प्रेयसीं सुभगाकृतिम् ॥ २४८ ॥
तद्गतप्रीतदृग्द्वन्द्वः, स मर्मणि हतः शरैः । सुजेया लोहजा बाणा दुर्जेया नेत्रजाः पुनः ॥२४९॥
अथ राजसुतस्तूर्णंस्तूर्णं पूर्णमनोरथः । गतः शङ्खपुरे स्वस्मिंश्चिरेण काङ्क्षिते मुदा ॥ २५० ॥
पल्लीशं भ्रातरः पञ्चः ज्येष्ठं दृष्ट्वाऽथ [1]संस्थितम् । तत्प्रहर्तुमधावन्त, रथमार्गानुसारतः ॥ २५१ ॥
दृष्ट्वा शङ्खपुरे राज-नन्दनं पत्तिमध्यगम् । पश्यन्तो मारणे छिद्रं, चिरं तस्थुर्यथा तथा ॥ २५२ ॥
अन्यदोद्यानदेवौको-मध्यगो राजनन्दनः । एकाकी ददृशे रात्रा-वमीभिः खड्गपाणिभिः ॥ २५३ ॥
इतो ध्वान्ते ततो राज-नन्दनो वह्नये गतः । आसीना अभवन्नेते, पूर्वं देवमहौकसि ॥ २५४ ॥
पूर्वं छन्नः कृतो दीप,-एतज्ज्येष्ठेन बन्धुना । सम्प्राप्यावसरं देव-मन्दिरान्तःस्फुटीकृतः ॥ २५५ ॥
ततस्तस्य कुरङ्गाक्ष्या, दीपोद्द्योतेन सर्प्पता । दृष्टः सैष पुमान्देह-श्रिया स्वर्गीव भूचरः ॥ २५६ ॥
तया निभालितः प्रेम-पूर्णया सुचिरं दृशा । वैरीव तत्पुरं कामो ज्वालयामासिवानथ ॥ २५७ ॥
तयासौ भणितः कामं, कामसन्तप्तगात्रया । अङ्गं मनोभवावेश-विवशं मे निरूपय ॥ २५८ ॥
किमिद सुतनो ! वक्षि ?, मम प्राणान्तकारकम् । ज्ञाता चेद्वल्लभस्तेऽद्य, भवेत्किं क्षेममावयोः ॥२५९॥
तयोचे भद्र ! मा कार्षी-र्भीरुत्वं भीरुसम्भवम् । अमुं व्यापादयिष्यामि, पश्यतस्तव खड्गतः ॥२६०॥

पञ्चमो भवः

अगडदत्तकथा

---

१ मृतम् ।

इतश्चागात्कुमारोऽपि वह्निमादाय सत्वरम् । प्रससर्पत्कथं दीपो-द्द्योतोऽयमिति सोऽवदत् ॥ २६१ ॥
तदा चेलाञ्चलाक्षेपा-द्धरणीधरबन्धुना । निर्वापितः प्रदीपोऽयं, कृतान्तेनेव देहभृत् ॥ २६२ ॥
साऽभ्यधादथ त्वद्वह्नेः प्रद्योतः प्रससर्प सः । प्रायस्तेजस्विनां तेजः पूर एव प्रसर्प्पति ॥ २६३ ॥
तरवारिं प्रियापाणौ, समर्प्य नृपनन्दनः । वह्निर्दन्ध्मीयते यावन्, मुखवाते विमुञ्चति ॥ २६४ ॥
तावत्तिमिरसाहाय्या-त्कोशादाकृष्य तं सितम् । मुष्णातिप्रेमसन्दर्भात्, प्रहारं दातुमुद्यता ॥ २६५ ॥
अथैतेन दयार्द्रेण, कृपाणः पातितः क्षितौ । करभोरोः स्वकरभा-दाहत्य करभं तदा ॥ २६६ ॥
ततस्तस्माद्विनिर्गत्य भ्रातॄणां भयवर्जितः । स्त्रीचरित्रं विवव्रेऽथ शमिनामुपकारकम् ॥ २६७ ॥

(यतः–) वनमृगवधूमुग्धाः प्रौढाः परं परवञ्चने तनुवितरणे सक्ताः पुंसां हरन्ति च जीवितम् ।
विदधति भयं पुष्पापाते विशन्ति च पावकम्, सरलकुटिला न ज्ञायन्ते विचारशतैः स्त्रियः ॥ २६८ ॥
यो मूर्ध्नि विधृतः कुम्भः, पाशस्तस्यापि योषिता । विधीयते कण्ठपीठे, जलार्थं ही मृगीदृशा ॥ २६९ ॥
ध्यात्वेत्यदः समागच्छ-न्नेते सर्वे मदन्तिके । संसारैकभयभ्रान्ता, जिनं शरणमन्वगुः ॥ २७० ॥
निशम्येदं मुनेरुक्तं, चरित्रं च प्रियाकृतम् । कुमारः सर्तुमारब्धो, धिक् चरित्रं मृगीदृशः ॥ २७१ ॥
क्षणादेव विरज्यन्ते, रज्यन्ते च क्षणादपि । चलस्वभावाः सुदृशो, हरिद्रारागसन्निभाः ॥ २७२ ॥
हृदये निष्ठुराः कामं, दृश्यमाना मनोहराः । वनिता नमिताः कान्त्या, सुवर्णक्षुरिकोपमाः ॥ २७३ ॥
इन्दोरप्युज्ज्वलं हन्त ! यत्कृते दूषितं कुलम् । तस्येदृशी क्रिया घोरा, नाहं वैरङ्गिकोऽभवम् ॥ २७४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादि चिन्तयंश्चित्ते, स वैराग्यमुपागतः । उवाच चारणं साधुं, सोऽहमस्म्यगडो गुरो! ॥ २७५ ॥
विषयेभ्यो विरक्तोऽहं, सक्तोऽहं तव वर्त्मनि । स्त्रीनाम्नोऽपि बिभेम्युच्चैः, कृष्टासेरिव कातरः ॥२७६॥
अमीषामग्रजस्याहं, घातकः कैतवादपि । तत्पापं क्षालयिष्यामि, त्वत्पादाराधनाधनः ॥ २७७ ॥
कुरु व्रतप्रसादेन, प्रसादं विशदाशय! । प्रव्रज्या सर्वपापघ्नी, दात्री निर्वाणसम्पदाम् ॥ २७८ ॥
ततो भावं परिज्ञाय, साहसगतिसाधुना । प्रव्राजिता षडप्येते, संवेगरसरङ्गिणः ॥ २७९ ॥
यथोदितं व्रतं कृत्वा, ते सर्वेऽपि समाहिताः । सुगतिं प्रापुराश्रित्य, भावनां भवतारिणीम् ॥ २८० ॥
कलिकपटकोटिकूटा समेखला मदनबाणसम्वलिता । दूरस्था रम्यतरा क्षिति-धरराजीव रक्ताक्षी ॥२८१॥ पञ्चमो भवः
वज्रकुण्डल! लोलाक्षी-सङ्गं त्यज भज व्रताम् । देवान् यज जय द्वेषं, नयात्मानं नयाध्वनि ॥२८२॥ अगडदत्तकथा
वज्रकुण्डल ऊचेऽथ निषम्यैनां महत्तम! । गतं मम कथाभानो-र्नारीरूपं महत्तमः ॥ २८३ ॥
वनिताऽगडदत्तस्य, नाऽभून्मृत्यूद्यतस्य या । सान्यस्य स्यात्कथङ्कारं, नारीप्रकृतिरस्थिरा ॥ २८४ ॥
एतावन्ति दिनान्यस्थाम्, यदहं रतिसागरे । मग्नः पाठीनवत्कूर्णं[1] मन्त्रि-राज! क्षमस्व तत् ॥ २८५ ॥
महामात्यं कुमाराणां, पितेव परशिक्षया । गुरुवद्गुरुवात्सल्यात्, साध्वाचारप्रदर्शनात् ॥ २८६ ॥
अतः परं मया दध्रे, परदारविवर्जनम् । सान्निधौ तत्रभवतो, भवतः सद्गुरोरिव ॥ २८७ ॥
वस्त्राद्यैः पूजयित्वामुं व्यसृजन्नरदेवभूः । उपदेशो हि पात्रेषु, वर्द्धतेऽम्बुनि तैलवत् ॥ २८८ ॥

---

१ मत्स्यवत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्येद्युश्च यशःसूरि–रागादुद्यानमुत्तमम् । इयाय वन्दितुममुं वज्रनाभोऽपि चक्रभृत् ॥२८९॥
सार्द्धं तेनागमचश्चन्माणिक्यमणिकुण्डलः । धर्मसत्रैर्वृतो मित्रैः, कुमारो वज्रकुण्डलः ॥ २९० ॥
त्रिश्च प्रदक्षिणीकृत्य, राजाऽवन्दत सद्गुरुम् । कुमारोऽपि स्फुरद्भावः, सुता हि पितृमार्गगाः ॥२९१॥
ऊचे सूरिरिति प्राप्य, मानुष्यं हन्त दुर्लभम् । न प्रमादः शुभैः कार्यः प्रमादः प्रथमो रिपुः ॥२९२॥
सत्वरं गत्वरं हन्त, यौवनं स्मृतिभूवनम् । शरीरिणां जीवितव्यं, विद्युदाटोपपेटकम् ॥ २९३ ॥
धनं विघटते वेगात्, सोदरोऽपि सुतोऽपि च । न पुनस्तीर्थकृद्धर्म्मः कृतः स्वल्पोऽपि जातुचित् ॥२९४॥
इति श्रुत्वा वज्रनाभो, व्रतेच्छुश्चक्रवर्त्यभूत् । वैराग्यं परमं स्तोककर्म्मणां श्रुतिसङ्गमात् ॥ २९५ ॥
राज्ये चक्रधरोऽन्यस्त, कुमारं मणिकुण्डलम् । प्रवव्राज स्वयं सूरेः, सन्निधौ शुभवासनः ॥ २९६ ॥
प्राव्राजीद्भूभुजा साकम्, सती देवी शुभावती । बह्वीभिर्नृपपत्नीभि-र्महतां स्वपरिच्छदः ॥ २९७ ॥
अन्यत्र विहृतः सूरिः नवीनैः साधुभिः समम् । क्रमाच्च निर्वृतिं प्राप, वज्रनाभः प्रियान्वितः ॥२९८॥
वज्रकुण्डलभूपालः, पालयन्निखिलामिलाम् । दुःसाध्यान्साधयामास, द्वितीय इव चक्रभृत् ॥२९९॥
बहूनि पूर्वलक्षाणि, गन्धमादनपूःपतिः । सुखेन गमयामास, जिनधर्मपरायणः ॥ ३०० ॥
कलाकलापपारीणः, सकलैः कलितो गुणैः । कामदेवाभिधो मुख्य-बान्धवो रतिवल्लभः ॥ ३०१ ॥
अन्येद्युरश्ववारौघैः, कामाद्यैः पर्यलङ्कृतः । निर्गतो हयवाह्याल्यां, कौतुकी मणिकुण्डलः ॥ ३०२ ॥
पपातासनशैथिल्यात्, कामदेवः प्रमादतः । न केनापि हि विज्ञातो, यद्भाव्यं भवतीति तत् ॥३०३॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुरङ्गमखुराग्रैः स, खण्डितो जीर्णपत्रवत् । सोऽवाप निधनं मृत्योः, कालः केनाभिभूयते? ॥ ३०४ ॥
ततो गतवता सौधं, भूभुजा जिनवन्दनम् । विधाय वेत्रभृत्पृष्टः, कामः कास्ति सहोदरः? ॥ ३०५ ॥
ततो वेत्रभृता विष्वग्, वीक्षमाणेन तत्त्वतः । अलभ्यत गतप्राणः, कामदेवः कदर्थितः ॥ ३०६ ॥
एत्य विज्ञपयामास, राजानं वेत्रभृत्तदा । कामदेवस्तुरङ्गस्य, पृष्टान्निपतितः क्षितौ ॥ ३०७ ॥
राजोवाच स शोकार्त्तः, सम्फेटो वाजिनां यदा । तदा भ्राता कामदेवस्तुरगात्पतितः क्षिता ॥३०८॥
ओमिति प्रोदिते तेन, भूपालो मणिकुण्डलः । व्यचरत्पादचारेण, शोके नो नृत्वमीदृशम् ॥३०९॥
तच्छ्रुत्वा कामदेवस्य, वल्लभा रतिसञ्ज्ञिका । नृपेण सार्द्धमगम-त्तस्य मार्गयियासया ॥ ३१० ॥
खुरैस्तुरङ्गमैस्तीक्ष्णैः, खण्डितं दृष्टवानमुम् । आक्रन्दं चकवान् भूप-स्ततः कण्ठप्रमाणतः ॥ ३११ ॥
मीलद्विलोचनपुटो, मूर्च्छाछिदुरचेतनः । विधृतो मन्त्रिसामन्तैः, पतन् भूपः कथञ्चन ॥ ३१२ ॥
कथञ्चित् चेतनां प्राप्य, स्वस्थोऽभूद्भूपतिस्ततः । तद्वद्रतिप्रिया मुख्य-शोकः सर्वेषु पूर्यते ॥ ३१३ ॥
देवानुगन्तुं भर्तार-मनुमन्यस्व मामिह । पत्यौ मृते गते क्वापि, जीवन्त्योऽपि मृताः स्त्रियः ॥३१४॥
रे! रे! जीव! कथङ्कारं, नानुयासि स्वयं पतिम् । हिमांशुमनुयात्येव कौमुदी परलोकगम् ॥३१५॥
इत्युक्तिवादिनीं देवी-मुवाच मणिकुण्डलः । युक्तमुक्तं त्वया सम्यक्, परं गर्भवती सती ॥ ३१६ ॥
श्रुत्वेति कामदेवस्य, प्रियाऽतिष्ठदशोकधीः । भ्रूणहत्या विधातव्या, कथङ्कारं विवेकिना? ॥ ३१७ ॥
अथोचे जिनदत्ताख्यो, मित्रं मन्त्री नृपं प्रति । कः शोको ज्ञाततत्त्वानां भावितानां जिनागमे ॥३१८॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जीवाः सर्वेषु तत्त्वेन, भ्रातृत्वेनापि जज्ञिरे । सम्बन्धः किं स कोऽप्यस्ति, स्पृष्टः कर्म्मवशैर्न यः ? ॥३१९॥
अनेकानि सहस्राणि, चक्रवर्तिशतानि च । निर्वापितानि कालेन, प्रदीपा इव वायुना ॥ ३२० ॥
प्रतिबोध्येति भूपालं, जिनदत्तोऽप्यशोकयत् । कथञ्चिद्भोजयामास, कामदेवप्रियामपि ॥ ३२१ ॥
पूर्णेषु नवमासेषु, रतिः सूनुमसूत सा । प्रतापदेव इत्याख्यां, चक्रवान् जगतीपतिः ॥ ३२२ ॥
वज्रकुण्डलबोधार्थ-मिति विमलसाधुराट् । तत्रागात्समये वृष्टि-र्जायते सस्यवर्द्धिनी ॥३२३॥
वज्रकुण्डलभूमीशो, वन्दितुं सपरिच्छदः । अगाद्ववन्दे सुगुरु-मसौ चक्रे च देशनाम् ॥ ३२४ ॥
चक्रिणा वज्रनाभेन, क्षुण्णाया व्रतपद्धतेः । न दुष्करं महीपाल !, तद्व्रतं भज साम्प्रतम् ॥ ३२५ ॥
स्वामिन् ! मम मनोभावं, ज्ञानाद्विज्ञातवानसि । ममाभिप्रायतोऽप्यत्र, समागा मुनिसत्तम ! ॥ ३२६ ॥
ततो नत्वा गुरुं वज्र-कुण्डलः क्षितिवासवः । प्रतापदेवं साम्राज्ये, न्यस्य भ्रातृतनूद्भवम् ॥ ३२७ ॥
वन्द्यमानगुणग्रामो, बन्दिभिर्विरवोलिना । स्थाने स्थाने ददानोऽथ, दानमर्थिषु चिन्तितम् ॥३२८॥
मन्त्रिणा पञ्चशत्याऽसौ, कामस्य प्रियया समम् । अभून्महीश्वरो राज-संयमी संयमप्रियः ॥३२९॥ [युग्मम्]
वज्रकुण्डलराजर्षि-रधीयानो जिनागमम् । आचार्यविमलेनासौ, पदे न्यस्तः शुभे दिने ॥ ३३० ॥
महत्तरापदे न्यस्ता ज्ञातजैनागमा रतिः । सर्वातिशयपूर्णानां, महतां हि पदं महत् ॥ ३३१ ॥
रतिमहत्तरा तस्त्वा, दुष्करं सुतपस्ततः । देवभूयमगादेषा, प्राप्स्यते निर्वृतिं ततः ॥ ३३२ ॥
जगाम विमलाचार्यो, दिवं संलेखनाकृतः । प्रत्यबोधयदुर्वीं च, वज्रकुण्डलसाधुराट् ॥ ३३३ ॥

पञ्चमो भवः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वज्रर्षिर्ज्ञातपर्यन्तो, विदधे मासिकं तपः । कृत्वा तं¹रूपगमनं, प्राणांस्तत्याज शुद्धधीः ॥ ३३४ ॥ षष्ठो भवः
ब्रह्मलोके समुत्पन्नो, देवत्वे भूरिवित्तवान् । दं²शसिन्धूपमायुष्क-स्तत्रासौ बुभुजे सुखम् ॥ ३३५ ॥

इति पञ्चम-षष्ठौ भवौ ।

---

## अथ सप्तमः भवः ।

इतश्च जम्बूद्वीपेऽस्मिन्, विदेहेषु मनोहरा । पुरी चन्द्रपुरी नाम, चम्पेत्यपरसञ्ज्ञिका ॥ ३३६ ॥
नरपुङ्गव इत्याख्यस्तत्राऽभून्नरपुङ्गवः । पुण्यश्रीः प्रेयसी तस्य, पुण्यश्रीरिव देहिनी ॥ ३३७ ॥
परिपूर्य निजायुष्कं, वज्रकुण्डलनाकसत् । तस्याः कुक्षाववातारी-दमारीकृतभूतलः ॥ ३३८ ॥ सप्तमो भवः
शुभेऽह्नयसूत सा सुतं, प्राचीव म³हसांपतिम् । महोत्सववरं राजा, वर्द्धापनमकारयत् ॥ ३३९ ॥
श्रीमर्मेति नृपश्चक्रे, नामेत्यस्य यथाविधि । सुरज्येष्ठ इति प्रीतो, द्वितीयं चाऽतिरूपतः ॥ ३४० ॥
धात्रीभिः पाल्यमानोऽसौ, लाल्यमानः कराम्बुजैः । क्रीड्यमानस्तु खेलाभिः, स यौवनमुपेयिवान् ॥३४१॥
वसन्तश्रीप्रभृतिकाः, कन्यकाः काश्यपीभुजाम् । नरपुङ्गवभूपालो, नन्दनं पर्यणाययत् ॥३४२॥
नरपुङ्गवभूपेन, परलोकं प्रपित्सुना । सुरज्येष्ठो निजे राज्ये, चक्रे शक्र इवौजसा ॥ ३४३ ॥
विलासहंसिकापद्मं, निच्छद्मप्रेममन्दिरम् । राज्यश्रीः प्रेयसी तस्य, राज्यश्रीरिव देहिनी ॥ ३४४ ॥

---

१ पादपोपगमननामानमनशनम् । २ दशसागरोपमायुः । ३ सूर्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कदाचित् खेलयामास, गजानैरावतद्युतीन् । शक्रवद्विविधैः सार्कं, सुरज्येष्ठमहीपतिः ॥ ३४५ ॥
कदाचिदुद्यानगतो, वृत्तो मित्रैर्गुणैरिव । चिक्रीड विविधैः क्रीडा-चक्रैर्वक्रेतराशयः ॥ ३४६ ॥
कदाचिदुच्चैःश्रवसः, सोदरान्भूगतानिव । लातपातस्फुरद्धोर्य-वर्यान्सोऽश्वानवाहयत् ॥ ३४७ ॥
कदाचिच्चित्रकाव्यानां, रहस्यानि व्यचारयत् । एकस्थानधियाऽऽसीनैः, रसैः सर्वैरिव स्थितैः ॥ ३४८ ॥
न सीदति यथा धर्मो, नार्थो याति क्षयं तथा । यथा न तरलायन्ते, बाह्याभ्यन्तरवैरिणः ॥ ३४९ ॥
यथा न स्थानविन्यस्तः, प्रकृत्यपि विरज्यते । संसाराशेषसर्वस्व-मन्वभूद्भूपतिस्तथा ॥ ३५० ॥

सप्तमो भवः

पुर्यामन्येद्युरुद्याने, नाम्ना नन्दनसञ्ज्ञिके । हृदयानन्दनो नाम, मुनिरागान्महातपाः ॥३५१॥
तदागमनमङ्गल्य-माकर्ण्यारामपालकात् । यथेच्छं पीतपीयूष-गण्डूष इव सोऽहृषत् ॥ ३५२ ॥
तं नमस्कर्तुमुर्वीश-श्चचालाऽचलमानसः । पिदधानो वरच्छत्र-र्दिवं हंसगणैरिव ॥ ३५३ ॥
दन्तावलैर्बलोद्दामै-रैरभ्रमुवल्लभायितः । तुरगैश्चापि मार्त्तण्ड-रथादपहृतैरिव ॥ ३५४ ॥
रथैः श्रोत्रपथाध्वन्य-चारुचीत्कारबन्धुरः । अनन्तैर्भक्तसामन्तैः, समन्तात् परिवारितः ॥ ३५५ ॥
भूचरस्वर्वधूभ्रान्ति-प्रदवारपुरन्ध्रिभिः । चामरैः रत्नखचितै-र्वीज्यमानः पदे पदे ॥ ३५६ ॥
बन्दिभोगावलीपाठ-स्पर्धाप्रसृमरैरिव । नादैर्मङ्गलतूर्याणां, पिदधद्रोदसीतलम् ॥ ३५७ ॥
धर्म्मसत्रैर्वृतो मित्रै-रनेकैः श्रीविकस्वरैः । पदातिभिश्च पारीन्द्र-प्रौढविक्रमविश्रुतैः ॥ ३५८ ॥



१ धोर्यं-अश्वस्य प्रथमा गतिः । २ ऐरावतसमैः ।

For Private and Personal Use Only

गजेन्द्रस्कन्धमारूढः, प्रौढप्रसूतभावनः । तमुद्यानमथ प्राप, नन्दनं वासवो यथा ॥ ३५९ ॥
॥ सप्तभिः कुलकम् ॥
दूरादेव वनीनाथः, करिस्कन्धान्मदादिव । उत्तीर्य राजचिह्नानि, पश्चाऽमुञ्चत्समाहितः ॥ ३६० ॥
क्रोधान्धकारमार्त्तण्डं, मानाचलपविप्रभम् । मायावल्लीतुषाराभं, लोभाम्बुधिघटोद्भवम् ॥ ३६१ ॥
आरामं साम्यवल्लीना-मभिरामं महाव्रतैः । आत्मारामं महासत्त्वं, मुक्तरागं विरागतः ॥ ३६२ ॥
लब्धिरत्नाकरं श्रीम-ज्जिनधर्ममिवाङ्गिनम् । हृदयानन्दनं नाम, महामुनिमलोकत ॥ ३६३ ॥
॥ त्रिभिर्विशेषकम् ॥
अथ प्रदक्षिणीकृत्य, मुनिनाथं जिनेन्द्रवत् । पुलकच्छद्मना बिभ्र-द्भक्तिं मूर्तां ननाम तम् ॥ ३६४ ॥



कांश्चित्पद्मासनासीनान् कांश्चिद्वज्रासनाश्रितान् । कायोत्सर्गस्थितान् कांश्चि-त्कांश्चिदर्धासनाश्रितान् ॥३६५॥
कांश्चन शीलाङ्गरथ-परावर्तनतत्परान् । कांश्चिदक्षैर्विनिक्षिप्तै-र्भङ्गानानयतो भृशम् ॥ ३६६ ॥
कालानुष्ठाननिष्ठांस्तां-स्तत्त्वाम्नान्यादृशोऽपि कान् । सिद्धान्तवाचिकं कांश्चित् कुर्वाणान् परया मुदा ॥३६७॥
पात्रलेपपरान् कांश्चित् कांश्चिन्मानमुपागतान् । शैक्षान् शिक्षयतः कांश्चि-त्कांश्चिच्च पठतः पटु ॥३६८॥
कांश्चित्कर्म्मप्रकृत्यादि-विचारग्रंथनिर्णयम् । कुर्वाणांश्चूर्णिभाष्याद्यैः, पदव्याख्याप्रकाशनैः ॥३६९॥
कांश्चित्प्रकरणान्युच्चै-र्नूतनानि प्रकुर्वतः । वन्द्यान्ववन्दे निर्ग्रन्थान्, क्षमाश्रमणपूर्वकम् ॥ ३७० ॥
॥ षड्भिः कुलकम् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथ नत्वा पुनः सूरिं, भूरिभावमनोहरः । मित्रैः सार्धमुपाविक्ष-च्चक्रे च विनयाञ्जलिम् ॥३७१॥
इतश्चम्पामहापुर्यां, जयदत्तावुपासकौ । ववन्दाते मुनिं भक्त्या, द्रव्यभावविभेदतः ॥ ३७२ ॥
मुनिप्रणीतसद्धर्म-देशनावसरक्षणम् । प्राप्याऽभाषिष्ट सुश्राद्धो, जयो गम्भीरया गिरा ॥ ३७३ ॥
एतस्यां चम्पानगर्यां, गर्भश्राद्धो जयोऽस्म्यहम् । अयं दत्ताभिधः कुल्य-मिथ्यात्वग्रहिलाशयः ॥३७४॥
जिनदासाभिधः श्राद्धो, दृष्टान्तैर्विविधैर्नवैः । दत्तं प्रबोधयामास, मोचयामास दुर्गतेः ॥ ३७५ ॥
धुर्येष्विव सुतेषूच्चै-र्न्यस्यौकोभारसम्पदम् । जन्मदीक्षादितीर्थेषु, वन्दमानो जिनेश्वरान् ॥ ३७६ ॥
साधून् जङ्गमतीर्थांश्च, नमस्कुर्वन्पुरे पुरे । वर्षाणि द्वादशाऽभ्राम्यज्जिनदास उपासकः ॥ ३७७ ॥युग्मम्॥
आगादिदानीमेतस्यां, स पुर्यां श्रावकाग्रणीः । भगवन्तो भवन्तोऽपि भवान्तकरणोद्यताः ॥ ३७८ ॥ लग्नो भवः
भवतस्तत्रभवतः प्राप्तान्नन्तुं महानघान् । दत्तमाह्वातुमगम-मवदं भवदागमम् ॥ ३७९ ॥
दत्तः प्रोवाच मे धर्मा-चार्यो मात्सर्यवर्जितः । जिनदासाभिधोऽभ्यागा-दद्य तर्हि महामनाः ॥३८०॥
अप्रणम्य सुहृद्धर्मा-चार्यं वन्दे कथं मुनिम् ? । प्रतिबध्नाति हि श्रेयः, पूज्यपूजाव्यतिक्रमः ॥३८१॥
अयमर्थोऽमुनाभाणि, किमयुक्तः किमन्यथा । मुनिनन्दन ! मे भिंद्धि, संदेहं सत्कथानकात् ॥३८२॥ ॥ ३२ ॥
अथोवाच मुनिरेहि, ध्वान्तभ्रंशनिशात्ययः । शृणु श्रोत्ररसास्वाद्यं, युगबाह्वोर्निदर्शनम् ॥ ३८३ ॥ युगबाहु-निदर्शनम्
अस्ति स्वस्तिनिभं धात्र्यां, नाम्ना पुरं सुदर्शनम् । हस्तियूथैरिवाकीर्णं, जनैर्दानकरोन्नतः ॥३८४॥
राजा मणिरथो नाम, तस्यामासीन्महारथः । विद्विषो यत्प्रतापार्त्ताः सिन्धुमध्यानि भेजिरे ॥ ३८५ ॥

For Private and Personal Use Only

युगबाहुरभूत्तस्य, कनीयान् युगबाहुभृत् । नदीनमन्थने[1] मन्था-चलाद्रिरिव जङ्गमः ॥ ३८६ ॥
तस्याऽभूत्प्रेयसी प्रेम-स्वर्णस्वर्णाद्रिचूलिका । स्त्रीषु रेखेति मदनरेखाख्या वपुषः श्रिया ॥ ३८७ ॥
कलाकलापकमला-खेलाकमलमुज्ज्वलम् । नाम्ना चन्द्रयशाश्चन्द्र-यशाः सुनुरभूत्तयोः ॥ ३८८ ॥
अमन्दमकरन्दाली-मत्तालिललने वने । रतिप्रिय इवाऽक्रीड-त्तया सार्कं कदाचन ॥ ३८९ ॥
सौराज्यमिव सप्ताङ्गं, सिन्धुरं सिन्धुरोत्तमम् । अखेदात् खेलयामास, युगबाहुः कलानिधिः ॥ ३९० ॥
समापन्ना इव प्रौढिं मग्ना इव मुदम्बुधा । अनुलिप्ता इव सुखैः, समुन्नतिमया इव ॥ ३९१ ॥
शुभैरनुपमैः पूर्णा-इव प्रीतिमया इव । भूयांसो वासरा जग्मु-स्तस्य त्रिचतुरा इव ॥ ३९२ ॥ [ युग्मम् ]

सप्तमो भवः

युगबाहु-निदर्शनम्

कुट्टिमोपरिभूमिस्थो, वीक्षमाणः पुरःश्रियम् । गवाक्षे युवराजस्य, दृष्टिं राजाऽन्यदा ददौ ॥ ३९३ ॥
निरङ्कुशतया चक्षु-र्मदोन्मत्तद्विपस्य च । अन्तःकरणसिंहस्य, दुर्निवारतया भृशम् ॥ ३९४ ॥
निरारेकाविवेकित्वात्त-च्छायानिरीक्षणात् । समासन्नसमापन्न-दुर्गदुर्गतिपूर्त्तितः ॥ ३९५ ॥
प्रेम्णा मदनरेखायां, पताकायां मनोभुवः । तस्य सोदर्यसुन्दर्यां, समगंस्त युगं दृशोः ॥ ३९६ ॥
॥ त्रिभिर्विशेषकम् ॥

एनामुद्वीक्ष्य चक्षुर्भ्याम्, भूपतिः प्रीतिनिभरम् । चकार चिन्तनां चित्ते, पुष्पकेतुवशम्वदः ॥३९७॥
आस्यं हास्यकरं चन्द्र-महसां महसा भृशम् । अस्या नेत्रेऽब्जिनीपत्रे, त्रिवली प्रीतिकन्दली ॥३९८॥

---

१ समुद्रमन्थने

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इत्याद्यनल्पसङ्कल्प-श्रेणिनिःश्रेणिवर्त्मना । दुर्वारमारवीरोऽस्या-ऽध्यारूढश्चित्तमन्दिरे ॥ ३९९ ॥
तदनन्तरमेवास्य, विचारेण पलायितम् । हृतापवादया चित्ता-द्रुतं मर्यादया तया ॥ ४०० ॥
यशःप्रतिष्ठया नष्टं, जगन्नैर्मल्यनिष्टया । अस्तोकेन विवेकेन, हृतं कामभयादिव ॥ ४०१ ॥
अथ तां प्रत्यहं ध्यायन्, स्मरापस्मारतत्परः । न दशापि निरैक्षिष्ट, दलितारिबलं बलम् ॥ ४०२ ॥
न विवेद महामात्य-शिक्षादीक्षां महायताम् । न दधार चिरं चित्ते, सदाचारं कदाग्रहात् ॥ ४०३ ॥
किं गत्वा सेवक इव-प्रस्तावात् प्रार्थये स्वयम् ? । विज्ञापयामि किं त्वेनाम् ? दूतीशतमुखेन वा ॥४०४॥
त्यागलीलाशतैर्यद्वा, तन्वीं सम्भावयामि किम् ? । देवः काष्ठमयोऽप्युच्चै-र्द्रव्यैर्वर्त्तीति सत्यगीः ॥४०५॥
यद्दूरस्थमतीवोच्चै-स्तद् दानैः सुलभं ननु । अपि चुम्बति मातङ्ग, कपोले हि शिलीमुखः ॥ ४०६ ॥
इति ध्यात्वा ततः पूर्वं, राजा मणिरथोऽन्वहम् । दुःकूलानि सुमूलानि, शृङ्गारतरुशाखिनः ॥४०७॥
पञ्चसुगन्धिकूलानि, ताम्बूलानि दिवानिशम् । कुङ्कुमानि तु जात्यानि, प्रेषयामास दुर्मनाः ॥ ४०८ ॥[युग्मम्]
सा जग्राहाखिलं शुद्ध-स्वान्ता प्रेषितमञ्जसा । ज्येष्ठः पितेव पुत्रीव, स्नुषाहं किं विकल्पना ? ॥४०९॥
इतश्च भूभुजाऽध्यायि, प्रेषयामि विशारदाम् । दूतीं काञ्चिद्यथा कार्यं, लीलयैव प्रसिद्ध्यति ॥ ४१० ॥
इत्थं विनिर्मितं कार्यं, न षडक्षीणमुद्भवेत् । अतः स्वयं निशीथिन्यां, मम यातुं प्रशस्यति ॥ ४११ ॥
ध्यात्वेत्यन्येद्युरुर्वीशो, गते दूरे सहोदरे । उन्मादात्मद्वितीयोऽथ, भ्रातुरावासमासदत् ॥ ४१२ ॥
एकाकिनममुं काम-रतमुद्वीक्ष्य दूरतः । करेणुरिव पारीन्द्रं, शार्दूलं सुरभिर्यथा ॥ ४१३ ॥

सप्तमो भवः

युगबाहु-निदर्शनम्

॥ ३४ ॥

For Private and Personal Use Only

कलविंकी[1] यथा श्येन-मवस्कन्दमिव[2] प्रजा । नदीपूरमिव ग्रामोऽनश्यद्दृश्यशिरोरुहा ॥ ४१४ ॥ [युग्मम्]
आः ! किमेतन्महत्कष्टं, भाषमाणा मुहुर्मुहुः । भिया पलायितुं साऽथ, प्रवृत्ता त्वरितक्रमैः ॥ ४१५ ॥
राजापि तादृशीमेना-मुद्वीक्ष्य ध्यातवानिति । कुलाङ्गना सदैव स्या-त्रपाऽऽभरणभूषिता ॥ ४१६ ॥
गच्छन्तीं शपथैरेनां, निषिध्य क्षितिनायकः । पर्यङ्के निषसादाशु, निजगादाथ सादरम् ॥ ४१७ ॥
क्व यातासि सरोजाक्षि ! किमु बिभर्षि भीरुताम् । तवाज्ञाकारकोऽस्मीति, विद्धि विज्ञानकौशले ! ॥४१८॥
श्रुत्वेति भूभुजो वाक्यं, तत्सर्वं तत्पदेऽदधत् । अन्यथा कथमीदृक् स्या-द्वचनोपक्रमोऽर्गलः ॥४१९॥
अथ दध्यौ सती चित्ते, हा ! हा ! कन्दर्पवल्गितम् । विवेकिनोऽपि येनोच्चै-र्दुर्विवेकक्रियाकृतः ॥४२०॥
विटा इव विचेष्टन्ते कुल्या अपि कुचेष्टया । महात्मानोऽपि येनोच्चै-र्नीचायन्ते प्रमद्वराः ॥ ४२१ ॥
सकलेऽपि जीवलोके, तेनात्रामारिघोषणोद्घुष्टः । एकमपि दुःखितं यः सत्त्वं बोधयति जिनधर्मे ॥४२२॥
इति जिनवचश्चित्ते, चिन्तयन्ती महासती । प्रबोधार्थमनुष्मापं वक्तुमारभतोज्ज्वलम् ॥ ४२३ ॥
यद्यप्यनल्पसङ्कल्प-कल्लोलावलिचालिता । तथापि न त्यजन्त्यब्धि-वन्मर्यादां महाधियः ॥४२४॥
ज्येष्ठ ! श्रेष्ठकरं नेत्थ-मनिष्टं किं करोषि मे ? । पूजनीयो भवान्यस्मात्, पितेव न्यायवत्सलः ॥४२५॥
एतस्यां भाषमाणाया-मथोवाच महीश्वरः । स्वप्नजल्पनसादृक्षम्, ज्येष्ठत्वं मम गद्यते ॥ ४२६ ॥
ज्येष्ठः स एव रम्भोरू ! यस्त्वया वीक्षितो दृशा । सुधा सैव गिरं यां त्वं, भाषसेऽलीकमम्बुधौ ॥४२७॥

सप्तमो भवः

युगबाहु-निदर्शनम्

1 चटका । 2 सेनायाः आक्रमणम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथोवाच वचः साध्वी, स्मितशुभ्ररदद्युतिः । स्वामिन्! विचारय प्राज्ञ! भङ्गुरा भवसंस्थितिः ॥४२८॥
परदारस्पृहा तात! दूती निरयवर्त्मनः । अकीर्तिकूलिनीशैलः, कालः सन्मार्गपद्धतेः ॥ ४२९ ॥
(यदूचे-) सन्मार्गस्खलनं विवेकदलनं प्रज्ञालतोन्मूलनम्, गाम्भीर्योद्वमनं स्वकायदमनं नीचत्वसम्पादनम् ।
सद्ध्यानावरणं त्रपाप्रहरणं पापप्रपापूरणम्, धिक्कष्टं! परदारवीक्षणमपि न्याय्यं कुलीनस्य किम्? ॥४३०॥
इत्थं विमृश्य भूमीश! विषयेषु विषेष्विव । परिणामाऽमनोज्ञेषु, खलानां सङ्गतिष्विव ॥ ४३१ ॥
परलोकस्य चेन्नाथ! न बिभेषि दुराशय! । युगबाहोर्महाबाहोः, किं भीरुक! बिभेषि न? ॥४३२॥
(यतः —) वृत्तान्तस्तत्र सोदरेण विदितो यद्येष पापद्विषा, तत्त्वं नासि न चाहमस्मि भगवन्नेता वराक्यः प्रजाः ।
स्तोकाय प्रलयं नयन्निदमहो! विश्वं ध्रुवं कीलिका-हेतोर्देवकुलस्य चालनमहो! विद्वन्नुपक्रान्तवान् ॥४३३॥



अथ दध्यौ नृपः स्वान्ते, यावत् प्राणिति सोदरः । तावदेषा न मे वाञ्छा-मच्छबुद्धिः प्रयच्छति ॥४३४॥
दूयमानस्तदुक्तैः सः कपिः कच्छुफलैरिव । ययौ धाम शरीरेण, सहाऽऽगतहृदा न हि ॥ ४३५ ॥
तस्मिन्नागत्य यातेऽथ, तृतीयज्वरसन्निभे । विच्छिन्नाऽशेषसन्तापा, मनागुच्छ्वसिता सती ॥ ४३६ ॥
कलयति यदि कुन्देन्दूपमानं सतीत्वं, वदति यदि च सत्यं सर्वसत्त्वानुकूलम् ।
त्यजति यदि परेषां वस्तु चामेध्यबुद्ध्या, तदपि युवतिजातिर्निन्द्यते दैवदग्धा ॥ ४३७ ॥
पूर्वां त्यक्त्वा परां याति, सूर्यः पूज्यस्तथापि सः । अनाविष्कृतदोषापि, कथं दोषा निशोच्यते? ॥४३८॥
सर्वथा हन्त! निन्द्येयम्, रामाजातिर्निगद्यते । यस्या मूलं महामाया, सा मोहस्य महासखी ॥ ४३९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति ध्यातवती देवी, पतिदेहभुवोः सदा । नृपादनिष्टमाशङ्क – मानाभ्येति स्म वत्सरान् ॥ ४४० ॥
कदाचित्सुमुखी सुप्ता, जिनचन्द्रमिवामलम् । पूर्णचन्द्रं मुखाम्भोजे, प्रविशन्तं निरैक्षत ॥ ४४१ ॥
विनिद्रया स्मृताऽभीष्ट-परमेष्ठिसुमन्त्रया । प्रातः प्रियस्य विज्ञप्तः स्वप्नो गम्भीरया गिरा ॥ ४४२ ॥
उच्चरोमाञ्चभृत्काय-यष्टिः स्पष्टमुवाच सः । प्रिये ! धन्यासि पुण्यासि, सुश्रेष्ठजिनरत्यसि ॥ ४४३ ॥
यस्यास्तव सुतश्चन्द्रयशाः प्राक् प्रकृतिप्रियः । निसर्गतो देव इव, दूरोज्झितकुसङ्गतिः ॥ ४४४ ॥
साम्प्रतं पुनरेतस्य, सुस्वप्नस्य प्रभावतः । भविता नन्दनो नेत्रा-नन्दनः पावनाकृतिः ॥ ४४५ ॥
इति श्रुत्वा तुतोषैषा, देहे कान्तिं पुपोष च । याति राज्य इव स्फातिं, गर्भोऽदभ्रसुखोदये ॥ ४४६ ॥

सप्तमो भवः

युगबाहु-निदर्शनम्

(इतश्च-)राजन्यो निखिलर्तूनां, जगदानन्दकन्दलः । मानिनीमानजीवातु[1]-र्वसन्तः समवातरत् ॥४४७॥
भ्रमराणां गुञ्जितैर्यत्र, कोकिलानां तु कूजितैः । स्मरः सुप्तो व्यबोधिष्ट, राजा बन्दीश्वरैरिव ॥ ४४८ ॥
वसन्तश्रीसनाथानि, काननानि निरीक्षितुम् । वव्रजे युवराजोऽथ, सार्कं मदनरेखया ॥ ४४९ ॥
प्रिये ! चम्पकमालासु, देहि देहि विलोचने । तवाङ्गस्य विभा यासु, विधिनेव निधीकृताः ॥ ४५० ॥
इह नृत्यन्ति खेलन्ति, जलक्रीडाश्च कुर्वते । किरन्ति पटवासांश्च, पौराः प्रमदमेदुराः ॥ ४५१ ॥
द्राक्षाऽऽरामेऽभिरामेऽस्मिन्, छाया किमु तमस्विनी ? त्वद्वक्त्रचन्द्रो निस्तन्द्र उदियायाऽन्यथा कथम् ?॥४५२॥
भाषमाणः प्रियामित्थम्, वीक्षमाणः क्षमारुहान् । आनन्द्यमानश्चित्तेन, दिनलक्ष्मीमवाहयत् ॥४५३॥

---

१ औषधम् ।

For Private and Personal Use Only

(इतश्च –) सूर्यरथ्यखुरक्षुण्णाञ्जनाचलरजोनिभा । दृगायुःकर्म्मविघ्नाय, प्रससार रजस्ततिः ॥४५४॥
अथ रम्भागृहे रम्भा-प्रेयानिव मनोहरे । कर्पूरपारीराजिष्णौ बद्धचन्द्रोदयोत्करे ॥ ४५५ ॥
दह्यमानागुरूद्गार-मत्तभ्रमरबन्धुरे । विस्मेरपुष्पशय्याढ्ये, स्थितवान् प्रियया समम् ॥ ४५६ ॥ [ युग्मम् ]
स्फुरत्तमसि विस्फूर्ज-त्तारकामहसि स्फुटम् । साक्रन्दचक्रवयसि, दूरे चन्द्रमहस्यपि ॥ ४५७ ॥
प्रस्तुते प्रेयसी जने विलासभुवनं प्रति । सज्जीभूते मुनिजने, धर्म्मश्रेयसि भूयसि ॥ ४५८ ॥
दुर्जयेन्द्रियवर्गत्वा-चञ्चलत्वाच्च चेतसः । अचिन्तयदिदं दुष्टं, सुचिरं मेदिनीपतिः ॥ ४५९ ॥
त्रिभिर्विशेषकम् ॥

सप्तमो भवः

अचिरेणापि यत्कार्यं, चिन्तितं चेतसा मया । तन्निष्पन्नं ममेदानीं, हन्त ! भाग्यविजृम्भितम् ॥४६०॥
एकं तावत्पुराऽऽरामे, दूरे तिष्ठति सोदरः । द्वितीयं पुनरत्यल्प-परिवारपरिवृतः ॥ ४६१ ॥

युगबाहु-
निदर्शनम्

पुनस्तृतीयं कंदर्प्प-रजनिरजनि मम । चतुर्थं पुनरुद्भूतः, प्रभूततमसां चयः ॥ ४६२ ॥
ततः फलित एवायम्, मनोरथमहातरुः । अनुकूले विधौ सर्वं, दुस्साध्यमपि सिद्ध्यति ॥४६३॥
ध्यात्वेति निजसोदर्यद्रोहबुद्धिसहायभृत् । चचालेलापतिः काल-करालकरवालवान् ॥ ४६४ ॥
स्थाने स्थाने पतन्नेष, व्यामूढो दुर्गताविव । स्खलन् स्थाणुषु पाताल-स्तम्भेष्विव पदे पदे ॥ ४६५ ॥
निषिध्यमानः प्रसभं, विविधैः शकुनेतरैः । अभिराममथ प्राप, महाऽऽरामं महीपतिः ॥ ४६६ ॥ [ युग्मम् ]

१ जावत्री इति भाषायाम् ।



For Private and Personal Use Only

कः कोऽत्र भो भोस्तस्करो विद्यते घातकोऽथवा ? । यामिकैरुक्त इत्यूचे, राजा मणिरथस्ततः ॥४६७॥
अरे ! किमर्थमेतस्मि-न्नाऽऽरामे ध्वान्तभीषणे । कुमारः कारितः केनाऽ-वस्थानं दुष्टचेतसा ॥४६८॥
पूर्वोत्पाटितसामन्त-घातकः कोऽपि किञ्चन । विदध्यादत्र कोऽप्युच्चै-रुत्तरं विदधाति मे ? ॥४६९॥
अतो निवेद्यतां क्वास्ति ? कुमारः सोदरो मम । अतो ममाधृतिर्बद्धी, निद्राविच्छेददायिनी ॥४७०॥
तदनु ज्ञापिते तैश्च, हृद्ये कदलिकागृहे । अगाद्राजा कुमारोऽपि, समुत्तस्थौ ससम्भ्रमम् ॥ ४७१ ॥
पतितः पादयोस्तस्य, परमस्नेहगौरवात् । साक्षात् पितेव हि ज्यायान्, भ्राता वन्द्यः कनीयसा ॥४७२॥
सोदर्यतां विमुच्योच्चै-रपास्य स्नेहभूरिताम् । अनाकलय्य मर्यादां धृत्वा चण्डालकर्मताम् ॥ ४७३ ॥
जनापवादमादृत्य, कृत्वा चण्डत्वमद्भुतम् । पापिष्ठतां पुरस्कृत्य, कृत्वा निष्ठुरचित्तताम् ॥ ४७४ ॥
कन्धरायां प्रहारं स, दत्तवान् कुल्यवैरिवत् । पतितश्च प्रहारान्ते च्छिन्नद्रुरिव भूतले ॥ ४७५ ॥
॥ त्रिभिर्विशेषकम् ॥
हा ! धिक्कष्टं ! हहा ! दुष्ट-चेष्टितं कथमीदृशम् ? । न म्लेच्छोऽपि करोत्येतत्, पतेद्वज्रं तवाचिरात् ॥४७६॥
भो भो भटा ! रणग्राम-लम्पटा ! धावतोच्चकैः । अमुना बन्धुकापथ्या-द्वैरिणा मे हतः पतिः ॥४७७॥
स्फुट क्षोणि ! कथं पाप-मेनं वहसि पृष्ठगम् । हा ! हा ! हतास्म्यहं मन्द-भागधेया पतिं विना ॥४७८॥
इत्थं मदनरेखायां, पूत्कुर्वत्यां मुहुर्मुहुः । हा ! हा ! स्वामिन् किमेतत्ते, विधुरं समुपागतम् ॥४७९॥
वदन्त इति निःशेषा, मिलिता भटकोटयः । अथाऽधमचरित्रेण, जजल्पे तेन दुर्वचः ॥ ४८० ॥

सप्तमो भवः

युगबाहु-निदर्शनम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धिग्! धिग्! श्लथत्वं कोशस्य, हा! मे निरवधानता। यदयं पतितः खड्गो मा भैः सुन्दरि! सर्वथा ॥४८१॥
स्वस्थस्तवायं प्राणेशो भव स्वस्था शुभाशये!। अहं स्वस्थं करिष्यामि, यामीति गतवान्वदन् ॥४८२॥
ततः कुमारवीरैः स, पायितो निर्मलं जलम्। अज्ञायि चन्द्रयशसा, तत्स्वरूपं तथाविधम् ॥४८३॥
हा! तात! तात! किमिद-मचिन्तितमुपागतम्। प्रलपन्नित्यगाद्वैद्यै-रन्वितो जनकान्तिके ॥४८४॥
चिकित्साकुशलैः प्राज्ञै-रायुर्वेदानुगामिभिः। न जीवतीति मुक्तश्च, विद्राणाऽऽननपङ्कजैः ॥४८५॥
धर्मौषधस्य योग्योऽयं कार्यं धर्मौषधं वरम्। धीरा मदनरेखेति, सम्यग् वक्तुं प्रचक्रमे ॥४८६॥



क्रोधं मुञ्च क्षमां धेहि, मानं मर्दय सर्वतः। पुषाण मार्दवं चित्ते, मायां खण्डय खण्डशः ॥४८७॥
मण्डयाऽऽर्जवतत्त्वेन, सर्वसत्त्वं मनस्यपि। लोभं शोषय सन्तोषं पोषयाऽऽत्ममनोऽम्बुजम् ॥४८८॥
प्राणेश्वर! ततोऽमीषां, चतुर्णामपि वैरिणाम्। दुर्ग्रहं निग्रहं कृत्वाऽ-नुगृहाण क्षमादिकम् ॥४८९॥



यदूचे-क्षान्तिः कृशोदरी येषा-मेषा जागर्ति मानसे। दोषोल्लासेऽपि तेषां स्यात्, क्व कोपाटोपतस्करः॥४९०
मार्दवाऽग्निप्रतापेन, द्रावयैनां कुशीलताम्। साधुत्वात् सिद्धिसौधं त्वं, प्रवेष्टुं लप्स्यसे यतः ॥४९१॥
वार्यतां वार्यतां माया, छायावज्जाड्यभीरुणा। सेव्यतां सेव्यतां धर्म्मो, धर्म्मवत् स्वार्जवान्वितः ॥४९२॥
पीत्वा सन्तोषपीयूषं, सम्पद्यस्वाऽजरामरः। तृष्णा पुष्णाति या तापं, साप्यतो विनिवर्तते ॥४९३॥
मा कृथाः सर्वथा खेदं, स्वामिन्! मणिरथेऽधुना। विराद्धोऽयं यतः क्वापि, पुरातनभवे त्वया ॥४९४॥
यदर्जितं स्वयं दुःखं, सुखं वा पूर्वकर्म्मभिः। संसारे तदिदं सर्वं, स्वयमेवाऽनुभूयते ॥ ४९५ ॥



For Private and Personal Use Only

सर्वः पूर्वकृतानां हि, कर्मणां लभते फलम् । परो निमित्तमात्रं स्या-दपराधगुणेष्वपि ॥ ४९६ ॥
युगबाहुस्तदीयोक्त्या, सर्वथा गतमत्सरः । स्मरन् पञ्चनमस्कारं, विपद्य त्रिदिवं गतः ॥ ४९७ ॥
तदनन्तरमेवोच्चैः लोकैः शोकपरैः समम् । क्रन्दितुं चन्द्रयशसि, प्रवृत्ते ध्यातवत्यसौ ॥ ४९८ ॥
धिगिदं रूपलावण्यं धिगङ्गं चङ्गिमास्पदम् । दुरात्मना नरेन्द्रेण, यदयं निहतः पतिः ॥ ४९९ ॥
भर्तारमिव मत्पुत्रं, घ्नन्तं तं वारयेत्तु कः ? । निहन्ति जननीं यः स्वां, स श्वश्रुं हन्ति खण्डशः ॥५००॥
तस्मात् पुत्रस्य शीलस्य, पालनाय पलायनम् । कालोचितं विचार्येति, निष्क्रान्ता स्वपुरादसौ ॥५०१॥
क्रमशः क्रमशो यान्ती, ताम्यन्ती नृपचेष्टिते । व्यालोलव्यालवेतालो-ल्लापोल्लेखितदिङ्मुखाम् ॥५०२॥
पत्रशालितमालाली-सङ्कुलां कालखेलनाम् । रटन्ती प्रापदटवीं, हन्त ! कर्मविजृम्भितम् ॥ ५०३ ॥ [युग्मम्]
भ्राम्यन्ती तत्र ताम्यन्ती, निजलावण्यसम्पदा । त्रियामां गमयामास, त्रियुगस्थितिसन्निभाम् ॥५०४॥
मृते पत्यौ किमद्यापि, क्वापि जीवेत्क्षितावित्ति । उल्लापयन्निवैक्षिष्ट, वनेभं सा सबृंहितम्[1] ॥५०५॥
दृष्ट्वेमां कुञ्जरो भ्रान्तां, भीमो मणिरथायितः । कुर्वाणो बृंहितं शूंढं, दधावे वनवारणः ॥ ५०६ ॥
दूरादेव सती चक्रे, पलायं त्वरितक्रमैः । रक्षणीया यतः प्राणा भयेषु न धनादिकम् ॥५०७॥
धावन्त्याऽथ महासत्या, भीतितारतरदृशा । सधर्मा धर्मराजस्य, मृगराजो निरैक्षत ॥ ५०८ ॥
पुच्छातुच्छच्छटाटोपैः, वारणेन्द्रान्विघट्टयन् । मृगारिः पुरतोऽतिष्ठ-द्रोषादुच्छ्रितकेशरः ॥ ५०९ ॥

सप्तमो भवः

युगबाहु-निदर्शनम्

१ गर्जनया सहितम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एतस्याः शीलशरभं, वीक्ष्येव मृगनायकः। अन्यतः प्रससाराशु, शीलात् किं न प्रसिद्ध्यति? ॥५१०॥
पुरस्थाऽत्माऽथ गच्छन्ती सौगन्धिकवनाश्रयम्। पान्थसार्थदृशां सत्रा-गारगरिमबन्धुरम् ॥५११॥
तालहिन्तालमाल्लूर-मालापालीसुपेसलम्। सङ्कुलं कमलैः सैरैः, कमलाकरमैक्षत ॥५१२॥ [युग्मम्]
क्षारवार्द्धिजलोद्विग्नाः, स्वादयितुमिवोदकम्। तरुमालामिषाद्यत्र, घनाघनघटा इव ॥५१३॥
एतस्य सरसो मध्ये, मध्याह्ने खेदसम्भिदे। हस्तपादादिशौचं सा, विदधे स्त्रीमतल्लिका ॥५१४॥
दुःखोद्रेकेऽपि कान्तार–फलवृत्तिं चकार सा। नान्तरङ्गा हि मुञ्चन्ति, क्षुत्तृष्णाद्याः शरीरिणाम्५१५
विकालवेलामासाद्य, कस्मिंश्चित्कदलीगृहे। विधाय पल्लवैः शय्यां, स्मृतदेवगुरुक्रमा ॥५१६॥
प्रत्याख्यानं च साकारं, विधाय विधिपूर्वकम्। शृण्वाना व्याघ्रबुक्कारान्स्वपिति स्म महासती॥५१७॥ [युग्मम्]



युगबाहु-निदर्शनम्

अर्द्धरात्रे पवित्रे सा, सुखेनाऽसूत दारकम्। प्रभामण्डलरोचिष्णुं, प्राचीव महसांपतिम् ॥५१८॥
हर्षोत्कर्षप्रकर्षोचे, विस्मृताऽरण्यवासना। यात दास्यः! सुतोत्पत्त्या वर्द्धयत नृपात्मजम् ॥५१९॥
मानसोन्मादनममुं, युवराजं विलोकय। आमन्त्र्य नयनाम्भोजे, सुधां पायय पायय ॥५२०॥
वाद्यन्तां हन्त तूर्याणि नृत्यन्तां नागरीगणाः। मुच्यतां वैरिणो गुप्तेः, पूज्यन्तां दैवतक्रमाः ॥५२१॥
एवमुक्तवतीं साध्वीं, निरीक्षितुमिवार्यमा। उदयाचलचूलाया-मुदियाय लसत्करः ॥५२२॥
श्रीयुगबाहुनामाङ्क-मुद्रां मुक्त्वा समीपगाम्। बालं कम्बलरत्नेन, प्रच्छाद्य कदलीगृहे ॥५२३॥
प्रसूतिसमयाशुचि-वस्त्रप्रक्षालनाकृते। अवतीर्णा सरः साध्वी, क्षिपन्ती दिक्षु चक्षुषी ॥५२४॥



For Private and Personal Use Only

अङ्गोपाङ्गभवं शौचं, यावदाचरितुं सती । प्रावर्तिष्टतरां तावद्-कस्मात्सरसो जलात् ॥ ५२५ ॥
प्रतिहस्तः कृतान्तस्य, जङ्गमोऽञ्जनपर्वतः । कुञ्जरः सलिलोत्पन्न,-उल्ललास भयङ्करः ॥ ५२६ ॥ [युग्मम्]
अमुं विलोकमानायास्तस्या उरुयुगं भयात् । खिन्नं निखिलमप्यङ्गं, जाते नेत्रे च चञ्चले ॥ ५२७ ॥
विमूढं मानसं तस्या मतिरप्यगमद्धृतिम् । उपाया गलिताः सर्वे, दुर्ज्ञेयं दैवनाटकम् ॥ ५२८ ॥
कथं भ्राम्यसि कान्तारे ? विस्मेराननपङ्कजा । सदेहापि व्रजेत्स्वर्गं, इति ध्यात्वैष शुण्डया ॥ ५२९ ॥
गृहीत्वाभिनभः क्षिप्ता, कुञ्जरेण जडात्मना । छिद्रे छिद्रशतानि स्युः, दुःखे दुःखशतानि हि ॥५३०॥
तस्मिंश्चावसरे कश्चि-द्विद्याधरशिरोमणिः । गच्छन् व्योम्नि विमानेन दृष्टवांस्तां तथाविधाम् ॥ ५३१ ॥ सप्तमो भवः
आददे तां नभोगर्भे, जातामिव सुलोचनाम् । यावदायुर्भवेत्ताव-दुपायः किल जन्मिनाम् ॥५३२॥
तां च रूपवतीं दृष्ट्वा, लसल्लावण्यशालिनीम् । समुल्ललास शृङ्गार-क्षीरवारांनिधिः क्षणात् ॥ ५३३ ॥ युगबाहु-
तेनापि रागमाहात्म्या-त्सद्यो मणिरथायितम् । यत्र वा तत्र वा यातु, कर्प्पासः किल लोठ्यते ॥५३४॥ निदर्शनम्
मूकेव गतजीवेव, भ्रान्तेव गतधीरिव । उच्छिन्नसर्ववंशेव तद्गिरः श्रवणादभूत् ॥ ५३५ ॥
तां दृष्ट्वा समया कुर्वन्, स्माह वैताढ्यमीक्षत । क्रीडाभूः सर्वदेवानां, स्वर्गलोकोऽपरः क्षितौ ॥ ५३६ ॥
ततश्चिन्तितममुया, धिगिमां मामकीं तनुम् । दूरक्ष्यं शीलरत्नं मे, सर्वतो विपदां पदाम् ॥ ५३७ ॥
किं करोमि क्व गच्छामि ? सङ्कटे पतिताऽस्म्यहम् । आकाशपतितेवाऽहं, कथं स्यां दैववल्गितात् ? ॥५३८॥
विमृश्येति सती स्माह, श्रद्धालुः परयोषितम् । ग्रहयालुरकीर्तिं च पतयालुश्च दुर्गतिम् ॥ ५३९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सधर्म्मकर्मतन्द्रालु-र्दयालुर्भव मय्यलम् । नभःक्रोडात्पतन्तीं मां, क्षिप्रं रक्षन् पिता मम ॥ ५४० ॥
(यतः)—जीवितं शीलमेवैकं, कुलीनस्य क्षमातले । यतः शीलविहीनानां, जीवितस्य कथा वृथा ॥५४१॥
अहमद्य सरस्तीरेऽजीजनं नन्दनं वरम् । तत्रैव कदलीधाम्नि, मुक्त्वाऽङ्गक्षालनाकृते ॥ ५४२ ॥
गता सरोवरे व्योम्नि, समुत्क्षिप्ता निषादिना । रक्षिता भवता तत्र-भवताऽहं दयालुना ॥५४३॥ [युग्मम्]
जीविष्यति कथं बालः ? स व्यालबहुले वने । तदपत्यभिक्षादानात्, पुण्यराशिमुपार्जय ॥ ५४४ ॥
दयावीर ! क्रियासार ! मां जीवयितुमिच्छसि । तं बालमविलम्बं मे, हृतं दर्शय दर्शय ॥ ५४५ ॥
एवमुक्तवतीं साध्वीं व्याजहार नभश्चरः । यदि सुन्दरि ! भर्तारं, मां नूनं प्रतिपद्यसे ॥ ५४६ ॥
तदा तव समादेश-कार्यहं किङ्करस्तव । भुङ्क्ष्व भोगान्मया साक-मन्यत्मानिनि ! मा वदेः ॥५४७॥
अपरश्च शृणु श्रोत्र-पेयो मम कथारसः । गन्धारविषये रत्ना-वहे पुरवरे पुरे ॥ ५४८ ॥
मणिचूडाभिधो विद्या-धरः प्रीतिकरः सताम् । तस्य राज्ञी सतीरत्नं, बभूव कमलावती ॥ ५४९ ॥
मणिप्रभाभिधानोऽहमभवं तनयस्तयोः । आधिपत्यं द्वयोः श्रेण्यो-र्दधानो जनको मम ॥ ५५० ॥
पटलग्नं तृणमिव, त्यक्त्वा राज्यं विरागवान् । दीक्षां जग्राह तीर्थेश-भाषितां शिवसाधिनीम् ॥५५१॥ [युग्मम्]
स पुनश्चारणः साधुः, ग्रामाकरपुराकुलाम् । वसुधां विहरन्नद्य, द्वीपं नन्दीश्वरं ययौ ॥ ५५२ ॥
तं नमस्कर्तुमेतर्हि, यानस्मि मृगलोचने ! । अद्राक्षं भवतीं मर्त्य-लोकपादपदोहदाम् ॥ ५५३ ॥

सप्तमो भवः

युगबाहु-निदर्शनम्



For Private and Personal Use Only

तच्छ्रुत्वा चिन्तितं चित्ते, सत्या मदनरेखया । अवश्यं स मुनिस्त्वेनं, बोधयिष्यति सर्वथा ॥५५४॥
महाभाग ! द्रुतं गच्छ, द्वीपं नन्दीश्वरं शुभम् । यदादेक्ष्यति निर्ग्रन्थ-स्तत्कर्तास्मि नभश्चर ! ॥५५५॥
एनां मदनरेखोक्तां, श्रुत्वा सूक्तिं नभश्चरः । विमानं त्वरयामास, मनसातुल्यरंहसा ॥ ५५६ ॥
अञ्जनाद्रिसमाकीर्णं, स्फुरद्दधिमुखान्वितम् । महावापीपरिक्षिप्तं, क्रीडागारं सुधाभुजाम् ॥ ५५७ ॥
चतुर्भिः शाश्वतैर्देवैः ऋषभाद्यैरधिष्ठितम् । नन्दीश्वरमसौ प्राप्तो द्वीपमुत्तममष्टमम् ॥ ५५८ ॥ [ युग्मम् ]
नमस्कृत्य जिनान् भक्त्या, मणिचूडाख्यखेचरम् । प्रणम्य प्रणिपातेन, समासीना बभौ पुरः ॥५५९॥
तूर्यज्ञानबलज्ञात-तदाशयजिघांसया । स्वाहृत्य विषयनिन्दां, मुनिर्वक्तुं प्रचक्रमे ॥ ५६० ॥
मूलं निरयकन्दस्य, शूलं निःशेषसम्पदाम् । अग्रासनं विमोहस्य, परस्त्रीवासनां त्यज ॥ ५६१ ॥
प्रग्रां शिवपुरे मार्गे, श्रुत्वैनां धर्मदेशनाम् । निरस्तो तेन निःशेषो, विकारः किल मान्मथः ॥५६२॥
आत्मानं निन्दयामास, तत्याज विषयाऽऽग्रहम् । स्मृतवांस्तत्त्वमार्हन्त्य-मुक्तवानिति भावतः ॥५६३॥
धन्यास्त एव निर्ग्रन्था, ये जित्वा कामवैवसम् । प्रपन्ना मुक्तिपदवीं, सर्वथा विजितेन्द्रियाः ॥५६४॥
अथोत्थाय पदद्वन्द्वं, तस्याः सत्याः प्रणम्य च । नभश्चर उवाचोच्चैः, संवेगरसरञ्जितः ॥ ५६५ ॥
दुर्वारमारवैक्लव्याद्यत् सुन्दरि ! मया दृशा । मातेव सोदरीवापि, न दृष्टा त्वं क्षमस्व तत् ॥५६६॥
तयाऽथाऽभिदधे धीरं, भ्रातर्जातो विरागवान् । स हि श्लाघ्यो न किं यः स्या-न्निर्वाहेऽपि विरागवान् ॥५६७॥

सप्तमो भवः

युगबाहु-निदर्शनम्

१ कामस्य क्रूरताम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सप्तमो भवः

युगबाहु-
निदर्शनम्

(यदूचे-)
गुणैः श्लाघ्यः सरागोऽपि, निर्वाहे यदि रागमुक्। श्वेताऽञ्चलं हि कौसुम्भो-त्तरीयवसनं श्रिये ॥५६८॥
अथ पप्रच्छ निर्ग्रन्थं, मुने! प्राणिति मे सुतः। अथवा मृत्युमापन्नो, गृहीतो वाऽथ केनचित् ॥५६९॥
श्रुत्वेति मुनिरप्यूचे, मनःपर्यायवित्तया। मिथिलायां महापुर्यां, पद्मोत्तरमहीपतिः ॥५७०॥
अन्यथाशिक्षाऽऽवेशेन, वाजी वेगजितानिलः। अपजह्रे महीपालं, वैपरीत्यान्न किं भवेत्? ॥५७१॥
सम्प्राप्तस्तद्वनं भ्राम्यन्, यत्रासीत्तव नन्दनः। रुदन्तं बालमश्रौषीत्, जाते सूर्योदये सति ॥५७२॥
सर्वलक्षणसम्पूर्णं, प्रभामण्डलमण्डितम्। तवाऽपत्यं विलोक्यैष, प्रमोदाऽऽधिक्यमासदत् ॥ ५७३ ॥
धन्योऽहं कृतपुण्योऽहं, निरपत्यस्य यन्मम। कुलदेवतया दत्तो, बभूव वरनन्दनः ॥ ५७४ ॥
वैपरीत्यगतिर्वाजी, किं न शस्यो ममाऽभवत्?। जठरं दाहयन्वैद्यो, गुं[1]लिभिः पूज्यते न किम्? ॥५७५॥
इति ध्यानपरस्याऽस्य, तत्पदेनाऽखिलं बलम्। समागात्तत्र त्वत्सूनु-पुण्यदर्शितवर्त्मना ॥ ५७६ ॥
गृहीत्वा बालकं राजा, निधानमिव जङ्गमम्। सकलः स्वपुरं प्राप तल्लाभमुदिताशयः ॥ ५७७ ॥
तेनापि पुष्पमालायाः, पट्टदेव्याः प्रमोदतः। प्रसाद इव त्वत्सूनु-रर्पितस्तर्पको दृशाम् ॥ ५७८ ॥
स पुर्यां कारयाञ्चक्रे, पुत्रोत्पत्तिमहोत्सवम्। नमिरित्यभिधां तस्य, द्वादशेऽह्नि स्वयं ददौ ॥५७९॥
पुनर्विज्ञपयामास, सतीचूडामणिस्ततः। भगवंस्तस्य मत्सूनोः, कृतं मणिरथेन किम्? ॥ ५८० ॥

१ गुटिकाभिः।



For Private and Personal Use Only

अथोवाच महासत्त्वो, राजा हत्वा निजानुजम् । तत्पदैरेव चलितो, निजप्रासादमाऽऽसदत् ॥५८१॥
दण्डेनेव कृतान्तस्य, तमसेव शरीरिणा । दुर्जनेनेव कुटिल-गतिना भीतिकारिणा ॥ ५८२ ॥
तरङ्गणेव पापस्य, सोदर्यवधजन्मना । दुष्टो दष्टो भुजङ्गेन शीघ्रं पापफलं महत् ॥ ५८३ ॥ [युग्मम्]
कथमस्माकमेतस्मिन्, पापीयसि महीयसि । अद्यापि स्थातुमुचित-मित्येषोऽमुच्यताऽऽत्मभिः ॥५८४॥
स्पष्टदुष्टाशयो मृत्वा चतुर्थ्यां नरकाऽवनौ । पङ्कप्रभाभिधानाया-मुदपद्यत नारकः ॥ ५८५ ॥
कृत्वोर्ध्वदेहिकं कार्य-मेकचित्यां द्वयोरपि । प्रतिष्ठितश्चन्द्रयशा, आधिपत्ये महत्तमैः ॥ ५८६ ॥

एवं वदति निर्ग्रन्थे, सर्वाङ्गीणविभूषणम् । निजदेहप्रभापूरैस्तरन्तमिव विस्तृतैः ॥ ५८७ ॥
अनेककिङ्किणीजाला[1]-वचूलाग्रविमानतः । अवतारं वितन्वान-मेषाऽद्राक्षीत्पुरः सुरम् ॥ ५८८ ॥ [युग्मम्]
तदा प्रदक्षिणीकृत्य, गुणकाव्यानि कोटिशः । ननाम कामरेखां[2] तां, भूतलन्यस्तमस्तकः ॥ ५८९ ॥
ततः प्रणत्य निर्ग्रन्थ-पादपद्मं शुभाशयः । भूमिभागे यथायोग्ये, निषसाद तदग्रतः ॥ ५९० ॥
अवज्ञास्थानमालोक्य, मुनेः स्त्रीपूर्ववन्दनात् । बभार खेचरः कोपं, कोपस्तीर्थे हि तादृशः ॥५९१॥
नीतिं किमेष नो वेत्ति? वेत्ति वा विस्मृता परम् । नीतिविज्ञं करिष्यामि, सुरं शिष्यमिवाऽचिरात् ॥५९२॥
अवधिज्ञानविज्ञात-तद्भावः खेचरं सुरः । उवाच साधु-साध्वीदृक्, चिन्तितं निजचेतसि ॥५९३॥
यदत्राऽद्यनमस्कार-कारणं शृणु तन्मम । सुदर्शनपुरे भूमानभून्मणिरथाह्वयः ॥ ५९४ ॥

सप्तमो भवः

युगबाहु-निदर्शनम्

१ अवचूलः पताका । २ मदनरेखाम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





युगबाहुरितिख्यात-स्तस्याहमनुजः सखे ! । केनापि हेतुनोद्याने, हतोऽहं तरवारिणा ॥ ५९५ ॥
ततोऽहं रौद्रध्यानेन प्रेरितो नरकालये । यावदास्थां सखे ! धर्म्म-देशनाऽऽरभ्यताऽनया ॥ ५९६ ॥
संवेगाम्बुधिकल्लोलै-रिव क्षान्तिमयैरिव । सिद्धान्ताम्भोधिपीयूषै-रिव वाक्यैर्मनोहरैः ॥ ५९७ ॥
अनया प्रापितः स्वर्गं, पञ्चमं पावनाशयः । ततस्त्रीर्वन्दिता पूर्वं, स्मृतः सिद्धान्तगीरिति ॥ ५९८ ॥
(यतः–) यो येन स्थापितो धर्मे, गृहिणा साधुनाऽपि वा । स तस्य जायते धर्म-गुरुर्धर्मोपदेशतः ॥५९९॥
अथाऽभ्यधीयताऽनेन, चारणेन महात्मना । साधु साधु सुधाहार ! वर्णनीया महासती ॥ ६०० ॥
ततो देवेन जगदे, जिनधर्मे व्यवस्थितम् । यदस्ति सारं तद् ब्रूहि, धेहि धेहि सुवासनाम् ॥ ६०१ ॥
अथाऽवोचत निर्ग्रन्थः सारमेतज्जिनागमे । साधर्मिकाणां वात्सल्यं ताच्छील्यं शिवसम्पदः ॥ ६०२ ॥
(यदूचे–) चक्रे तेन जिनार्चनं स विदधे सम्यग्गुरूपासनम्, तत्त्वं तेन जिनागमस्य कलितं, सङ्घोन्नतिं स व्यधात् ।
सत्यङ्कारितमेव तेन सुधिया निर्वाणस्वर्गाऽद्भुतं, यः साधर्मिकगौरवं वितनुते हृष्टो गुरूणामिव ॥६०३॥
इति श्रवणतो देवो, योजिताञ्जलिपल्लवः । ऊचे मदनरेखां तां, रेखां शीले समुज्ज्वले ॥ ६०४ ॥
साधर्मिकोचिताऽऽदेशो, मम, साध्वि ! प्रदीयताम् । साधर्मिकं हि यत्क्षेत्रं, सप्तक्षेत्र्यां विशेष्यते ॥६०५॥
अथाऽऽचख्यौ सती हृष्टा मम वैरङ्गिकं मनः । दूरं सुतमुखाम्भोज-वीक्षाकौतुकमङ्गलम् ॥ ६०६ ॥
सम्पादयामि शीघ्रं त-दित्युक्त्वा त्रिदशाग्रणीः । दिव्यप्रभावतः साध्वीं, निनाय मिथिलां क्षणात् ॥६०७॥
आनन्दद्रुवसन्ताभं, मनो नवरसायनम् । रक्षाकुण्डकराजिष्णु-कण्ठपीठं सुधा दृशाम् ॥ ६०८ ॥



For Private and Personal Use Only

परीतमङ्गरक्षौघैर्दत्तदृष्टिं च गेन्दुके । बालं विलोकयामास सा बालेन्दुमिवोदितम् ॥ ६०९ ॥ [ युग्मम् ]
परमानन्दमग्नेव, सुधासिक्तेव तत्क्षणम् । सन्तोषपोषपूर्णेव, सा तदाऽभून्महासती ॥ ६१० ॥
विलोक्य सुचिरं बाल-मालानं दृग्विषाणिनाम् । जगाद त्रिदशं देवी, मुञ्च कस्मिंश्चुपाश्रये ॥ ६११ ॥
अन्तर्दधे सुरो मुक्त्वा, तां साध्वीनामुपाश्रये । तया च वन्दिता भक्त्या, पश्चाङ्गेन प्रवर्तिनी ॥६१२॥
ऊचुः प्रवर्तिनीमिश्राः, साम्भःपाथोदनिःस्वनाः । असार एष संसारो, न स्थैर्यस्य मुखं सुखम् ॥६१३॥
( यतः– ) कति न कति न भुक्ता, भूरि भोगोपभोगाः । कति न कति न जाताः, पुत्रपौत्रादियोगाः ।
कति न कति न भूताः, सार्द्धमेतैर्वियोगा-स्तदिह भवनिवासे कः सुतः कः परो वा ? ॥ ६१४ ॥
एतत्स्वरूपं विज्ञाय, ये गृह्णन्ति जिनव्रतम् । तेषां कराम्बुजे मुक्ती, राजहंसीव खेलति ॥ ६१५ ॥
( यतः– ) एकाहमपि निर्मोहः प्रव्रज्यापरिपालकः । न चेन्मोक्षमवाप्नोति, तथापि स्वर्गभाग्भवेत् ॥६१६॥
श्रुत्वेति देशनामेनां, तत्पार्श्वे जगृहे व्रतम् । तस्या यथार्था जगति सुव्रताऽऽख्या च पप्रथे ॥ ६१७ ॥
तां दीक्षां प्राप्य साकाङ्क्षा, शिक्षां कक्षीचकार सा । शिक्षाहीना तु या दीक्षा, सा भिक्षामात्रकारणम् ॥६१८॥
पिण्डं शय्यां तथा वस्त्रं, पात्रकं च यथाविधि । आददाना चकाराऽसौ, दशधा साधुसत्क्रियाम् ॥६१९॥
इतश्च तस्य बालस्य, महापद्ममहीपतिः । नमिरित्यभिधां चक्रे, परमानन्दमेदुरः ॥ ६२० ॥
वर्द्धमानः कुमारोऽथ, पपाठ सकलाः कलाः । अष्टोत्तरसहस्रं स, उपायंस्त नृपात्मजाः ॥ ६२१ ॥
स ताभिर्मानयन्साकं, सुखं विषयसम्भवम् । यौवराज्यश्रियं भेजे, सत्यङ्कारं नृपश्रियः ॥ ६२२ ॥

सप्तमो भवः

युगबाहु-
निदर्शनम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भुक्तभोगतया ज्ञात-संसारस्थितिमत्तया । विधित्सया तपस्यायाः, श्रीपद्मोऽप्याहरन्नमिम् ॥ ६२३ ॥
वत्स! राज्यश्रियं प्राज्यां, तदिदानीमलङ्कुरु । चतुर्थपुरुषार्थस्य, करिष्ये साधकं तपः ॥६२४॥
ततोऽनिच्छति चैतस्मि-न्यस्य राज्यश्रियं नृपः । जैनीं दीक्षां स्वयं प्राप्य, पद्मर्षिर्मोक्षमप्यगात् ॥६२५॥
नमिः पुनरसौ राजा वशीकृतमहीतलः । चन्द्रेऽपि राजशब्दं न, सहे किमुत विद्विषाम् ॥ ६२६ ॥
कदाचन शरत्काले, मदाम्भःप्लुतलोचनः । आलानस्तम्भमुन्मूल्य, हत्वा हस्तिपकानपि ॥६२७॥
वरण्डान् पातयन्नुच्चै र्भञ्जन् सौधशिखावलीम् । निघ्नन्पौरान् कराघातै-र्निर्जगाम महागजः ॥६२८॥ [युग्मम्]
जवना वाजिनां सङ्घा, महामात्रैः पदे पदे । व्यावर्त्तयितुमुत्सिक्तं, गजाधीशं ढुढौकिरे ॥६२९॥
केवलं पश्यतामेव, तेषां विस्मेरचक्षुषाम् । अगोचरं गजः प्राप पक्षोड्डीन इवाचिरम् ॥ ६३० ॥
इति कालान्तरेणायं, विज्ञप्तो नमिभूपतिः । परदेशस्य जवनै-र्भटैः कैश्चिदुपेत्य च ॥ ६३१ ॥
समस्ति मालवे देशे, पुरं नाम्ना सुदर्शनम् । राजा चन्द्रयशास्तत्र, चन्द्रशुभ्रयशोनिधिः ॥६३२॥
तेन स्वविषये भ्राम्यन्, विज्ञाय तव वारणः । नयति स्म पुरं स्वीयं, सारग्राही न को भवेत्? ॥६३३॥
ततो नमिनरेन्द्रेण, महाधैर्यो महामतिः । दूतस्तन्मार्गणायाऽथ, प्रेषितस्तत्र पत्तने ॥ ६३४ ॥
तत्रैत्य चन्द्रयशसं, प्रणिपत्य वचोऽवदत् । देव! श्रीनमिभूपाल-वारणोऽस्ति तवाऽन्तिके ॥६३५॥
तमर्प्पय महीपाल! वर्द्धय प्रीतिवल्लरीम् । तन्मार्गणाय देवेन प्रहितोऽस्मि तवान्तिके ॥ ६३६ ॥

सप्तमो भवः

युगबाहु-निदर्शनम्



---

१ गर्विष्ठम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतः परं यदुचितं, स्वयमेव महीपते ! । तदाज्ञापयतु क्षिप्र-मथ राजाऽऽदिशत्तराम् ।। ६३७ ।।
प्रेषितो न त्वदीशेन याचितो न मया गजः । अतः स्वयं द्विषं लब्धं, प्रेषयामि नमेः कथम् ? ।।६३८।।
दूतः श्रुत्वेति सम्प्राप्य, मिथिलां नगरीं निजाम् । नृपचन्द्रयशःप्रोक्त-माचचक्षे विचक्षणः ।।६३९।।
राजापि तेन वाक्येन, चित्ते कोपं चकार च । राजते हि क्षमानिष्ठो, यतिरेव न भूपतिः ।।६४०।।
कोपाटोपोत्कटस्वेद-बिन्दुर्नमिमहीपतिः । ढक्कां विजययात्रायै, वादयामास तत्क्षणम् ।। ६४१ ।।

पदातिकुञ्जराऽश्वैना-ऽश्वतरोष्ट्रवृषेण च । शताङ्गशतसन्तानै-र्दुस्तराऽभूत्पताकिनी ।। ६४२ ।।
शुभेऽह्नि द्विपमारुह्य, कृतप्रस्थानमङ्गलः । प्रेरितः शकुनैर्भव्यै-रचालीन्नमिभूपतिः ।। ६४३ ।।
आहूयमान इव स-न्निमित्तैर्गणकैरिव । कम्पयन्पृथिवीचक्रं, खुरारावैश्च वाजिनाम् ।। ६४४ ।।
घासेन्धनं विना लोको-पद्रवं परमण्डले । आज्ञया वारयन् चक्रे, प्रयाणं मिथिलेश्वरः ।। ६४५ ।।
न केवलं बलं तस्य, न ममौ भूमिमण्डले । वीराणां रणमिच्छूनां प्रमोदो भुवनेष्वपि ।। ६४६ ।।
प्रयाणैरुत्प्रयाणैश्च, बहुभिर्मिथिलेश्वरः । अवाप मालवं देशं, पूर्वश्रीतिलकोपमम् ।। ६४७ ।।

निश्चचाल बलोदग्रः पुराच्चन्द्रयशा अपि । तत्क्षणं पङ्कमत्तेभः प्रस्थितस्तद्भयादिव ।। ६४८ ।।
निपेतुश्चैत्यशृङ्गेभ्यः कलशाः पवनं विना । चकम्पिरे सुराऽऽवासाः सहसा देवमूर्तयः ।। ६४९ ।।
नारीणां विकृतिर्गर्भे, कौशिकाः पुरमध्यगाः । आकर्षन्ति मुहुः काकाः, सुरधामध्वजाऽञ्चलान् ।।६५०।।
शीतपादे गतरुचौ, सूर्ये मन्दत्वमीयुषि । दिवा ददृशिरे तारा, दिनस्येवाऽश्रुबिन्दवः ।। ६५१ ।।

सप्तमो भवः

युगबाहु-निदर्शनम्



For Private and Personal Use Only

निमित्तशकुनादीना-ममङ्गल्यात्पदे पदे । बलाद् व्यावर्त्य नीतोऽसौ, मन्त्रिभिर्नीतिपारगैः ॥ ६५२ ॥
प्रदत्तासु प्रतोलीसु, सज्जे यन्त्रगणेऽपि च । धानुष्कलक्षपूर्णासु, विष्वग्विद्याधरीष्वपि ॥ ६५३ ॥
संहतीक्रियमाणे च, प्राकारोपरि गोलके । भज्यमानासु वापीषु, बहिःस्थासु पदे पदे ॥ ६५४ ॥
स्फोट्यमानासु पर्वासु, बहिःपुष्करपङ्क्तिषु । छिद्यमानेषु वृक्षेषु, भ्रियमाणेषु पत्तिषु ॥ ६५५ ॥
आगत्य नमिभूपालो, दत्त्वा वासान्बहिःस्थितः । कष्टसाध्यमजेयं हि, कोट्टदुर्गं महीभुजाम् ॥६५६॥
[ चतुर्भिः कलापकम् ]
वहन्ते रौद्रयन्त्राणि, युध्यन्ते पत्तयो मिथः । बहिस्थैः खण्ड्यते वप्रो, मध्यस्थैराशु पूर्यते ॥ ६५७ ॥
कपिशीर्षाग्रतो व्यूढदारुणि द्विषतः प्रति । यमस्योपायनानीव, मुच्यन्ते तुमुलोल्बणम् ॥ ६५८ ॥
प्रपञ्चबहुला मञ्चा, विरच्यन्ते बहिःस्थितैः । ज्वाल्यन्ते वह्नितैलेन, तेऽपि मध्यस्थनागरैः ॥ ६५९ ॥
केवलं पवनस्यैव, न सञ्चारो विशां क्वचित् । सुदर्शनपुरस्यान्तं, तुङ्गप्राकारशालिनः ॥ ६६० ॥
एवं प्रवर्तमानेषु, वासरेषु कतिष्वपि । भवत्सु भटकोटीनां, संहारेषु दिवानिशम् ॥ ६६१ ॥

सप्तमो भवः

युगबाहु-निदर्शनम्

तदानीं सुव्रता साध्वी, विहरन्ती यथाविधि । तयोः समरसंरम्भं समाकर्ण्येत्यचिन्तयत् ॥६६२॥
अन्योऽन्यमत्सराक्रान्तौ, स्फुटं नरककोटरे । एतौ निपततां मा स्म, चिरं ध्यात्वेति चेतसि ॥६६३॥
प्रवर्तिनीमनुज्ञाप्यो-दित्वा वृत्तं यथातथम् । ज्ञापिता वेत्रिणा राज-द्वारमेषाऽऽगमन्नमेः ॥ ६६४ ॥

---

१ मानवानाम् ।



For Private and Personal Use Only

एतां श्वेताम्बरधरां, वीक्ष्य तां देवतामिव । अवाप परमानन्दं, मिथिलानगरीश्वरः ॥ ६६५ ॥
धर्मलाभाशिषं दत्त्वा, सर्वाशीर्वादमण्डनाम् । अनुशासितुमुर्वीशं, समारेभे प्रशान्तगीः ॥ ६६६ ॥
संसारकारणं क्रोधः क्रोधो धर्मद्रुमानलः । क्रोधः प्रीतिलताग्रीष्मः, क्रोधः शाम्यघनानिलः ॥६६७॥
विरोधः सह केनापि, क्रियमाणः सुखाय न । विशेषाच्चन्द्रयशसा, भ्रात्रा ज्येष्ठेन सन्मते ! ॥६६८॥
अथोवाच नमिः श्रुत्वा श्रुतपूर्वं च न क्वचित् । सत्यवादिनि ! साध्वि ! त्वं, कथमीदृग्विभाषसे ? ॥६६९॥
ततः सा कथयामास, निःशेषं चरितं नमेः । सोऽपि धात्रीमुवाचाऽथ, मातः ! ब्रूत यथातथम् ॥६७०॥
साऽथ श्रीयुगबाह्वाङ्क-मुद्रारत्नं समार्पयत् । स एनां संयतीं नत्वा, सप्रणामं व्यजिज्ञपत् ॥ ६७१ ॥
एतावन्तमहं कृत्वा, समराऽऽरम्भमुग्रकम् । निवृत्तोऽथ दिवारूढ-पतितोऽस्मीति चिन्त्यताम् ॥ ६७२ ॥
भ्रातुर्ज्येष्ठस्य मत्पार्श्व-मायातुर्लाघवो न हि । अनुजानुनये हन्त ! प्रकर्षो हि गरीयसः ॥६७३॥

सप्तमो भवः

युगबाहु-निदर्शनम्

एवं तद्वचनं श्रुत्वा, सुव्रता व्रतधारिणी । ततः प्रच्छन्नरथ्याया अगाच्चन्द्रयशो गृहम् ॥ ६७४ ॥
अथ प्रविष्टमात्रैव, विज्ञाता सकलैर्जनैः । हा देवि ! कीदृशी जज्ञे, तवाऽवस्था विसंस्थुला ॥ ६७५ ॥
कथमेतेन देहेन, मृदुलेन तपःक्रिया ? । कथं भ्राम्यसि पादाभ्यां, क्व स्थितासि गतासि किम् ? ॥६७६॥
एवं क्रन्दन्महीपालः पतितः तत्क्रमद्वये । इष्टे दृष्टे पुनर्दुःखं, नवीभवति देहिनाम् ॥ ६७७ ॥
नृपदत्तासने स्थित्वा दत्त्वाऽऽशीर्वादमुत्तमम् । राज्ञा भगवती पृष्टा, स्वचरित्रं जगाद सा ॥ ६७८ ॥
नमिरेष तव भ्राता, युगबाहुतनूद्भवः । मत्कुक्षीसरसीहंसः, प्राप्तशंसः करान्तरैः ॥ ६७९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ततः कण्टकितं तत्र, प्रसृतं प्रमदाऽश्रुभिः । अहंकारेण गलितं, श्रीमच्चन्द्रमहीपतेः ॥ ६८० ॥
ततः परिवृतः पौरै-रात्तप्राभृतसन्ततिः । राजा चन्द्रयशाः साध्वीं प्रणम्य निरगात्पुरात् ॥ ६८१ ॥
आगच्छन्तं नमिः श्रुत्वा, ज्यायांसं भ्रातरं निजम् । सम्मुखीनोऽभवत्प्रीत्या, बलैर्हर्षमयैरिव ॥६८२॥
पताकामालिकाप्रेङ्ख-दट्टश्रेणीविराजिनि । प्राविविशद्विशामीशः, पुरे पौरहृदीव सः ॥ ६८३ ॥
सुव्रतादर्शनेनाऽथ, प्रबुद्धा बहवो जनाः । संसाराऽसारतां ज्ञात्वा, सारतां च शिवश्रियः ॥ ६८४ ॥
निर्द्वन्द्वत्वपदं दीक्षां, परिभाव्य स्वचेतसा । प्रादायि नमये राज्यं, तदानीं कर्मलाघवात् ॥ ६८५ ॥
वैराग्यरङ्गितोऽगृह्णा-न्मुदा चन्द्रयशाः व्रतम् । गीतां गीतार्थतां प्राप्य, विजहाराऽवनीतले ॥६८६॥ [युग्मम्]
राज्यद्वयश्रियं भेजे नमिः प्रबलविक्रमः । सुव्रताऽपि चन्द्रयशा, देवभुवं तु जग्मतुः ॥ ६८७ ॥

सप्तमो भवः

अथोचे नन्दनः साधु-र्जय! श्रावकपुङ्गव! । अयं मदनरेखायाः, दृष्टान्तः कथितो मया ॥ ६८८ ॥
अवन्दिष्ट यथा देवो, गृहवेषधरां सतीम् । तथा दत्तोऽपि भावेन, जिनदासमुपासकम् ॥ ६८९ ॥
गुरोरपि गरीयांस्तु धर्माचार्यः प्रकीर्तितः । स वन्दनीयः प्रथमं, पूजनीयश्च भावतः ॥ ६९० ॥

युगबाहु-निदर्शनम्

अथोवाच सुरज्येष्ठो, मद्भाग्योपचयो महान् । युगबाहुकथा नाथ! शुश्रुवे भवतारिणी ॥ ६९१ ॥
अपरं पूज्यवक्त्राब्ज-मरन्दकणवर्षकम् । सत्या मदनरेखाया, यद् दृष्टान्तो मया श्रुतः ॥ ६९२ ॥
मुने! नन्दन! राज्येऽहं, यावद्यस्यामि नन्दनम् । तावत्स्थातव्यमत्रैव, विधाय करुणां मयि ॥६९३॥
अथ प्रोवाच भगवान्, मुनिर्हृदयनन्दनः । परमार्हत! मा कार्षीः, प्रमादं श्रेयसः कृते ॥ ६९४ ॥



For Private and Personal Use Only

प्रभो ! प्रमादः सुतरां तदानीं तत्यजे मया । यदैव भवतां वाणी, शुश्रुवे सत्त्वसारणी ॥ ६९५ ॥
अथ नत्वा मुनिं गत्वा, चम्पां पौरमनोहराम् । भवे सञ्जातवैराग्य,-इति दध्यौ महीपतिः ॥६९६॥
अलं मे पुत्रमित्रादि-सुखैः क्षणविनश्वरैः । अलं मे सम्पदा कुम्भिकर्णतालविलोलया ॥ ६९७ ॥
अलं मे भववासेन, पुरौघेनान्तरात्मनः । ध्यात्वेति सुतमाहूय, मन्त्रिणश्चाभ्यधादिदम् ॥ ६९८ ॥
वयमत्रैव राजानो, यूयमन्वयमन्त्रिणः । अतो राज्यश्रियो भारो, युष्मास्वस्मास्ववस्थितः ॥ ६९९ ॥
ममेयं साधिता पृथ्वी, भवद्भिः कृतसन्निधैः । सुव्रता सौरभेयी य-त्तद्गोपालविशेषणम् ॥ ७०० ॥
यद्भवन्तो मयैश्वर्या-त्खेदिताः शुभकर्मणि । यत्तु न्यायेतरं चक्रे, भूमिपीठे मदाऽऽन्ध्यतः ॥ ७०१ ॥ सप्तमो भवः
चालिता जययात्रायै, चलता ये निरागसः । उन्मूलिता महीपाला, वात्ययेव महाद्रुमाः ॥ ७०२ ॥
विहाय भस्मसाद्ग्रामान्, यल्लोका निर्धनीकृताः । नश्यद्भीरुकरक्रोडा-द्यच्च बाला वियोजिताः ॥७०३॥ युगबाहु-निदर्शनम्
तदघं क्षालयिष्यामि, मलक्लिन्नमिवाम्बरम् । गृहीत्वा नन्दनोपान्ते, संयमं यमिनां मतम् ॥ ७०४ ॥
[चतुर्भिः कलापकम्]
सुते न्यस्यामि राज्यस्य, जरसा जर्जरो भरम् । प्रदोषकाले पूषेव, निजं तेजो हविर्भुजि ॥ ७०५ ॥
अमुष्मिन् कवचहरे, मयीव नृपपर्षदि । वर्तितव्य महाभागा ! युष्माभिर्मम शिक्षया ॥ ७०६ ॥
अथेत्थं मन्त्रिणोऽप्यूचुः, स्वामिन् ! जातो विरागवान् । अन्यथा कथमासन्न-मोक्षस्येव वचस्तव ? ॥७०७॥
यः श्रेयसि प्रवृत्तानां, निषेद्धा मोहतो भवेत् । स शालीनूषरक्षेत्रे-ष्वारोपयति वप्रतः ॥ ७०८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तवाऽपि पूर्वजा राजन्!, वार्धके मुनिवृत्तयः। साम्प्रतं साम्प्रतं तत्ते, कर्तुमेतन्महामनाः! ॥ ७०९ ॥
इदं राज्यं कुमारेऽस्मिन्, यत्त्वया विनिवेश्यते। विचार्यं तत्र किञ्चिन्नाऽ-स्माकमेष भवानिव ॥७१०॥
भूभुजो मन्त्रिणां वाचं, श्रुत्वा नृपतिनन्दनः। प्रोवाच तातचरणा!, अप्रसन्नाः कथं मम ? ॥७११॥
अथोचे जगतीपालो, मत्पुत्रोऽसि विवेक्यसि। गिरो निराक्रियन्ते नः, किमज्ञेनेव यत्त्वया ? ॥७१२॥
एवं पितृगिरः श्रुत्वा, तनयो नाम सन्नयः। ऊचे देव! त्वदादेशो, मान्यः स्वर्मोपदेशवत् ॥ ७१३ ॥
असौ न्यवेशयद्राजा, कुमारं सम्मदोद्धुरः। अभिषेकासने शक्रः पर्यंक इव तीर्थपम् ॥ ७१४ ॥
माङ्गल्याऽऽतोद्यमालासु, वाद्यमानासु सर्वतः। कुमारः सिषिचे मूर्ध्नि, भूभुजा तीर्थवारिभिः ॥ ७१५ ॥
अथ भूमिभुजोऽन्येऽपि, सौवर्णकलशैर्नृपम्। अभ्यषिञ्चन्नमुं जैन-मिव बिम्बं प्रतिष्ठितम् ॥ ७१६ ॥
अथोदितं द्वितीयेन्दु-मिव नम्रशिरोधराः। प्राणमन्नवमुर्वीशं, निखिला अपि नागराः ॥ ७१७ ॥
सदशानि मनोज्ञानि, वासांसि श्रीनृपाज्ञया। व्यूतानीवेन्दुकिरणैः पर्यधान्नूतनो नृपः ॥ ७१८ ॥
चन्दनैश्चन्द्रकान्ताश्म-स्त्यानबिन्दूदकैरिव। तस्याङ्गरागं सर्वाङ्गं, विदधुः वारयोषितः ॥ ७१९ ॥
भूषणैर्भूषितस्तैस्तैरामुक्तमणिमौक्तिकैः। असौ वसुन्धराकल्पः कल्पद्रुरेव रेजिवान् ॥ ७२० ॥
माणिक्यभासुरं रेजे, किरीटं तस्य मूर्द्धनि। उदयाद्रितटीटीक-मानं बिम्बं रवेरिव ॥ ७२१ ॥
अधारयत्पुरज्येष्ठः, छत्रं मूर्ध्नि नवेशितुः। क्षीरनीरधिडिण्डीर-पिण्डैरिव विनिर्मितम् ॥ ७२२ ॥

सप्तमो भवः

युगबाहु-निदर्शनम्

१ गच्छन्तम्। २ क्षीरसमुद्रफेनपिण्डैः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चामरैर्वाररामाणा-मवीज्यत कृतादरैः । नवसङ्गकृतोल्लासैः, राज्यश्रीरिव तैरिव ॥ ७२३ ॥
विशाले श्रीसुरज्येष्ठ-स्तद्भाले [1]लटभभ्रुवि । तिलकं रचयामास, राज्यश्रीन्याससमण्डलम् ॥ ७२४ ॥
वारांनिधिजलोत्पत्तेरिव नीचत्वगामिनी । नैकत्र स्थायिनी वेला, सङ्क्रान्तव्यसनादिव ॥ ७२५ ॥
द्विपेनेव सहोत्पन्ना-दुर्दामा, मदधारिणी । लक्ष्मीर्देवी दुराराधा वत्स ! राधापतेरपि ॥ ७२६ ॥
एतस्या रक्षणे वत्स ! यामिक इव विक्रमः । जागरूकस्त्वया कार्यः, प्रदत्तन्यायवृत्तवान् ॥ ७२७ ॥
नरो विक्रमवान्वत्स ! सत्त्वेन परिभूष्यते । तदेव यत्नतो रक्ष्यं, स्वामिदत्तप्रसादवत् ॥ ७२८ ॥
ससत्त्वेनाऽपि नाऽऽधेयं, प्रचण्डकरताण्डवम् । पश्य चण्डकरं लोको, न दृशाऽपि विलोकते ॥ ७२९ ॥
प्रचण्डकरचातुर्ये, जायते व्यसनोदयः । तस्माद्भ्राम्यति संसारे-ऽरघटीयो वृषो यथा ॥ ७३० ॥
सप्तभिर्व्यसनैः सप्त-नरकाह्वयकैरिव । अन्तरङ्गारिषड्वर्गो, जागर्ति जगतीपते ! ॥ ७३१ ॥
एवं शिक्षां नृपो दत्त्वा, कृतस्नानादिमङ्गलः । सहस्रवाह्यां शिबिका-मारुरोह प्रमोदवान् ॥ ७३२ ॥
ददानो विधिवद्दानं, भावशुद्ध्या विशुद्धधीः । उपेत्योपवनं तस्या,-उत्ततार भवादिव ॥ ७३३ ॥
उज्झांचकार निःशेषं, नेपथ्यादि स्वमोहवत् । श्रीनन्दनपदाम्भोजं, ववन्दे मोदमेदुरः ॥ ७३४ ॥
सामायिकमहामन्त्रं, सत्रं निर्वाणसम्पदाम् । राजर्षिर्गुरुवक्त्रेणो-च्चचार प्रकटाक्षरम् ॥ ७३५ ॥
विविधाऽभिग्रहग्राही निगृहीतकुवासनः । अनगारः शमाऽगारं, निर्निदानतपःपरः ॥ ७३६ ॥

सप्तमो भवः

युगबाहु-निदर्शनम्

[1] सुन्दरभ्रुवि ।

For Private and Personal Use Only

अन्येद्युर्व्रतिनामीश - मनुज्ञाप्य महामुनिः । चम्पापुर्यां समायातः, सुरज्येष्ठस्तपोनिधिः ॥७३७॥ [ युग्मम् ]
सुरज्येष्ठमुनिं तत्र, समायातं निशम्य सः । जगाम वन्दितुममुं, पूज्या हि गुरवो हि मे ॥७३८॥
समागम्य मुनिं नत्वा, यथास्थानमुपाविशत् । अपृच्छज्जिनभक्तेः स, फलं सुगुरुसन्निधौ ॥ ७३९ ॥
(तथाहि) सुरज्येष्ठो जगादाथ, येऽर्हतां भक्तितत्पराः । ते लभन्ते श्रियं रम्यां, यथाऽऽरामनितम्बिनी ॥७४०॥
अस्मिन्नेव महाद्वीपे, क्षेत्रे भरतसञ्ज्ञिके । कुसन्नविषयो ग्राम - नगरैः परिमण्डितः ॥ ७४१ ॥
उपाचलतटं ग्रामो, नाम्ना ख्यातस्थलाशयः । कौटुम्बिकजनाऽऽकीर्णः, पूर्णो विविधगोधनैः ॥ ७४२ ॥
आयोजनमुपग्रामं, वनखण्डं न विद्यते । मरुदेश इवाऽऽयातः, तद्देशस्य दिदृक्षया ॥ ७४३ ॥
तृणान्यपि चतुर्दिक्षु न भवन्ति कदाचन । ऊषरक्षेत्रसादृश्यं ग्राम एष दधौतराम् ॥ ७४४ ॥
अग्निशर्माभिधस्तत्र, द्विजो वेदविदांवरः । प्रिया ज्वलनशिखाख्या, स्वाहेवाऽस्य हविर्भुजः ॥७४५॥
तयोर्विद्युत्प्रभानाम - नन्दिनी नेत्रनन्दिनी । रूपहृपितकन्दर्प - प्रिया प्रियगिरां खनिः ॥ ७४६ ॥
अष्टवर्षप्रमाणाया, - अस्या माता विधेर्वशात् ! अगात्परभवं मृत्युः, सर्वदैव सनातनः ॥ ७४७ ॥
सा बाला सुकुमालाङ्गी, प्रगे गोदोहनं व्यधात् । ममार्ज प्राङ्गणं भक्त - पात्रीः प्रक्षालयज्जलैः ॥ ७४८ ॥
जनकं भोजयामास, गृहकर्माणि चाकरोत् । ततश्चारयितुं गाश्च, ययौ द्विजतनूद्भवा ॥ ७४९ ॥
गाः समानीय मध्याह्ने, गोपेन्द्रे विन्यवेशयत् । स्वयं च भोजनं चक्रे, कुतः शं गृहधर्म्मिणाम् ॥७५०॥
ततश्चारयितुं याति, गाश्च सायं समेति च । एवं कर्मकृतोऽमुष्या, - दिनं वर्षमिवाऽजनि ॥ ७५१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनको गृहचिन्तां न, करोति गतचेतनः । उदितास्तमितं हन्त !, न जानन्ति कुशिक्षिताः ॥७५२॥
एवं ध्यातवती बाला, मालेव च्छाययोज्झिता । विहाय दूरतो लज्जाम्, तातमुक्तवती रहः ॥ ७५३ ॥
निर्विण्णा गृहभारेण, चेष्टितेन तवापि च । अत्याकृष्टं त्रुटत्येवाऽ-तिपूर्णं स्फुटति स्फुटम् ॥७५४॥
कुरु काञ्चिद् वधूं कर्म्म, न कर्त्तास्मि गृहोद्भवम् । भारं मुञ्चति यः किं नु, गृह्यते भारवाहनम् ॥७५५॥
इतश्च जनकेनाऽस्याः, साधूक्तं दधता हृदि । विभवैर्विधृता काचि-द्धनायत्ता हि योषितः ॥७५६॥
साऽपि पुत्र्यां स्वगेहस्य, भारं निक्षिप्य पुत्रवत् । भुङ्क्ते स्वपिति च स्वैरं, सर्वः सौख्यं समीहते ॥७५७॥
पूर्ववत्कर्म्म कुर्वाणा, दधाना खेदमुच्चकैः । अतिचक्राम द्वादश-वत्सरीं सुखकर्त्तरीम् ॥ ७५८ ॥
अन्येद्युर्विस्तृणस्यान्तः-सुप्ता गोचारणोद्यता । स्थानास्थानविचारो हि, श्रमार्त्तानां कुतो भवेत् ? ॥
इतो विषधरो भीतः, कज्जलः श्यामलच्छविः । मूर्तिमानिव कोऽप्याऽऽगात्, कालिन्दीसलिलप्लवः ॥७६०॥
तामुपेत्याऽवदद्बालाम्, निर्निद्रां नरभाषया । विद्धि नागकुमाराख्यं, द्विजपुत्री ! महोरगम् ॥ ७६१ ॥
रक्ष रक्ष दयादक्षे !, तवाहं शरणं गतः । पश्चादमी समायान्ति, यद् व्यालग्राहिणो मम ॥ ७६२ ॥
मा[1] भूयात् सुन्दरं मेऽङ्गम्, करण्डकविडम्बितम् । तव साहाय्यतो जीवि-तव्यं मम विवर्द्धताम् ॥७६३॥
भद्रे ! निजोत्तरीयेण, मां पिधेहि निजाङ्गवत् । भीतानामाऽऽर्तदुःखाना-मुपकारपरो हि कः? ॥७६४॥
नागदेवोऽप्यहं दैवा-द्व्यालग्राह्यः सुमन्त्रतः । महीयो मन्त्रमाहात्म्यं, नैतेभ्यो गन्तुमीश्वरः ॥७६५॥

---

१ अत्र न माङ् किन्तु मा शब्दः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मा भैषी पुत्रि ! सर्प्पत्वान्, मम जातिर्भयङ्करी । तवोपकारकर्त्ताऽस्मि, विरलः परतोषकृत् ॥ ७६६ ॥
श्रुत्वेति सदया सर्पं, पिदधे वाससाऽथ सा । स्वयं सुष्वाप कपटात्, कूटमप्यभये शुभम् ॥ ७६७ ॥
भणन्तो जाङ्गुलीं व्याल-ग्राहिणः तूर्णमाययुः । क्वचित् दृष्टस्त्वया सर्प्पन्, सर्प्पः पङ्केरुहानने ! ॥७६८॥
साऽप्यवोचत सुप्ताऽस्मि, न किञ्चिद्दृष्टत्यवहम् । अहेर्बिभेमि नाम्नाऽपि, किमु प्रत्युत वीक्षणात् ? ॥७६९॥
तेऽप्यूचुर्बालिका वेत्ति, नेयं किञ्चित्कथञ्चन । दृष्टश्चेदनया नागो-ऽभविष्यद्दूरतो गता ॥ ७७० ॥
इत्युक्तवन्तः सर्वत्र, व्यालमार्गनिभालनम् । दिग्मूढा इव कुर्वाणा, भ्रेमुस्तस्थुरगुस्तदा ॥ ७७१ ॥
गतो नः पश्यतां पापी, गदन्त इति विस्मिताः । स्थानं निजं निजं जग्मु-र्भाग्यायत्तायुषः स्थितिः ॥७७२॥
ऊचे द्विजसुता नागं, प्रयाता ह्याहितुण्डिकाः । देवगुर्वोः प्रसादेन, बभूव तव जीवितम् ॥ ७७३ ॥
ततो रूपं निजं कृत्वा लसत्कुण्डलमण्डितम् । ऊचे नागकुमारोऽथ, रूप्यघर्घरसुस्वरः ॥ ७७४ ॥
तवोपकारकरणा-द्वत्से ! तुष्टोऽस्म्यहं भृशम् । आहितुण्डिकमन्त्रेभ्यः, क्षुद्रा शक्तिर्ममोच्चकैः ॥७७५॥
परं परमया शक्त्या,-पालितो बालवत्त्वया । शक्तो हि नान्यथा कर्तुं, कर्म्मशक्तिं नु कश्चन ॥७७६॥
वरं वृणु महाभागे !, मम जीवितदायिके ! । ततः प्राह द्विजसुता, यदि तुष्टोऽसि सत्यतः ॥ ७७७ ॥
तदा कुरु वरारामं, छायाच्छिन्नमहातपम् । अहं यत्र स्थिता चारु, चारयामि गवाङ्गणान् ॥ ७७८ ॥
श्रुत्वेत्यस्या वचो नाग-कुमारो ध्यातवानसौ । मयि तुष्टेऽपि किमियं ? याचते मातृशासिता ॥७७९॥

सप्तमो भवः

आरामशोभाकथा



---

१ मूर्खा ।

For Private and Personal Use Only

अथवा स्वप्रमाणेन, याचते बुद्धि[1]दुर्विधः। यो येन दग्धस्तं हन्तु-मेव वाञ्छति नाऽपरम् ॥७८०॥
भवत्वेवं ततो नाग-कुमारः परमाऽऽदरात्। विचकार महारामं, देवानां किमु दुष्करम्? ॥७८१॥
राजन्ते पुष्पजातीनां, यत्र भेदा अनेकशः। रोलम्बतुमूलव्याजा-द्गायन्त इव तद्गुणान् ॥ ७८२ ॥
एलालवङ्गकक्कोल-फलिनीलवनीदलैः। भ्रमद्भ्रमरवाचालै-रारामो विरराज सः ॥ ७८३ ॥
मृद्वीकामण्डपा यत्र, सत्राऽऽगारा दृशामिव। यत्र तालद्रुमाः साधु,-सिंहा इव महोन्नताः ॥ ७८४ ॥
यत्र यत्र सुते! यासि, तत्र तत्रायमुत्तमः। आगन्ता नूनमाराम-श्छायावत्पारिपार्श्वकिः ॥ ७८५ ॥
स्मरेर्विपदि मां वत्से!, इत्युदित्वा गतः सुरः। आरामच्छायया कामं, सुभगाङ्गी बभूव सा ॥७८६॥
आरामेण सहाऽयासी-न्निजमोकः सुलोचना। सोऽस्थाद्गृहोपरि प्रीत्या, नान्यथा दैवतं वचः ॥७८७॥
भुङ्क्ष्व पुत्रीति भणिता, जनन्या प्रीतिबन्धुरम्। न ददावुत्तरं किञ्चि-त्परप्रेक्षी क्षुदर्दितः ॥ ७८८ ॥
एवं गताऽऽगतैरस्या, गतः कालः कियानपि। गतक्षुत्तत्फलास्वादात्, पुण्यसिद्धिर्बलीयसी ॥७८९॥
अन्येद्युः पाटलीपुत्र-नायको जितशत्रुराट्। तत्राऽऽगाज्जययात्राया,-व्यावृत्तः सपरिच्छदः ॥७९०॥
आवासान्दापयामास, दृष्ट्वाऽऽरामं महीश्वरः। श्रमार्त्तानां विना छायां, न भद्रं मार्गचारिणाम् ॥७९१॥
बध्यन्ते तरुशाखासु, सिन्धुरा मदबन्धुराः। दूर्वावनेषु वेल्लन्ति, मुक्तपल्ययना हयाः ॥ ७९२ ॥
सर्वंसहायाः स्वं सौद-मार्पयन्त इवोच्चकैः। विधाय पल्लवैः शय्याः शेरते भटकोटयः ॥ ७९३ ॥

सप्तमो भवः

आरामशोभा-कथा

---

१ मूर्खः। २ श्रमम्।

वीज्यमानो दलैर्लोलै-स्तालवृन्तैरिवाऽऽयतैः । माकन्दपादपाधस्स्थः, स्वयं राजाथ विष्टरे ॥७९४॥
निषेदिवान् भृशं वार-वेश्याभिः परिवारितः । स्कन्धावारं तमालोक्य, ग्राम्या विद्युत्प्रभा स्वयम् ॥७९५॥
गाः समादाय वेगेना-ऽनश्यन्नान्यद्बलं स्त्रियाः । तामन्वगाद्वरारामः, साकं करितुरङ्गमैः ॥ ७९६ ॥ युग्मम् ॥
ततः कातुकितश्चक्षु-रक्षिपद्दिक्षु भूपतिः । नाऽपश्यत्तुरगाद्युच्चै-र्माकन्दमपि नात्मनः ॥ ७९७ ॥
मायेन्द्रजालं मन्वानः, पप्रच्छ सचिवाग्रणीः । किमिदं सचिवाधीश !, तद्गतं हयहस्तिकं ? ॥ ७९८ ॥
कुतोऽत्र मम माकन्दो, दृष्टनष्टं क्षणादिदम् ? । दधावे धीसखः सद्यो, दृष्ट्वा गच्छन्तमञ्जसा ॥७९९॥
नेत्राभिराममारामं, गन्धर्वैरिव निर्मितम् । एतस्या हन्त ! बालायाः, प्रभावः कोऽपि विद्यते ॥८००॥
तदेनां मानयिष्यामि, ज्ञातास्म्यतिशयं खलु । ध्यात्वेति धीसखो बालां, गच्छन्तीमवगम्य च ॥८०१॥
उवाच सुभगे ! राज-समीपे सर्प्यतां त्वया । मा भैषीर्भीरु ! भीरुत्वात्, तवाऽऽज्ञाकारकोऽस्म्यहम् ॥८०२॥
इत्युक्त्वा तेन सा बाला, ववले विपुलेश्वरा । तामायान्तीं नृपो वीक्ष्य, दध्यौ देवीति भूचरी ॥८०३॥
ईदृग्रूपा मया नारी, न दृष्टा संश्रुता नहि । तस्या वदनशीतांशु-क्षुब्धस्तच्चित्तवारिधिः ॥ ८०४ ॥
वेलोर्मिरिव दिग्भागः, विकारान्सारयन्निव । ऊचे स्वयमिमां राजा, कामार्त्ते क्व विमर्शनम् ? ॥ ८०५ ॥
भव प्राणप्रिया बाले ! नीलेन्दीवरलोचने । स्मित्वा सा च जगादैवं, पित्रायत्ता हि पुत्रिका ॥ ८०६ ॥
ततो मन्त्री बभाणेति, किं नामा जनकस्तव ? । अथोचे द्विजपुत्रीद-मस्मिन् ग्रामे द्विजोत्तमः ॥ ८०७ ॥
अग्निशर्माभिधानोऽस्ति, तस्याहं देव ! नन्दनी । प्रजिघायाऽथ भूपालो, मन्त्रिणं ब्राह्मणान्तिके ॥ ८०८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अगाद्द्विजगृहेऽप्येनं, सच्चक्रे द्विजपुङ्गवः। द्विजपृष्टोऽवदन्मन्त्री, विशामीश्वरभाषितम् ॥ ८०९ ॥
तत्तथा प्रतिपेदे च, सर्वेऽप्युन्नतवासनाः। यद्येवं द्विज! भूपाल-समीपे सर्प्यतामतः ॥ ८१० ॥
कः कल्याणविरोधीति, जल्पन् भूपालमभ्यगात्। इदं जगाद विशदं, प्रेमभङ्गितरङ्गितम् ॥ ८११ ॥
देवाऽस्माकमपि प्राणा-स्तवाऽऽयत्ताः सुता किमु ?। यद्यद्रत्नं भवेदुर्व्यां, तद्भूपमुपतिष्ठते ॥ ८१२ ॥
इत्युक्तवन्तं तं राजा, सच्चक्रे भूरिदानतः। तदैव तामुपायंस्त, लक्ष्मीमिव पतिः श्रियः ॥ ८१३ ॥
पूर्वं नाम-परावर्त्तं, चक्रेऽस्या भूमिवासवः। इयमारामशोभेति, सत्यार्था मम वल्लभा ॥ ८१४ ॥
अयमर्थः प्रसिद्धोऽभू-द्भूभुजा सदसीरितः। यदेव मन्यते स्वामी, जनस्तद्बहु मन्यते ॥८१५॥
द्विजाय श्वशुरायाऽस्मै, भूपो ग्रामशतीं ददौ। तुष्टेषु जगतीशेषु क्षणाद्दारिद्र्यविद्रुतिः ॥८१६॥
तया सहाऽचलद्राजा, कृतारामैकशोभया। सर्वास्वपि प्रियास्वेनां, सद्गुणां बहु मन्यते ॥ ८१७ ॥
तस्या लाभेन भूपालः, स्वं कृतार्थममन्यत। अथ वा रत्नमासाद्य, को न माद्यति कोविदः ? ॥८१८॥
तन्मुखाऽऽलोकशीतांशु-ज्योत्स्नया नेत्रकैरवम्। प्रीणयन् पृथिवीपालः, पन्थानं गतवान्वहन् ॥ ८१९ ॥
एकं रूपवती रामा, परं सातिशया गुणैः। रुरुचे पूर्णमासीव, शारदीनहिमांशुना ॥ ८२० ॥
क्रमाद्गच्छन्नृपः प्राप, पाटलीपुत्रपत्तनम्। प्रवेशं कारयामास, तस्याः स्वविभवोचितम् ॥ ८२१ ॥
धन्योऽयं जगतीपालो, यद्रूपपरिमाणभृत्। इयं प्राणेश्वरी जाता, नागनारीव भूचरी ॥ ८२२ ॥
धन्येयं रमणीचूडा-मणिः शुभगुणावनिः। यद्राजाऽकृत कान्तां तां, तुल्ययोगस्थितौ सुखम् ॥ ८२३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दम्पती निर्मितौ येन, विधिना सोऽपि नूतनः । शङ्के पङ्केरुहोत्पत्तेः, ब्रह्मणः स्यात्कथं मतिः ? ॥८२४॥
एवं नगरनारीभि-र्वर्ण्यमानौ निरन्तरम् । सेवमानौ रैणं प्रीत्या, बहुकालमतीयतुः ॥ ८२५ ॥
देवाऽनुभावतस्तस्या, भुवनोपरि सन्ततम् । आरामश्छत्रवत्तस्थौ, प्रतिपन्नपराः सुराः ॥ ८२६ ॥
इतो माहनगेहिन्या-स्तद्विमातुः सुताऽजनि । साऽपि यौवनभूजज्ञे, खैलूरी पुष्पधन्विनः ॥ ८२७ ॥
तन्माता ध्यातवत्येवं, तच्छन्नं कूटनाटकम् । आरामशोभां तां हन्मि, ही ! व्यामोहविजृम्भितम् ॥८२८॥
ततो मम सुतामेनाम्, परिणेता महीपतिः । ध्यात्वेति भणितो भट्टो, गोधूमादि समानय ॥ ८२९ ॥
यथा सुखादिकां काञ्चि-दारामायै करोम्यहम् । अथ भट्टो जगादैवं, किं तस्या न्यूनता क्वचित् ? ॥८३०॥
यद्येवं प्रिय ! नन्दिन्याः, करणीयं निजाम्बया । अन्यथा मे सपत्नीत्व-दोषपोषो विषायते ॥ ८३१ ॥
ततो भट्टेन गोधूम-प्रभृतावर्पिते सति । मोदकान्कारयामास, चैातुर्जातकमिश्रितान् ॥ ८३२ ॥
तेषां मध्ये प्रचिक्षेप, गरलं कलुषाशया । कृत्याकृत्यविदो नैव, लोभेनान्धाः शरीरिणः ॥८३३॥
अँभ्यङ्गे ते घटे न्यस्ता, मुद्रिता मुद्रया स्वयम् । द्विजोऽथ भणितो भद्र !, विन्यस्येमान् स्वमस्तके ॥८३४॥
न च कस्याऽप्यमी देया, नेया मत्तनयाऽऽलये । मुग्धत्वादसकौ भट्ट-स्तथेति प्रत्यपद्यत ॥ ८३५ ॥
भणितव्यं पुनरिदं, भोक्तव्या मोदकाः सुते ! । सङ्केतमिति स प्राप्य, निजावासाद्विनिर्ययौ ॥८३६॥
उद्वहन् शिरसा कुम्भं, रक्षंश्च निजजीववत् । जगाम पाटलीपुत्रो-पान्ते मुग्धो द्विजः क्रमात् ॥८३७॥

१ आनन्दम् । २ ब्राह्मणपत्न्याः । ३ शस्त्राभ्यासस्थानम् । ४ तमालपत्रेलाफलादिवस्तुचतुष्केण मिश्रितान् । ५ अखण्डे ।

सप्तमो भवः
आरामशोभा-कथा



For Private and Personal Use Only

पुरो बहिर्वटाधस्तात् सुप्तः श्रान्तोऽथ माहनः । प्रियावाक्यादपि प्राज्य-पत्तिरप्येककस्तदा ॥ ८३८ ॥
इतो नागकुमारस्य, सुहृदा वटवासिना । यक्षेण वीक्षितः कोऽय-मत्र सुप्तोऽध्वगः पुरः ॥ ८३९ ॥
सोऽज्ञासीदवधिज्ञानात्, तस्या मातुर्विचेष्टितम् । दूरस्थापि विमाता ही !, पुरःस्था प्राणनिग्रहे ॥८४०॥
ध्यात्वेति करुणापूर-पूरितो वटवास्यथ । मोदकानपजह्रे तान्, भाग्यं जागर्ति सर्वतः ॥८४१॥
सख्युर्नागकुमारस्य, परोपकृतिवत्यसौ । अतोऽहमपि चैतस्या, भवेयमुपकारकः ॥ ८४२ ॥
तत्रान्यान्मोदकान्यक्ष-स्तत्क्षणात् क्षिप्तवानसौ । द्विजः सोऽभूद्विनिद्रोऽथ, ययौ राजनिकेतनम् ॥८४३॥
उपसौधमुपाविक्षत्, प्रतीहारनिवेदितः । "ॐ भूर्भुवः स्वस्ति स्वाहा वषडिन्द्राय" चेत्यवक् ॥८४४॥
स्वस्त्यस्तीति समुच्चार्य, समासीनो यथासनम् । घटं मुमोच भूपान्ते, स्फूर्जत्परिमलाकुलम् ॥ ८४५ ॥
देवाऽयं मम गेहिन्या, पुत्रीयोग्यो महाघटः । पूरितो मोदकैः कामं, प्रेषितोऽस्ति स्थलाशयात् ॥८४६॥
आकारय मम सुतां, देव ! तद्दर्शनोत्सुकः । यस्मादपत्यसंस्पर्शः, प्रीतिकृच्चन्दनादपि ॥ ८४७ ॥
ततो राज्ञः समाहूते-रागादारामशोभिका । ननाम दूरतस्तातं, वीक्षाञ्चक्रे दृशा मुदा ॥ ८४८ ॥
राजा कौतुकितः कुम्भं, प्रमोदादुदघाटयत् । ततो गन्धः स्फुरन्नासा-प्रीणको घनसारवत् ॥ ८४९ ॥
प्रियेऽमी मोदका दैवा, ज्ञायन्ते गन्धतो मया । गन्धमात्रादपि मम, प्रणष्टा क्षुन्निशाचरी ॥ ८५० ॥
चकोरपक्षिणां क्षिप्रं, दर्शं दर्शं सुमोदकान् । स्वयमाद धराधीशो,ऽपूर्वाऽऽस्वादेन सुन्दरान् ॥ ८५१ ॥
आरामशोभयाऽन्येद्यु-र्विभज्याखिलमोदकाः । प्रेषिताः सर्वदेवीभ्यः, सर्वदेयं सुभोजनम् ॥८५२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विमातुरस्याः सत्कीर्तिः, प्रसूता गन्धकैतवात् । अगण्यपुण्यपूर्णानां, विषमप्यमृतायते ॥८५३॥
उवाच विनयादेष, राजानं प्रीतिपूर्वकम् । कश्चित्कालं मम ग्रामे, नृप ! प्रेषय पुत्रिकाम् ॥ ८५४ ॥
विहस्य भूपतिः स्माऽऽह, युक्तमुक्तं गुणाऽनघ ! । परं ग्रीष्मोऽप्ययं काल-करालतपनाऽऽतपः ॥ ८५५ ॥
वर्षासु प्रेषयिष्याम,-इति कूटोत्तरो नृपः । इमकं रञ्जयामास, कूटात्सर्वोऽपि रज्यते ॥ ८५६ ॥
राज्ञा प्रसादितो भट्टो-ऽगमद्ग्रामं स्थलाशयम् । सोऽथ मोदकवृत्तान्तं, स्वकान्तायाः समाख्यत ॥८५७॥
श्रुत्वा मोदकवृत्तान्त-मन्यथाभूतचिन्तितम् । शाखाच्युतप्लवङ्गीव, विमनास्तद्गृहिण्यभूत् ॥ ८५८ ॥
किमभूद् व्यत्ययः कोऽपि, किमु स्तोकं विषं त्वभूत् ? । किम्वाऽभून्मे मनोभ्रान्ति-र्यत्साप्राणिति मोदकात् ? ॥



ध्यात्वेति पर्यतीतेषु, वासरेषु कियत्स्वपि । सा चकारतरां फेला, गरद्गरललोलिताः ॥ ८६० ॥
तथेति प्रेषितो भट्टो, गतस्तं वटपादपम् । पूर्ववद् व्यन्तरो ज्ञात्वा, हृत्वा ता अपरा व्यधात् ॥ ८६१ ॥



अर्पितो भूपकान्तायै, फेलालीः प्रेमलालसम् । पूर्ववत्सर्वदेवीभ्यो, ददौ दानपरायणा ॥ ८६२ ॥
आसन्नप्रसवां राज-प्रियां विज्ञाय माहनः । उवाच भूपतिं देवीं, प्रेषयाऽऽशु स्थलाशये ॥ ८६३ ॥
स्मित्वा जगाद भूपालो, देवी गन्ता पुरात्कथम् ? । लोकाचारो भवेल्लोके, राजाचारः परः स्मृतः ॥८६४॥
अथाधान्माहनः शर्त्रीं, जठरं प्रति दुर्मतिः । तवोपरि करिष्यामि, निजामत्रौघमालिकाम् ॥८६५॥
पञ्चेन्द्रियहतेर्भीतो, राज्ञोचे विनयोत्तरम् । याहि याहि निजं ग्रामं, प्रेषितेयं तवात्मजा ॥ ८६६ ॥
राज्ञाऽथ प्रेषिता देवी, शुभेऽह्नि सपरिच्छदा । कालौचित्येन वर्तन्ते, महात्मानो न चाग्रहात् ॥८६७॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कतिभिर्दिवसैराप, निजं ग्रामं नृपप्रिया । साह्लादाऽपरमाताऽभूत्, परिरम्भचिकीर्षया ॥ ८६८ ॥
जयन्तं दीपकिरणान्, कान्तिभिः कायकान्तिभिः । साऽसूत समये सुतं, गङ्गेव नववारिजम् ॥८६९॥
तन्माता कारयाञ्चक्रे, छन्नं छन्नं महाऽवटम् । उपकण्ठशिलाबद्धं, पातालस्येव सोदरम् ॥ ८७० ॥
अन्येद्युर्देहचिन्ताया-मुत्थिता भूपतिप्रिया । समादिष्टा तया मात्रा, पश्चिमद्वारमभ्यगात् ॥ ८७१ ॥
कूपमालोकमानोचे, मातः! कूपः कदाऽभवत्? । तयापि जगदे देवि!, तवाऽऽगमनजे क्षणे ॥ ८७२ ॥
मातर्ममागमनेन, किं कार्यं मम कथ्यताम् । असावुक्तवती कूपाः, सावकाशे सहस्रशः ॥ ८७३ ॥
तेषां जलं सदोषं स्या-ज्जलदेवीभिरश्चितम् । अतो गेहे मयाऽकारि, कूपो भूपतिवल्लभे! ॥ ८७४ ॥
तदाऽऽकूतमजानाना, सरला नृपवल्लभा । महाकूपं निरैक्षिष्ट, मूर्त्तं व्यसनचक्रवत् ॥ ८७५ ॥
कौतुकात्कूपमुर्वीश-कान्ता यावदधोमुखी । निरीक्षते दृशा ताव-त्तयोत्पाट्य निचिक्षिपे ॥ ८७६ ॥
रुदन्ती निपतन्ती सा, नागासुरमथाऽस्मरत् । आर्त्ता हि देवतापाद-स्मरणं खलु कुर्वते ॥८७७॥
तत्पुण्यप्रेरितमिव, तद्विष्टरमकम्पत । अज्ञासीत्सोऽप्यवधिना, निपतन्तीमिमामधः ॥ ८७८ ॥
ततो नागः समेत्यैनां, प्रभुदत्तप्रसादवत् । बिभराञ्चकार पाणौ, पुण्यं मातुं न शक्यते ॥ ८७९ ॥
आरामोऽपि च तामन्व-गमत्कूपस्य वर्त्मना । यत्रैव सविता तत्र, दिनं खेलति नान्यतः ॥८८०॥
स्वाऽऽवासमानयद्देवः, सुतामारामशोभिनीम् । वत्से! सुष्ठु स्मृतोऽस्म्येष, ह्यन्यथा जीवितं कथम्? ॥८८१॥
अहं विमातुस्ते पापं, पातयिष्यामि मस्तके । इत्युच्चरन् सुरोऽचालीत्, कालीभूतमुखद्युतिः ॥ ८८२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एषाऽऽधादश्चले नागं, मा गास्त्वं भुवनेश्वर ! । स्वमातेव विमाता मे तत्किं ध्यायसि दुर्मतिम् ? ॥८८३॥
पराऽपराधसहनं, भावतः सा क्षमा मता । निरपराधः सर्वोऽपि, क्षमी सुर ! विचक्षण ! ॥ ८८४ ॥
एवमुक्तस्तया नागः, शान्तात्मा समजायत । प्रस्तावे सदृशं वाक्यं, गदितं हन्त सिद्धये ॥८८५॥
ततस्तयाऽस्याः पल्यङ्के, शायिता निजनन्दिनी । केचित्परसुखं प्रेक्ष्य, स्फोटयन्ति निजं शिरः ॥८८६॥
[1]केकराऽक्षीं गतच्छायां, तनुलावण्यधारिणीम् । इमां दृष्ट्वाऽवदत् स्मित्वा, सर्वतः परिचारिका ॥८८७॥
स्वामिन्यन्यादृशं जातं, कथमेतत्तवाङ्गकम् । किं वा विद्याप्रयोगोऽद्य, भियेऽस्माकं प्रदर्शितः ॥ ८८८ ॥
साप्युवाच न जानामि, सर्वरूपधराऽस्म्यहम् । न च विद्या मया कापि, प्रयुक्ता निजविग्रहे ॥ ८८९ ॥
ततस्ताः कथयामासु-रेत्य द्विजमृगीदृशः । साप्यगात्सम्भ्रमवती, दुर्ज्ञेयं चरितं स्त्रियाः ॥८९०॥
तामालोक्य रुरोदाऽथ, मुष्टा मुष्टेति निष्ठुरम् । भाषमाणा जवानोच्चै-र्मुष्टिभिर्वक्षसस्तटीम् ॥ ८९१ ॥
अन्यादृग्रूपवत्येषा, कथं वत्सा इहाऽजनि ? । अथवा दृष्टिदोषोऽयं, क्रूरदेवग्रहोऽथवा ॥ ८९२ ॥
अथ वा सूतिरोगोऽय-मथवा मे शुभक्षयः । अथवाऽकालमृत्युर्मे-ऽथवा दैवं पराङ्मुखम् ॥ ८९३ ॥
विलपन्तीमिमामूचु-स्त्रियः सन्निधिसंस्थिताः । मा रोदीः कुरु वेगेन, करणीयं यथाविधि ॥८९४॥
इत्युक्त्वा ताभिरत्यर्थं, साऽवादीद्गद्गदाक्षरम् । कुलदेवि ! करिष्यामि, पूजनं लक्षपूजया ॥ ८९५ ॥
मोदकानां बहुद्रोणिं, ढौकयिष्यामि ते पुरः । नर्त्यामि रजनीं पूर्णां, गीतं गास्यामि नूतनम् ॥ ८९६ ॥

---

१ वक्रनयनाम् ।

सप्तमो भवः

आरामशोभा-कथा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पॅद्रदेवि ! विधास्यामि, महायात्रां तवाऽऽग्रतः । लोकं च भोजयिष्यामि, नवैर्भोज्यैर्यथेच्छितम् ॥८९७॥
इत्युपयाचितवतीं, रुदतीं करुणस्वरैः । आययौ ब्राह्मणस्तत्र, जानानः ²कैतवं न हि ॥ ८९८ ॥
अन्यादृग्रूपभृत्पुत्रीं, तां वीक्ष्य ब्राह्मणोऽरुदत् । आः ! किमेतत्समुत्पन्न-मविचार्यं हृदाऽपि यत् ॥८९९॥
उपचारशतैरेषा, नाऽभूद्रूपप्रियोपमा । सूचीः स्यात्किं नु पाराऽग्नी ?, ताडनैरपि भूरिभिः ॥ ९०० ॥
यन्मया प्रथमं बाला, कुत्रापि न हि वेदिता । विधृता गर्भगेहेऽस्थान्, मृतेति बहुरुक्तिभिः ॥ ९०१ ॥
तदद्य शोभनं जातं, भवितेयं नृपप्रिया । ध्यात्वेति मुमुदे चित्ते, बहिः शोकवती भृशम् ॥ ९०२ ॥
इतश्च भूपतिर्ज्ञात्वा, पुत्रोत्पत्तिमहोत्सवम् । प्रेषयामास मन्त्रीशं, सोऽप्यगाच्च स्थलाशयम् ॥ ९०३ ॥
द्विज ! प्रेषय ते पुत्री-मुपराजं सनन्दनाम् । इत्युक्तः प्रेषयामास, विप्रः पुत्रीं सपुत्रकाम् ॥ ९०४ ॥
द्विज ! क्वास्ति वरारामः ?, सोऽवोचच्छिक्षितस्तया । उपकूपं पयःपानं, कुर्वन्नस्तीति चिन्तया ॥ ९०५ ॥
भवतां पाटलीपुत्रे, गतानामेकतः क्षणात् । अयमाराम आगन्ता, त्वं गच्छन् भव वर्त्मनि ॥ ९०६ ॥
प्रसाददानैर्भूयिष्ठै-स्तया तस्याः परिच्छदः । निषिद्धो मन्त्रिणो नाऽऽख्य-द्दानं कार्मणमङ्गिनाम् ॥९०७॥
क्रमतः पाटलीपुत्र-मगमद्विजनन्दिनी । प्रवेशं कारयामास, भूपतिर्मश्वसञ्चितम् ॥ ९०८ ॥
राज्ञा कुमारो दृष्टश्च, स्वकुमार इव श्रिया । तुतुषे चेतसा सूनु-सज्ञात्तेषां किमद्भुतम् ॥ ९०९ ॥
देवीरूपं निरीक्ष्योच्चै-र्विषाददलितोऽजनि । आः ! प्रिये ! रूपमीदृक्षं, कथमेतदजायत ? ॥ ९१० ॥



१ ग्रामदेवी ! । २ कपटम् ।

For Private and Personal Use Only

अथोचुस्ताः समायात-योषितः प्रकटाक्षरम् । यदा देव ! प्रसूतेयं, तदेयं दैवतोऽजनि ॥ ९११ ॥
यद्येवं कथमाराम-स्ता अप्यूचुरसंशयम् । पयः पिबन् विमुक्तोऽस्ति, पश्चान्नूनं समेष्यति ॥ ९१२ ॥
श्रुत्वेति विस्मितो राजा, स्फुटं कपटनाटकम् । नेयमारामशोभैव, परं तस्याः सुतः पुनः ॥ ९१३ ॥
ध्यात्वेति तस्या देहस्य, संस्पर्शं न चकार च । दुःखितो विमनस्कोऽभू-द्दीनो जालगमीनवत् ॥९१४॥
इत आरामयाऽभाणि, पितेव व्यन्तरस्तु सः । विना कुमारं मे चित्तं, दधाति विरहव्यथाम् ॥९१५॥
तथा कुरु यथा तात !, वीक्षे पुत्रमुखाम्बुजम् । अन्यथा जीवितव्यद्रु-र्निराशापत्रलोऽजनि ॥ ९१६ ॥
यद्येवं गच्छ वत्से ! त्वं, मम शक्त्या सुतान्तिके । परं शीघ्रं समेतव्य-मासूर्योदयतस्त्वया ॥ ९१७ ॥
पश्चात्स्थास्यसि चेत्त्वं तु, देवाऽऽराममनोहरे ! । ततस्तद्वार्त्तां नो कर्त्ता, हर्ताऽपि विपदाम्पदम् ॥ ९१८ ॥
त्वत्केशपाशतः पुत्रि !, मृतः सर्प्पः पतिष्यति । असकौ प्रत्ययः प्रोक्त-स्तत्राग्रे सत्यतोदितः ॥९१९॥
आमेत्युक्ते तया नागः, पुत्रिकां पाटलीपुरे । समानिन्ये निशामध्ये, पाययेत्तनयं पयः ॥ ९२० ॥
निबद्धरत्नदीपौघे, मौक्तिकस्वस्तिकाङ्किते । पुष्पोपहाररुचिरे, कर्पूरागरुवासिते ॥ ९२१ ॥
चतुर्दिक्षु सदाबद्ध-रक्षायन्त्रकदम्बके । भूभुजा कारिते रम्ये, बालपुत्रगृहे स्थिता ॥ ९२२ ॥
॥ त्रिभिर्विशेषकम् ॥
व्यधात्पुष्पोपहारं सा, भ्रमद्भ्रमरबन्धुरम् । अदृष्यदेवदूष्येन, साऽप्यधाच्च स्तनन्धयम् ॥ ९२३ ॥
एवं कृत्वाऽगमन्नाग-भुवनं भूपतिप्रिया । प्रागद्राक्षीत्क्षमानाथ-स्तत्सर्वं देवनिर्मितम् ॥ ९२४ ॥

सप्तमो भवः

आरामशोभा-कथा



For Private and Personal Use Only

ऊचे कापटिकीं कान्तां, भूयोऽद्य किमजायत ? । साप्युवाच नृपास्म्येषा-ऽऽरामशोभा भवत्प्रिया ॥९२५॥
परं कापटिकं रूपं, विधाय त्वामुपागता । तव प्रेमपरीक्षार्थं, न गृह्यन्ते नरा गुणैः ॥ ९२६ ॥
ततो मया वरारामा-दानीय कुसुमोत्करम् । पुष्पोपहारो विदधे, पिदधे वसनैरसौ ॥ ९२७ ॥
श्रुत्वेति भूपतिर्मेने, नापि तत्कथिते सति । मनः प्रत्येति सत्येन, नाऽसत्येन महात्मनाम् ॥९२८॥
अथोवाच नृपोऽप्येनां, यदि शक्तिर्गरीयसी । ममाध्यक्षं वरारामपुष्पाण्यानय साम्प्रतम् ॥ ९२९ ॥
तयोचे दिवसे शक्ति-र्दैवी नापि विजृम्भते । ततो राजाऽनुमेने तां, तत्त्वतो दम्भशोभिनीम् ॥९३०॥
दिनं वर्षोपमं राजा, गमयामास चिन्तया । इतः सूरोऽप्यगादस्त-मस्तायत्ता हि देहिनः ॥ ९३१ ॥
दीपच्छायाऽऽश्रिते कोणे, निशीथे पृथिवीपतिः । खड्गव्यग्रकरस्तस्थौ, ध्यायन्नारामवल्लभाम् ॥९३२॥ सप्तमो भवः
ततो दिव्याम्बरधरा-ऽऽरामशोभा नितम्बिनी । प्रश्नुवाना पयःपूरै-र्धेनुर्वत्सानुगेव सा ॥ ९३३ ॥ आरामशोभा-कथा
रत्नासने निविष्टाऽथ, गृहीत्वा पाणिनाऽर्भकम् । खेलयन्ती च हृत्पीठे, दों दों दोमिति वादिनी ॥९३४॥
स्वस्तन्य पाययामास, नर्त्तयामास बालकम् । विविधैर्नामभिर्नव्यै-रभाषिष्ट विशिष्टधीः ॥९३५॥युग्मम्॥
बालक्रीडां विधायाथ, यावदेषाऽचलत्तराम् । तावच्चेलाञ्चले राज्ञा, विधृता पद्मपाणिना ॥ ९३६ ॥
करभोरु ! क्व याताऽसि ?, हृत्वा मे निखिलं मनः । मनश्चारी मया, लब्धा, बध्नामि भुजबन्धनैः ॥९३७॥
साप्यूचे प्रातरेष्यामि, गदिष्यामि निजां कथाम् । त्वदाधीनाः प्रिय ! प्राणाः, मुञ्च मां भुजपञ्जरात् ॥९३८॥
अथ स्मित्वाऽवदद्भूपो, यदगाः गजगामिनि ! । तत्स्मर स्मरमत्तेभ-क्रीडार्थजघनस्थले ! ॥ ९३९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ततः सा भूपतेः क्रोड-मध्यास्य स्मितबन्धुरम् । विमातुः पूर्वसम्भूतं, तं वृत्तान्तमचीकथत् ॥ ९४० ॥
इतो वीक्ष्य त्विषांभर्तु-रुदितं रुदितं तया । तात ! नाग ! त्वया सार्धं, सम्बन्धो भविता कदा ? ॥९४१॥
इतश्च केशपाशात्स, नागदेहोऽपतन्मृतः । जायन्ते सत्यतो देवा, नासत्यं हि वदन्त्यमी ॥ ९४२ ॥
अथोवाच नृपः कान्ते !, हर्षे किं नु विषीदसि ? । ततः सा नागवृत्तान्तं, सप्रत्ययमवोचत ॥९४३॥
अथोचे हृषितो भूपो, मम पुण्यैः पतिस्त्विषाम् । उदियाय कथं लाभ-स्तव स्यात्प्रेमवारिधेः ॥९४४॥
इत्युदित्वा करे कृत्वा, कशां द्विजपतेः सुताम् । यावत्ताडयितुं कोपा-दुपाक्रमत नीतिवित् ॥९४५॥
तावदेषाऽन्तरे भूत्वा, जगाद करुणाक्षरम् । मुञ्च मे भगिनीं देव !, स्त्रीप्रहर्त्ता न सुन्दरः ॥९४६॥
देवि ! त्वं परतो भूया, एनां नवनवैरहम् । कुमारैर्मारयिष्यामि, शिक्षणीयाऽपि वर्णिनी ॥९४७॥
क्षेपिताऽसि महाकूपे, यत्त्वं निर्दययाऽमुया । तदेनां मारयिष्यामि, तद्विजं मातरं तथा ॥ ९४८ ॥
आरामशोभाऽभाषिष्ट, नीतिवित्सत्यमीरितम् । चेदत्ति कुकुरो लोकं, स लोकैर्भुज्यते नु किम् ? ॥९४९॥
अमुं दुःसहमाकर्ण्य, दृष्टान्तं जगतीपतिः । अहो ! दयामयी केय-महो ! रामाशिरोमणिः ॥९५०॥
अथ वाच्युच्चनीचानां, दृश्यतेऽन्तरमीदृशम् । वार्द्धिः क्षुभ्यति कल्पान्ते, न हि त्रिदशपर्वतः ॥९५१॥
इत्युक्त्वा भूपतिः प्रीतो-ऽमोचयत्तां स्थलाशये । हट्टेष्वपि गतं नूनं, वलते कूटनाणकम् ॥९५२॥
दम्पत्योरतिलाम्पट्यात्, कुर्वतोर्मन्मथोत्सवम् । तदेकतानमनसो-र्गतः कालः कियानपि ॥ ९५३ ॥
अन्येद्यू रहसि क्ष्माप-मुवाचाऽऽरामवर्णिनी । कथं पुराऽभवं देव ! दुःखदौर्गत्यपीडिता ॥ ९५४ ॥

सप्तमो भवः

आरामशोभा-कथा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथं सुखमयी देव ! जाताऽहं त्वत्प्रसादतः । इति विज्ञातुमिच्छामि, यद्यागच्छति केवली ॥९५५॥
एवमुक्तवती याव-त्तिष्ठत्येषा नृपाङ्गना । तावदागाद्वराराम-पालकः पालकाभिधः ॥ ९५६ ॥
देव ! ते चन्दनोद्याने, भूमिनन्दनसन्निभे । त्रिकालविन्महासत्त्वः, समागाज्जनपावनः ॥ ९५७ ॥
सिद्धान्तवारिधेश्चन्द्रो, वीरचन्द्राऽभिधानतः । मुनिपञ्चशताऽऽकीर्णो विस्तीर्णार्हतदेशनः ॥९५८॥ युग्मम् ॥
तच्छ्रुत्वा न्यगदद्राजा, प्रिये ! पूर्णा मनोरथाः । अथवाऽर्जितपुण्यानां चिन्तितं चित्तसात् स्फुटम् ॥९५९॥
अथ राजा समं देव्या, सह भूत्या विभूषितः । जगाम वन्दितुं सूरिं, तं नत्वा निषसाद च ॥९६०॥
अथ तद्भावमालोक्या-ऽवादीदेतन्महामुनिः । संसारसागरः सोऽय-मपारो भववारिभिः ॥ ९६१ ॥
यानपात्रोपमं तत्र, मानुष्यं मानुषेश्वर ! । तत्र धर्ममयः कूप-स्तम्भः सरलतागुणः ॥ ९६२ ॥
सुगुरोर्देशना तत्र, नूनं सितपटोपमा । तया याति जनो भव्य-देशद्वीपादिषु स्फुटम् ॥ ९६३ ॥
तत्राऽस्ति सुकृतं नाम, पण्यं पुण्यमते ! वरम् । यत्प्रभावादभूच्छर्म्म, तव पत्नीवदञ्जसा ॥ ९६४ ॥
एतस्मिन्नेव सुद्वीपे, चम्पापूः कम्पवर्जिता । श्रेष्ठी कुलधरस्तत्र, नानावित्तधरः सुधीः ॥ ९६५ ॥
कुलानन्दा प्रिया तस्य, कुलाऽऽनन्देन शालिनी । तयोरिमाः सुताः जाताः, सप्तसन्तानदीपिकाः ॥९६६॥
प्रथमा कमलश्रीश्चा-परा कमलवल्यपि । तृतीया कमला नाम, तुर्या लक्ष्मीरिति स्फुटम् ॥९६७॥
श्रीरिति पञ्चमी पुत्री, यशोदेवी ततः परम् । प्रियकारिणीति नाम्ना, सप्तमी प्रियकारिणी ॥९६८॥
यथाक्रमं कुले रम्ये, श्रेष्ठिना परिणायिताः । नेपथ्यानि प्रदत्तानि, पूजितास्तत्प्रिया अपि ॥ ९६९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अतोऽभूदष्टमी पुत्री, तयोर्नष्टा नु चेतना । अत्युत्सवे न लज्जन्ते, धीमन्तः सधना अपि ॥९७०॥
अहो ! पुत्रीभिरस्माकं, सुदृष्टं केवलं गृहम् । येन ज्ञाता इवाऽऽयान्ति, निषिद्धाः शपथैरपि ॥९७१॥
निर्विन्नौ पितरौ तस्या-श्चक्राते नामकर्म न । निर्भाग्येति जनैरुक्ता, निर्नामिका किमप्यहो ! ॥९७२॥
अन्येद्युर्भणितः श्रेष्ठी, जनैः सूनृतवादिभिः । परिणाययसे कन्यां, किमु न प्राप्तयौवनाम् ॥ ९७३ ॥
ततस्तस्या वरोपायं, वीक्षमाणो धनेश्वरः । अगादटन् ततो दृष्टो, नरः कोऽपि सुदुर्गतः ॥ ९७४ ॥
सहस्रचक्षुःसाधर्म्यं, यस्य वस्त्राणि बिभ्रति । छिद्रैरत्यन्तसम्भूतैः, दारिद्र्यं छिद्रदूषितम् ॥ ९७५ ॥
भणितोऽसौ कुतो भद्र !, समागाः कुत्र वास्यसि ? । किं नामधेयं निर्भाग्य !, ध्रुवं ब्रूहि ममाग्रतः ॥९७६॥
इत्युक्तः श्रेष्ठिनाऽवादीत्, कोशलायां महापुरि । गणेन्द्रभूतिरिभ्योऽभूत्तस्य सोमाभिधा प्रिया ॥९७७॥
तस्याहं नन्दनो देव !, नन्दन इति विश्रुतः । पितरौ च विपेदाते, जातोऽहं दुर्गतस्ततः ॥ ९७८ ॥
तत्रत्यवणिजो लेखं, समादाय महामते ! । श्रीदत्तश्रेष्ठिनोऽभ्यर्णे, समागां द्रविणेच्छया ॥९७९॥
श्रुत्वेति ध्यातवानेव-महं पूर्वाङ्गजाव्रजैः । उद्वेलितोऽस्मि सतत-मूणं मूर्तं हि नन्दिनी ॥ ९८० ॥
अद्याऽसूत सुता सूनुं, प्रेष्यं भूषणमञ्जसा । विवाहे च मातृशालं, लेखशालामहोत्सवः ॥ ९८१ ॥
योऽप्येकनगरे पुत्रीं, ददाति स्नेह-वृद्धये । स स्वयं गृहमुद्दीप्य, बहिर्याति प्रधावितः ॥ ९८२ ॥
प्रतिदर्शं विधातव्यो, जामातुर्भोजनोत्सवः । ही ! यमोऽप्येकदा हन्ति, जामाता शतधा धनैः ॥९८३॥
इत्यादिनन्दिनीभूतै-राचारैर्धनदारुणैः । घुणैरिव तरुं जग्धं, वैरिणीः खलु देहजाः ॥ ९८४ ॥



For Private and Personal Use Only

अष्टमीं नन्दिनीमस्मै, दास्ये व्यवस्थयाऽमुया । विवाहाऽनन्तरं लाग-भागो नो नास्ति कुत्रचित् ॥९८५॥
ध्यात्वेति नन्दनं स्माह, तुभ्यं दास्ये निजाऽङ्गजाम् । यतस्तव पिता मित्रं, मम पावित्र्यपेशलाम् ॥९८६॥
अतस्तुभ्यं प्रदास्यामि, मित्रपुत्रतया सुताम् । परं त्वया ममाऽभ्यर्णे, न वाच्यं किञ्चन क्वचित् ॥९८७॥
आमिति गदिते तेन, नीतोऽसौ श्रेष्ठिना गृहम् । लग्नं विनाऽपि यामिन्यां, कन्याश्च परिणायितः ॥९८८॥
तया साकं व्रजन्नेष, छिन्नशम्बलसद्बलः । अवन्तीं नगरीं प्राप्य, देशकुट्यां निषेदिवान् ॥ ९८९ ॥
ध्यातवानिति मे नास्ति, शम्बलं येन याम्यहम् । दूरे मम पुरी चम्पा, न स्त्री चङ्क्रमणक्षमा ॥ ९९० ॥
नास्याः पित्रा धनं किञ्चित्, प्रदत्तं मम सर्वथा । उक्त्वा येनाऽद्यमुद्वाहः कृतो दद्यान्न किञ्चन ॥९९१॥
तावद्धर्मः कुलं ताव-त्तावत्कार्यविमर्शनम् । तावल्लज्जा धृतिस्ताव-द्यावन्न स्यात्क्षुदर्दितः ॥ ९९२ ॥
यदि भिक्षामहं याचे, गृह्णात्यर्द्धं तदुद्भवम् । यतोऽर्द्धहारिणी रामा, चिन्तापादपसारिणी ॥९९३॥
ध्यात्वेति प्रियया साकं, सुष्वापाऽसत्यनिद्रया । साऽपि श्रमार्त्ता शेते स्म, निद्रा विजयिनी सदा ॥९९४॥
अथ कन्थाद्यमादाय, निर्ययौ नन्दनो वणिक् । चकार जागरां सापि, नाथमैक्षत न क्वचित् ॥ ९९५ ॥
हा ! नाथ ! किमु मुक्ताऽस्मि ?, परदेशे क्षुदर्दिता । त्वत्पाणिग्रहणं प्राप्य, कृतार्थाऽस्मीति चिन्त्यताम् ॥९९६॥
पित्रोरनिष्टा प्रथमं, प्रियस्याऽपि तथाऽभवत् । यो गृहे भवति लघुः, स बाह्ये नीयतेऽनिलैः ॥९९७॥
गृह्णीयाच्चेत्परः कोऽपि, मां जातनवयौवनाम् । स्वामिंस्तव कुले कोऽपि, कलङ्कस्य नवाऽङ्कुरः ॥९९८॥
अनिष्टायाः पितुर्गेहे, स्थिताया अपि न त्रपा । इदानीं देवता सत्यं, भ्रमणं बाच्यकारणम् ॥९९९॥

सप्तमो भवः

आरामशोभा-
कथा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ध्यात्वेति धैर्यमालम्ब्य, प्रविश्योज्जयिनीं पुरीम् । पुरुषं कञ्चन प्रेक्ष्य, भद्राकारमनोहरम् ॥१०००॥
पतित्वा पादयोस्तस्य, बाष्पपूर्णविलोचना । उवाच तात! चम्पाया-मिभ्यः कुलधरो वणिक् ॥१००१॥
॥ त्रिभिर्विशेषकम् ॥
तस्याऽहमस्मि पुत्रीयं, गौडाख्यं विषयं प्रति । चलिता सह नाथेन, स नाथः क्वापि मे गतः ॥१००२॥
स्वपत्युर्विषये गन्तुं, न शक्ता स्वां पुरीमपि । त्वं तु तातसमो दृष्टो, मां स्वीकुरु सुतात्वतः ॥१००३॥
अथैष वचनैरस्या, रञ्जितोऽगदद्ञ्जसा । तिष्ठ पुत्रि! ममागारे, साक्षात्कुलधरस्तव ॥ १००४ ॥
इत्युक्त्वा **माणिभद्रेण**, सा मुक्ता मन्दिरे निजे । निजाङ्गजानिर्विशेष-माचचाराऽथ सोऽनिशम् ॥१००५॥
परीक्षितुं वचस्तस्या, **माणिभद्रेण** सादरम् । अप्रेष्यततरां लेख-वाहकः कार्यकारकः ॥ १००६ ॥
तेन गत्वा पुरीं चम्पां, पृष्टः कुलधरो वणिक् । कति पुत्राः कति पुत्र्यः? सोऽप्यूचे न हि नन्दनाः ॥१००७॥
इहैव सन्ति मत्पुत्र्यः, सप्तैव परिणायिताः । अष्टमी गौडविषये, प्रेषिता सधवा पुनः ॥ १००८ ॥
किमर्थं पृच्छति भवान्, सोऽप्यवादीदिदं ततः । नगर्याः प्रेषितो **माणि-भद्रेण** भवदन्तिके ॥१००९॥
ववाहिकं विधातुं त्वा-मिच्छा तस्य प्रवर्द्धते । सोऽवक् विवाहनाम्नाऽपि, लज्जासज्जोऽस्म्यहं सखे! ॥१०१०॥
ततस्तेन समागत्य, **माणिभद्राय** सर्वतः । तदुक्तं कथयामास, तद्वचः सत्यमिच्छुना ॥ १०११ ॥
ततःप्रभृति स श्रेष्ठी, तद्गौरवमकारयत् । नेपथ्यं घटयामास, पूजयामास चीवरैः ॥ १०१२ ॥
वित्तवान् **माणिभद्रो**ऽपि, जिनधर्मपरायणः । अकारयन्नवं चैत्यं, सुदृशां शैत्यकारकम् ॥ १०१३ ॥

स्वसमो भवः

आरामशोभा-कथा



For Private and Personal Use Only

महेभ्यो देवतागारे, द्रव्यव्ययपुरस्सरम् । नाटकानि महर्षीणां, प्रतिपर्व व्यधापयत् ॥ १०१४ ॥
महापद्म इव शेषे, पुरे रथमहोत्सवम् । चक्रे विमोचयन् वित्तदानै-र्गुप्तिगतान् जनान् ॥ १०१५ ॥
साधर्मिकाणां वात्सल्य-महर्दिवमकारयत् । गुप्तिस्थान् मोचयामास, नास्ति दानसमं शुभम् ॥१०१६॥
त्रिकालं कुसुमैरेष, जिनेन्द्रं पर्यपूजयत् । भक्तिं चकार साधूनां, वस्त्रान्नशयनादिभिः ॥ १०१७ ॥
साऽपि कौलधरी पुत्री, श्रेष्ठिवज्जिनमर्चयत् । प्रत्यहं स्वस्तिकांश्चक्रे, शिवौकस्वस्तिकोपमान् ॥ १०१८ ॥
विक्रीय पत्रपूगादि, भ्रान्त्वा सुबहु पत्तने । किं बहुना ? देवतास्वं, शुभभावादवीवृधत् ॥ १०१९ ॥
स्वनेपथ्येन सौवर्ण-छत्रत्रयमकारयत् । उपरिष्टाज्जिनेन्द्रस्य, त्रिलोकैश्वर्यसूचकम् ॥ १०२० ॥
तस्मिन् जिनेन्द्रसद्वक्त्रं, वीक्ष्य तारावलीभ्रमम् । विश्रामधाम सुदृशां, मुक्तोचूलमचीकरत् ॥१०२१॥
यद्यत्प्राप्नोति सा वित्तं, तत्तच्छत्रे न्यवेशयत् । औपम्यमस्यामेवाऽस्या, वारिधेर्वारिधाविव ॥१०२२॥
माणिभद्रो वरारामं, देवार्चायामकारयत् । तत्र गत्वा स्वयं पौष्प-मानिन्ये परमार्हतः ॥ १०२३ ॥
स ग्रन्थ्य कुसुमान्युच्चैः पूजयामास तीर्थपम् । तीर्थभर्तुः किङ्करत्वं, चक्रित्वमुपतिष्ठते ॥ १०२४ ॥
केनचिद्धेतुनाऽन्येद्यु-र्दृष्ट्वाऽऽरामं विपुष्पकम् । इभ्योऽभ्यपूर्यताऽस्तोकं, शोकेन हृदयस्थलम् ॥ १०२५ ॥
देव्या कयाचन क्रोधान्-मिथ्यात्वग्रहिलाशयात् । संशोषितो ममाऽऽरामः कोपः पापवतां गृहम् ॥१०२६॥
अथवा तीर्थकृद्भर्तुरभक्तिः कापि दर्शिता ? । येनायमद्भुताऽऽरामो, विरामः पुष्पसम्पदाम् ॥ १०२७ ॥
इति ध्यानपराधीनं, माणिभद्रं निरीक्ष्य सा । तात ! चिन्तातुरः कस्मा-च्चिन्ताभागं प्रयच्छ मे ॥ १०२८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सोऽप्युवाच सुते देवा - ऽऽरामः शुष्क इहाऽजनि । तन्निमित्तमभूत्खेदः, खेदः स्वार्थक्षये सखा ॥ १०२९ ॥
अथोचे श्रेष्ठिनं पुत्री, शीलं मे यदि निर्मलम् । ततः पूर्ववदाऽऽरामो, भूयात्फलसमाकुलः ॥ १०३० ॥
अन्यथा निखिलाहार - परिहारः कृतो मया । कायोत्सर्गं करिष्यामि, भविष्यामि समाहिता ॥ १०३१ ॥
एवं सा निश्चयं कृत्वा, शुद्धाम्बरधरा सती । गत्वा देवगृहं नत्वा, देवं देवेन्द्रवन्दितम् ॥ १०३२ ॥
कायोत्सर्गं चकारैषा, सर्वयोषाशिरोमणिः । वारंवारं स्फुरद्भाव-प्रकाराऽवकरोज्झिता ॥ १०३३ ॥ त्रिभिर्विशेषकम् ॥
तृतीयदिनयामिन्यां, शासनस्वामिनी पुरः । तस्याः सत्त्वात्समाकृष्टा, स्फुटाऽभूदद्भुतद्युतिः ॥ १०३४ ॥
तुष्टाऽस्मि सुभगे ! तुभ्यं, याचस्वेप्सितमात्मनः । कायोत्सर्गं विमुञ्चामुं, सत्त्वतुष्टाः सुधाभुजः ॥ १०३५ ॥
पारयित्वा तया कायो - त्सर्गमूचे वचः शुचि । तथा कुरु यथाऽऽरामः, पूर्ववत्फलपेशलः ॥ १०३६ ॥
एवमुक्त्वा गता देवी, प्रत्याख्यानसुरी चिरम् । सा प्रगे कथयामास, तत्सर्वं श्रेष्ठिनः पुरः ॥ १०३७ ॥
श्रेष्ठी निरीक्षयामास, च्छन्नमाप्तस्वपुरुषात् । स गत्वाऽऽगत्य चावादी - दपूर्वः कोऽपि सोऽभवत् ॥ १०३८ ॥
सुते ! मनोरथाः पूर्णाः, सृष्टेरासंहृतेरहम् । त्वयैव पुत्रवानस्मि, किं पुत्रैर्धर्महन्तृभिः ? ॥ १०३९ ॥
उक्त्वेति माणिभद्रोऽथ, तूर्यघोषपुरस्सरम् । साकं सकलसङ्घेन, वराराम समासदत् ॥ १०४० ॥
आरामं पुष्पितं दृष्ट्वा, पुष्पैः सन्ध्याभ्रविभ्रमैः । पुत्र्याः कुलधरस्योच्चैः, श्लाघाद्वैतं जनोऽवदत् ॥ १०४१ ॥
धन्यस्तीर्थकृतां धर्मो, धन्येयं कुलबालिका । धन्यमस्या महच्छीलं, येनाऽऽरामो मनोहरः ॥ १०४२ ॥
एवं बन्दिभिरुद्दाम - नवैः काव्यैः प्रपञ्चितम् । अर्थे प्रत्यक्षदृष्टे हि, को विवादपरायणः ? ॥ १०४३ ॥



For Private and Personal Use Only

आनीय पुष्पसङ्घातं, फलजालविकस्वरम् । अपूजयज्जिनं श्रेष्ठी, यथास्थिति जनाः परे ॥ १०४४ ॥
साधर्मिकाणां वात्सल्य-मथ कृत्वा यथाविधि । पारणमेकभक्तेन, चक्रे कुलधरात्मजा ॥ १०४५ ॥
ततः शुभगुरूपान्ते, श्रेष्ठिनोऽनुज्ञया व्रतम् । अग्रहीदायुषो नास्ति, प्रव्रज्यायाः परं फलम् ॥ १०४६ ॥
विधाय विधिवत्प्राज्यं, चारित्रमतिपावनम् । सौधर्मे नाकसञ्जज्ञे, तस्माद्ब्राह्मणपुत्रिका ॥ १०४७ ॥
क्रमशो माणिभद्रोऽपि, स्तोकायुस्त्रिदशोऽजनि । तस्माद्बभूव मनुज-स्ततो नागसुरोऽजनि ॥ १०४८ ॥
मिथ्यात्वदुष्टया पूर्व-स्थितया पितृवेश्मनि । यदर्जितमघं देवि !, तस्माद्बाल्ये सुखं न ते ॥ १०४९ ॥
यत्त्वया तीर्थनाथस्यो-परि छत्रत्रयं वरम् । कारितं सहस्रश्वारी, तेनाऽऽरामस्तवाऽभवत् ॥ १०५० ॥
तुष्टो नागकुमारोऽपि, यत्तवाऽऽरामशोभिनि ! । तत्पूर्वजनकत्वेन, प्रेम कोटिभवानुगम् ॥ १०५१ ॥
यत्त्वया जिनवित्तानि, वर्द्धितानि दिने दिने । तत्ते भोगपरा भोगाः, सत्कृतं नान्यथा भवेत् ॥ १०५२ ॥
श्रुत्वेति केवलिप्रोक्तम्, जातिस्मरणमाप सा । उवाच तव वाक्येन, स्मारिताऽर्थं पुरातनम् ॥ १०५३ ॥
यथाऽनुभूतं सर्वज्ञ !, चरितं कथितं त्वया । अधिकं केवलज्ञाना-न्नास्ति ज्ञानं महीतले ॥ १०५४ ॥
स्वामिन् ! युष्मद्वचः श्रुत्वा, विरक्तं भवतो मनः । चारित्रं प्राप्तुमिच्छामि, यौष्माकचरणान्तिके ॥ १०५५ ॥
इदं देवीवचः श्रुत्वा, जगाद जगतीश्वरः । देवीव भवतो नाथ !, विरक्तोऽस्मि स्मिताननः ॥ १०५६ ॥
यावत्कुमारे राज्यस्य, भारं न्यस्यामि सन्मते ! । तावत्त्वयात्र च स्थेयम्, प्रतिबोधपरा जिनाः ॥ १०५७ ॥
ततो गत्वा नृपो देव्या, साकमारामनन्दनम् । अभिषिच्य न्यधाद्राज्ये, धर्मेच्छुः को विलम्बते ? ॥ १०५८ ॥

सप्तमो भवः

आरामशोभा-कथा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एत्य केवलिनः पार्श्वे, व्रतं जगृहतुस्तराम् । पालयामासतुः शुद्धं, जग्मतुस्त्रिदशालयम् ॥ १०५९ ॥
अर्हद्भक्तेः कथामेनां, श्रुत्वा भावविवर्द्धनीम् । तनयो भूपतिः प्राप, निजावासमसम्मदः ॥ १०६० ॥
अर्हद्भक्तिं सदा कुर्वन्, कारयन् प्रतिवासरम् । मृत्वोत्पन्नस्स सौधर्मे, तस्मान्निर्वाणमाप्स्यति ॥ १०६१ ॥
सुरज्येष्ठो महासत्त्वो, विहरन्पावनक्रियः । अर्हद्गोत्रनामकर्मा-ऽबध्नादिति शुभाशयः ॥ १०६२ ॥
तथा हि–अर्हतां प्रतिमाऽर्चाभि-रर्हतां स्तवनादिभिः । एकमर्जितवान् स्थान-मवर्णादिनिवारणैः ॥१०६३॥
सिद्धस्थानेषु सिद्धानामुत्सवैः प्रतिजागरैः । एकत्रिंशत्सिद्धगुण-कीर्तनैश्च द्वितीयकम् ॥ १०६४ ॥
प्रवचनोन्नतेः सम्यक्, ग्लानबालादिसाधुषु । अनुग्रहमनोज्ञायाः, स्थानमेतत्तृतीयकम् ॥ १०६५ ॥
गुरूणामञ्जलिर्बद्धा-द्वस्त्राहारादिदानतः । असमाधिनिषेधेन, स्थानमेतत्तुरीयकम् ॥ १०६६ ॥
स्थविरा द्विविधा प्रोक्ताः, वयसा सुगुणैरपि । तेषां भक्तिविधानेन, पञ्चमं स्थानकं विदुः ॥ १०६७ ॥
बहुश्रुतानां ग्रन्थार्थ-वेदिनां तत्त्वशालिनाम् । प्रासुकान्नादिदानेन, षष्ठं स्थानमुदीरितम् ॥ १०६८ ॥
तपस्विनां सदोत्कृष्ट-तपःकर्मस्थिरात्मनाम् । विश्रामणादिवात्सल्यात्, सप्तमं स्थानमिष्यते ॥ १०६९ ॥
ज्ञानोपयोगः सातत्यं, द्वादशाङ्गागमस्य च । सूत्रार्थोभयभेदेन, स्थानं ननु तदष्टमम् ॥ १०७० ॥
दर्शनं रहितं शङ्काद्यैः, स्थैर्यादिगुणान्वितैः । शमादिलक्षणं यत्तु, स्थानकं नवमं मतम् ॥ १०७१ ॥
विनयो यश्चतुर्भेदो, ज्ञानदर्शनतोऽपि च । चारित्रादुपचाराच्च, स्थानं तद्दशमं मतम् ॥ १०७२ ॥
आवश्यकं भवेत् स्थान-मेकादशमिदं पुनः । इच्छादिदशधा या च, सामाचारी जिनोदिता ॥ १०७३ ॥

सप्तमो भवः



For Private and Personal Use Only

शीलव्रतं विशुद्धं यत्, नवगुप्तिनियन्त्रितम् । यत्पाल्यं निरतिचारं, स्थानं तद्वादशं भवेत् ॥ १०७४ ॥
त्रयोदशमिदं स्थानं, क्षणे क्षणे लवे लवे । शुभध्यानस्य करणं, प्रमादपरिवर्जनात् ॥ १०७५ ॥
तपो विधीयते शक्त्या, बाह्याऽभ्यन्तरभेदतः । असमाधिपरित्यागात्, स्थानमुक्तं चतुर्दशम् ॥ १०७६ ॥
त्यागोऽतिथिसंविभागः, शुद्धान्नोदकदानतः । तपस्विनां स्वया शक्त्या, स्थानं पञ्चदशं तु तत् ॥ १०७७ ॥
वैयावृत्त्यं तु गच्छस्य, बालादिदशभेदतः । भक्तिः विश्रामणाद्यैः स्यात्, षोडशस्थानकं किल ॥ १०७८ ॥
समाधिः सर्वलोकस्य, पीडादिकनिवारणात् । मनःसमाधिजननं, स्थानं सप्तदशं भवेत् ॥ १०७९ ॥
अपूर्वज्ञानग्रहणात्, सूत्रार्थोभयभेदतः । अष्टादशमिदं स्थानं, सर्वज्ञैः परिभाषितम् ॥ १०८० ॥ सप्तमो भवः
श्रुतभक्तिः पुस्तकानां, लेखनादिककर्मतः । व्याख्याव्याख्यापनैरेको-नविंशं स्थानकं भवेत् ॥ १०८१ ॥
प्रभावना प्रवचन-विद्यावादनिमित्ततः । शासनस्योन्नतेर्या स्यात्, स्थानं विंशतिसञ्ज्ञिकम् ॥ १०८२ ॥
एकैकं तीर्थकृन्नाम-कर्मबन्धस्य कारणम् । सर्वैराराधितैरेभि-स्तद् बबन्ध सः संयमी ॥ १०८३ ॥
सुरज्येष्ठो महासत्त्वो, ज्ञात्वा पर्यन्तमात्मनः । प्रतिलिख्य क्षमापीठ-मुपाविक्षद्यथाविधि ॥ १०८४ ॥
कृत्वा मनसि भावेन, जिनेन्द्रं प्रतिमामिव । असावाराधनां धीरः, स्वयं विहितवानिति ॥ १०८५ ॥
अकालविनयाद्यैर्यो, ज्ञानाचारे स्वरूपिणि । अतिचारः कृतस्तत्र, स्यान्मिथ्यादुष्कृतं मम ॥ १०८६ ॥
अष्टधा दर्शनाचारे, भेदैर्निःशङ्कितादिभिः । योऽतिचारः कृतस्तत्र, भूयान्मे दुष्कृतं ननु ॥ १०८७ ॥
समितिभिः पञ्चभिश्च, गुप्तिभिस्तिसृभिर्वृतम् । पालितं यन्न चारित्रं, तत्र मे दुष्कृतं वृथा ॥ १०८८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तपसि द्वादशभेदे, बाह्याऽभ्यन्तरभेदतः। योऽतिचारः कृतस्तत्र, मिथ्या मे दुष्कृतं भवेत् ॥ १०८९ ॥
निगूहितं बलं यच्च, धर्मानुष्ठानकर्मसु। तमहं भावतो वीर्याचारं निन्दामि सर्वतः ॥ १०९० ॥
त्रसानां स्थावराणाञ्च, या हिंसा प्राणिनां कृता। क्रोधादिभिः कषायैश्च, यदलीकं मयोदितम् ॥१०९१॥
यत्कापि भूरि चाल्पं च, परद्रविणमाहृतम्। तैरश्च्यं दिव्यमानुष्यं, यन्मैथुनमकारि च ॥ १०९२ ॥
लोभोद्रेकान्मयाऽकारि, बहुभेदपरिग्रहः। प्रत्यक्षं सर्वसिद्धानां, सर्वं निन्दामि तत्त्रिधा ॥ १०९३ ॥युग्मम्॥

प्राणिघातो १ मृषावादो २,-ऽदत्तादानञ्च ३ मैथुनम् ४।
परिग्रह ५ स्तथा, कोपो ६, मानो ७ माया च ८ लोभकः ९ ॥ १०९४ ॥
रागो १० द्वेषो ११ रत्यरत्य १२,-भ्याख्याने १३ कलह १४ स्तथा।
पैशुन्यं १५ परिवादश्च १६, मायाऽसूनृतमेव च १७ ॥ १०९५ ॥

सप्तमो भवः

मिथ्यादर्शनशल्यञ्च १८, भवसन्ततिकारणम्। अमून्यष्टादशाऽवद्य-स्थानानि व्युत्सृजाम्यहम् ॥१०९६॥
एकेन्द्रियादिका जीवा, ये केचन भवाम्बुधौ। भ्रमता पीडितास्त्रेधं, तान् क्षमयामि शुद्धहृत् ॥१०९७॥
यच्चक्रे पापशास्त्रादि, तन्निन्दामि समाहितः। शीलं यत्पालितं शुद्धं, तदभिष्टौमि तत्त्वतः ॥१०९८॥
ग्लानानां यत्समाचीर्णं, वैयावृत्त्यादिकं मया। षड्विधाऽऽवश्यकं शुद्धं, यच्चक्रे तत्स्तवाम्यहम् ॥१०९९॥
शरणं मम तीर्थेशाः, सिद्धाश्च शरणं मम। साधवः शरणं सर्वे, धर्मः शरणमाऽर्हतः ॥ ११०० ॥
उपधिं देहमाहार-मुच्छ्वासेनान्तिमेन च। त्रिविधं व्युत्सृजाम्युच्चै-र्निर्ममत्वविभूषितः ॥ ११०१ ॥



For Private and Personal Use Only

ये जानन्ति जिनाः सम्य - गपराधान् मया कृतान्। तान् भूरिभावतः सर्वान्, गर्हेऽहं सिद्धसाक्षिकम् ॥११०२॥
एष जीवः कियत्पापं, छद्मस्थः स्मरति स्वयम् । यदहं न स्मराम्यत्र, मिथ्यादुष्कृतमस्तु तत् ॥११०३॥
ऋषभादिजिनेन्द्राणां, शाश्वतानां पुरस्सरम् । प्राकृतं दुष्कृतं सर्वं, निन्दामि व्युत्सृजामि च ॥११०४॥
शुभध्यानपरो मृत्वा, नमस्कारपरायणः । राजसाधुर्विपद्याऽभूत्, प्राणते त्रिदशेश्वरः ॥ ११०५ ॥
विनयोपचारसरसै - रेतैर्जिनगोत्रनामभिः स्थानैः । सुभगं भविष्णु देहो, भेजेऽसौ प्राणते सौख्यम् ॥११०६॥

इत्याचार्यश्रीविनयचन्द्रविरचिते श्रीमुनिसुव्रतस्वामिचरित्रे महाकाव्ये विनयाङ्के अगडदत्त-युगबाहु-आरामशोभा-कथानक-गर्भितः पञ्चम-षष्ठ-सप्तम-अष्टम-भवव्यावर्णनो नाम द्वितीयः सर्गः ॥ ग्रंथाग्रः ॥ १६४५ ॥



For Private and Personal Use Only

## तृतीयः सर्गः ।

इत्यष्टकं भवानां जगदे, जगदीशितुर्जिनेन्द्रस्य । उद्धृत्य समयजलधे-र्गुरूपदेशेन सङ्क्षिप्तम् ॥ १ ॥
चक्रे कैश्चन चरितं भवत्रयो जिनवरस्य सङ्क्षिप्तम् । प्रायः सङ्क्षेपरुचिर्भवतितरां जगति भव्यजनः ॥ २ ॥

इक्ष्वाकुवंशप्रभवा जिनेशा,–द्वाविंशतिः साम्यलताऽवसंसाः ।
द्वौ तीर्थनाथौ शुभमार्गसार्थौ, जातौ च वंशे हरिनामधेये ॥ ३ ॥

यस्मिन्वंशे विशुद्धाः, क्षितिपतितिलकाः पालयित्वाऽऽधिपत्यं
तप्त्वा तीव्रं तपोऽपि, प्रशमपरिणताः केऽप्यगुर्मोक्षसौधम् ।
केचित्सर्वार्थसिद्धिं त्रिदशवरगृहं, प्राप्य नित्या बभूवुः ।
तं वन्देऽहं जिनेन्द्रद्वय-जनिरुचिरं, भावतस्तत्त्वबुद्ध्या ॥ ४ ॥

नवमो भवः

हरिवंशोत्पत्तिः

कैटभरिपुबलभद्रौ, यस्मिन्वंशे बभूवतुः सुनरौ । चित्रैश्चरित्रचित्र-वीर्या जगद्भित्तिरभ्राजि ॥ ५ ॥
तस्य श्रीहरिवंशस्य, प्रशंसां रचयाम्यहम् । येन मे परमानन्दः, प्रसर्प्पति मनोऽम्बुजे ॥ ६ ॥
चक्रधरकुले प्रान्त-कुले हीनकुलेऽपि च । उत्पद्यन्ते जिना नैव, किन्तु राजकुले वरे ॥ ७ ॥
इतश्च्युत्वैष भगवान्, हरिवंशे किलाऽजनि । तेनैवमस्य वंशस्य, समुत्पत्तिर्निगद्यते ॥ ८ ॥
तथा हि जम्बूद्वीपेऽस्मिन्, क्षेत्रे दक्षिणभारते । कौशाम्बीनाम नगरी, वत्समण्डलमण्डनम् ॥ ९ ॥
सुमुखो भूपतिस्तत्र, विमुखः परयोषिति । सुमुखस्तेजसां धाम, सुसखः शेमुषीवरः ॥ १० ॥



For Private and Personal Use Only

वृद्धो यशः पुनानोऽसौ, दिक्षु भ्रमणलम्पटः । दण्डं जग्राह भूभृद्भ्यः, समुद्रकरमण्डितः ॥ ११ ॥
वज्रपाणिरपूर्वोऽयं, पतिरासीच्चतुर्दिशाम् । अजघन्यः प्रचेतास्तु, कुबेरो उत्तरः किल ॥ १२ ॥
अपरेद्युर्वसन्तर्तौ, रतिवल्लभवल्लभे । अचालीद्रन्तुमुद्यान-मसौ रन्तुमना नृपः ॥ १३ ॥
स यान्दन्तावलारूढो, वनमालेति विश्रुताम् । प्रियां वीरकुविन्दस्य, पङ्कजाक्षीमुदैक्षत ॥ १४ ॥
पार्वणेन्दुमुखीं पीन-समुन्नतपयोधराम् । मृणालमृदुदोर्लक्ष्मीं, पुलिनाभकटीतटीम् ॥ १५ ॥
वामेन पाणिना श्रोण्याः, श्रंसमानं वरांशुकम् । दक्षिणे ननु बिभ्राणा-मुत्तरीयं कुचस्थलात् ॥ १६ ॥
वज्रक्षामोदरीं कोक-नदाऽऽताम्रकरोदराम् । तां वीक्ष्य पृथिवीभर्ता, कामार्त्या विधुरोऽजनि ॥ १७ ॥
॥ त्रिभिर्विशेषकम् ॥
इयं शापेन कस्यापि, दिवो भ्रष्टा सुराङ्गना । किमियं व्यन्तरी कापि, किञ्चेयं जलदेवता ? ॥ १८ ॥
वसन्तलक्ष्मीः किमियं ?, किं रतिः स्मरवर्जिता ? । किं वा हिमाद्रिजा देवी, स्त्रीरत्नं किमु चक्रिणः ? ॥ १९ ॥
एवं ध्यायन् धरापाल-स्तत्रैवाभ्रमयद्द्विपम् । सत्पथेषु भ्रमः प्रायः, कन्दर्पाज्ञाविधायिनाम् ॥ २० ॥
नृपभावं परिज्ञाया-ऽवोचन्मन्त्री कथं विभो ! । कमपीवाग्रतो वीक्षां-चक्राणो यासि न क्वचित् ॥ २१ ॥
देव ! प्राप्तं बलं सर्वं, विलम्बते कुतोऽमुना ? । रथ्या रथैश्च सम्पूर्णाः, पूरैरिव सरिद्वराः ॥ २२ ॥
अमात्यवचसा तेना-ङ्कुशेनेव महागजम् । चेतः संस्थाप्य यमुना-वर्त्तमुद्यानमाप सः ॥ २३ ॥
न चूतमञ्जरीपुञ्जे, मञ्जुगुञ्जन्मधुव्रते । नाप्यशोकवने लोल-पल्लवोल्लाससुन्दरे ॥ २४ ॥

नवमो भवः
हरिवंशोत्पत्तिः

वेल्लद्वकुलखण्डेऽपि, न वा विचकले कले । नीचांशुकायितदले, न वा कदलिकानने ॥ २५ ॥
न वाऽऽन्दोलनखेलासु, पाशेष्विव मनोभुवः । लभते स्म रतिं राजा, स्वान्ते हृतमनास्तया ॥ २६ ॥
॥ त्रिभिर्विशेषकम् ॥
अथोचे सुमतिर्मन्त्री, स्वामिन्! भावं स्फुटीकुरु । न ते च्छन्नद्विषो भीति–र्विकारः कोऽपि मान्मथः ॥ २७ ॥
किञ्चिद्विहस्य राजोचे, भावं भावज्ञ! हृद्गतम् । ज्ञातवान् क्षणमात्रेण, नाऽसाध्यं सुधियां धिया ॥२८॥
इहायाता मया मार्गे, लुण्टाकी मनसो मम । कुट्टाकी नीतिमार्गस्य, ददृशे काऽपि कामिनी ॥ २९ ॥
मच्चेतोऽपहृतं मन्त्रि-स्तया विस्मेरनेत्रया । महामोहकरा जैत्राः, कन्दर्प्पाऽस्त्रीर्मृगीदृशः ॥ ३० ॥
उवाच सचिवो देव!, ज्ञाता हि सा मया ननु । वनमालाभिधा वीर-कुविन्दस्य परिग्रहः ॥ ३१ ॥
एषोऽहं रचयिष्यामि, शीघ्रं तस्याः समागमम् । परं यातु निजावासं, स्वामी सह परिच्छदैः ॥ ३२ ॥
इत्युक्तः सचिवेनासा-वारुह्य शिबिकां ततः । जगाम धाम बिभ्राणः, पुरस्थां वनमालिकाम् ॥ ३३ ॥
परिव्राजिकामाऽऽत्रेयीं, विचित्रोपायवेदिनीम् । मन्त्रीशो वनमालायाः, प्राहैषीदथ वेश्मनि ॥ ३४ ॥
जटाजूटेन रोचिष्णुः, साऽगात्तद्गृहमञ्जसा । तयाऽथ वन्दिता शक्त्या, पूजनीया हि लिङ्गिनी ॥ ३५॥
मुक्ते तयाऽऽसने न्यस्य, पादान्तन्यस्तलोचना । रूप्यघण्टानुसारेण, स्वरेणेमामवोचत ॥ ३६ ॥
मेघच्छन्नेन्दुलेखेव, विच्छायाऽसि कुतोऽधुना? । कुतस्ते पाण्डुरौ गण्डौ, ग्रीष्मशुष्कदलाकृती? ॥ ३७ ॥
जृम्भाव्याजेन चेतष्कं, दर्शयन्तीव किं ननु । सर्वमाख्याहि मातेव, पूरयिष्यामि निश्चितम् ॥ ३८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चिरं निःश्वस्य साऽप्यूचे, दुःप्रापार्थकदर्थिता। किं प्रजल्पामि किं यामि ?, किं वा सेवे भवामि किम् ? ॥ ३९ ॥
क्व रासभी क्व वाजी च ?, क्व ढिकी क्व सितच्छदः ? । क्व वा शृगालललना ? क्व केशरिकिशोरिका ? ॥ ४० ॥
गर्ताशूकरिका क्वापि ? क्वापि मत्तगजेश्वरः ? । क्वापि कौविन्दिकी भार्या ?, दुर्लभः क्वापि वल्लभः? ॥ ४१ ॥
अप्येषां सम्भवेद्योगः, कथञ्चिद्दैववल्गनात् । न पुनर्मम दुर्जाते–र्वार्ताभिरपि सङ्गमः ॥ ४२ ॥
आत्रेयिकाऽप्यथोवाच, मुखमत्कुटिकान्वितम् । असाध्यं मन्त्रशक्तेः किं ? मन्त्रतन्त्रविदो मम ॥ ४३ ॥
मन्त्रादाकृष्य मार्तण्ड–मानयामि पुरस्तव । चन्द्रं न्यसामि ते पाक–भुवने सूपकारवत् ॥ ४४ ॥
मन्त्रादैरावणारूढं, दर्शयामि हरिं तव । सुमुखं भूपतिं पाद–संलीनं करवाणि किम् ? ॥ ४५ ॥ नवमो भवः
उपश्रुतिमिवोद्दाम–परं श्रुत्वेति तद्वचः । तोषपोषं दधाराङ्गे, वनमाला समन्मथा ॥ ४६ ॥
साऽप्यवोचन्मया गच्छन्, वीक्षितः पथि भूपतिः । प्रत्यक्ष इव कन्दर्पो, दृशां विश्राममण्डपः ॥ ४७ ॥ हरिवंशोत्पत्तिः
तद्दर्शनान्मदीयेऽभू-द्देहे दाहो मनोभुवः । तदा द्रवीभूतमपि, चन्दनं दहनायते ॥ ४८ ॥
ज्वरहृत्तक्षकव्याल-चूडामणिरिवोच्चकैः । सङ्गमो दुर्लभस्तस्य, सुलभस्त्वत्प्रसादतः ॥ ४९ ॥
आत्रेयिकाप्यथाऽवादीत्, कोऽयमर्थः सुदुष्करः । आकर्षामि नृपं मन्त्रै-रत्रस्थैवाऽधुना सुते ! ॥ ५० ॥
महाप्रसादः समभूद्, भगवत्या कृतो मम । गुरूणां क्रमसेवा हि, सफला निष्फला न तु ॥ ५१ ॥
वत्से ! कर्त्र्यऽस्मि संयोगं, तव क्षोणीभुजा सह । अथवा ज्वलनज्वालां, स्वीकर्त्र्यस्मि कृतादरा ॥ ५२ ॥
श्रीमु० ११ प्रतिज्ञामिति कृत्वोच्चै–राश्वास्य वनमालिकाम् । सुसिद्धं भूभुजः कार्यं, सा गत्वाऽऽख्यत मन्त्रिणम् ॥ ५३ ॥

For Private and Personal Use Only

असावपि तदाऽऽख्यायाऽऽश्वासयन्मेदिनीश्वरम्। वार्तयापि प्रियाप्राप्तिः, प्रत्याशा हि प्रियङ्करा ॥ ५४ ॥
आत्रेय्यऽपि पुनः प्रात-र्गत्वोचे वनमालिकाम्। त्वत्प्रेमाभिमुखश्चक्रे, सुमुखः कार्मणैर्मया ॥ ५५ ॥
मुञ्च खेदं समुत्तिष्ठ, गच्छाऽद्य नृपमन्दिरम्। चिरं रमस्व राज्ञा च, विषयैर्विषयागतैः ॥ ५६ ॥
मालेव वनमाले! त्वं, प्रियकण्ठावलम्बिनी। उदारगुणराजिष्णु-र्मुदं देहि मनस्विनाम् ॥ ५७ ॥
यन्निन्द्याऽन्वयजाताऽपि, लप्स्यसे पृथिवीश्वरम्। तत्प्राक्तनतपःस्फूर्जत्-प्रभावो हि निर्गलः ॥ ५८ ॥
वनमाला तया साक-मगमन्नृपमन्दिरम्। अवरोधे व्यधादेष, सुप्रापं पुण्यतोऽखिलम् ॥ ५९ ॥
कदाचित्केलिवापीषु, सखीष्विव महोदधेः। कदाचित्केलिशैलेषु, मूलेष्विव मनोभुवः ॥ ६० ॥
कदाचिदुद्यानगतः, सानुरागस्तया सह। चिक्रीड विविधैः क्रीडा-चक्रैः स्वामित्वमीदृशम् ॥ ६१ ॥ युग्मम् ॥
वर्षं दिनमिव क्ष्मापः, प्रहरं च मुहूर्त्तवत्। सार्कं क्रीडंस्तया मेने, मानिनीमानमर्दनः ॥ ६२ ॥
इतो वीरकुविन्दोऽपि, वियुक्तो वनमालया। अमन्यत गृहं शून्यं, गृहिणी गृहमुच्यते ॥ ६३ ॥
उन्मत्त इव वातूल-श्चत्वरे चत्वरे भ्रमन्। जगौ रुरोद करुणं, वनमालेति संलपन् ॥ ६४ ॥
क्व गतासि प्रिये! मुक्त्वा, मामिह प्रेममन्थरम्। त्वां विना नगरं शून्य-मरण्यमिव भाति मे ॥ ६५ ॥
भूताविष्ट इव क्षोण्यां, पपाताऽयं पदे पदे। वनमाले! कथं पङ्क्त्यां, ताडयसीति चक्रवत् ॥ ६७ ॥
इभ्याः! सभ्याः! मम न्यायं, दापयन्तु दयापराः!। मामकीना सरोजाक्षी, हृता केनाऽप्यनीतितः ॥ ६८ ॥
दुःखमन्यस्य कस्यापि, माऽभूत् कान्तावियोगजम्। एतस्य परिपाको हि, सम्यग् ज्ञातो मया यतः ॥ ६९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शीर्णजीर्णाऽम्बरधरो, धूलीधूसरमूर्द्धजः । स्थूलरोमा लुठत्केशः, क्षुधाक्षामोदरो ज्वरी ॥ ७० ॥
उत्तालैः प्रसरत्तालै–र्बालैस्तुमुलमालिभिः । आवृतो वनमालेति, जल्पको नगरेऽभ्रमत् ॥७१॥ युग्मम् ॥
रूपलुब्धेन शक्रेणाऽ–पहृता वनमालिका । अथवा बलभद्रेणा–ऽपहृता नामविभ्रमात् ॥ ७२ ॥
इति प्रविलपन्पुर्यां, चत्वरे चत्वरेऽनिशम् । स कालमतिचक्राम, वराको रङ्कवद्भ्रमन् ॥ ७३ ॥
अनेकैः खिङ्गकैर्डिम्भै–र्वराकैश्च परावृतः । कुविन्दको भ्रमन्नाऽऽप, कदाचिद्राजमन्दिरम् ॥ ७४ ॥
केलीकिलेन निखिल–राजलोकेन कौतुकात् । पैशाचकीभिर्निर्माल्य–मालिकाभिरवेष्ट्यत ॥७५॥ युग्मम् ॥
अनुगस्तस्य लोकाना–मुत्तालं तालिकारवः । उल्ललासतरां हास्य–नाट्यनान्दीसहोदरः ॥ ७६ ॥ नवमो भवः
किमेतदिति जिज्ञासुः, सहितो वनमालया । निजवेश्माऽङ्गणं प्राप, सुमुखस्तन्मुखेक्षणः ॥ ७७ ॥ हरिवंशोत्पत्तिः
धूलिभिस्तप्यमानश्च, हस्यमानं पदे पदे । निर्माल्यैर्वेष्ट्यमानश्च, खेद्यमानं विटैर्नटैः ॥ ७८ ॥
हा! पर्वेन्दुमुखि! स्मेर-लोचने! लोकलोभने! । हा! मत्प्राणमहारत्न-रक्षारत्नकरण्डके! ॥ ७९ ॥
वनमाले! वनमाले! एवंरूपप्रलापिनम् । दृष्ट्वा नरेन्द्रदेव्यौ तु, बिभरांचक्रतुः खिदम् ॥ ८० ॥ युग्मम् ॥
स्वयं गतदयं कर्म्म, हा! हाऽस्माभिर्विनिर्मितम् । यदसौ पातितो दुःखे, निरागा अपि रागतः ॥ ८१ ॥
अस्मत्तो हन्त! पापिभ्यः, कोऽपि पापी न विद्यते । सीमन्तकादपि गुरु-र्न परो नारकालयः ॥ ८२ ॥
दुःशीला वयमेव स्मः, सुशीलजनगर्हिताः । जीवन्मृतः कृतो यस्मा-देष वेषविडम्बितः ॥ ८३ ॥
विषयग्रहलाम्पट्ये, क्व विवेकः प्रसर्पति । मन्दिरे तु दरिद्रस्य, प्रदीपो दीप्यते कियत्? ॥ ८४ ॥

For Private and Personal Use Only

धन्यास्त एव निर्ग्रन्था, यैर्जिता विषयग्रहाः । तेभ्यो नोऽस्तु नमस्कारः, सर्वपापप्रणाशनः ॥ ८५ ॥
निन्दतोरेवमात्मानं, विन्दतोस्तत्त्वभावनाम् । चिन्वतोः समतां नूनं, जयतोरान्तरं मनः ॥ ८६ ॥
इतस्तयोः पपाताऽऽशु, खाद्विद्युच्छीर्षयोः क्षणात् । प्राणानपजहाराऽपि, सापायं किल जीवितम् ॥ ८७ ॥
मिथः प्रेमपरिणामा-च्छुभध्यानवृतौ मृतौ । हरिवर्षे समुत्पन्नौ, वर्षे युगलधर्म्मिणौ ॥ ८८ ॥
हरिश्च हरिणी चेति, पितृभ्यां करितान्वयौ । प्राक्तनभववत्काल-मवियुक्तौ व्यतीयतुः ॥ ८९ ॥
दशधा कल्पवृक्षाणां, फलैः सम्पादितेहितौ । तस्थतुः सुखनिर्मग्नौ, परमानन्दभागिनौ ॥ ९० ॥
नृपालवनमालाभ्यां, गताभ्यां परतो भवे । चक्रे वीरकुविन्देन, बहु बालभवं तपः ॥ ९१ ॥

नवमो भवः

(तथाहि-) अवासा वनवासी च, ध्यानी मौनपरायणः । अयाचितपयःपायी, त्रिःसप्तक्षालितान्नभुक् ॥ ९२ ॥
कालक्रमेण मृत्वाऽसौ, सुरः किल्बिषिकस्ततः । सौधर्मे देवलोकेऽभू-दीदृगल्पतपः फलम् ॥९३॥ युग्मम् ॥

हरिवंशोत्पत्तिः

अन्तर्मुहूर्तसञ्जाता-ऽवधिज्ञानमनोहरः । तौ पूर्वजन्म चाद्राक्षी-त्तत्रस्थहरिणीहरी ॥ ९४ ॥
भ्रूकुटीभङ्गभीमास्यः, कोपाटोपारुणेक्षणः । हरिवर्षं जगामाऽथ, संहाराय हरीयितः ॥ ९५ ॥
अथ दध्यौ सुरश्चित्त, इमौ क्षेत्रानुभावतः । मृत्वा सुरनिकायेषु, पूर्णाऽऽयुष्कौ भविष्यतः ॥ ९६ ॥
अन्यत्र क्षेत्रे मोक्ष्यामि, पूर्वजन्ममहारिपू । भवतो भवनिर्मग्नौ, दुर्गतीनां निबन्धनम् ॥ ९७ ॥
इति निश्चित्य स सुरः, कल्पद्रुमफलैः समम् । चम्पानगर्यामानैषीद्, भरतेऽस्मिन्नुभावपि ॥ ९८ ॥
तदानीं तत्र पुर्यांश्च, भूमानिक्ष्वाकुवंशजः । चन्द्रकीर्तिर्महीपालो, निष्पुत्रः पञ्चताङ्गतः ॥ ९९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो राज्यार्हमपरं, नरं प्रकृतयस्ततः । सदर्थमिव वागीशाः, प्रावर्त्तत निरीक्षितुम् ॥ १०० ॥
देवो देवविभूत्याऽथ, जनान्विस्मापयन्नलम् । एवमूचे प्रभापुञ्ज-पूर्णाकाशमवस्थितः ॥ १०१ ॥
अहो! शृणुत निःशेषा!, मद्वचो राज्यचिन्तकाः! । निरङ्गजो मृतो राजा, तत एष नृपोऽस्तु वः ॥ १०२ ॥
युष्मत्पुण्यैरिवागण्यैः, प्रणुन्नोऽहं सुराऽऽलयात् । हरिवर्षादिदं क्षेत्र-मगमं स्वर्गवच्छ्रिया ॥ १०३ ॥
तत्राऽद्राक्षं हरिं नाम, राज्यार्हं युग्मरूपिणम् । निःसमानशुभोदर्क-शुचिकर्मपरिवृतम् ॥ १०४ ॥
उत्क्षिप्य युगपत्तस्मा-दुभाविह समानयम् । नरो हरिर्वधूश्चास्य, हरिणीति विचिन्त्यताम् ॥ १०५ ॥
आनीताश्च मया भोज्ये, दशधा कल्पपादपाः । भवत्क्षेत्रभवं भोज्य—मेताभ्यां न हि रोचते ॥ १०६ ॥
शङ्खश्रीवत्सकुलिशा-ऽङ्कुशनौमत्स्यलाञ्छनः । छत्राकारशिरो रम्य—ऊर्णारोमसखाननः ॥ १०७ ॥
राजहंसगतिः स्मेर-पद्मनेत्रः प्रियंवदः । तदय वो भवत्वद्य, महीपालो महाबलः ॥ १०८ ॥ युग्मम् ॥
पशुपक्षिभवं मांसं, कल्पद्रुमफलाविऽऽलम् । मद्यश्च देय आहार, एतयोर्युग्मरूपिणोः ॥ १०९ ॥
एवमस्त्विति तेऽप्युक्त्वा, तं प्रणम्य सुधाभुजम् । रथे मिथुनमारोप्य, राजवेश्म समानयत् ॥ ११० ॥
तस्मिन्नेवाह्नि चाऽह्वाय, ततो राजमहत्तराः । अभ्यषिञ्चन्नवं राज्ये, मङ्गलोद्गारपूर्वकम् ॥ १११ ॥
ह्रस्वमायुःस्थितेश्चक्रे, तयोस्त्रिदशशक्तितः । धनुःशतश्च तुङ्गत्वे, प्रीतोऽगात्त्रिदशालये ॥ ११२ ॥
तीर्थे शीतलनाथस्य, राजा हरिरजायत । ततःप्रभृति तन्नाम्ना, हरिवंशः प्रशस्यते ॥ ११३ ॥
स्वीचकार हरी राजा, महीं सागरमेखलाम् । उपयेमे सुता राज्ञां, राज्यश्रिय इवापराः ॥ ११४ ॥



For Private and Personal Use Only

कियत्यपि गते काले, तयोरजनि नन्दनः। पृथ्वीपतिरिति ख्यातः, पृथ्वीव विपुलाशयः ॥ ११५ ॥
विपेदे प्रियया सार्कं, हरिरर्जितपातकः । अलब्ध दुर्गतिमपि, दत्तामिव सुधाभुजा ॥ ११६ ॥
तयोः पृथ्वीपतिः सूनुः, पृथ्वीपतिरजायत । स शशास महीमेक-नगरीमिव लीलया ॥ ११७ ॥
महागिरिः सुतस्तस्य, नाम्ना जितमहागिरिः। गिरिस्थिरः स्मराऽऽवेशाऽ-विवशो वशिनां मतः ॥ ११८ ॥
सुते हिमगिरौ राज्यं, क्रमाद्न्यस्य कृतव्रतः। महागिरिर्महीशोऽपि, तपस्तप्त्वा शिवं ययौ ॥ ११९ ॥
ततो हिमगिरीराजा, राज्ये वसुगिरिं सुतम् । अभिषिच्य प्रवव्राज, वव्राजाऽप्यपुनर्भवम् ॥ १२० ॥
राज्ये सुतं गिरिं न्यस्य, ततो वसुगिरीर्नृपः। आत्मनाऽऽदाय साधुत्वं, क्षीणकर्मा ययौ शिवम् ॥ १२१ ॥
राज्ये मित्रगिरिं न्यस्य, नन्दनं गिरिरप्यथ। उपादत्त परिव्रज्यां, लेभे च त्रिदिवश्रियम् ॥ १२२ ॥
असङ्ख्याताः क्रमेणैवं, हरिवंशे महीश्वराः । ययुः केचन निर्वाणं, दिवं केचन भेजिरे ॥ १२३ ॥

इतश्च भरते पुत्र-पवित्रे सच्चरित्रतः । समस्ति मगधो देश, आदेशः सर्वसम्पदाम् ॥ १२४ ॥
यत्रार्हज्जैत्रवादित्र-ध्वानप्रतिहता इव । सहसैव विलीयन्ते, विरुद्धार्थगिरोऽङ्गिनाम् ॥ १२५ ॥
तत्र भाति समस्तश्री-गृहं राजगृहं पुरम् । सतेजसां सुवृत्तानां, यन्मुक्तानां महाकरः ॥ १२६ ॥
बालिका अपि खेलन्ति, यत्रार्हद्गुणगुम्फितैः । नवच्छन्दोमनोहारि-रासकैः राजवर्त्मनि ॥ १२७ ॥
प्रियंवदः सदाक्षिण्यः, स्थैर्यगाम्भीर्यबन्धुरः । यत्र लोकः कलङ्केन, विकलः सकलः श्रिया ॥ १२८ ॥
मित्रो नीतिसरोजिन्याः, सुमित्रो हरिवंशभूः । सुमित्रो भूपतिस्तत्रा-ऽमित्रश्रीग्रहणाग्रणीः ॥ १२९ ॥



नवमो भवः
हरिवंशोत्पत्तिः

हरिवंशश्रियो नेता, विनेता प्रबलद्विषाम् । स्तोता वंशं मुनीन्दुना-मुन्नेता विजयश्रियः ॥ १३० ॥
देवी पद्मावती तस्य, पद्मा पद्मापतेरिव । अहार्यशीलाऽलङ्कार–शालिनी गुणमालिनी ॥ १३१ ॥
आत्मानं गृहिणीवन्तं, मेने राजा तयैव सः । बहुष्वपि वधूषूच्चैः, रोहिण्येव निशाकरः ॥ १३२ ॥
गुणैस्तस्या जगद्व्यापि, नभस्तारागणैरिव । चूर्णवासैरिव क्षिप्तैः, स मोदैरधिवासितः ॥ १३३ ॥
भुञ्जानः पञ्चधा भोगां-स्तया सह महीश्वरः । न विवेद गतं कालं, शच्येव घनवाहनः ॥ १३४ ॥

इतश्च प्राणते कल्पे-ऽनल्पसौख्यवशंवदः । सुरज्येष्ठसुरः श्रेष्ठ-मायुर्निजमपूरयत् ॥ १३५ ॥
श्रवणस्थे विधौ च्युत्वा, राकायां श्रावणस्य सः । अवाततार तत्कुक्षौ, सिप्रायां स्वातिबिन्दुवत् ॥ १३६ ॥ नवमो भवः
तदवतारयामिन्याम्, सुखसुप्ता महासती । वीक्षाञ्चक्रे क्रमादेतान्, महास्वप्नांश्चतुर्दश ॥ १३७ ॥ जिनच्यवनम्

[1]गजो [2]वृषो [3]मृगाधीशो,-ऽ[4]भिषेको [5]दाम [6]चन्द्रमाः ।
[7]दिननाथो [8]ध्वजः [9]कुम्भः, [10]पद्मरम्यसरो[11]ऽम्बुधिः ॥ १३८ ॥

[12]विमानं [13]रत्नसन्तानो, निर्धूमश्च [14]विभावसुः । अमूंश्चतुर्दशस्वप्नान्, दृष्ट्वा देवी व्यबुध्यत ॥ १३९ ॥ युग्मम् ॥
इतस्तत्र समागत्य, सर्वेऽपि त्रिदिवेश्वराः । चलत्कुण्डलमाणिक्य-रचितेन्द्रधनुःशताः ॥ १४० ॥
किरीटस्पृष्टभूपीठा, नेत्रैर्नीलोत्पलैरिव । पद्मावतीं समभ्यर्च्य पेठुस्स्तवनमीदृशम् ॥ १४१ ॥
प्रथमा विश्वरामाणाम्, विद्यानामिव मातृका । जगन्माताऽसि वन्द्यासि, जगन्नायकजन्मना ॥ १४२ ॥
समीपवर्त्ति सत्तीर्थ-मदेहदहनं तपः । अस्नानं वपुषः शौचं, मातस्ते क्रमसेवनम् ॥ १४३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पद्मावतीमिति स्तुत्वा, द्वीपे नन्दीश्वराभिधे । कृत्वा महोत्सवं स्थानं, स्वं स्वमीयुः सुरोत्तमाः ॥१४४॥
स्वप्नान्तादपि जाग्रत्या, पद्मावत्या महीपतिम् । कथयामासिरे सर्वे, स्वप्ना दृष्टा अमी प्रगे ॥ १४५ ॥
ऋजुना मनसा स्वप्नान्, विचार्य क्षोणिनायकः । आचक्षाविति ते देवि !, सुतरत्नं भविष्यति ॥ १४६ ॥
विशेषतस्त्वमीषान्तु, फलं ज्ञातुं धराधिपः । वेत्रिणाऽऽजूहवत्सर्वान्, स्वप्नशास्त्रविशारदान् ॥ १४७ ॥
पार्वणेन्दुवदानन्द-सम्पादनकृतोद्यमाः । त्वक्साररोचनापुण्ड्रा, आययुः स्वप्नपाठकाः ॥ १४८ ॥
आर्यवेदोद्भवान्मन्त्रानुत्कीर्त्योद्दामया गिरा । उपाविक्षन्नासनेषु, मराला मानसेष्विव ॥ १४९ ॥
आसयामास भूपालो, जायां जवनिकान्तरे । अथैषा न्यगदत्स्वप्ना-नाप्यतत्वयुजा गिरा ॥ १५० ॥

नवमो भवः

अथ तेषां वरोऽवादीत्, स्वप्नशास्त्रमहोदधिः । दर्शयन् हृदयानन्द-ममान्तं दशनांशुना ॥ १५१ ॥
स्वप्ना द्वासप्तती राजन् !, स्वप्नशास्त्रविदो विदुः । तन्मध्यात्रिंशदुत्कृष्टा, ज्योतिष्केषु ग्रहा इव ॥ १५२ ॥
तन्मध्यात् प्रवरा राजन् !, वाञ्छितार्थसमर्थकाः । चतुर्दशमहास्वप्नाः, कीर्तिताः सर्ववेदिभिः ॥१५३॥

स्वप्नपाठक-कथितं स्वप्नवर्णनम्

अर्हतां चक्रिणां माता, महास्वप्नांश्चतुर्दश । हरेर्माता तथा सप्त, चतुरः सीरिणोऽपि च ॥ १५४ ॥
अमीषां पृथिवीपाल ! शृणु व्याख्यां मनोहराम् । यस्याः श्रवणमात्रेण, सम्पद्यन्ते मुदोऽङ्गिनाम् ॥१५५॥
करीश्वराद्दानशौण्डो, धुर्यो धर्म्मरथे वृषात् । सिंहात्कर्मेभनिर्भेदी, राज्यभागाभिषेकतः ॥१५६॥
दाम्नः सौरभवाँल्लोके, शशिनः शैत्यकृद्दृशाम् । सूर्यात्तमोपहो विश्व-मूर्धन्यो ध्वजदर्शनात् ॥१५७॥
पूर्णकुम्भात् गुणैः पूर्णः, सरसः कमलालयः । अम्भोधेर्धृतगाम्भीर्यो, विमानात्रिदशालयः ॥१५८॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रत्नादनल्पतेजस्कः पावकाल्लोकपावकः । एवं मन्ये महीपेन्द्रो !, भाविनस्तनुजन्मनः ॥ १५९ ॥
इति सुस्वप्नसामर्थ्या-त्तव सूनुर्भविष्यति । सुराऽसुरशिरःश्रेणि-वेणीसम्मार्जितक्रमः ॥ १६० ॥
॥ पञ्चभिः कुलकम् ॥
परितुष्टोऽथ भूनाथ-स्तद्वचःश्रवणाद् भृशम् । ददौ ग्रामाकराद्युच्चै-र्वासोऽलङ्करणानि च ॥ १६१ ॥
वस्त्रालङ्करणैरेते, कल्पद्रुमदलैरिव । राजमाना ययुर्गेहं, श्रिया श्रीदविडम्बकाः ॥ १६२ ॥
देवानुभावसम्पूर्ण-मनोरथतया भृशम् । मुदिताया सुखेनैव, गर्भस्तस्या व्यवर्धत ॥ १६३ ॥
सार्द्धाष्टमदिने मास-नवके गतवत्यथ । ज्येष्ठमाससिताष्टम्यां, श्रवणस्थे निशाकरे ॥ १६४ ॥ नवमो भवः
ग्रहेषूच्चस्थितेषूच्चै-स्तज्जन्मौको दिदृक्षया । कूर्माङ्कं श्यामलच्छायं, विंशमर्हन्तमाऽऽत्मजम् ॥ १६५ ॥ जिनजन्म
प्रभाप्राग्भाररोचिष्णुं, जात्यरत्नमिवाऽमलम् । पद्मावती प्रसूते स्म, मरुदेवेव नाभिजम् ॥ १६६ ॥
॥ त्रिभिर्विशेषकम् ॥
अनुकूला ववुर्वाता-स्तज्जन्मसुखिता इव । सुप्रसन्ना दिशोऽभूवन्, कृतकृत्या प्रजा इव ॥ १६७ ॥
अरिष्टानि क्षयं जग्मुः, शुभात्मकमभूज्जगत् । नारकाणामपि सुख-माकस्मिकमजायत ॥ १६८ ॥
दिक्कुमार्यो विदित्वाऽथ, तज्जन्माऽऽसनकम्पतः । अधोलोकात् समाजग्मु-रष्टौ देव्यः ससम्भ्रमम् ॥१६९॥
(ताश्चेमाः—)भोगङ्करा भोगवती, सुभोगा भोगमालिनी ।
सुवत्सा वत्समित्रा च, पुष्पमाला त्वनिन्दिता ॥ १७० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भक्तितो विंशमर्हन्त-मम्बाश्च त्रिजगत्पतेः । अनुप्रदक्षिणीकृत्य, नत्वा भक्त्येत्थमूचिरे ॥ १७१ ॥
समुद्द्योतितभुवने !, जगन्नाथैकजन्मना । जगद्वन्द्यगुणागारे !, जगन्मातर्नमोऽस्तु ते ॥ १७२ ॥
अधोलोकनिवासिन्यो, वयमष्टौ यशस्विनि ! । तीर्थकृज्जन्ममहिमा-ऽऽकर्तुकामा इहाऽऽगताः ॥ १७३ ॥
अस्मत्तस्तन्न भेतव्य-मुक्त्वा पूर्वोत्तरस्थिताः । प्राङ्मुखं सूतिकौकस्ता-श्चक्रुः स्तम्भसहस्रभाक् ॥ १७४ ॥
अभितः सूतिकाधाम, ततः संवर्तवायुना । तृणकण्टककाष्ठाद्य-मायोजनमपाहरन् ॥ १७५ ॥
अथ संहृत्य पवनं, प्रणम्य जिननायकम् । आसन्नासनमासीना गायन्ति स्म यथाविधि ॥ १७६ ॥
सुवर्णाद्रिकृतावासा—स्तद्वदासनकम्पतः । ऊर्ध्वलोकात् समाजग्मु—रष्टौ देव्यस्तथाऽपराः ॥ १७७ ॥ नवमो भवः
**मेघा मेघङ्करावती, सुमेघा मेघमालिनी । तोयधारा विचित्रा च, वारिषेणा बलाहिका ॥१७८॥** दिक्कुमारी-
विकृत्य जलदं कृत्वा, प्रशान्तरजसं महीम् । विधाय पुष्पवृष्टिश्च, ता गायन्त्यऽवतस्थिरे ॥ १७९ ॥ कृतोत्सवः
पौरस्त्यरुचकादष्टौ, पूर्वस्या आगता दिशः । हस्तस्थदर्प्पणा देव्यो, जगुस्तत्राऽर्हतो गुणान् ॥ १८० ॥

**ताश्च नन्दोत्तरा नन्दा, सुनन्दा नन्दवर्द्धिनी ।**
**विजया वैजयन्ती च, जयन्ती चाऽपराजिता ॥ १८१ ॥**

अपाच्यरुचकाद्रिस्था, दक्षिणस्या दिशोऽपराः । अष्टावेत्य स्वदिग्भागे, गायन् भृङ्गारपाणयः ॥ १८२ ॥
(ताश्चेमाः— )
**समाहारा सुप्रदत्ता, सुप्रबद्धा यशोधरा । लक्ष्मीवती शेषवती चित्रगुप्ता वसुन्धरा ॥१८३॥**



For Private and Personal Use Only

ततस्तस्य गिरेरेव, प्रहृष्टा वारुणीदिशः । संस्थानं तत्र देव्योऽष्टौ, चक्रुर्व्यजनपाणयः ॥ १८४ ॥
( ताश्चेमाः— )
इलादेवी सुरादेवी, पृथिवी पद्मवत्यथ । एकनासा नवमिका, भद्राऽशोकेति नामतः ॥१८५॥
एवमुत्तरदिग्भागा-दपि रुचकवर्त्तिनः । समेत्याऽष्टौ स्थितिं चक्रु-स्तत्र चामरपाणयः ॥ १८६ ॥
( ताश्चेमाः– )
अलम्बुसा मिश्रकेशी, पुण्डरीका च वारुणी । हासा सर्वप्रभा चैव, श्री ह्री इत्यभिधानतः ॥१८७॥
चतस्रो विदिग्रुचकात्, सदीपा दिक्कुमारिकाः । चित्रा चित्रकनका सु-तारा सौत्रामणी तथा ॥१८८॥ नवमो भवः
प्रणिपत्य जगन्नाथं, जगन्नाथस्य मातरम् । ईशान्यादिविदिक्संस्था, बभूवुर्दीपपाणयः ॥ १८९ ॥ दिक्कुमारी-
देव्योऽन्या मध्यरुचका-चतस्रः समुपस्थिताः । रूपा रूपाम्बिका चापि, सुरूपा रूपकावती ॥१९०॥ कृतोत्सवः
ताश्चतुरङ्गुलीवर्जं, नालं छित्त्वा भुवोऽन्तरे । क्षिप्त्वा रत्नमयं तत्र, दूर्वापीठं विचक्रिरे ॥ १९१ ॥
विहाय पश्चिमां जन्म-गृहाद्दिक्षु तिसृष्वपि । रम्भागृहाणि हृद्यानि, देव्यस्ताश्च विचक्रिरे ॥ १९२ ॥
तेषां मध्ये चतुःशालं, विशालं जिनचित्तवत् । प्रत्येकं रचयामासुः, सिंहासनविकस्वरम् ॥ १९३ ॥
दाक्षिणात्ये चतुःशाले, नीत्वोभौ विनिवेश्य च । सिंहासने सुतैलेना-ऽभ्यानञ्जुर्मृदुमर्दनम् ॥ १९४ ॥
जनन्या सममभ्यज्य, शीघ्रमुद्वर्त्य च प्रभुम् । निन्यिरे निभृतं देव्यः, पौरस्त्यकदलीगृहे ॥ १९५ ॥
तत्र गन्धाम्बुभिः पुष्पा-म्बुभिः शुद्धाम्बुभिस्तथा । द्वावपि स्नपयित्वाऽथ, भूषयन्ति विभूषणैः ॥१९६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नवमो भवः

शक्रेन्द्राऽऽसनकम्पनम्

नीत्वोत्तरस्या रम्भायाः, सदने हरिचन्दनैः । प्रज्वाल्याऽरणिना वह्निं, ताश्च भूतिं विचक्रिरे ॥ १९७ ॥
रक्षाबन्धं व्यधुस्ताश्च, जननीस्वामिनोः करे । रक्षा दुरितभिद्रेखां, लभते सर्ववस्तुषु ॥ १९८ ॥
पर्वतायुर्भवेत्युच्चै-रुक्त्वा कर्णान्तिके विभोः । अवादयंस्ततो रत्न-पाषाणौ कांस्यतालवत् ॥ १९९ ॥
सूतिकाधामतो निन्यु-र्जननीं जिनमप्यथ । षट्पञ्चाशद्दिक्कुमार्य-स्ता गायन्त्योऽवतस्थिरे ॥ २०० ॥
(इतश्च-) सौधर्मे प्रथमे कल्पे, कल्पेशोऽनल्पवैभवः । अनेकदेवकोटीनां, कोटीभिः परिवारितः ॥ २०१ ॥
गीयमानगुणग्रामो, गान्धर्वैः कोमलस्वरैः । स्तूयमानयशाश्चारु-चरणैः काव्यपङ्क्तिभिः ॥ २०२ ॥
दोधूयमानचमरो, देवनारीभिरादरात् । यावदाऽऽस्ते हरिस्ताव-दासनं कम्पमासदत् ॥ २०३ ॥
॥ त्रिभिर्विशेषकम् ॥
तत्प्रकम्पादसौ रुष्ट-स्ताम्रीकुर्वन् दृशोर्युगम् । अन्तर्ज्वलत्कोपवह्नि-ज्वालाः प्रकटयन्निव ॥ २०४ ॥
वक्रीकुर्वन् भ्रुवोर्युग्मं, कोदण्डमिव भीषणम् । ज्वलन् ज्वालाकुलं पाणौ, वज्रं वज्रधरोऽधरत् ॥ २०५ ॥
तत्कोपाटोपमुद्वीक्ष्य, नम्रमौलिः कृताञ्जलिः । प्राचीनबर्हिषं प्रोचे, नैगमेषी चमूपतिः ॥ २०६ ॥
कथङ्कारं विभो! कोपो, मयि सत्यपि तन्यते? । शृणु स्वाऽऽसनकम्पस्य, कारणं श्रोत्रपारणम् ॥ २०७ ॥
द्वीपाद्ये जम्बूद्वीपेऽस्मिन्, वर्षे दक्षिणभारते । पुरे राजगृहे रम्ये, श्रीसुमित्रमहीपतिः ॥ २०८ ॥
पद्मावत्या महादेव्या, अद्यैव जगतांपतिः । विंशस्तीर्थङ्करो जातः, समस्तजनपावनः ॥ २०९ ॥
तेनाऽऽसनप्रकम्पोऽयं, तीर्थकृज्जन्मसूचकः । दिव्यसौख्यप्रमत्तानां, कथं वो बोधिरन्यथा ॥ २१० ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुत्वेदं त्रिदशाधीश–स्तस्मिन् दुश्चिन्तिते निजे। मिथ्यादुष्कृतमवद–न्निन्दन्नात्मप्रमादिताम् ॥२११॥
अथोत्थायाऽऽसनादिन्द्रः, सप्ताऽष्टौ च पदान्यदात् । सम्मुखं जिननाथस्य, ततः स्तोतुं प्रचक्रमे ॥२१२॥
सम्पूर्णस्त्वं त्रिभिर्ज्ञानैः, गर्भवासादपि प्रभो ! । अतोऽपि यो गुणोच्छ्रायः, स भवेत्कस्य गोचरः ? ॥२१३॥
एवं जिनस्तुतिं कृत्वा, सेनान्यं हरिणाननम् । आदिदेशेति सुत्रामा, गिरा धीरप्रशान्तया ॥२१४॥
जम्बूद्वीपे राजगृहे, श्रीसुमित्रस्य भूपतेः । विंशस्तीर्थङ्करः पद्मा-वत्या अजनि साम्प्रतम् ॥२१५॥
कर्तुं तस्य जन्मस्नात्र-माह्वयन्तां दिवौकसः । कल्याणकोत्सवविधे-रधिकारो यतोऽस्ति नः ॥ २१६ ॥
अवादयदसौ घण्टां, परिमण्डलयोजनाम् । सुघोषां तन्निनादेन, घोषः सर्वास्वजायत ॥ २१७ ॥
द्वात्रिंशतिविमानानां, घण्टालक्षेष्वथ स्वनः । समकालं समुत्तस्थे, शब्दाऽद्वैतमभूत्तदा ॥ २१८ ॥
सम्भ्रान्तान् रणनैस्तासां, दृष्ट्वा तानिति सोऽवदत् । जन्मस्नात्रे जिनेन्द्रस्य, सहेन्द्रेण प्रसर्प्पताम् ॥२१९॥
केऽपि शक्राज्ञया चेलुः, केचिद्भक्त्या जिनं प्रति । विचित्रवाहनाऽऽरूढा-स्त्रिदशाः शक्रसन्निधौ ॥२२०॥
पालको द्युसदीशेना-ऽऽभियोगिकशिरोमणिः । आदिष्टो विदधे वेगा-द्विमानं बहुमानतः ॥२२१॥
भुजैरिव ध्वजैर्नृत्य-च्छत्रैर्हसदिवोज्ज्वलैः । वीक्षमाणं यदुत्तुङ्गै-र्गवाक्षैर्नयनैरिव ॥ २२२ ॥
ततः प्रदक्षिणीकृत्य, प्राच्यसोपानवर्त्मना । द्युसन्नाथो विमानं त-दारुरोह समं सुरैः ॥ २२३ ॥युग्मम्॥
गन्धर्वनाथाऽनीकाभ्यां, कौतुकाऽऽक्षिप्तमानसः । अभि स्वयम्भूरमणं, तेनाऽचालीत्पुरन्दरः ॥२२४॥
हस्तिवाहन ! मागास्त्वं, पुरः सिंहभृतो मम । अश्वसादिन्नितो याहि, महिषो मम वाहनम् ॥२२५॥

नवमो भवः

जिनजन्मोत्सवे शक्रागमनम्



For Private and Personal Use Only

सर्पगामिन्नितो याहि, न मे तार्क्ष्यः सहिष्यते । मद्विमानं विमानाऽऽग्रैः, किं घट्टसि सुधाशन ! ॥२२६॥
इत्थं सौधर्मकल्पस्य, देवानां परिसर्प्पताम् । कोलाहलैर्नभोऽव्यापि, सरिद्घोषैरिवाम्बुधिः ॥ २२७ ॥
अथाऽऽसङ्ख्यातद्वीपाब्धी - नतिक्रम्य क्षणादपि । सङ्क्षिपन् सङ्क्षिपन्नुच्चै - स्तद्ग्रन्थवत्पुरन्दरः ॥ २२८ ॥
भारते दक्षिणे पुर्यां, मघवा समुपागतः । तस्मादुत्तीर्य तीर्थेशं, तदम्बाञ्चाऽऽनमत्तराम् ॥ २२९ ॥
पद्मावति ! प्रभायुक्ते ! जिनकल्पद्रुमप्रदे ! । नमो दत्तजगद्दीपे !, नमश्चिन्तामणिप्रदे ! ॥ २३० ॥
इति पद्मावतीं स्तुत्वा, दत्वाऽवस्वापिनीं हरिः । प्रतिरूपं प्रभोर्मुक्त्वा, चलितोऽभि सुराचलम् ॥२३१॥
वज्रं छत्रं जिनं बिभ्र - च्चामरे च पृथक् पृथक् । इतीन्द्रः पञ्चरूपोऽभू - न्मार्गे मेरुं प्रति व्रजन् ॥२३२॥
ततो देवाङ्गनादेव - कोटिलक्षसमन्वितः । पूरयन्गगनं तूर्य - घोषैर्हर्षमयैरिव ॥ २३३ ॥
निमेषार्द्धेन गत्वासौ, सुवर्णाऽचलचूलिकाम् । अतिपाण्डुकम्बलायां, शिलायां प्राङ्मुखः स्थितः ॥२३४॥
एवमीशानकल्पेशः, सनत्कुमारसञ्ज्ञिकः । माहेन्द्रो ब्रह्मलोकेशो, लान्तकस्त्रिदशाऽधिपः ॥२३५॥
शुक्रशक्रः सहस्रार, आनत - प्राणतेश्वरः । आरणाऽच्युतराजोऽपि, दशेत्थं कल्पवासवाः ॥२३६॥
श्रेणिद्वयनिकायेषु, दशसूभयतः क्रमात् । अमी विंशतिरिन्द्राः स्यु - र्भवनानामधीश्वराः ॥ २३७ ॥
पुर्याश्चमरचञ्चायाश्चमरेन्द्रो बलिस्तथा । धरणेन्द्रो भूतानन्दो, हरिकान्तहरिस्सहौ ॥२३८॥
वेणुदेवो वेणुदारी, त्वग्निशिखाऽसिमाणवौ । वेलम्ब - प्रभञ्जनाख्यौ, सुघोषो भुवनेश्वरः ॥२३९॥
महाघोषो जलकान्तो, जलप्रभ इति स्मृतः । पूर्णोऽवशिष्टशक्रश्च, त्वमितामितवाहनौ ॥२४०॥

नवमो भवः

चतुःषष्टि-सुरेन्द्रागमनम्



For Private and Personal Use Only

एवञ्च व्यन्तरश्रेण्यो-र्दक्षिणोत्तरसञ्ज्ञयोः । अष्टावष्टनिकायाः स्यु-स्तेष्विन्द्राः षोडश क्रमात् ॥२४१॥
कालशक्रो महाकालः, सुरूपः प्रतिरूपकः । पूर्णभद्रो माणिभद्रो भीमो यक्षगणेश्वरः ॥२४२॥
महाभीमः किन्नरश्च, किम्पुरुषस्ततः परम् । तथा सत्पुरुषमहापुरुषौ वासवाविमौ ॥ २४३ ॥
अतिकाय-महाकायौ, महोरगप्रभाविमौ । गीतरतिगीऽतयशा, गन्धर्वाणामधीश्वरौ ॥ २४४ ॥
तद्वदाप्रज्ञप्तिपञ्च-ज्ञप्तादीनां तु षोडश । व्यन्तराष्टनिकायाणनां, वासवाः समुपागताः ॥ २४५ ॥
तथाऽऽप्रज्ञप्तीनां शक्रः, सनिहितः समानकः । धाता विधाता च हरी, ऋषिश्च ऋषिपालकः ॥२४६॥
ईश्वरो महेश्वरश्च, सुवत्सकविशालकौ । हास-हासरती श्वेत-महाश्वेतौ पुरन्दरौ ॥२४७॥
पतङ्गः पतङ्गपती, पतङ्गानां तु वज्रिणौ । एवं षोडश देवेन्द्रा-आययुर्मेरुमूर्धनि ॥ २४८ ॥
ज्योतिष्काणामशेषाणां, चन्द्राऽऽदित्यावधीश्वरौ । चतुःषष्टिरितीन्द्राणां, मेरुमूर्द्धानमाययौ ॥ २४९ ॥
आदिदेशाऽच्युतेन्द्रोऽथा-ऽऽभियोगिकदिवौकसः । क्षीराद्म्भः समानेतुं, जिनस्नपनहेतवे ॥ २५० ॥
क्षीरोदादिसमुद्रेषु, गङ्गादिषु नदीषु च । तीर्थेषु मगधाद्येषु, ते गत्वा जगृहुर्जलम् ॥ २५१ ॥
तद्वन्मृत्स्नापयोजादीन्, लात्वा क्षीरोदवार्द्धितः । गोशीर्षचन्दनादीनि, तैः शक्रेभ्यो डुढौकिरे ॥ २५२ ॥
सौवर्णान्राजतान्रात्नान्, स्वर्णरूप्यविनिर्मितान् । रत्नस्वर्णमयान् दिव्यान्, रजतस्वर्णरत्नजान् ॥ २५३ ॥
रूप्यरत्नमयान्भौमान्, विचक्रुः कलशांश्च ते । अष्टोत्तरं सहस्रं स्या-त्तेषां प्रत्येकमेव च ॥ २५४ ॥युग्मम्॥
अतिपाण्डुशिलापीठ-रत्नसिंहासने स्वयम् । सौधर्मेन्द्रो निषिद्याऽङ्के, दधौ त्रिजगतां पतिम् ॥ २५५ ॥

नवमो भवः

मेरुगिरौ जिनस्नपनम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अच्युतेन्द्रो ततो भक्त्या, कर्पूराऽगुरुधूपिताम् । मुमोच विश्वनाथस्य, पुरतः कुसुमाञ्जलिम् ॥ २५६ ॥
वाद्यमानासु भेरीषु, मृदङ्गेषु स्वनत्स्वथ । मुहुराऽऽस्फाल्यमानासु, कांस्यतालासु निर्दयम् ॥ २५७ ॥
स्मयमानैरिव न्यस्त - विस्मेरकुसुमोत्करैः । अधीयानैरिव स्नात्र - श्लोकान् गुञ्जदलिच्छलात् ॥ २५८ ॥
अच्युतेन्द्रेण तैः कुम्भै - र्योजनाऽऽस्यैर्जगद्गुरोः । स्नात्रं चक्रे महाऽऽनन्दात्, सुधाभुग्भिः समं निजैः ॥२५९॥
॥ त्रिभिर्विशेषकम् ॥
एवं द्वाषष्टिरन्येऽपि, स्नात्रं चक्रुर्जगत्पतेः । भक्त्या महत्याऽनुज्येष्ठं, सोदर्या इव हर्षतः ॥ २६० ॥
यदेकः कुरुते स्नात्रं, शक्रोऽन्ये हरयस्तदा । सर्वेऽर्हतः पुरः सन्ति, धृतचामरपाणयः ॥ २६१ ॥
विकृत्य पञ्चरूपाणि, तद्वदीशानवासवः । सौधर्मेन्द्राधिपस्थाने, दधन्नाथमवस्थितः ॥ २६२ ॥
अथ सौधर्मनाथोऽपि, चतुर्दिक्षु व्यधात् क्रमात् । वृषभांश्चतुरः स्फार - स्फाटिकोपलनिर्म्मितान् ॥२६३॥
तेषामुत्तुङ्गशृङ्गाग्र - प्रसृता गगनाङ्गणे । प्रसस्रुरम्भसामष्टौ, धाराश्चन्द्रकरोज्ज्वलाः ॥ २६४ ॥
एकीभूय पतन्त्यस्ता - श्चन्द्रकान्तसमुज्ज्वलाः । निम्नगा इव पाथोधौ, निपेतुः प्रभुमूर्द्धनि ॥ २६५ ॥
स्नपयित्वेति तीर्थेशं, भाविनं त्रिदिवाधिपः । रत्नदर्प्पणवद्वेगाद्, ममार्जाऽङ्गं विभोरथ ॥ २६६ ॥
ततो रत्नमये पट्टे, स लिलेखाऽष्टमङ्गलान् । निजपुण्यैरिवाऽखण्डै - स्तण्डुलैः रूप्यनिर्मितैः ॥ २६७ ॥
ततो विलेपयामास, वासवोऽङ्गं जगत्पतेः । भूषणानि च प्रत्यङ्गं, वासवः पर्यदीधिपत् ॥ २६८ ॥
विनिद्रपारिजाताद्य - कुसुमैः परमेश्वरम् । मुखकोशमनोहारी, पूजयामास वृत्रहा ॥ २६९ ॥



नवमो भवः

मेरुगिरौ
जिनस्नपना-
द्युत्सवः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्तार्य लवणं त्रिश्च, सर्वदोषविभेदकृत् । आरात्रिकमुपादत्ते, पुरोभूय हरिर्विभोः ॥ २७० ॥
इतश्च विस्मिताः केचित्, मञ्जु गुञ्जन्ति भृङ्गवत्। केचिच्च बृंहितं चक्रुः, कुञ्जरा इव निर्जराः ॥ २७१ ॥
केचिद्धोंकारधोंकारं, वाद्यैरिव मुखैर्व्यधुः । सिंहनादं मुहुः केचि-द्भटा इव वितेनिरे ॥ २७२ ॥
केचित्कोलाहलं चक्रुः, जितद्यूतपणा इव । अहासयन्पुरात् केचि-द्विटवन्नर्म्मभाषणैः ॥ २७३ ॥
एवं जन्मोत्सवे कोऽपि, हर्षो जज्ञे दिवौकसाम् । वागीशोऽपि गिरां गुम्फैर्यं वर्णयितुमक्षमः ॥ २७४ ॥
वामं जानुमथाऽऽकुञ्च्य, शिरोन्यस्तकरो हरिः । परमाऽऽनन्दनिर्मग्नः, शक्रस्तवनमुज्जगौ ॥ २७५ ॥
नमोऽर्हते भगवते, आदितीर्थकृते नमः । स्वयं सम्बुद्धतत्त्वाय, नराणामुत्तमाय च ॥ २७६ ॥ नवमो भवः
नरसिंहाय पुरुष-पुण्डरीकाय ते नमः । नृवरगन्धकरिणे, नमो लोकोत्तमाय च ॥ २७७ ॥
लोकनाथाय लोकानां, कृतोत्तमहिताय च । लोकानां तु प्रदीपाय, लोकप्रद्योतकारिणे ॥ २७८ ॥ शक्रस्तवः
नमोऽस्त्वभयदात्रे च, चक्षुदात्रे च सर्वदा । मार्गदाय शरण्याय, बोधिदात्रे नमो नमः ॥ २७९ ॥
धर्मदात्रे धर्म्मदेष्ट्रे, धर्माधिपतये नमः । धर्म्मसारथये धर्म्म-चातुरन्तिकचक्रिणे ॥ २८० ॥
नमः सदाऽप्रतिहत-ज्ञानदर्शनधारिणे । विगतच्छद्मने नित्यं, जिनाय जापकाय च ॥ २८१ ॥
तीर्णाय तारकायोच्चै-र्बुद्धाय बोधकाय च । मुक्ताय मोचकाय स-र्वज्ञाय सर्वदर्शिने ॥ २८२ ॥
शिवाऽचलाऽरुजाऽनन्ता-ऽक्षयाऽव्याबाधनिर्वृतिम् । सम्प्राप्ताय नमस्तुभ्य-मिति शक्रस्तवं व्यधात् ॥२८३॥
कृतकृत्यमिवाऽऽत्मानं, मन्यमानो ऽर्हतो नतेः । रोमाञ्चितवपुः शक्र-इति स्तोतुं प्रचक्रमे ॥ २८४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नमस्तुभ्यं जिनाधीश !, परमानन्ददायिने । उल्लसत्करुणाक्षीर-पाथोधिशशलक्ष्मणे ॥ २८५ ॥
त्वया त्रिजगतां नाथ !, फलिनीदलकान्तिना । बद्धेन्द्रनीलमुकुट-इव भाति सुराचलः ॥ २८६ ॥
स्तुत्वेति मिथिलां गत्वा, हृत्वाऽवस्वापिनीमपि । नत्वा मातुर्जिनं पार्श्वे, मुक्त्वा शक्रोऽभ्यधादिदम् ॥२८७॥
अस्मिन् स्वामिन्यकल्याणं, योऽधमश्चिन्तयिष्यति । तस्याऽऽर्यमञ्जरीवाऽऽशु, स्फुटिष्यति शिरस्स्वयम् ॥२८८॥
पूरयित्वा विभोर्वेश्म, स्वर्णरत्नादिभिः स्वयम् । यात्रां नन्दीश्वरे कृत्वा, स्वं स्थानं हरयो ययुः ॥२८९॥
पद्मावतीमथ ज्ञात्वा, प्रसूतां सम्भ्रमाऽन्विताः । स्त्रियः सुमित्रभूपस्य, पुत्रोत्पत्तिं बभाषिरे ॥२९०॥
स्वकिरीटं विना ताभ्यः, स्वाङ्गिकं भूषणं ददौ । वृत्तिश्च चक्रिरे याव-द्वेणिकामपि सप्तमीम् ॥२९१॥

नवमो भवः

रत्नस्वर्णादिभिः पूर्णं, गृहं वीक्ष्य नरेश्वरः । अज्ञासीन्नन्दनोत्पत्तौ, देवेन्द्राणां समागमम् ॥ २९२ ॥

सुमित्रभूपकृतो पुत्रजन्मोत्सवः

ततो मुमुचिरे राज्ञा, कारागारात् द्विषन्नृपाः । कारयांश्चक्रिरे पूजां, सुरसद्मसु सर्वतः ॥ २९३ ॥
समाजग्मुरुपाध्यायाः, पठन्तः सुतमातृकाम् । उच्चावचपदैः छात्रैः, बलाजिर्मर्कटैरिव ॥ २९४ ॥
चन्द्राऽर्कदर्शनं भर्तु-स्तृतीयेऽह्नि प्रमोदतः । षष्ठीजागरणं षष्ठे, पितृभ्यां च व्यरच्यत ॥ २९५ ॥
अस्मिन् गर्भस्थिते माता, मुनिवत्सुव्रताऽजनि । मुनिसुव्रत इत्याख्यां, पित्रा तेन विनिर्ममे ॥ २९६ ॥
अङ्गुष्ठस्थां पपौ स्वामी, शक्रसङ्क्रमितां सुधाम् । उदयेऽपि क्षुधः स्तन्यं, न पिबन्ति जिनेश्वराः ॥ २९७ ॥
रेजे देहः शुचिर्भर्तुः, प्रक्षालितसुनिर्मलः । निरामयसुगन्धिश्च, पूर्णकर्पूरपात्रवत् ॥ २९८ ॥
पद्मकिञ्जल्कसुरभि-र्बभौ श्वासो जगत्पतेः । गोक्षीरधारेव गौरे, रेजाते रुधिरामिषे ॥ २९९ ॥



For Private and Personal Use Only

विभोराहारनीहारौ, चर्मचक्षुरगोचरौ । चत्वारोऽतिशया एते, सहजोत्था गुणा इव ॥ ३०० ॥
स्नपन-स्तन्य-नेपथ्य-क्रीडा-चालनकर्मसु । कर्मठा पञ्चधात्र्योऽथ, शक्रेण विनियोजिताः ॥ ३०१ ॥
पञ्चरत्नमयं दिव्यं, कन्दुकश्चक्रवान्वृषा । विश्रामाय दृशोर्भर्तु-र्निद्रातल्पोपरि स्थितम् ॥ ३०२ ॥
प्रत्यहं सुरदेवीभिः, कृतोत्तारणमङ्गलः । प्रत्यहं रक्ष्यमाणस्तु, वेत्रिभिरिव देवतैः ॥ ३०३ ॥
सौवर्णैर्गेन्दुकैः स्वामी, कदाचित्खेलनापरः । कदाचिदाऽऽमलक्या हि, क्रीडया प्रीणिताऽऽशयः ॥३०४॥
नाटयन्वाल्यखेलाभि-रित्थमज्ञाननाटितम् । क्रमेण ववृधे स्वामी, ज्ञानत्रयपवित्रितः ॥ ३०५ ॥
प्रभुर्बाल्यमतिक्रम्य, मध्यंदिनमिवांशुमान् । नयनाऽऽनन्दजननं, द्वितीयं शिश्रिये वपुः ॥ ३०६ ॥ नवमो भवः
पादौ समतलौ भर्तुः, सरोजोदरसोदरौ । दामाङ्कुशध्वजैर्नावा, भूषितौ स्वेदवर्जितौ ॥ ३०७ ॥ बालक्रीडा
भुजङ्गमफणाकारो, मांसलो वर्तुलो विभोः । श्रीवत्सलाञ्छनोऽङ्गुष्ठः, सस्नेहो नखदर्पणः ॥ ३०८ ॥ जिनदेहवर्णनञ्च
क्रमाब्जयोर्दलानीव, बभुरङ्गुलयो विभोः । नीरन्ध्रा ऋजवो नेत्र-लोभनाः शोभनाऽग्रकाः ॥ ३०९ ॥
पार्ष्णिर्वृत्तो बभौ भर्तु-र्गुल्फौ च गोलकाकृती । उरुयुग्मश्च सुस्निग्ध-च्छवि लोमविवर्जितम् ॥ ३१० ॥
गोपुच्छरुचिरे जङ्घे, सरले क्रमवर्तुले । अभातां जगतां भर्तुः, कान्ते कदलिविभ्रमे ॥ ३११ ॥
विशाला मांसला भर्तुः, पुलिनाभा कटी बभौ । मध्यभागश्च तुच्छत्वात्, कुलिशस्येव सोदरम् ॥३१२॥
बभौ नाभिः सुगम्भीरा, कुक्षी स्निग्धौ च कोमलौ । वक्षःस्थलं शिलाकल्पं, श्रीवत्सेन मनोहरम् ॥३१३॥
दृढौ पीनोन्नतस्कन्धौ, मत्ताक्षककुदोपमौ । गन्धस्वेदोज्झिते कक्षे, अल्परोममनोहरे ॥ ३१४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भुजौ फणिफणाकारौ, जानुदघ्नौ सुकोमलौ। अपछिद्रौ विभोः पाणी, पल्लवाऽऽकारधारिणौ ॥ ३१५ ॥
अङ्गुष्ठाऽङ्गुलयो भर्तु-र्भ्रेजिरे शोणपाणिजाः। कण्ठः कम्बुभ्रमं चाऽपि, रेखात्रितयलाञ्छनः ॥ ३१६ ॥
विमलं वर्तुलं भर्तुः, वदनं सदनं श्रियः। कपोलफलकौ स्निग्धौ, मसृणौ मांसलौ ततौ ॥ ३१७ ॥
स्कन्धान्तलम्बिनौ कर्णा-वन्तरावर्त्तसुन्दरौ। बिम्बाकारौ विभोरोष्ठौ, दन्ताः शशधरत्विषः ॥ ३१८ ॥
रेजे जगत्पतेर्नाशा-वंशः तुङ्गत्वभासुरः। चिबुकं चाऽह्रस्वदीर्घं, वर्तुलं मांसलं तथा ॥ ३१९ ॥
श्मश्रु त्रिजगताम्पत्यु-र्मेचकं बहुलं मृदु। रसज्ञा चाऽनतिस्थूला, सिद्धान्तनिखिलार्थज्ञः ॥ ३२० ॥
प्रान्तरक्ते दृशौ भर्तुर्भ्रुवौ च कुटिलाकृती। भालस्थलमशोभीष्टा-ऽष्टमीशीतांशुसोदरम् ॥ ३२१ ॥
मौलिश्छत्रानुकारोऽभूत्, सुवर्णकलशोपमः। केशाश्चकासिरे भर्तुः, स्निग्धा भ्रमरमेचकाः ॥ ३२२ ॥
रूपघण्टाऽनुकारोऽभूत, ध्वनिस्त्रिजगदीशितुः। गतिश्च वृषभोन्मत्त-द्विपहंससहोदरी ॥ ३२३ ॥
को भवेज्जिनरूपस्य, निपुणो वर्णनाम्प्रति !। देवदेहा अपि बभु-र्यत्पुरोऽङ्गारका इव ॥ ३२४ ॥
प्रभुर्विंशतिधन्वोच्च-स्तमालश्यामलच्छविः। दृशां विश्रामभूः प्राप्तो, यौवनं भवनं श्रियाः ॥ ३२५ ॥
प्रभावतीप्रभृतिकाः, कन्यकाः पृथिवीभुजाम्। उपायंस्त महीपाल-सुमित्राऽऽदेशतो विभुः ॥ ३२६ ॥
ज्ञानत्रयधरोऽधीशः, कर्म भोग्यफलं विदन्। भोगान् सिषेवे कर्मा-ऽनुपभुज्याऽलं न तीर्थकृत् ॥ ३२७ ॥
प्रभावत्यां महादेव्यां, प्राच्यामिव निशाकरः। मुनिसुव्रतनाथस्य, सुव्रतोऽजनि नन्दनः ॥ ३२८ ॥

नवमो भवः

परिणयनं पुत्रोत्पत्तिश्च

१ श्यामलम्।



For Private and Personal Use Only

उपादत्त प्रभुः पित्रा-ऽऽरोपितं राज्यसम्पदम् । सार्द्धाऽष्टमेषु वर्षाणां, सहस्रेषु गतेष्वथ ॥ ३२९ ॥
पितरौ जगतां भर्तुः शुभध्यानपरायणौ । माहेन्द्रमीयतुः कल्पं, तस्मान्निर्वाणमेष्यतः ॥ ३३० ॥
पञ्चदशाब्दसाहस्रीं, पालयन्पृथिवीतलम् । भोगकर्म्म परीक्षीणं, ज्ञानेन ज्ञातवान् विभुः ॥ ३३१ ॥
न्यवेशयत्सुतं राज्ये, सुव्रतं मुनिसुव्रतः । वीतरागा अपि परं, न त्यजन्ति कुलक्रमम् ॥ ३३२ ॥
(यतः–) यद्वदन्यरता नारी, भर्तारमनुवर्तते । तद्वन्मोक्षरतो योगी, संसारमनुगच्छति ॥ ३३३ ॥
इतः पञ्चमकल्पस्य, प्रस्तरेऽरिष्टनामनि । लोकान्तिकानां देवाना-मासनानि चकम्पिरे ॥ ३३४ ॥
तत्कम्पादवधिज्ञान-प्रयोगादपि ते सुराः । सारस्वतादयः सर्वे, जानन् दीक्षाक्षणं प्रभोः ॥ ३३५ ॥ नवमो भवः
एत्य श्रीसुव्रतस्याग्रे तेऽवोचन्निति भक्तितः । सर्वजगज्जीवहितं, स्वामिंस्तीर्थं प्रवर्त्तय ॥ ३३६ ॥
स्वामी गार्हस्थ्यवासेऽपि, वैराग्यैकनिकेतनम् । विज्ञप्तस्तैर्विशेषेण, दीक्षायां सत्वरोऽजनि ॥ ३३७ ॥ सांवत्सरिकं दानम्
अथ वात्सरिकं दानं समारेभे जगत्पतिः । सर्वेऽपि सुकृताऽऽरम्भा दानपूर्वा महात्मनाम् ॥३३८॥
शृङ्गाटकचतुष्कादि-स्थानेषु प्रति वासरम् । आरभ्य सूर्योदयतो, घोषणां स्वाम्यकारयत् ॥ ३३९ ॥
यो यदर्थी स तद्वस्तु, गृह्णातु निजयेच्छया । एवं वर्षावधि प्रातः, प्रातरुच्चार्यते जनैः ॥ ३४० ॥
धनानि धनदो यक्षः, शक्राऽऽदेशाद्दिने दिने । आहृत्य भ्रष्टनाथानि, पूरयत्यम्बुवद्धनः ॥ ३४१ ॥
सर्वत्रेच्छानुमानेन, दीयन्ते कुञ्जरा हयाः । रथाऽऽभरणवस्त्राणि, रत्नानां राशयस्तथा ॥ ३४२ ॥
करभा केशराश्चापि, नगराणि गुरूण्यपि । ग्रामाऽऽकरा वराऽऽरामा, यथाकामं धनादयः ॥ ३४३ ॥युग्मम्॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्वेच्छया याचमानेभ्यो, गृहाच्च वस्तु दीयते । पल्यङ्काऽऽसनयानादि, सङ्ख्यातुं शक्यते न तत् ॥३४४॥
कोटीमेकां सुवर्णस्य, लक्षाण्यष्टौ दिने दिने । सूर्योदयात्प्रातराश-कालं यावद्ददौ विभुः ॥ ३४५ ॥
सर्वाङ्के ददिवान्स्वामी, हेमकोटिशतत्रयीम् । अष्टाशीतिं च कोटीनां लक्षाशीतिं च सर्वतः ॥ ३४६ ॥
सांवत्सरिकदानान्ते, सौधर्माधिपतिस्स्वयम् । दीक्षोत्सवं विधित्सुः सन्, समागाच्चलितासनः ॥३४७॥
सलिलापूर्णसौवर्ण-कुम्भसम्भृतपाणिभिः । सुरैः साकं वृषा दीक्षा-ऽभिषेकं कृतवान्प्रभोः ॥ ३४८ ॥
विलिलेप विभोरङ्गं दिव्यैर्गोशीर्षचन्दनैः । मौलौ सन्तानपुष्पैश्चाऽबध्नाद्धम्मिलमद्रिभित् ॥ ३४९ ॥
वासांस्यलङ्कृतीः शक्रः, स्वामिनं पर्यधापयत् । स स्वयं सूत्रयामास, शिबिकामपराजिताम् ॥ ३५० ॥
दत्तहस्तः सुरेन्द्रेणा-ऽऽरुरुहैनां जगद्गुरुः । पश्चादमर्त्यैर्मर्त्यैश्चा-ऽग्रभागे सा समुद्धृता ॥ ३५१ ॥
पार्श्वे सुव्रतनाथस्य, चकासे चामरद्वयम् । धर्मशुक्लाऽभिधध्यान-युग्मं मूर्त्तमिवाऽमलम् ॥ ३५२ ॥
वादित्राणां महाघोषो, व्यानशे निखिला दिशः । अधर्मवार्त्तां सर्वत्र, सर्वतस्तिरयन्निव ॥ ३५३ ॥
वृन्दारकाणां वृन्देभ्यः, स्पष्टो जयजयारवः । उत्तस्थे मोहराजस्य, प्रवासपटहोपमः ॥ ३५४ ॥
क्षणमग्रे क्षणं पृष्ठे, पौरास्तस्थुः प्रमोदतः । स्वामिनो विरहं सोढु-मप्रौढा इव हर्षतः ॥ ३५५ ॥
केऽप्यारुरुहुर्हट्टाऽग्रं, सौधाग्राणि च केचन । सन्मञ्चाग्राणि केचिच्च, प्रभोर्दर्शनकाम्यया ॥ ३५६ ॥
स्वामिदीक्षाश्रुतेरक्तैः, प्रविव्रजिषुभिः समम् । सहस्रप्रमितैः राज-नन्दनैरग्रतः स्थितैः ॥ ३५७ ॥
पूर्णपात्रोऽचलद्राज-गृहपूर्मध्यवर्त्मना । वधूपाणिमिवादातुं, दीक्षामुक्तो वरो यथा ॥ ३५८ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इभ्यसामन्तवर्गाणां सम्मदाद्गलतश्च्युतैः । हारै रचितपूजेव, भूरभूत्सर्वतोमुखी ॥ ३५९ ॥
निर्ममोऽपि जगन्नाथो, मङ्गलानि पदे पदे । प्रतीयेषाऽनुचराणां सेवास्थितिविदो जिनाः ॥ ३६० ॥
कांश्चित्तं पश्यतो देवा-नाकाशे भुवनाधिपः । कृतार्थाऽन्विदधे स्मेर-नयनाम्भोजवीक्षणैः ॥ ३६१ ॥
एवं सुरासुरनरैः, क्रियमाणमहोत्सवः । पुरीगोपुरमुल्लङ्घ्य, भववासनिवासवत् ॥ ३६२ ॥
कुमुदामोदसम्मत्त-रोलम्बरवडम्बरैः । मधुरैराह्वयदिव भाविनीं मधुसम्पदाम् ॥ ३६३ ॥
एलालवङ्गकंकोल-नागरङ्गादिभूरुहैः । सहाशाप्रसृतैः पूर्ण-मिव साधुमनोरथैः ॥ ३६४ ॥
अभ्रंलिहाऽनोकहेषु, बद्धदोलं कुमारकैः । मुखासवाद्यैः पौरीभिः, पूर्यमाणहृदोहदम् ॥ ३६५ ॥
मञ्जु गुञ्जत् पिकीनादै-राह्वयदिव तीर्थपम् । ययौ नीलगुहं नामो-द्यानं भुवननायकः ॥ ३६६ ॥
[ पञ्चभिः कुलकम् ] ॥
अथाऽऽयाच्छिबिकारत्नात्, पोतादिव महाभुजः । उत्ततार स्वबाहुभ्यां, तरीतुं भववारिधिम् ॥३६७॥
फाल्गुनश्वेतद्वादश्यां श्रवणे पश्चिमेऽहनि । सार्द्धं मुनिसहस्रेण, षष्ठेन प्राव्रजद्विभुः ॥ ३६८ ॥
पुरे राजगृहे रम्ये, ब्रह्मदत्तनृपौकसि । द्वितीये दिवसे प्राप्ते, पायसेनाऽप्यपारयत् ॥ ३६९ ॥
अमरैर्निर्ममे तत्र, वसुधारादिपञ्चकम् । रत्नपीठं विभोः पाद-स्थाने ब्रह्मनृपेण तु ॥ ३७० ॥
परीषहमहासैन्यं, जयन् जितमनोभवः । मासानेकादशान् स्वामी, छद्मस्थो व्यहरत्पुनः ॥ ३७१ ॥
आययौ विहरन्नील-गुहोद्यानं पुनर्विभुः । तस्थौ च चम्पकतरो-रधस्तात्प्रतिमाधरः ॥ ३७२ ॥

For Private and Personal Use Only

फाल्गुनकृष्णद्वादश्यां, श्रवणस्थे निशापतौ । घातिकर्मक्षयात्तत्रो-त्पन्नं केवलमीशितुः ॥ ३७३ ॥
अथ क्षणात्सहस्राक्षः, प्रयुक्ताऽवधिना स्वयम् । उत्पन्नं केवलज्ञानं ज्ञात्वाऽऽगाद् भर्तुरन्तिके ॥३७४॥
अपनिन्ये हरेराज्ञा-विधेर्वायुकुमारकाः । योजनप्रमिते क्षेत्रे, तृणकाष्ठादिविसृतम् ॥ ३७५ ॥
तत्र गन्धाम्बुभिः शुद्धां, वृष्टिं स्वातिभवामिव । रजःपुञ्जप्रशमिनीं, वृष्टिश्चक्रुर्दिवौकसः ॥ ३७६ ॥
स्वर्णरत्नशिलाजालै-स्तद्बबन्धुर्महीतलम् । सुरास्तत्र मृतचैत्य-वन्मध्यं मेध्यबुद्धयः ॥ ३७७ ॥
जानुदघ्नीं पञ्चवर्णा-मामोदोन्मत्तषट्पदाम् । विक्षणिकाक्षणयन्तीं, वृष्टिं पौष्पीं व्यधुः सुराः ॥३७८॥
कृत्वान्तर्मणिमस्तूप-मभितस्तमधः सुराः । हेमकपिशीर्षं वप्रं, व्यधुर्भुवनवासिनः ॥ ३७९ ॥
ज्योतिष्कास्तद् द्वितीयं तु, सद्रत्नकपिशीर्षकम् । चक्रिरे काञ्चनैः सूर्य-रश्मिभिरिव मण्डितम् ॥३८०॥
रत्नैः प्राकारमुत्तुङ्गं, रोहणाद्रिहृतैरिव । सुरा वैमानिकाश्चक्रु-र्माणिक्यकपिशीर्षकम् ॥ ३८१ ॥
वप्रं वप्रं प्रति कृता, प्रतोलीनां चतुष्टयी । चतुर्दिगन्तलोकाना-माह्वातुमिव दूतिकाः ॥ ३८२ ॥
उपरिष्टात्प्रतोलीनां तोरणानि चकासिरे । निरीक्षितुं दिगन्तानि, स्थितानीवोर्ध्वमम्बरे ॥ ३८३ ॥
मुखन्यस्ताम्बुजाः पूर्ण-कलशास्तोरणस्थिताः । रेजिरे मोहसन्तप्तान् भव्यान् सेक्तुमिवोद्यताः ॥३८४॥
प्रतोलीनाम्पुरो वाप्यो, दिव्या सौवर्णपङ्कजाः । क्रीडार्थमिव कैवल्य-लक्ष्म्या इव सुदीर्घिकाः ॥३८५॥
प्रतिद्वारं धूपघट्यः, स्फुरद्धूपाः पदे पदे । विपदंशविनाशाय, निर्मितास्त्रिदशेश्वरैः ॥ ३८६ ॥
देवच्छन्दं जगद्भर्तु-र्विश्रामाय दिवौकसः । प्राकारे मध्यमे चक्रुः, पूर्वोदीच्यां यथाविधि ॥ ३८७ ॥

नवमो भवः

केवलज्ञान-प्राप्तिः समवसरणञ्च



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चत्वारिंशद्धन्वशत-द्वयोच्चाऽशोकपादपम् । विदधुस्त्रिदशास्तत्र, नृत्यन्तं प्रचलैर्दलैः ॥ ३८८ ॥
तत्र सिंहासनं दिव्यं, चारुणी चामरे अपि । त्रैलोक्यविभुताशंसि, शुभ्रं छत्रत्रयं सुराः ॥ ३८९ ॥
सर्वाश्चर्यैरिव कृतं, निर्मितं मङ्गलैरिव । सङ्कीर्णमिव लक्ष्मीभिः, हर्षैर्मूर्तैरिवाऽऽवृतम् ॥ ३९० ॥
जगच्चित्रैरिव व्याप्तं, निधानैरिव सेवितम् । चक्रे समवसरणं शरणं पर्वणामिव ॥ ३९१ ॥
एकत्र दिव्यरम्भोरु-करताडितदुन्दुभिः । एकत्र पञ्चमग्राम-प्रपञ्चस्थिरकिन्नरम् ॥ ३९२ ॥
एकत्र लेप्यललना-करकुम्भगलज्जलम् । एकत्र रममाणस्वः-कुमारकृतहुंकृतिः ॥ ३९३ ॥
एकत्र स्वर्वधूलोक-हल्लीसककृतोत्सवम् । एकत्र किन्नरीगान-प्रपञ्चस्थिरकिन्नरम् ॥ ३९४ ॥

॥ पञ्चभिर्द्वितीयश्लोकमध्यक्रियाकुलकम् ॥

समवसरणे जिनागमनम्

मुहुः सञ्चार्यमाणेषु, लक्ष्मीलीलागृहेष्विव । स्वर्णमयेषु पद्मेषु, न्यस्यन् पादसरोरुहे ॥ ३९५ ॥
पुरस्तद्बन्दिभिरिव, त्रिर्जयेति विभाषकैः । अमरैर्दर्श्यमानाऽध्वा, देवीभिर्गीतमङ्गलः ॥ ३९६ ॥
पूर्वद्वारात् प्रविश्योच्चै-श्चैत्यद्रोश्च प्रदक्षिणाम् । विदधेऽवश्यकार्याणि, जिना अपि वितन्वते ॥३९७॥

॥ त्रिभिर्विशेषकम् ॥

"नमस्तीर्थाये"ति वचो, धारास्फारमुदीरयन् । दिव्यसिंहासने तस्थौ, कूर्माङ्के परमेश्वरः ॥ ३९८ ॥
विचक्रिरेऽसुरा मूर्ति-त्रयीं दिक्षु तिसृष्वपि । पर्षदो द्वादशाऽभूवन्, यथास्थानमुपाविशत् ॥ ३९९ ॥
अथ प्रथमकल्पेशः, कल्पितैः काव्यसञ्चयैः । एवं तुष्टाव हर्षेण, पुष्टमानसविष्टरः ॥ ४०० ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्रयः स्युस्त्रिजगन्नाथ !, जम्बूद्वीपे यदीन्दवः । तेनोपमीयते छत्र-त्रितयं मौलिभासुरम् ॥ ४०१ ॥
स्तुत्वेति विरते शक्रे, ज्ञात्वा ज्ञानोत्सवं विभोः । सुव्रतः पृथिवीपालः, सुव्रताऽऽभ्यर्णमाययौ ॥ ४०२ ॥
प्रणिपत्य जगन्नाथं, सनाथः परया मुदा । सहितो नागरैर्लोकैः, स्तुतवानिति भूपतिः ॥ ४०३ ॥
दिव्यध्वनिरसास्वाद-लुब्धास्त्वत्पादपङ्कजम् । तदेकतानहृदयाः, सेवन्ते सततं मृगाः ॥ ४०४ ॥
स्यूते इव करैरिन्दोः, फेनैरिव करम्बिते । तव पार्श्वे जगन्नाथ !, रेजाते चामरे इमे ॥ ४०५ ॥
तव सिंहासनं नाथ !, धत्ते सुरगिरिश्रियम् । अप्रकम्प्यं सुरैः कामं, चारुकल्याणभाजनम् ॥ ४०६ ॥
भाति भामण्डलं पृष्टे, पिण्डीभूतमहः सुरैः । उदयद्द्वादशाऽऽदित्य-तेजस्तोमविडम्बकम् ॥ ४०७ ॥
इत्थं स्तुत्वा त्रिभुवन-गुरुं सुव्रतं सुव्रतार्थी, पृथ्वीनाथो विनयविनतः सुव्रतः प्रीणितार्थी ॥
सिञ्चन् भक्तिद्रुममतिघनैर्हर्षनेत्राश्रुपूरैः, वाचः श्रव्या नवमधुमुचः श्रोतुमुत्को न्यषीदत् ॥ ४०८ ॥

नवमो भवः

शक्र-सुव्रत-नृपाभ्यां कृता जिनस्तवना.

इत्याचार्यश्रीविनयचन्द्रविरचिते श्रीमुनिसुव्रतस्वामिचरिते महाकाव्ये विनयाङ्के हरिवंशोत्पत्ति-प्रकटनश्च्यवन-जन्म-दीक्षा-केवलज्ञानोत्पत्तिव्यावर्णनो नाम तृतीयः सर्गः ॥छ॥

ग्रन्थाग्रम् मूलतो ॥ २०५० ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# चतुर्थः सर्गः

अथाऽऽरभत विश्वेशो, देशनां क्लेशनाशिनीम्। ऐहिकामुष्मिकाभीष्ट-साधिकां दुःखबाधिकाम् ॥ १ ॥
रोहणाद्रिरजःक्षोदा-दिवाऽसाराद्भवादतः । जात्यरत्नमिव प्राप्यं, धर्मं शर्मैकलक्षणम् ॥ २ ॥
संयमः सूनृतं शौचं, ब्रह्माऽऽकिञ्चनता तपः। क्षान्ति-मार्दव-ऋजुता, मुक्तिश्च दशधा स तु ॥ ३ ॥
कुल-जातिबलोपेतः, शान्तो दान्तो जितेन्द्रियः। श्रद्धालुर्गुरुभक्तश्च, क्षमावान् विनयी नयी ॥ ४ ॥
अमर्मवादी निर्मायः, पराऽपायप्ररक्षकः। इत्यादिगुणसम्पन्नो, यतिधर्माय कल्पते ॥ ५ ॥ युग्मम् ॥
विषयाऽव्यामूढमनाः, श्रद्धालुः परमार्हतः । एकविंशतिगुणवान् गृहिधर्माय युज्यते ॥ ६ ॥
(स चायम्–) सम्यक्त्वमूलानि पञ्चा-ऽणुव्रतानि गुणास्त्रयः। शिक्षापदानि चत्वारि, व्रतान्येतानि गेहिनाम् ॥ ७ ॥
यतिश्रावकधर्मेषु, दानं शीलं तपस्तथा। भावना अप्यमी धर्मा, मुक्तिमार्गैकदेशकाः ॥ ८ ॥
दानधर्मः श्रियां पात्रं, दानधर्मः शुभास्पदम्। दानधर्मो यशोमूलं, दानधर्मो गुणाऽवनिः ॥ ९ ॥
धर्मोऽयं विजयी दान-खड्गपत्तलयाऽमुया। आवर्षं सेव्यतेऽस्माभि-र्यः सर्वैस्तीर्थपैरपि ॥ १० ॥
स्वरूपं दानधर्मस्या-भिरूपं महिमास्पदम्। मङ्गलकलशाऽऽख्याना-द्वर्ण्यमानं निशम्यताम् ॥ ११ ॥
(तथाहि–)अस्यैव जम्बूद्वीपस्य, मुख्यस्य मुखमण्डनम्। अवन्ती नाम नगरी, जयन्ती स्वः पुरीं श्रिया ॥१२॥
वैरिसिंहो नृपस्तत्र, वैरिवारणदारुणः। देवी सोमानना तस्य, सोमचन्द्रेति विश्रुता ॥ १३ ॥
धनदत्ताभिधस्तत्र, श्रेष्ठी श्रीद इव श्रिया। सत्यभामा प्रिया तस्य, सती शान्ता त्रपावती ॥ १४ ॥



For Private and Personal Use Only

अन्येद्युरपनिद्रोऽसौ, सुमना क्षणदाऽत्यये । इति ध्यातुं समारेभे, चिन्तासन्तानननाटकम् ॥ १५ ॥
गृहवित्तानुमानेन, मया त्यागः कृतोर्थिषु । राजप्रसादाद्‌भवं, समस्तजातिमण्डनम् ॥ १६ ॥
एतन्ममास्ति निःशेषं, सफलं पुण्ययोगतः । परं कुलसरोहंसो, नास्ति सूनुः प्रशस्तधीः ॥ १७ ॥
यथा वृष्टिं विना सस्यं, यथा मूलं विना तरुः । यथा गुरुं विना विद्या, यथा धर्मो दयां विना ॥ १८ ॥
यथा ज्ञानं विना तत्त्वं, यथा नीतिं विना धनम् । तथैधते विना पुत्रं, न कुलं चन्द्रनिर्मलम् ॥१९॥ युग्मम्॥
को नाम नायको भावी, सगुणो मे कुलश्रियः । यदाधारे स्फुरन्त्युच्चैः, मुक्ताखासविवर्जिताः ॥ २० ॥
आशावल्लीलसद्वंशो, गोत्रस्त्रीपाणिदर्पणः । शरणं वार्द्धके प्राप्ते, नन्दनो गात्रचन्दनः ॥ २१ ॥
इति चिन्तानिशाचर्या, ग्रस्यमानं विलोक्य तम् । अभाषिष्ट वचश्चारु, सत्यभामा मिताक्षरम् ॥ २२ ॥
निःश्वासधमनीयोगा-चिन्तासन्तानकाञ्चनम् । ताप्यमानं मनो मूषा-सङ्गे विज्ञायते मया ॥ २३ ॥
स्वामिन् ! मलिनिता केयं, तव वक्त्रे प्रसर्प्पति ? । हृदि काष्ठोद्भवस्योच्चै-श्चिन्ताग्नेर्धूमपङ्क्तिवत् ॥ २४ ॥
अपमानं कृतं केन ? किमु प्राणाधिदैवत ! । किमाऽऽज्ञाखण्डनं स्नेहा-न्मादृशैर्विहितं तव ? ॥ २५ ॥
सोऽप्यूचे पृथिवीपाल-प्रसादादपमाननम् । मम कर्तुं सुरेन्द्रोऽपि, नालमन्येषु का कथा ? ॥ २६ ॥
मित्रं मन्त्री, प्रियो बन्धु-स्त्वमेव मम जीवितम् । त्वत्कृतं खण्डनं शङ्के, किमाज्ञायाः सुलोचने ! ॥ २७ ॥
सत्यभामा पुनः स्माह, स्थितं सौख्येतरं हृदि । गोपायसे कथं नाथ ! वचनैरतिपेशलैः ? ॥ २८ ॥
नाथ ! दुःखार्णवे मग्न-मिव चित्तं तवेक्षते । वृत्तान्तकथनेनाशु, संविभागं प्रयच्छ मे ॥ २९ ॥

अथ श्रेष्ठीत्यभाषिष्ट, यद्दुःखमधिकं मम । सत्यमेतत्कलत्रादौ, कथितं हि लघूभवेत् ॥ ३० ॥
दृष्ट्वा स्तनंधयानङ्के, पित्रोरुल्लापतत्परान् । मच्चित्तं कौतुकाऽऽकृष्टं, दुःखमावहते भृशम् ॥ ३१ ॥
पतिव्रतेऽन्तरायोऽस्ति, किञ्चित्कर्म पुरातनम् । सुता येन न जायन्ते, मनोरथकथाऽधिपाः ॥ ३२ ॥
उवाच सत्यभामेश ! खिद्यसेऽत्र कथं मुधा । सुकरे कर्मणि प्रायः, खेदं भजति मूढधीः ॥ ३३ ॥
परिणीतासु चान्यासु, कन्यासु तनयास्तव । बहवोऽपि भविष्यन्ति, मौक्तिकानीव शुक्तिषु ॥ ३४ ॥
अवादीत्सत्यभामां स, चारु नो भाषितं त्वया । त्वां विना गृहिणी नान्या, भवेदत्र भवे मम ॥ ३५ ॥
त्वदङ्गसम्भवाः पुत्राः, प्रीणयन्ति मनो मम । तृष्णार्त्तं चातकमिव, घनस्यादिमबिन्दवः ॥ ३६ ॥
कथ्यतां मम पुत्रार्थ-मुपायः कोऽपि वल्लभे ! । यतेऽहं येन भावेनो-पायादर्थः प्रसिद्ध्यति ॥ ३७ ॥
साऽप्यूचे देव ! यद्येवं, देवं पूजय तीर्थपम् । देहि दीनेषु सद्दानं, पात्राऽपात्रविचारणात् ॥ ३८ ॥
श्रुत्वेति श्रेष्ठिपुन्नागः, स चकार जिनार्चनाम् । चमत्कारि ददौ दानं, श्रद्धया दययाऽनिशम् ॥ ३९ ॥
अस्य प्रकृष्टया धर्म-चेष्टया शासनेश्वरी । रञ्जिता वाञ्छितं तस्य, यथाकाममशिश्रिणत् ॥ ४० ॥
साऽथ गर्भाऽवतारस्य, निशायां सुखशायिनी । स्रग्भिः श्रीभिरिवाकीर्ण्णं, कामकुम्भं व्यलोकत ॥ ४१ ॥
स स्वप्नः प्रातरुत्थाय, कान्ताय कथितस्तया । स निशम्येदमाचख्यौ, प्रिये ! भावी सुतस्तव ॥ ४२ ॥
साऽसूत समये सूनुं, श्रेष्ठी स्वप्नानुसारतः । सुनोर्मङ्गलकलश, इत्याख्यामुत्सवे व्यधात् ॥ ४३ ॥
लाल्यमानः स धात्रीभिः, वर्द्धमानो दिने दिने । अष्टवत्सरदेशीयो, जज्ञे पितृमनोरथैः ॥ ४४ ॥

प्रातः श्रेष्ठी स्वयं याति, जिनानामर्चनाकृते । पुष्पादिकं समानेतुं, मलये तरुमालिनि ॥ ४५ ॥
पित्रा निषिद्ध्यमानोऽपि, परेद्युः श्रेष्ठिनन्दनः । पुष्पवाट्यां जगामासौ, बाल्ये चापल्यमद्भुतम् ॥ ४६ ॥
तं बालं धनदत्तस्य, ज्ञात्वा मलयकस्ततः । अप्रीणात् फलसन्दोहैः, पूज्या हि धनिनन्दनाः ॥ ४७ ॥
गृहमेधी ततो गेह-मागत्य जगतां पतेः । अर्चां रचितवानेष, सोऽपि पुष्पाद्यमार्प्पयत् ॥ ४८ ॥
एतन्नित्यं वितन्वानोऽ-न्येद्युस्तातं व्यजिज्ञपत् । अहमेव समानेष्ये, पुष्पादि मलयान्ननु ॥ ४९ ॥
धनदत्तोऽपि तं मेने, विनयं तनुजन्मनः । विनीतानां हि विज्ञप्तं को नाम नहि मन्यते ? ॥ ५० ॥
अन्येद्युर्धनदत्तोऽथ, मालिकं प्रत्यभाषत । अस्य बालस्य सस्नेहं, सारा कार्या दिवानिशम् ॥ ५१ ॥
मया प्रहरके मुक्त-स्त्वदीये त्वेष बालकः । अर्प्पणीयं मनोहारि, पुष्पादिकमतः परम् ॥ ५२ ॥
इत्युक्तं श्रेष्ठिनः श्रेष्ठं, मालिकस्तत्तथाऽकरोत् । सदाऽऽदिष्टप्रसादा हि, भवन्ति किल सेवकाः ॥ ५३ ॥
किञ्चित् किञ्चित् कलाभ्यासं, कलशस्य वितन्वतः । आनन्दोद्रेकसम्पूर्णा, भूयांसो वासरा ययुः ॥ ५४ ॥
इतश्चम्पापुरी रम्या, कृताऽऽकम्पाऽलकाश्रियः । द्विधापि नामधामभ्यां, तत्र राड् गुणसुन्दरः ॥ ५५ ॥
गुणावली प्रिया तस्य, तयोस्त्रैलोक्यसुन्दरी । पुत्री कल्पलतास्वप्न-सूचिताऽजनि सन्मनाः ॥ ५६ ॥
कुमारीं यौवनोद्यान-करिणीमवलोक्य ताम् । अन्वेष्टुं वरपुन्नागान्, मनश्चक्रे क्षमापतिः ॥ ५७ ॥
सामन्तो मन्त्रिपुत्रो वा, चक्रवर्तिसुतोऽथवा । खेचरः क्षितिचारी च, वा कोऽमुष्याः भविष्यति ? ॥ ५८ ॥
ध्यात्वेति भूपतिः स्माऽऽह, हंहो सभ्या ! महाधियः । पुत्रीयोग्यो वरः कोऽपि, श्रुतो दृष्टोऽथवोच्यताम् ॥५९॥

अथोचुस्ते महीपाल-मभयो नः प्रदीयताम् । अस्मन्मतितरी युष्म-चिन्ताम्भोधौ तरत्वलम् ॥ ६० ॥
आमेत्युक्ते नरेन्द्रेणा-ऽभ्यधुः सभ्या महाधियः । देवाऽस्ति भवतामेका, पुत्री पुत्र इव प्रिया ॥ ६१ ॥
तन्नो न स्वदते कर्तुं दूरे वैवाहिकीं क्रियाम् । एतत्तुल्यो वरः कोऽपि, श्रुतो दृष्टो न हि क्वचित् ॥ ६२ ॥
तदाऽऽत्ममन्त्रिपुत्राय, पवित्राय गुणोत्करैः । भवता दीयतां पुत्री, सुखेन स्थीयतां चिरम् ॥ ६३ ॥
आमेति प्रतिपद्योच्चै-र्भूपतिः सदसि स्थितः । समक्षं सर्वलोकाना-ममात्यमिदमब्रवीत् ॥ ६४ ॥
त्वत्पुत्राय मया पुत्री, दत्ता त्रैलोक्यसुन्दरी । उत्सुक्यो भव सद्बुद्धे !, विवाहक्षणकर्मणि ॥ ६५ ॥
विज्ञाय दूषितं रोग-निर्मोकेन स्वनन्दनम् । कापथ्योत्तरमकरो-दिदं सचिवपुङ्गवः ॥ ६६ ॥
क्व भवान् जगतीनाथ ! ? क्व चाहं तव कर्मकृत् ? । क्व पुत्री भवतो रम्भा-ऽनुकाराऽनुपमश्रिया ? ॥ ६७ ॥
क्व च मे नन्दनः सर्वै-र्न्यूनः स्थैर्यादिभिर्गुणैः । स्वर्ण-पित्तलयोर्योगो, न कदापि हृदो मुदे ॥ ६८ ॥
अपरं तव पर्णेषु, चूर्णं दातुमपि क्षमः । नाऽस्म्यहं जगतीनाथ ! क्वा वार्तोद्वाहमङ्गले ? ॥ ६९ ॥
नरेशस्तं करे धृत्वा, स्मितपूर्वमवोचत । कृतज्ञ ! सचिवावश्य-मत्रार्थे मा वदः परम् ॥ ७० ॥
आमेति सचिवः प्रोच्य, गत्वा निजनिकेतनम् । ऊरीकृत्य तपो गोत्र-देवीमाराधयत्तराम् ॥ ७१ ॥
स तथा विदधे भोगं, कर्पूराऽगुरुचन्दनैः । स तथा चक्रिवान् भूरि, तपः प्रकृतिदुस्तपम् ॥ ७२ ॥
स तथा वासनां शुद्धां, भूयो भूयो व्यवर्द्धत । गोत्रदेवी यथा साऽऽह, सन्तुष्टाऽस्मीति तत्पुरः ॥७३॥ युग्मम्॥
मन्त्र्यूचे देवि ! तुष्टा चेत्, कुरूल्लाघं ममात्मजम् । साऽप्यूचे सूनुना जन्म-भोग्य एव महाऽऽमयः ॥ ७४ ॥

नवमो भवः

जिनदेशनायां दानधर्मे मङ्गलकलश-कथानकम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तस्याऽपनयने भद्र !; समर्था नास्मि सर्वथा । बन्धो निकाचितो यस्मात्, वेद्यस्तीर्थङ्करैरपि ॥ ७५ ॥
सविषादोऽवदन्मन्त्री यद्येवं देवि ! तत्परम् । नरमानय यः कन्यां, भाटकेनोपयच्छते ॥ ७६ ॥
हस्ते कृत्य सुतां राज्ञः, समर्प्य मम नन्दने । यथा प्रयाति तद्ब्रूहि, वरं मम मनोहरम् ॥ ७७ ॥
भूयोऽप्युवाच सा देवी, प्रयुज्याऽवधिवैभवम् । यः कश्चन बहिः पुर्याः, शीतार्तोऽभ्येति बालकः ॥ ७८ ॥
स युष्मन्मन्दुरारक्षै-र्दक्षैरग्रेष्टिकास्थितैः । तपद्भिः छन्नमानेय, इत्युक्त्वा देव्यगान्नभः ॥ ७९ ॥
आहूय मन्दुरारक्षा-नमात्य इदमब्रवीत् । तपतां भवतां वह्नौ, योऽभ्येति निशि बालकः ॥ ८० ॥
स मेऽन्तिकं समानये-स्तृतीयेऽह्नि दिनादतः । इत्याऽऽदिश्य च तान्मन्त्री, विससर्ज दिवात्यये ॥ ८१ ॥
विज्ञायाऽवधिना पुत्री-योग्यं मङ्गलमद्भुतम् । अवन्त्यामगमद्देवी, तमारामस्थमैक्षत ॥ ८२ ॥
मध्येव्योम ततः स्थित्वा, देव्यवादीदिति स्फुटम् । सुतः सैष कुमारीं यो, भाटकेनोपयंस्यते ॥ ८३ ॥
मङ्गलोऽपि निशम्येदं, मानसे ध्यातवानिति । किमपूर्वमिदं व्योम्नि, श्रूयते देवतोदितम् ॥ ८४ ॥
भवताद्वमुराऽऽख्यास्ये, विचिन्त्येति गृहं गतः । तत्सर्वं व्यस्मरत्तस्य, नान्यथा भवितव्यता ॥ ८५ ॥
द्वितीयेऽपि दिने श्रुत्वा, तन्नाऽऽख्यदसको पितुः । उद्यानाद्यावदभ्येति, तावद् वायुर्ववौ दिवि ॥ ८६ ॥
वातेन तेन जातेनो-त्पाट्य तृतीयके दिने । चम्पाया निकटाऽटव्यां, व्यमोचि श्रेष्ठिनन्दनः ॥ ८७ ॥
मुक्तमात्रः स तत्राथ, पालीतालीजलाविलम् । वेल्लत्कमलिनीखण्डं, स ददर्श महासरः ॥ ८८ ॥
सुधारसरसं हारि, वारि पाणिपुटात्पपौ । वटं पालीकिरीटाभ-मारुरोह, झटित्यसौ ॥ ८९ ॥

नवमो भवः

जिनदेशनायां
दानधर्मे
मङ्गलकलश-
कथानकम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतश्च सविताऽऽरूढः, प्रतीचीनाऽद्रिचूलिकाम् । तद्दुःखमक्षमो द्रष्टुं, मित्रे हि घटतेऽखिलम् ॥ ९० ॥
कलशो वटमारूढो, दिशां जालं विलोकयन् । उदीच्यां दिश्यवैक्षिष्ट, प्रज्वलन्तं हविर्भुजम् ॥ ९१ ॥
किञ्चिद्विलीनशोकोऽसौ, निरीक्ष्योत्तीर्य च क्षणात् । मन्दुरारक्षकाऽभ्यर्णे, ययौ शीतार्तविग्रहः ॥ ९२ ॥
वीक्ष्य तैरश्वपालैः स, तापितः पावकार्चिषि । सहास्यं यामिनीं सर्वां स्फीतशीतामवाहयत् ॥ ९३ ॥
विभातायां विभावर्यां, ते सर्वे वाजिपालकाः । वाहयन्तो हयानुच्चै-र्दूराद्दूरतरं ययुः ॥ ९४ ॥
अथ तेषु प्रयातेषु, प्रगे मन्त्री कथञ्चन । संगोप्य बालकं गेहं, निन्ये लब्धनिधानवत् ॥ ९५ ॥
स स्वयं स्नानभोगादि, छन्नं छन्नमकारयत् । निर्गच्छन्तं बहिर्गेहा-ज्जवादेनं न्यवर्त्तयत् ॥ ९६ ॥
नगरी-ग्राम-देशादि, पृच्छतोऽस्य मुहुर्मुहुः । न किञ्चिद् वक्ति मन्त्रीश, एडमूक इवापरः ॥ ९७ ॥
मन्त्री चिन्ताञ्चितं चैनं, तमवग् वाक्यविद्वरः । कार्यं भद्र ! कुरुष्वैकं, त्वया निष्पद्यते यतः ॥ ९८ ॥
कार्यं किमार्य ! सत्कार्य-मित्युक्ते तेन सोऽब्रवीत् । विवाह्य भूभुजः पुत्रीं मत्पुत्राय प्रयच्छ तत् ॥ ९९ ॥
कलशोऽप्याह नेदृक्षं, युज्यते कर्तुमङ्गिनाम् । दारदानात्परं दानं, ग्रन्थेष्वपि निशम्यते ॥ १०० ॥
अथ रुष्टोऽवदन्मन्त्री, यद्येवं न करोषि रे ! । तदा त्वां मारयिष्यामि, मारैर्नवनवैरहम् ॥ १०१ ॥
अथ प्रोवाच निर्भीकः कलशः कोमलस्वरः । विधेहि वाञ्छितं भद्र ! यत्ते सङ्गतिमङ्गति ॥ १०२ ॥
अथाऽऽकृष्य कृपाणं स, निष्कृपः प्राह मन्त्रवित् । स्मरेष्टां देवतां कुल्यां, भव त्वं सम्मुखः स्वयम् ॥१०३॥
सोऽप्यूचे कलशो मेऽर्ह-च्चरणाः शरणं चिरम् । जिनोपदिष्टो धर्म्मश्च, पापतापनिपातकृत् ॥ १०४ ॥



For Private and Personal Use Only

अन्तरङ्गा नराः प्रोचुः, प्रणिपत्याऽथ मन्त्रिणम् । अयं दुग्धमुखो बालो, निरागा हन्यते कथम् ? ॥ १०५ ॥
मा वधीरवधिं स्थैर्य-धैर्याद्यैः सुगुणैरमुम् । स्वार्यमेवं निवार्योचुः, कुमारं प्रति सादरम् ॥ १०६ ॥
यदसौ भाषते मन्त्री, तत्कुरुष्व गुणानघ ! । जीवन्नरो भद्रशतं, पश्येदिति वचः स्मर ॥ १०७ ॥
तैरेवं बोधितो दध्यौ, नितरां मङ्गलः सुधीः । क्व विशाला विशालाख्या, नगरी श्रीगरीयसी? ॥ १०८ ॥
क्वायं समागमोऽप्यत्र ?, क्वेदृशी स्थितिरुत्थिता ? । तूलपूलकवत् क्वेदं ? वातेनाऽऽनयनं मम ? ॥ १०९ ॥
क्व सा तातस्य सद्वाणी, ? क्वेयं गरलसोदरी । कुल्या इव मम क्वैते ?, पुंसो निधनरक्षकाः ॥ ११० ॥
विचार्यैवं चिरं चित्ते, प्रोचे सचिवमुच्चकैः । कारयिष्यामि तेऽभीष्टं, ममाऽपि कुरु किञ्चन ॥ १११ ॥
तेनोचे किं तदित्युक्ते, सोऽप्यूचे यन्महीश्वरः । मङ्गलेषु प्रदत्ते हि, तन्मे देयं गुणानघ ! ॥ ११२ ॥
तदशेषमुज्जयिन्यां, प्रहेयं गुप्तपूरुषैः । स्नेहस्य लोभतो लोकै-रुच्छिष्टमपि भुज्यते ॥ ११३ ॥
आमेति मन्त्रिणा प्रोक्ते, शुभवारे शुभे दिने । वर्णकोद्वर्णकविधौ, वधूभिर्विहिते सति ॥ ११४ ॥
स्तूयमानगुणग्रामो, बन्दिवृन्दारकेश्वरैः । वाराङ्गनाकुलस्त्रीभ्य, उच्चरद्धवलध्वनिः ॥ ११५ ॥
वादित्राणां महाघोषै-र्बधिरीकृतविष्टपः । गजारूढः कुमारोऽसौ, विवाहाऽऽवासमाऽऽसदत् ॥ ११६ ॥युग्मम्॥
ध्वनत्सु वर्यतूर्येषु, हस्तालेपे कृते सति । शुभलग्नोदये जाते, सहर्षो धनदत्तभूः ॥ ११७ ॥
त्रैलोक्यसुन्दरीकन्या-मुपयेमे तदाज्ञया । चतुर्थे मङ्गले राजा, ददावस्मै हयादिकम् ॥ ११८ ॥ युग्मम् ॥
तथापि सुन्दरीपाणिं, जामातरि न मुञ्चति । राजा सस्नेहमाचख्यौ, वत्स ! याचस्व वाञ्छितम् ॥ ११९ ॥

सोऽप्यवादीदिति क्ष्मापं, यदिदं देव ! सुन्दरम् । पञ्चवल्लभवाजिभ्यो, वाजिपञ्चकमर्पय ॥ १२० ॥
तथा कृते नरेन्द्रेण, महेन सुमहीयसा । चचाल श्रेष्ठिसूः साकं, तया राजीवनेत्रया ॥ १२१ ॥
गच्छन्नभिमुखं मन्त्रि-मन्दिरं धनदत्तसूः । गिरं सुधाकिरं पौरीं शुश्राव श्रुतिहारिणीम् ॥ १२२ ॥
कृष्णः कृष्णः सुराधीशः, सर्वाङ्गीणविलोचनः । पुराणपुरुषो ब्रह्मा, शङ्करोऽमटवाहनः ॥ १२३ ॥
अयं चम्पकपुष्पाभो, विस्मेरनयनद्वयः । नवीनो गजमारूढः, किमेभिरुपमीयते ? ॥ १२४ ॥
इति शृण्वन्वचः प्राप-दालयं मङ्गलो वरः । जायापती अभूतां च, क्रमात्पल्यङ्कसङ्गिनौ ॥ १२५ ॥
इतो मन्त्रिनरैरन्त-रङ्गिरङ्गविचेष्टितैः । सञ्ज्ञितः स्वं वचः पाहि, याहि याहि निजाऽऽश्रयम् ॥ १२६ ॥
तनूचिन्तामिषं कृत्वा, यावद्यात्येष मन्दिरात् । तावदात्तपयःपात्रा-ऽन्वयात् कुलवधूर्नवा ॥ १२७ ॥
कृताङ्गचिन्तचिन्तार्त्त-मालोक्य प्रियमभ्यधात् । क्षुधातृड्भ्यां किं कान्त ! त्वं, बाध्यसे स तथाऽवदत् ॥१२८॥
दास्या मातृगृहानीतान्, मोदकान्वारि हारि च । भुञ्जानः प्रियया साकं कलशः च्छन्नमाख्यत ॥१२९॥
मोदकानां यद्यमीषां, स्वादवन्त्यम्बुसङ्गमः । तदा मोदकता काचित्, परिस्फुरति नूतना ॥ १३० ॥
एवं राजाङ्गजा श्रुत्वा, सहास्यं हृद्यचिन्तयत् । दूरे पुरी च सा कान्तः, कथं संस्मृतवानिह ॥१३१॥
यत्तन्मातृकुलं तत्र, तदा सम्भाव्यते ह्यदः । ध्यात्वेति भूपतेः पुत्री, ताम्बूलं प्रेयसे ददौ ॥ १३२ ॥
पौनःपुन्येन धनभूः, सञ्ज्ञितो नेत्रसञ्ज्ञया । मुहुर्विवलितग्रीवं, निर्ययौ वासवेश्मनः ॥ १३३ ॥
नीत्वाऽवन्तीपथं गूढं, तत्तथा दर्शितं नरैः । तुरङ्गादिकमुत्प्रेक्ष्य, स तुतोष सविस्मयः ॥ १३४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रेष्ठिसूर्योजयामास, चतुरस्तुरगान् रथे । पश्चमं पृष्ठिभागे चा-ऽपृच्छद् ग्रामादिनाम च ॥ १३५ ॥
तान्सन्तुष्य धनैर्बाढं, गिरा सम्भाष्य धीरया । स चचाल स्वयं स्वीयां, नगरीं प्रति सप्रभः ॥ १३६ ॥
एत्याऽवन्तीं ततो वेगाद्, वाजिभिर्वायुवाजिभिः । स्वधाम प्रविशन्नेष, पितृभ्यामिति भाषितः ॥ १३७ ॥
कथमेषि परागारे, ? नास्ति मार्गस्य निसृतिः । अमुं वणिग्जनागारं, राजपुत्र ! न वेत्सि किम् ? ॥ १३८ ॥
पित्रोरित्युक्तिमाकर्ण्य, मुदितो धनदत्तसूः । उत्तीर्य स्यन्दनात्पादौ, ववन्दे भक्तिमेदुरः ॥ १३९ ॥
अथोत्थाय पितुः कण्ठ-मवलम्ब्याऽब्रवीदिति । न जानासि कथं तात !, त्वं पुत्रं मङ्गलाभिधम् ॥ १४० ॥
तौ मत्वा सुतमानन्द-कन्दं रुरुदतुस्ततः । ताभ्यां पृष्टः स्ववृत्तान्तं, मूलादारभ्य सोऽभ्यधात् ॥ १४१ ॥
समाकर्ण्य वणिग् मेने, सुतं सर्वश्रियां पदम् । अगोपयद् गृहस्यान्तः, पश्चाश्चीमपि दूरतः ॥ १४२ ॥
अगारं कारयाश्चक्रे, सप्राकारं सतोरणम् । तया रथस्थया लक्ष्म्या, लब्धया मन्त्रिभूभुजोः ॥ १४३ ॥
एषोऽन्येद्युरनुज्ञाप्य, मङ्गलो मङ्गलाशयः । अपाठीत्सकला विद्या, विद्याहीनः पशुर्यतः ॥ १४४ ॥
इतश्च मन्त्रिणाऽनेन, तनयोऽस्तनयेन सः । कृतमङ्गलनेपथ्यः, प्रेषितो वासवेश्मनि ॥ १४५ ॥
तं पल्यङ्कसमारूढं, प्रेक्ष्य प्रोचे नृपाङ्गजा । हहा ! क्व मे प्रियश्चारु-श्लक्ष्णकर्पूरपादपः ॥ १४६ ॥
क्वायं मृतकदुर्गन्धि-रित्युक्त्वा तल्पमत्यजत् । तेनोच्चैर्धार्यमाणाऽपि, बलाद्गीता सहस्रधा ॥ १४७ ॥
बहिर्गत्वा स्ववृत्तान्तं, तं सखीनां पुरोऽगदत् । ताः प्रोचुर्नाऽविशत्कोऽपि, किन्तु तेऽस्ति सखि ! भ्रमः ॥१४८॥
साख्यद् भ्रान्ता भवन्त्योऽपि, स्थाताऽस्म्यत्रैव सर्वथा । तदुक्तं तथ्यमज्ञायि, तं दृष्ट्वा ताभिरादरात् ॥ १४९ ॥



For Private and Personal Use Only

अमात्योऽपि प्रगे गत्वा, पूच्चकार नृपाग्रतः । देव ! दैवेन मुष्टोऽस्मि, दुर्जयो हि विधेर्विधिः ॥१५०॥
पृथिवीशक्र ! मत्पुत्रः, तव जामातृतां गतः । तर्प्पिष्यतीति मे वाञ्छा-द्रुमं दैवानलोऽदहत् ॥१५१॥
त्वत्सुताकरयोगेन, कुष्ठी मे नन्दनोऽजनि । पूर्णेन्दुसुन्दरं वासो, नीली मलिनयेन्न किम् ? ॥१५२॥
गुरुरप्यष्टमीयुक्त-स्त्यज्यते शुभकर्मणि । मन्दोऽपि शस्यते तज्ज्ञै-श्चतुर्दश्यामुपागतः ॥ १५३ ॥
वरमिन्द्रियहीनत्वं, वरं दारिद्र्यसेवनम् । वरं बन्धो वरं मृत्यु-र्न पुनः कुष्ठसङ्गमः ॥ १५४ ॥
भूमानाऽऽकर्ण्य तद्वाक्यं, कर्णयोर्विषभोजनम् । उवाच गोचरं नेया, न दृशोर्मम पापिनी ॥ १५५ ॥
राजाऽऽदेशाज्जनन्याऽपि, साऽवज्ञाता व्यचिन्तयत् । उदियाय हहा ! दैवात्, क्व कलङ्कनवाङ्कुरः ? ॥१५६॥
प्रियो लब्धोऽप्यलब्धोऽभून्मम भाग्यविपर्ययात् । दरिद्रस्य करे चिन्ता-रत्नं तिष्ठेत् कियच्चिरम् ? ॥१५७॥
पूर्वजन्मनि कस्यापि, कलङ्कः कोऽपि निर्ममे । अधुना तत्फलं प्राप्तं, परिपाकेन सुन्दरम् ॥ १५८ ॥
इति चिन्तामरुद्भ्रान्ता, जाता त्रैलोक्यसुन्दरी । मोदकाद्युक्तमस्मार्षीत्, पत्युरिष्टोपदेशवत् ॥१५९॥
ध्यात्वेति मातरं प्रोचे, मातः कारय दर्शनम् । पित्रा सह यथा वक्ष्ये, किञ्चिदीप्सितमात्मनः ॥१६०॥
अनाकर्ण्येति तद्वाक्यं, जाता मातापि मौनिनी । अर्जितानां दुरन्तानां, कर्मणामीदृशी गतिः ॥१६१॥
साऽऽख्यन्न दीनवदना, जनन्येत्यपमानिता । अपमानं हि सह्येत, किं पित्रोः प्रेमशालिनोः ॥१६२॥
आख्यया सिंहनामानं, राजमानं मनीषिणम् । नत्वाऽसावग्रतस्तस्थौ, योजिताञ्जलिकुड्मला ॥१६३॥
सेत्यूचे सिंहनृपतिं, प्रीतिपात्रं पितुर्मम । मदर्थं पृथिवीनाथं, विज्ञ ! विज्ञपय द्रुतम् ॥ १६४ ॥

नवमो भवः

जिनदेशनायां दानधर्मे मङ्गलकलश-कथानकम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यदेव ! भवतां पुत्री, दैवतो दोषभूरभूत् । सैकां विज्ञप्तिकां नाथ ! करिष्यति विनिश्चितम् ॥ १६५ ॥
आमेत्युक्तेऽथ तेनोच्चै-र्विज्ञप्तः, पृथिवीपतिः । तामाहूय नृपोऽवादीत्, पुत्रि ! ब्रूहि यथारुचि ॥१६६॥
वसुधानाथ ! मे देहि, नरवेषमिति स्फुटम् । निगद्य विररामोच्चै-र्भाषिता नाधिकं वदेत् ॥ १६७ ॥
श्रुत्वेति नृपतिर्दध्यौ, गुरुकार्येण केनचित् । भवितव्यं विचार्येति, तथेत्यूचे सुतां प्रति ॥ १६८ ॥
तस्या रक्षाकृते सिंहं नृसिंहोऽथ समादिशत् । यथाऽसौ लक्ष्मभूर्न स्या-द्दुरुच्छेद्या कलङ्किता ॥१६९॥
नारी नियमिता तावद् भवेन्नेत्रप्रियङ्करी । चैत्यस्य स्वकुलस्यैव, पताकेव विभूषणम् ॥ १७० ॥
भूयोऽपि न्यगदद्राजा, वत्से ! स्वच्छाशये ! तव । मानसे भासते यच्च, तद् ब्रूहि त्वमनाकुला ॥१७१॥
प्रस्तावज्ञा जगाद ज्ञा, सैषा रेखा महाधियाम् । अनुज्ञाता त्वया यामि, विशालां नगरीं वराम् ॥१७२॥
अथोवाच नृपो वत्से !, भव शीलवती परम् । शाश्वतं मण्डनं शीलं, कीर्तेर्मूलं निकेतनम् ॥ १७३ ॥
अथ प्रणम्य भूपाल-पादांस्त्रैलोक्यसुन्दरी । वेगादगादवन्तीं च नरवेषमनोहरा ॥ १७४ ॥
त्रैलोक्यसुन्दरं ज्ञात्वा, पुत्रं चम्पाधिपोद्भवम् । भूत्याऽभ्येत्य महापुर्यां, प्रावेशयदिलापतिः ॥१७५॥
चापाऽसिधेनुप्रमुखं, बिभ्राणं करपङ्कजे । त्रैलोक्यसुन्दरं दृष्ट्वा, राजा मेनेऽमरं भुवि ॥ १७६ ॥
सन्मानपूर्वकं सौधं, समर्प्पयदिलापतिः । तत्राऽस्थात्सोऽपि जालस्थो, वीक्षमाणः पुरश्रियम् ॥ १७७ ॥
अन्येद्युर्भूपभूः पाथः-पानार्थं पथि गच्छतः । हयांस्तार्क्ष्यानिव प्रेक्ष्यो-पालक्षयदसौ सुधीः ॥ १७८ ॥
अथाऽऽदिक्षन्नरान्नैकान्, कस्यैते वरवाजिनः ? । इति ज्ञात्वा समायाता-स्ते गत्वा पुनरूचिरे ॥१७९॥



For Private and Personal Use Only

स्वामिन् ! मङ्गलकुम्भस्य, वाजिनो दिव्यरूपिणः । अमुना सममायाता-श्चंपापुर्या महात्मना ॥१८०॥
श्रुत्वेदं स पुनः प्रैषीत्, शुद्धये तान्स्मरोद्धुरः । तदादेशात्तदा गत्वा, समाचख्युः सविस्तरम् ॥१८१॥
धनदत्तसुतः स्वामिन् !, मङ्गलो मङ्गलालयः । कलाभ्यासं दधानोऽस्ति, मध्यगश्छात्रपर्षदि ॥१८२॥
श्रुत्वेति सिंहमूचे सा, तात ! क्रेया महाहयाः । त्वया निमन्त्र्यतामत्र, स गुरुः पाठकाग्रणीः ॥१८३॥
ततो ज्ञात्वा मनोभावं, याच्यन्ते वाजिनो मया । मनोभावाऽपरिज्ञाने, प्रार्थना हि त्रपावती ॥१८४॥
सिंहेनापि प्रगे गत्वो-पाध्यायः सन्निमन्त्रितः । सोऽप्याजगमिवांस्तत्र, छात्रवर्गसमन्वितः ॥१८५॥
नृपभूर्मङ्गलं वीक्ष्य, सशरीरमिव स्मरम् । सुधाभुगिव सञ्जज्ञे, निर्निमेषविलोचनः ॥ १८६ ॥
नररूपधरश्छात्रान्, भक्तिपूर्वममानयत् । मुक्त्वैकं मङ्गलं नेत्र-मङ्गलानां निकेतनम् ॥ १८७ ॥
राजार्हैरासनस्थालैः, प्रेमपात्रैरिवोदितैः । मङ्गलं मानयामास, वीक्षामासे मुहुर्दृशा ॥ १८८ ॥
वीक्ष्य सन्मानमेतस्य, दुःख्यभूत्पाठकव्रजः । क्षमन्ते हन्त सोढुं न, ह्येक एव प्रभाववान् ॥ १८९ ॥
अथाऽध्यापकमूचे स, कथां छात्रेण केनचित् । आख्यापयत निःशेष-रसनिष्पन्दसुन्दराम् ॥ १९० ॥
छात्रैरथोचिरे स्मित्वा, यस्य सन्मान ईदृशः । स सकर्णः श्रवःपेयां, कथयिष्यति वः कथाम् ॥ १९१ ॥
अभाषिष्ट बुधादिष्टो, मङ्गलो मङ्गलं गिरा । कल्पिताकल्पिताभ्यां तु, राजपुत्र ! कथा द्विधा ॥१९२॥
किं कथा कल्पिता कथ्या,? किंवान्या रसहारिणी । अथोचे राजसूः स्मित्वा-ऽनुभूतां कथ्यतां कथाम् ॥१९३॥
अथोचे मङ्गलः स्फीतं, स्वकीयं चरितं ततम् । विशालाजलयोगेन, स्वादिष्टैर्मोदकैर्वरम् ॥ १९४ ॥

नवमो भवः

जिनदेशनायां दानधर्मे मङ्गलकलश-कथानकम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





निशम्य भूपभूरेवं, क्रोधोद्धुर इवाऽवदत् । अरेरे ! कोऽयमत्यन्त-मसम्बद्धप्रलापकः ॥ १९५ ॥
अस्माकं कुरुते मन्त्री, किमिदं जनगर्हितम् । धत्तैतस्य न कोऽप्यस्ति, किमु दूरं भटा गताः ॥ १९६ ॥
धृते तस्मिन् सह छात्रै-स्तदैकः कोऽपि पाठकृत् । धनदत्ताय नंष्ट्वाऽथ, तं वृत्तान्तं न्यवेदयत् ॥१९७॥
धनदत्तस्ततः श्रेष्ठी, भीतिव्याकुलमानसः । प्राभृताद्यमुपादाय, स्वयं राजकुलेऽचलत् ॥ १९८ ॥
इतः पुंवेषशालिन्या, मङ्गलो मालकोपरि । गृहीत्वा प्रेमसन्दर्भं, सिंहप्रकटमुच्यते ॥ १९९ ॥
प्राणेश ! निर्भयीभूय, मेऽखिलं दर्शयस्व तत् । यत्पित्रा मम तेऽदायि, वैवाहे मङ्गलक्षणे ॥ २०० ॥
मूर्त्यन्तरं पितुः सिंहो, मत्कृते दर्शयस्व तत् । विना प्रत्यय-सङ्केतं, न प्रत्येति विचक्षणः ॥२०१॥
कलशोऽप्युक्तवानेवं, यद्यसौ स्वसुरोत्तमः । प्रेष्यतां मन्दिरेऽस्माकं, यथा गच्छति वस्तु तत् ॥२०२॥
एवमुक्तो गतः सिंहः, सच्चक्रे तत्पिताऽप्यमुम् । परं चित्तं भयभ्रान्तं, वीक्ष्यैनं प्रोक्तवानसौ ॥ २०३ ॥
मा भैषीद् भद्र ! मा भैषी-र्नारीरूपधरो नरः । सा स्नुषा तव तत्पितृ-दत्तं वस्तु प्रदर्शय ॥ २०४ ॥
तथोदिते धनेनापि, नृपनामाङ्कमुज्ज्वलम् । श्रेष्ठिना तुष्टिभृत् चित्ते, भूषणाद्यमदर्शयत् ॥ २०५ ॥
सन्मान्य धनदत्तेन, प्रेषितः सिंहभूपतिः । सर्वमाख्याय ताश्चक्रे, नारीरूपधरां पुनः ॥ २०६ ॥
त्रैलोक्यसुन्दरी देवी, दिव्यनेपथ्यधारिणी । पत्युः प्रणम्य पादाब्जं कृताञ्जलिरभाषत ॥ २०७ ॥
तदा प्राणेश ! मां मुक्त्वा, दम्भेन गतवानसि । इदानीं चित्तचौर ! त्वं, क्व याताऽसि दृशोर्मम ? ॥२०८॥
अथोचे मङ्गलो विद्वान्, दैवादिदमभूत्प्रिये ! । अतः परं त्वया कार्यो, न विषादः कदाचन ॥२०९॥



For Private and Personal Use Only

अथ सिंहो नरेन्द्राऽन्ते, नरवेषां विधाय ताम् । नीत्वा यथाभवं वृत्त-माख्यन्नृमानुवाच च ॥२१०॥
अनया पालितं शुद्धं, महाशीलव्रतं चिरम् । अहो ! मतिप्रपञ्चोऽस्या, नृशंसत्वं च मन्त्रिणः ॥२११॥
सभासमक्षं भूपस्तां, प्रशंस्येति वचोऽवदत् । भज वत्से ! स्वभर्तारं, भव पुत्रवती सति ! ॥ २१२ ॥
इत्युक्त्वा पुत्रिकीकृत्य, स्त्रीवेषीकृत्य भूपतिः । धनदत्तगृहे प्रैषी-द्वरेण सह तां वधूम् ॥ २१३ ॥
दशाऽह्नानि धनश्रेष्ठी, वर्धापनमकारयत् । सिंहोऽपि वैरिसिंहान्ते, तदाऽऽदेशात्तदा ययौ ॥ २१४ ॥
पृष्टा क्ष्माभुजा पुत्री, वृत्तं स सर्वमाऽऽख्यत । तथा पुरुषवेषत्व-कारिवेषं समार्पयत् ॥ २१५ ॥
समाकर्णाति नन्दिन्या, महिमानमनुत्तरम् । प्रमोदाऽऽमोदसुरभिः, क्षोणीशो ध्यातवानदः ॥२१६॥
अहो ! शक्तिरहो ! शील-महो ! भक्तिः स्ववल्लभे । अहो ! कलङ्कवैकल्य-मिति ज्ञात्वा महीपतिः ॥२१७॥
अवन्त्यास्तां समानाय्याऽ-वेशयत् सवरां सुताम् । तद्द्वयं वीक्ष्य दृग्द्वन्द्वं, मेने साफल्यमात्मनः ॥२१८॥
स्वस्वामिद्रोहिणा कस्मान्, मन्त्रिणा मिथुनं हहा । कलङ्कितं कलङ्केन, न धर्मे लोभिनां मतिः ॥२१९॥
अथो नाथो विशां रोषात्, सिंहं सेवकमादिशत् । मन्त्रिणं मारयाद्ध्यग्रं, समारोह्य सनन्दनम् ॥२२०॥
इतश्च मङ्गलोऽवादी-देव ! मन्त्री पिता मम । मुञ्चाऽमुं मा वधीस्तत्त्वं, स च पापात् पतिष्यति ॥२२१॥
सुतापतिचरित्रेण, भूपस्तेन चमत्कृतः । तथा चक्रे स्वदेशात्तु मन्त्री निर्वासितः पुरात् ॥ २२२ ॥
पुर्यां सौख्येन सोऽप्यस्थात्, सप्रियो मङ्गलश्चिरम् । निष्पुत्रत्वान्नृपेणाथ, स्वपदे विनिवेशितः ॥२२३॥
शीलशालीनभद्रस्य, यशोभद्रस्य सद्गुरोः । व्रतमाप्य तपस्तप्त्वा, देवभूयं नृपो ययौ ॥ २२४ ॥

नवमो भवः

जिनदेशनायां दानधर्मे मङ्गलकलश-कथानकम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कियत्यथ गते काले, महीं शासति मङ्गले। ज्ञात्वेति वणिजं क्षुद्रं, क्रुद्धास्तु प्रान्तभूभुजः ॥ २२५ ॥
हेलया मेलयामासु-रखिलानि बलान्यमी। रुरुधुर्मङ्गलं भूपं, दैत्या इव सुराधिपम् ॥ २२६ ॥
अथ ते निर्जिताः सर्वे, युद्धे मङ्गलभूभुजा। न तेजस्तादृशां हन्त, जात्यपेक्षं विजृम्भते ॥ २२७ ॥
जितकाशी ततश्चम्पा-मगान् मङ्गलभूपतिः। जयकेशर इत्यस्य, समभून्नाम चाऽपरम् ॥ २२८ ॥
अन्यदोद्यानमायातं, जयसिंहं मुनीश्वरम्। आरामिकमुखाज् ज्ञात्वा, तं प्रणन्तुमगान्नृपः ॥ २२९ ॥
निषण्णे भूपतौ तत्र, प्रसादविकसद्दृशि। वासनाशासनावासां, विदधे धर्मदेशनाम् ॥ २३० ॥
प्रस्तावेऽवोचदुर्वीशो, गुरो ! दुःस्थ्यभवं कथम् ?। सकलङ्का कथं देवी !, तद् ब्रूहि ज्ञानिनाम्वर ! ॥२३१॥
अथोचे साधुपुन्नागः, पुरे क्षितिप्रतिष्ठिते। श्रीदेवीदयितः सौम्यः सोमचन्द्राऽभिधो धनी ॥२३२॥
तत्रैव नगरे जज्ञे, जिनदत्ताऽभिधो नरः। सोमचन्द्रस्य समभूत्, प्रीतिस्तेन सहोच्चकैः ॥ २३३ ॥
गत्वा देशाऽन्तरं लक्ष्मीं, समुपार्ज्य सहस्रधा। मनोरथान्पूरयिष्ये, सर्वेषां तनुजन्मिनाम् ॥ २३४ ॥
देशाऽन्तरं गतवतश्चेन्मे भवति पञ्चता। परलोकगतेः श्रेयः, न स्यादसुमतां क्वचित् ॥ २३५ ॥
तदस्माद्दापयिष्यामि, पश्चाद्दानं सुहृत्तमात्। निर्मलः परलोको मे, यथा भवति निश्चितम् ॥ २३६ ॥
ध्यात्वेति दश दीनार-सहस्राणि सुहृत्करे। समर्प्येदमवादीत्स, द्वितीयं हृदयं भवान् ॥ २३७ ॥
अमी देयास्त्वया धर्मे, देशान्तरगतस्य मे। मम पुण्यस्य षष्ठांशो, भूयात्तव सुहृद्वरः ॥ २३८ ॥
त्वन्मित्रं जिनदत्तोऽपि, त्वयि देशान्तरं गते। व्यस्राणयत्सुपात्रेषु, मित्रे श्रेयः कृते श्रियम् ॥२३९॥

नवमो भवः

जिनदेशनायां दानधर्मे मङ्गलकलश-कथानकम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वासनावासितस्वान्तः, स ददानः परश्रियम् । जिनदत्तोऽभवत्पुण्य-भाजनं जनवर्णितः ॥ २४० ॥
( यदूचे– ) अप्यन्यसम्पदां दाता, प्रपापालकवज्जनः । याच्यतेऽञ्जलिमायोज्य, कटरे दानवल्गितम् ॥२४१॥
यत्त्वया परहस्तेन, दापितं द्रव्यमात्मनः । तद्घाटकेन समभू-दुद्वाहस्तव भूपते ! ॥ २४२ ॥
जिनदत्तप्रिया भद्रा, रहस्येवमुवाच सा । तत्र पूर्वभवां पत्नीं, श्रीदेवीं धीरया गिरा ॥ २४३ ॥
जामे ! प्रियो विरक्तो मे, कारणं तन्निवेदय । सहास्यमूचे श्रीदेवी, त्वग्दोषस्तत्र कोऽप्यभूत् ॥२४४॥
भद्रां दुःखातुरीं वीक्ष्य, श्रीदेव्यूचे घृणान्विता । मा दुःखं भज हास्येन, मयाऽवादि त्वयीदृशम् ॥२४५॥
सोमचन्द्रस्ततो मृत्वा, त्वमभूर्मङ्गलो नृपः । श्रीदेव्यपि तव प्राण-वल्लभाऽजनि पूर्ववत् ॥ २४६ ॥
पूर्वकर्माभिलापेन, त्वत्पत्नी लक्ष्मवत्यभूत् । सुकृतं दुष्कृतं भद्र ! भुज्यते स्वयमेव तत् ॥ २४७ ॥
जयसिंहगुरोरेवं, श्रुत्वा प्राच्यं भवं निजम् । महादेव्या समं सौध-मगाद्विमलवासनः ॥ २४८ ॥
ततः प्रभृति भूपालो, दानधर्मपरायणः । अर्जयन्सुकृताद्वैतं, द्वादशव्रतपालकः ॥ २४९ ॥
क्रमात् पुत्रे निजं राज्यं, निवेश्य क्षितिवासवः । गतिं शिवां सदेवीको, महानन्दमयीं ययौ ॥ २५० ॥
उपतिष्ठति दातारं, दानं दत्तं परैरपि । स्वस्य दत्तस्य दानस्य, किं पुनर्वर्ण्यते फलम् ? ॥ २५१ ॥
प्रायः शुद्धैस्त्रिविधविधिना, प्राशुकैरेषणीयैः, कल्पप्रायैः स्वयमुपहितैर्वस्तुभिः पानकाद्यैः ॥
काले प्राप्तान् सदनमसकृच्छ्रद्धया साधुवर्गान्, धन्याः केचित् परभवहिता हन्त ! सन्मानयन्ति ॥२५२॥



For Private and Personal Use Only

अशनमखिलं खाद्यं स्वाद्यं, भवेदथ पानकम्, यतिजनहितं वस्त्रं पात्रं, सकम्बलप्रोञ्छनम् ॥
वसतिफलकप्रख्यं मुख्यं, चरित्रविवर्धनम्, निजकमनसः प्रीत्याधायि, प्रदेयमुपासकैः ॥ २५३ ॥

इति मङ्गलकलशस्य दानकथानकं प्रथमम् ।

पर्वतानां यथा मेरुः, यथेन्द्रः स्वर्गवासिनाम् । सर्वेषामपि धर्माणां, तथा दानमनुत्तरम् ॥ २५४ ॥
अथोवाच महीपालः, सुव्रतो मुनिसुव्रतम् । भगवन् ! वः प्रसादेन, दानधर्मकथा श्रुता ॥ २५५ ॥
इदानीं शीलमाहात्म्यं, श्रोतुमस्मि समुत्सुकः । युष्मद्देशनया नाथ ! किं तृप्यन्ति मनीषिणः ? ॥२५६॥
उक्त्वा दानस्य माहात्म्यं, माहात्म्यानां महानिधिः । शीलव्याख्यामथाऽऽरेभे, भगवान् मुनिसुव्रतः ॥२५७॥
अहार्यं भूषणं शीलं, शीलं मूलं शिवश्रियः । सुभद्रेवाऽथ संसेव्यं, शासनोन्नतिकारणम् ॥ २५८ ॥
(तथाहि—)
वसन्तपुरनामाऽस्ति, वसन्तसदृशं पुरम् । अशोका नागरा यत्र, दानवल्लीफलाऽऽश्रया ॥ २५९ ॥
जितशत्रुनृपस्तत्र, बिभ्राणः पाणिपङ्कजम् । सिन्दूरपूरवैरीभ-कुम्भस्पर्शादिवाऽरुणम् ॥ २६० ॥
तत्र श्रेष्ठमनाः श्रेष्ठी, प्रेष्ठवाङ् शुभकर्मणि । जिनदत्ताऽऽभिधो धीरो, महेभ्यः परमार्हतः ॥ २६१ ॥
बालत्वादपि विज्ञात-धर्मकर्मा कलावती । धीमती विनयवती, सुभद्रानाम तत्सुता ॥ २६२ ॥
हरन्ती जनचेतांसि, पुण्यलावण्यवीचिभिः । सा क्रमाद्यौवनं प्राप, कलावल्लीव जङ्गमा ॥ २६३ ॥
इतश्चम्पापुरीप्राप्त-स्तरुणः कोऽपि सार्थपः । जिनदत्तेन तस्याऽभूत्, मैत्र्यं व्यवहृतेः क्वचित् ॥२६४॥

नवमो भवः

जिनदेशनायां शीलधर्मे सुभद्रासती-कथानकम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्येद्युर्भोजनं कर्तुं, सस्नेहं स निमन्त्रितः । आगतो मन्दिरेऽद्राक्षीत्, सुभद्रां नेत्रवागुराम् ॥२६५॥
किमु देवी दिवः प्राप्ता ?, किमु वा नागकन्यका ? । किमु वा ब्रह्मणः सृष्टे-र्लेखा मूर्तिमती भुवि ॥२६६॥
इन्द्रियेषु यथा दृष्टिः, सुमनस्स्विव मालती । पतिव्रतासु सीतेव, नदीष्विव सुरापगा ॥ २६७ ॥
वीणेव सर्ववाद्येषु, गोषु गौरिव कामधुक् । सर्वधातुष्विव स्वर्णं, तथा स्त्रीषु पराऽसकौ ॥ २६८ ॥ [युग्मम्]
यदीयं प्राप्यते बाला, पन्थाः सुकृतसत्कृतेः । तदाहं कामिषु श्रेष्ठो, भवेयं भववर्त्मनि ॥ २६९ ॥
प्रमोदस्य कुलाऽऽगारं, वेलेव स्मरवारिधेः । पद्वीव विलासस्य, कृतेयं विधिना नवा ॥ २७० ॥
विमृश्येति विधायाऽथ, भोजनं जनलज्जया । श्रेष्ठिपुत्रीमयाचिष्ट, परकीयमुखेन सः ॥ २७१ ॥
श्रेष्ठी प्रोवाच वैशिष्ट्यं, कन्या परधनं यतः । कृपणर्द्धिरिवाऽवश्यं, परार्थे परिपाल्यते ॥ २७२ ॥
परं मम कुले देवो, जिनेशः पर्युपास्यते । गतदम्भा निरारम्भा, गुरवोऽचित्तभिक्षवः ॥ २७३ ॥
अमुष्याऽपि कुलदेवः, सुगतः सेव्यतेतराम् । आराध्यन्ते गुरोर्बुद्ध्या, भिक्षवो रक्तचीवराः ॥ २७४ ॥
समानकुलशीलानां, शस्यो वैवाहिकक्षणः । अन्यथा नरनारीणां, काचपिच्यं पदे पदे ॥ २७५ ॥
श्रुत्वेति श्रेष्ठिनो वाक्यं, तेनोक्तं सार्थशालिनः । सविलक्षो बभूवाऽथ, सिद्धेऽर्थे वर्द्धते हि मुत् ॥२७६॥
सल्लकीमिव मत्तेभः, सत्क्रियामिव संयमी । योगीव निर्वृतिं स्मेर-मालतीमिव षट्पदः ॥ २७७ ॥
जयलक्ष्मीमिव क्ष्मापः, श्रीपतिः कमलामिव । सुभद्रां हृदये ध्यायन्, हृदयानन्ददायिनीम् ॥२७८॥
जपन्निव महाविद्यां, सुधामास्वादयन्निव । प्रत्यहं हृदि बिभ्राणः, सुमनो मालिकामिव ॥ २७९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चम्पां प्राप्तोऽथ दम्भेन, श्रमणोपासकोऽजनि। रागार्थे रागिणः किं न ?, वितन्वन्ति स्वसिद्धये ॥२८०॥
॥ चतुर्भिः कलापकम् ॥
वन्दना-पूजनाऽऽद्येषु, कृत्यकृत्येषु कोविदः । गुणसङ्क्रामिको नैस-र्गिकान्नरो विशिष्यते ॥ २८१ ॥
सर्वत्र ख्यातकीर्तिः स, बभूव श्रावकत्वतः । वाहीकोऽपि हि कर्पूर-वाहकः शस्यते न किम् ? ॥२८२॥
वाणिज्यव्यपदेशेन, सुभद्रा-रूपमोहितः । भूयश्चम्पामसौ प्राप्तः, स्थितश्च श्रेष्ठिनोऽन्तिके ॥ २८३ ॥
श्रेष्ठिना जिनदत्तेन, भुक्तयेऽसौ निमन्त्रितः । अर्थं साधयतोऽमुष्य, कालक्षेपोऽभवद्बहुः ॥ २८४ ॥
निष्पन्ना रसवतीयं, गृह्यतां श्रेष्ठमासनम् । इत्युक्तः श्रेष्ठिना चम्पा-धिवासीदमुदालपत् ॥ २८५ ॥
दिने दिने जनैरन्नं, प्राप्यते न जिनार्चना। जिनार्चारहितो घस्रो, घस्मरः शिवशर्मणाम् ॥ २८६ ॥
कल्पद्रुरिव वृक्षेषु, गुणेष्विव विवेकिता । ग्रहेष्विव दिवानाथो, ब्रह्मचर्यं व्रतेष्विव ॥ २८७ ॥
धर्मेष्विव दयाधर्मो, यथा विद्यासु लक्षणम् । सारा श्रावकधर्मेषु, देवपूजा विवेकिनाम् ॥ २८८ ॥ [युग्मम्]
उक्त्वेति विहितस्नानो, गृहे बिम्बमपूजयत् । अगाद्देवालये तीर्थ-नाथं पूजितवानपि ॥ २८९ ॥
तत्र त्रिदशकोपेतं, स चक्रे जिनवन्दनम् । श्रेष्ठिनो जिनदत्तस्य, मनः कुर्वन् प्रमोदभाक् ॥ २९० ॥
ननाम सुगुरोः पादौ, सिद्धान्तस्य गरीयसः । पृच्छतस्तु रहस्यानि, न श्रुतान्यमुना क्वचित् ॥ २९१ ॥
वेश्मन्युपागतः सैष साधुना व्याहृतश्च यत् । तदनुभुक्तविशिष्टान्नं, प्रत्याख्यानश्चकार च ॥ २९२ ॥
क्रियां तस्य विलोक्यैनां, जिनदत्तोऽवदत्सुधीः । कदेदृक् तीर्थकृद्धर्म्मः, सम्पन्नो जात्यरत्नवत् ॥२९३॥



For Private and Personal Use Only

सोऽप्यूचे कर्मणां पूरे, दूरीभूते कथञ्चन । ममार्हद्धर्मलाभोऽभूत्, पुरीं चम्पामुपेयुषः ॥ २९४ ॥
येऽभूवन्नर्भतः श्राद्धा-स्ते प्रशस्या भवादृशाः । मम मिथ्यादृशो भद्र!, गतः कालः कियानपि ॥२९५॥
तद्दिनक्षतिरस्माकं, कथं पूर्णीभविष्यति ? । गतं शुभमते! क्वापि, न पुनः प्राप्यते वयः ॥ २९६ ॥
अहर्दिवममुं दृष्ट्वा, जिनधर्मपरायणम् । तद्गुणैः रञ्जितः श्रेष्ठी, हिङ्गुलैरिव भाजनम् ॥ २९७ ॥
कथश्चित्तेन न ज्ञातं, श्राद्धत्वं छद्मनाऽन्वितम् । सुप्रयुक्तस्य दम्भस्य, ब्रह्माप्यन्तं न गच्छति ॥२९८॥
स श्रेष्ठिनोपरोधेन, सुभद्रां परिणायितः । द्रव्यव्ययैर्यथायोगं, महद्भिर्भक्तिभाषणैः ॥ २९९ ॥
दम्भादपि कृतो धर्मो, भवेदीहितसिद्धये । अनिच्छयापि सम्भुक्ता, मोदकाः किं न तृप्तये ? ॥३००॥
क्रमशस्तमनुज्ञाप्य, परिपूर्णमनोरथम् । समं सुभद्रया भद्रां, प्राप चम्पापुरीमसौ ॥ ३०१ ॥
सिषेवे श्वशुरं भक्त्या, सुभद्रा भद्रचेतसा । वात्सल्यविनयाद्यैश्च, श्वश्रूश्च भारतीमिव ॥ ३०२ ॥
कलहेऽपि खरं वाक्यं, नाऽवादीत्कोपिताऽपि हि । साम्यवाक्यरसार्द्रायाः, कुतो निष्ठुरतोदयः? ॥३०३॥
तथापि श्वश्रूवर्गस्य, न प्रिया जिनधर्मतः । परं तदीयशीलेना-ऽऽवर्जितं निखिलं पुरम् ॥ ३०४ ॥
यतः—धवलीकुरुते विश्व-मिन्दुः सुन्दरधामभिः । कलङ्कमात्मनो हर्तुं, नालं सद्वृत्तवानपि ॥ ३०५ ॥
अयासीद्यदसौ जैन-मन्दिरेऽर्हन्नमस्यया । यदवन्दत गुरून् गत्वो-पाश्रये श्रेष्ठिनः सुता ॥ ३०६ ॥
तेनाऽप्रनष्टशल्येन, पीडऽऽक्रान्त इवाऽभितः । हृदये बौद्धभक्तत्वा-न्ननान्द्रादिरखिद्यत ॥ ३०७ ॥
पत्युर्धर्म्मे महारम्भाः, पत्युः कर्मणि कर्मठाः । प्रियाकृताः प्रिये पत्युर्भवन्ति हि पतिव्रताः ॥ ३०८ ॥

नवमो भवः

जिनदेशनायां शीलधर्मे सुभद्रासती-कथानकम्

भ्रमरीव भ्रमन्तीयं, चैत्यादिष्वम्बुजेष्विव । सुभद्रा श्लोककिञ्जल्कं, धत्ते पक्षद्वयानुगम् ॥ ३०९ ॥
अलीकैर्वचनैरेवं, पत्युर्नो तार्यते मनः । सुभद्राशीलमाहात्म्यं, जानात्येष विचक्षणः ॥ ३१० ॥
अन्येद्युः कोऽपि निष्कोपो, मलाविलकलेवरः । देहेऽप्यप्रतिकर्माद्यै-र्विहरन्मुनिरापयौ ॥ ३११ ॥
तं दृष्ट्वा न्यगदच्छ्वश्रू-र्वत्से ! दानं मुनेर्दिश । महासत्त्वः समायातो, भवत्पुण्यैर्भवद्गुरुः ॥ ३१२ ॥
इत्यादेशात् सुभद्राऽपि, प्रमोदोन्मादमासदत् । हास्येनाऽप्यमुया दत्त, आदेशः प्रतिलाभने ॥३१३॥
तृणं चक्षुर्गतं साधो-स्तस्याऽपश्यदुपासिका । येन निष्प्रतिकर्मत्व-कूपकुल्या प्रकाश्यते ॥ ३१४ ॥
अमुष्मै ददती दानं, हरती चक्षुषस्तृणम् । रसज्ञाऽग्रेण दक्षत्वात्, महत्पुण्यमुपार्जयत् ॥ ३१५ ॥
अस्याः भालस्थलोद्भिन्न-कुङ्कुमस्तबको मुनेः । मूर्तिमानिव तद्भावो, ललाटे प्रतिबिम्बितः ॥ ३१६ ॥
प्रतिबिम्बममुष्योच्चै-र्दृष्ट्वा श्वश्रूजनोऽखिलम् । चक्रे कलकलाराव-महो ! वध्वाः सतीव्रतम् ॥ ३१७ ॥
अपि साधुं कृशक्षीण-शरीरं स्मरघस्मरम् । आलिलिङ्ग कुरङ्गाक्षी, स्मराऽऽज्ञा किल दुर्जया ॥३१८॥
सस्वजे साधुमप्येषाऽ-स्मत् समक्षं मृगेक्षणा । विकारमूलागारेषु, गणना काऽस्ति रागिषु ? ॥३१९॥
पुत्र ! वीक्ष स्वकान्ताया-श्चेष्टितं दोषवेष्टितम् । प्रत्यायतोऽस्य विश्रान्त-ममुया दम्भवेलया ॥ ३२० ॥
भूयो भूयो भण्यमान-स्तस्यां रागोज्झितोऽजनि । अत्याऽऽकृष्टं हि बुद्ध्याऽपि, त्रुटत्येवेति सत्यगीः ३२१॥
अमुष्या निन्दनात्कष्टं किञ्चिन्नाऽजनि पूर्वतः । शीलमालिन्यदानात्त-दुःसहं हृदि वर्तते ॥ ३२२ ॥
यदभूच्छासने जैने, गर्हा दुर्गतिकारणम् । तत्राऽहं हेतुरत्यन्तं, धिग्धिग् जन्म मृगीदृशाम् ॥ ३२३ ॥

नवमो भवः

जिनजेशनायां शीलधर्मे सुभद्रासती-कथानकम्



For Private and Personal Use Only

जिनशासनमालिन्यात्, सम्यक्त्वं हि दूष्यते । अभावे दर्शनस्यापि, गतो धर्मो जिनोदितः ॥ ३२४ ॥
ध्यात्वेति विहितस्नाना, प्रत्याख्यानपरायणा । स्मृत्वा पञ्चनमस्कार-मुवाचेति सुकोमलम् ॥ ३२५ ॥
यदि मे शीलमालिन्यं, नास्ति शासनशासिके ! । ततः कुरुष्व साहाय्यं, विदधीथाः प्रभावनाम् ॥३२६॥
मया मुदा दृशाऽप्यन्यो, यदि दृष्टोऽस्ति पूरुषः । तदान्ध्यं चक्षुषोर्भूया-न्निग्राह्यो दोषकृद्धठात् ॥३२७॥
जिनशासनमालिन्यं, भवत्यैव विनिर्मितम् । भृत्यापराधेऽपि विभु-र्दण्ड्यते सत्यगीरिति ॥३२८॥
उक्त्वेति सोत्का तीर्थेश-शासनस्य समुन्नतौ । कायोत्सर्गं ददौ नक्तं, निश्चलाङ्गी शिला यथा ॥ ३२९ ॥
शासनस्वामिनी जज्ञे, प्रत्यक्षाऽऽक्षिप्तमानसा । धन्याऽसि कृतकृत्याऽसि, शुद्धशीलव्रताऽसि हि ॥३३०॥
सफलाऽस्मि सुभद्रेऽहं, त्वन्मुखाम्भोजवीक्षणात् । महासती सरिदिव, कालुष्यं हि व्यपोहति ॥३३१॥
सुरेश्वराः किङ्करास्ते, शीलवत्याः पुरस्सरम् । अस्मादृशी वराकी का, त्वत्पदाम्भोजहंसिका ॥ ३३२ ॥
परं तव प्रसादो मे, सुमहान्समजायत । यदहं पतिमात्रेव, स्मृता साध्वीमतल्लिके ! ॥ ३३३ ॥
तव शीलस्य माहात्म्यं, स्फुटीकर्ताऽस्मि निश्चितम् । प्रातः प्रतोलीद्वाराणां, नैवोद्घाटो भविष्यति ॥३३४॥
ततः क्षोभकरं पुर्यां, गदिष्यामि नभोऽङ्गणे । इति तारेण नादेन, सती गृह्णाति चालिनीम् ॥ ३३५ ॥
तस्यां क्षिप्त्वा जलं रथ्या-स्त्रिराछोटयतां सती । ततो भवति हे पौराः !, कपाटोद्घाटनं पुरः ॥ ३३६ ॥
अभिषिक्ते त्वया साध्वि !, कपाटोद्घाटनं स्फुटम् । तमोग्रस्तस्य लोकस्य, नोद्योतो हि रविं विना ॥३३७॥
ततस्ते शीलमालिन्यं, गमिष्यति पतिव्रते ! । ध्रुवा प्रभावना जैनी, निदानं शिवसम्पदाम् ॥ ३३८ ॥





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





उक्त्वेति देवता दूर-मगाद्गगनवर्त्मनि । अपारयत्सुभद्राऽथ, कायोत्सर्गं यथाविधि ॥ ३३९ ॥
इतः प्रभातकालोऽभूद्गलिता निखिला निशा । आस्फालितानि तूर्याणि, गम्भीराणि सुरौकसि ॥३४०॥
मुहुरुद्धाट्यमानानि, रथ्याद्वाराणि सर्वतः । विघटन्ति क्वचिन्नाऽपि, दैवी शक्तिर्बलीयसी ॥ ३४१ ॥
गृहान्मुक्तैः पशुव्रातैः, रथ्या पूर्णा पदे पदे । भाङ्कारैः पूरितं रोदः, सरित्पूरैरिवाम्बुधिः ॥ ३४२ ॥
प्रवेशनिर्गमौ रुद्धौ, जातः कलकलो महान् । समभून्नृपतिर्भीतः, सर्वतुल्यं महाभयम् ॥ ३४३ ॥
धौतधारैः कुठारैस्तै-स्ताड्यमानानि कोटीशः । न स्फुटन्ति स्म विशेषाद्, द्वाराणि निखिलान्यपि ॥३४४॥
ततः समाकुलीभूतो, ह्यभूद्धात्रीश्वरोऽद्भुतम् । आययौ पादचारेण, भीतिविभ्रान्तमानसः ॥ ३४५ ॥
इतो नभसि देवी वा-गुच्चचार स्फुटाक्षरम् । वन्ध्यप्रयत्नं मा मूढाः!, कुरुताऽऽत्मानमुच्चकैः ॥ ३४६ ॥
मनसाऽपि हि न ध्यात, आजन्मनः परः पुमान् । सा धारयतु चालिन्यां, जलं शीलमिवोज्ज्वलम् ॥३४७॥
अभिषिक्ते जलेनोच्चैः, रथ्याद्वारविघट्टनम् । भविता नाऽन्यथा दत्त-मुद्रेव त्रिदिवौकसा ॥ ३४८ ॥
अथ तुल्या महासत्यो, निज एव गृहस्थिताः । परीक्षायै स्वशीलस्य, चालिन्यां चिक्षिपुर्जलम् ॥३४९॥
चालिनीभ्योऽगलन्नीरं, तासां शीलमिवाऽर्जितम् । यावन्त्यः कुटवाहिन्यः, किं तावन्त्योऽम्बुवाहिकाः ॥३५०॥
अथ प्रोचे सुभद्रा स्व-पत्युरग्रे पतिव्रता । यद्याऽऽदिशसि नाथाऽम्बु, तच्चालिन्यां क्षिपाम्यहम् ॥३५१॥
हसन्नुवाच सार्थेशः, कुरु शीलपरीक्षणम् । भवत्येव सतीचूडा-मणिस्त्रिभुवनेष्वपि ॥ ३५२ ॥
ननान्दृषु हसन्तीषु, सुभद्राऽधत्त चालिनीम् । तस्यां चिक्षेप नीरं च, तदभूच्छीलवत् स्थिरम् ॥३५३॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद् दृष्ट्वा प्रमदोत्फुल्लः, प्रेयानजनि पूर्ववत् । नाश्चर्यं जलसम्पर्कान्, मालिन्यमपगच्छति ॥ ३५४ ॥
ततः श्वश्रूजनोपेता, नान्दिकरनिनादयुग् । चालिन्यां निहितक्षीरा, पूर्वद्वारं सती ययौ ॥ ३५५ ॥
आच्छोटयत्कपाटे सा, तज्जलेन त्रिधा सती । ततः कपाटमोक्षोऽभूत्, मोक्षः शीलात् करस्थितः ॥३५६॥
दाक्षिणात्यमथ द्वारं, पश्चिमात्यश्च सा सती । उद्घाट्य सर्वप्रत्यक्षं, प्रोवाचोच्चकरद्वया ॥ ३५७ ॥
महसरिसा इच्छज्जा, जा होइ महासई सुशीलधरा । चालणिसंठियउदया, उग्घाडउ सा इमं पोलिम् ॥३५८॥
इयतीए अणुग्घाडिय, उत्तरदिसिदारमज्जवि ताहेव । संमिलियं चिय चिट्ठइ, तारिसगुवयारमलहन्तम् ॥३५९॥
श्वश्रूननान्द्रप्रमुखः, सुभद्रां प्राऽणमज्जनः । तदीयशीलमाहात्म्य-भारनम्रशिरोधरः ॥ ३६० ॥
अथोवाच महीनाथः, सत्यं रत्नप्रसूः क्षितिः । अन्यथा रत्नतुल्याया, एतस्याः सम्भवः कथम् ? ॥३६१॥
जिनशासनमाकन्द-मञ्जरीयं महासती । मृतसञ्जीवनी पुर्याः, कीर्तिगङ्गाहिमाचला ॥ ३६२ ॥
स्तुत्वेति भूपतिः साध्वीं, विमुच्य च गृहे स्वयम् । सन्मान्याऽथ सुभद्राश्च, राजा स्वाऽऽवासमीयिवान् ॥३६३॥
तस्याः प्रभावमालोक्या-ऽद्भुतं श्वश्रूजनोऽखिलः । निन्दन्नात्मानमेवार्ह-द्धर्मं बुद्ध्या प्रपेदिवान् ॥३६४॥
क्रमादायुःक्षये जाते, सम्यक्सम्यक्त्वधारिणी । देवभूयं ययौ पश्चा-ल्लप्स्यते प्रथमं पदम् ॥ ३६५ ॥
शीलं कीर्तिसितातपत्र-कलशः शीलं श्रियः कार्मणं, शीलं भावपयोधिशीतकिरणः शीलं गुणानां निधिः ।
शीलं निर्वृतिकाननैकदलिका शीलं खनिः श्रेयसां, शीलं सत्यलतावसन्तसमयः शीलं सुभद्राकृतम् ॥३६६॥

इति सुभद्रामहासती-शीलकथानकं द्वितीयम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शीलेन रक्षितो जन्तु-र्न केनाऽप्यभिभूयते । महाह्रदनिमग्नस्य, किं करोति दवानलः ? ॥ ३६७ ॥
कर्मभिच्छर्ममर्माली-कुल्याकूलङ्कषं तपः । सर्वार्थसाधकं धाम, तेजसां दुःखबाधकम् ॥ ३६८ ॥
तावद्गर्जति कर्मेभो, विभयो भुवनोदरे । यावच्चित्तगुहाऽध्यासी, तपःसिंहो न खेलति ॥ ३६९ ॥
अस्माभिरपि यच्चक्रे, प्रव्रज्याज्ञानमुक्तिषु । माहात्म्यं तपसस्तस्य, स्तुतिवाचामगोचरम् ॥ ३७० ॥
सुमतिस्त्वेकभक्तेन, चतुर्थाद्वसुपूज्यभूः । अष्टमेन पार्श्वमल्ली, शेषाः षष्ठात्प्रवव्रजुः ॥ ३७१ ॥
अष्टमात् केवलं प्रापुः, श्रीपार्श्वर्षभमल्लयः । वासुपूज्यश्चतुर्थेन, शेषाः षष्ठेन तीर्थपाः ॥ ३७२ ॥
उपवासैः शिवं षड्भि-रगान्नाभिभवो जिनः । द्वाभ्यां वीरोऽपरे मास-क्षपणेन क्षमाभृतः ॥३७३॥
तन्न सिध्यति यन्नास्ति, तपोमाहात्म्यतोऽङ्गिनाम् । यथाऽघटकुमारस्य, राज्यलाभः पुराऽजनि ॥३७४॥
तथाहि भारते क्षेत्रेऽ-वन्तिदेशस्य मण्डनम् । श्रीविशाला विशालाख्या, नगरी मुत्करी दृशाम् ॥३७५॥
अभूत्सुघटितस्तत्र, भूपालः सबलो रिपौ । प्रेमभूः प्रेयसी तस्य, नाम्ना मदनमञ्जरी ॥ ३७६ ॥
सुतो विक्रमसिंहोऽस्य, विक्रमैककथागुरुः । तनया विनयाऽऽवासा, सञ्ज्ञया रत्नसुन्दरी ॥३७७॥
प्रश्नलग्नप्रमाणेन, कालत्रितयवेदकः । अधीतज्योतिषस्तस्य, ज्ञानगर्भः पुरोहितः ॥ ३७८ ॥
आस्थानीमास्थितोऽन्येद्यु-र्भूपतिः स्वःपतिः श्रिया । तत्राऽऽगाज्ज्ञानगर्भोऽपि, शिष्यवर्गैः परावृतः ॥३७९॥
इतश्च किङ्करः कश्चि-दोकसोऽभ्येत्य किञ्चन । आख्याय ज्ञानगर्भस्य, निवृत्तस्तैरपि क्रमैः ॥३८०॥
तच्छ्रुत्वा विस्मितस्वान्तः, स चक्रे नखवादनम् । धुनोति स्म शिरो मन्दं, ज्ञातुं गोपायते ह्रिकः ? ॥३८१॥

अथाऽभ्यधान्महीपाल-स्तं दृष्ट्वा विस्मिताऽऽननम् । ज्ञानगर्भ ! कथं हृष्टो, विप्रकृष्टार्थवेदक ! ॥३८२॥
इत्युक्ते भूभुजाऽवादी-त्स न किञ्चन मौनिवत् । बुद्धिपूर्वं हि भाषन्ते, विचार्य किल तादृशाः ॥३८३॥
अन्वत्रग् ज्ञानगर्भोऽथ, मा पृच्छ क्षितिवल्लभ ! । ज्ञाते सति तवाऽशर्म, भविता भवनोत्तम ! ॥३८४॥
अशर्म शर्म वा भूयात्, परं ज्ञेयं मनीषिणा । उपायः शक्यते कर्तु-मनुकूले विधातरि ॥ ३८५ ॥
इत्युक्ते भूभृताऽवादी-देष ज्ञानमहोदधिः । देव ! मे किङ्करी धाम्नि, गृहकर्म्मणि कर्मठा ॥ ३८६ ॥
वर्तमाने शुभे लग्ने, परमोच्चग्रहान्विते । इदानीं सा प्रसूते स्म, नन्दनं स्पन्दनं श्रियाम् ॥ ३८७ ॥
इत्युक्त्वा विरते तस्मि-न्नभाणीज्जगतीपतिः । एतन्मात्रे शिरःकम्पो, घटाकोटिमुपैति न ॥ ३८८ ॥
गोप्यं गोपयसे विद्वन् ! भाष्यं नो भाषसे कथम् ? । वार्तारसः परां कोटि-मुपैति कथमन्यथा ? ॥३८९॥
अथोच्छ्वस्य स निःश्वस्य, ज्ञान्यभाषिष्ट ते पदे । असौ भूमिपतिर्भावी, वीरूपमजिधातुवत् ॥ ३९० ॥
श्रुत्वेति नरदेवोऽथ, विसृज्याऽऽस्थानमात्मनः । शून्यस्वान्तो गतो धाम्नि, मुषिताऽशेषवित्तवत् ॥३९१॥
पुरोहितोऽपि तं बालं, प्रेक्ष्यं गत्वा व्यलोकयत् । निष्प्रभावोऽभवद्दीपो, भूपवद्यस्य तेजसा ॥ ३९२ ॥
द्वात्रिंशल्लक्षणाधारं, तं वीक्ष्याऽऽनन्ददं दृशाम् । भावी राज्येऽप्ययं बालः, कालः सुघटितेशितुः ॥३९३॥
इतः सुघटितश्चित्ते, ध्यातवानिति दुःखितः । अविसंवादिवाक्योऽयं, रात्रिस्वप्नोपदेशवत् ॥ ३९४ ॥
अयं बालः कथङ्कारं, मम राज्यं ग्रहीष्यति ? । यन्नास्ति चात्र संसारे, श्रूयते दृश्यते न तत् ॥ ३९५ ॥
निमज्जति दलं वार्द्धौ, शिला तरति पत्रवत् । कक्षे ज्वलति नो वह्नि-र्ग्रन्थौ वातो न बध्यते ॥ ३९६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इति बालो न मोच्योऽयं, विधाय करुणां मया । उत्तिष्ठमानो विद्वेषी, नोपेक्ष्यः पथ्यमिच्छता ॥३९७॥
ध्यात्वेति श्रीविशालेशः, प्रैषीन्नरयुगं निशि । राज्यलोभाऽभिभूतानां, तरुणी करुणा कथम् ? ॥३९८॥
गत्वा पौरोहिते धाम्नि, प्रसुप्तं मन्दचारतः । बालं जगृहतुः छन्नं, दासीजीवमिवाऽपरम् ॥ ३९९ ॥
विनिर्गत्य विशालाया, जीर्णोद्याने गताविमौ । एनं निरीक्ष्य सत्कान्तिं, ध्यायेते स्मेति मानसे ॥४००॥
गतं बहुतरं चाऽऽयुः, कालः खेलति सन्निधौ । विधृता सुचिरं सेवा, दुष्पूरोदरपूर्त्तये ॥ ४०१ ॥
राज्यलुब्धः क्षितेरीशो, मारयत्येनमुत्सुकः । आवयोः केवलं पापं, कर्तुः कारयतोऽथवा ॥ ४०२ ॥
स्वयमेव वने त्यक्तो, गतासुर्भविता ह्यसौ । मीनो जालगतो दीनः, किमु प्राणति कुत्रचित् ॥४०३॥
आवां तावत्कथं जातौ, जातौ चेन्न मृतौ कथं ? । यदीदृशी क्रियाऽऽवाभ्यां, चक्रे बालाऽपहारिणी ॥४०४॥
केवलं कवलायोच्चै-रावाभ्यां दुष्कृतं कृतम् । सुकृतं दूरतो मुक्तं, न्यक्कृतं निर्मलं कुलम् ॥ ४०५ ॥
ध्यात्वेति स वने मुक्तो, बालः कोमलदोर्लतः । एतौ जगदतुर्गत्वा, नृपं निष्कृपया गिरा ॥ ४०६ ॥
तच्छ्रुत्वा वचनं राजा, जहर्षाऽऽनन्दहर्षभाक् । आभ्यां तु स ददौ वस्त्र-ताम्बूलादि यथोचितम् ॥४०७॥
अथैषा कर्मकृत्पार्श्वे, न निरैक्षिष्ट नन्दनम् । मुष्टा मुष्टेति जल्पन्ती, चक्रन्द कुररी यथा ॥ ४०८ ॥
किमपुण्यवतां गेहे, सद्रत्नमिव तिष्ठति । न ह्यूखरक्षितिक्षिप्तं, सुबीजमधिरोहति ॥ ४०९ ॥
अजातनन्दना रामा, वरं न हृतपुत्रकाः । वरं जात्यन्धता पुंसां, पश्चादान्ध्यं वरं नहि ॥ ४१० ॥
कस्यचिद्धनिनो रत्नं, यन्मया पूर्वजन्मनि । अपजहेतरां तस्य, परिपाकः प्रसर्प्पति ॥ ४११ ॥



For Private and Personal Use Only

विलापमिति कुर्वाणा, चेटी राज्ञः पुरोधसा । न्यवार्यततरां पुत्री !, मा रोदीस्त्वमदीनगीः ॥ ४१२ ॥
तव पुत्रः क्षितेः पालो, भविताऽत्र विनिश्चितम् । यद्भाव्यं तद्भवत्येव, दैवात् कोऽपि बली नहि ॥४१३॥
इति तेनोदितं श्रुत्वा, सा चक्रे नितरां मुदम् । आशया जीव्यते हन्त !, न तु पश्चाशतात् (?) क्वचित् ॥४१४॥
इति विभातकालोऽभूत्, ध्वान्तप्रस्थानडिण्डिमः । अगादितो वरोद्यानं, सप्रियः प्रातिहारकः ॥४१५॥
प्रारब्धरवरोलम्बं, मञ्जरीपिञ्जरान्तरम् । प्रेक्ष्य रामा वराऽऽरामं, जगाद दयितं प्रति ॥ ४१६ ॥
प्रिय ! प्रेमदशोद्यानं, निरीक्षस्व प्रियङ्करम् । शुष्कः पुराऽयमारामः, साम्प्रतं शाड्वलः कथम् ? ॥ ४१७ ॥
अथोचे मालिको जाये !, सहकारतरोरधः । विमुक्तं केनचिद्बालं, पश्यै तस्मात् पुराद्वनम् ॥ ४१८ ॥
पुष्पलावी करक्रोडे, तं चकार निधानवत् । ततः प्रश्नविनी साऽभू-द्भाग्यैर्भवति किं न वा ? ॥ ४१९ ॥
स्तन्यं स पायितो बालः, कोमलालापपेशलम् । छन्नं नीतो गृहे स्वीये, सुवर्णपुरुषो यथा ॥ ४२० ॥
गूढगर्भा मम प्राण-वल्लभेह शुभेऽहनि । प्रसूता दारकं कान्त-मिति लोके न्यगद्यते ॥ ४२१ ॥
सापायायां तमस्विन्या-मेकाकी बालकः कथम् ? । जीवितोऽघट इत्याख्यां, रचयांश्चकृवान् पिता ॥४२२॥
स पुपोष वपुः कान्त्या, सद्गुणैरपि भूरिभिः । चिक्रीड विविधैः क्रीडा-चक्रैर्बाल्यक्रियोचितैः ॥४२३॥
प्रातः प्रातः प्रसूनानि, प्रत्यहं प्रातिहारकः । उपदायै महीभर्तुश्चक्रे सुघटिताञ्जलिः ॥ ४२४ ॥
कटीतटे निवेश्याऽमुं, बालकं पुष्पलाविका । अन्येद्युः संसदि प्रात-रगात् पुष्पकरण्डभृत् ॥ ४२५ ॥
सभ्यानां स्मेरनेत्राणि, निपेतुस्तत्र बालके । सौन्दर्यस्यैकपात्रं हि लोभयत्येव लोचनम् ॥ ४२६ ॥

तं बालं प्रेक्ष्य स ज्ञानी, पुरेव नखवादनम् । विदधेऽथ धरानाथः, पुरेवाऽपृच्छदञ्जसा ॥ ४२७ ॥
ज्ञानगर्भ ! कथङ्कारमकार्षः नखवादनम् । भवादृशो वरज्ञानी, निष्फलं न हि चेष्टते ॥ ४२८ ॥
अथोचे ज्ञानविद्राज - स्त्वयं मालिकनन्दनः । भावी तव पदेऽवश्यं, नाऽसाध्यं भाग्यभाजिनाम् ॥४२९॥
पुरेव शून्यधी राजा, पुरेव ध्यातदुर्म्मतिः । राज्याऽपहारवार्ताभि - रपि वैरं नवीभवेत् ॥ ४३० ॥
स ताभ्यां न हतो बालो, मुक्तः कारुण्यबुद्धितः । अन्यथा कथमीदृक्षं, भाषते ज्ञानपारगः ॥ ४३१ ॥
इति दत्त्वा तयोर्भूमा - नभयं रहसि स्थितः । स्वं वृत्तान्तं यथाभूतं, पप्रच्छ प्रथिताशयः ॥ ४३२ ॥
सत्यमुक्तं ततस्ताभ्या - मथाऽसौ रञ्जितो नृपः । सत्यवादिनि रज्यन्ते, प्रतीतिं यान्ति निश्चितम् ॥४३३॥
अथाऽन्यं पुरुषं राजा, जजल्प विजने स्थितः । दृष्टोऽयं मालिनीबाल - स्त्वयाऽत्र समुपागतः ॥ ४३४ ॥
तं गृहीत्वा तमस्विन्यां, त्यजाऽऽशु विजने स्थितः । तत्कण्ठपीठनेपथ्यं, गृहीत्वाऽर्प्पय सन्मते ! ॥४३५॥
आमेत्युक्त्वा नरः सन्ध्या - समये मायया गतः । मालिकागारसामीप्यं, निभृतं निभृतक्रमः ॥ ४३६ ॥
रममाणं कुमारं तं, दिव्याऽऽभरणभासुरम् । वञ्चयित्वा दृशो नृणा - मंशे विन्यस्तवान्नरः ॥ ४३७ ॥
नागरैरप्यदृश्योऽसौ, ध्वान्तपूरे प्रसर्प्पति । बहिरुद्यानमगमत्, ततश्चन्द्रोदयोऽजनि ॥ ४३८ ॥
पञ्चेषुकेलिनाट्यस्य, नान्दी कुमुदमङ्गलम् । अध्यास्त क्षणदानाथः, प्राचीनाऽचलचूलिकाम् ॥ ४३९ ॥
उज्जीवितं चकोरीभि - र्भूयसा तमसा गतम् । नर्त्तितं च कुमुद्वत्या, प्रम्लानं कमलश्रिया ॥ ४४० ॥
इतश्च बालिशः सोऽपि, नृकूर्चकचकर्षणम् । चकार तात ! तातेति, वावदूको मुहुर्मुहुः ॥ ४४१ ॥



नवमो भवः

जिनदेशनायां
तपोधर्मे
अघटकुमार-
वृत्तान्तम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं तादृशममुं वीक्ष्य, सोऽभूत्करुणयाऽऽर्द्रितः । धिग् धिग् मां मनसा बाल-घातपातकशङ्किनम् ॥४४२॥
हन्तुं स्तनंधयममुं, न मे हस्तौ प्रसर्प्पतः । कथं गीरीदृशाऽऽदेशं, यच्छतो भूपतेरभूत् ॥ ४४३ ॥
तात ! तात ! इति प्रोक्तो, बालेनाऽहं यथातथा । एनं हन्मि कथं पापी, निर्दयानां शिरोमणिः ॥४४४॥
अस्मिन्नमारिते मे स्या-न्निधनं भूधनादिकम् । निन्द्यं तथापि नो कर्म्म, विधास्ये शर्मधर्महृत् ॥४४५॥
ध्यात्वेति भुवने मुक्तो, यक्षस्याऽथ स्तनन्धयः । तत्कण्ठाऽऽभरणं जह्रे, जीवितव्यमिवापरम् ॥४४६॥
अर्प्पयामास भूपस्य, राजबीजमिऽवास्य तम् । अचीकथच्च भूमीशं, बालिशो निशि शातितः ॥४४७॥
ततः सुघटितो राजा, तद्वीक्ष्य ध्यातवानिति । अनेन प्रत्ययेनैवा-ऽनेन बालो निपातितः ॥४४८॥
अप्रेक्ष्यमाणौ तं बालं, मालिनीमालिकावपि । निर्जीवाविव सुचिरं, तस्थतुर्गतचेतनौ ॥ ४४९ ॥
पुत्रलाभसुखं तुच्छ-मलाभे दुःखमद्भुतम् । वाहीकानां गुरुभारो, लाभस्तुच्छो हि वल्लभे ! ॥४५०॥
उभावपि विमृश्येदं, सखेदं सखिबोधितौ । दैवोपालम्भवाचालौ, गमयामासतुः समाः ॥ ४५१ ॥
अथाऽघटकुमारोऽसौ, क्रीडन् भ्राम्यंस्तदौकसि । आलिलिङ्गतरां यक्ष-प्रतिमां जनकं यथा ॥४५२॥
तात ! तातेति सञ्जल्पन्, यक्षकूर्चस्य कर्षणम् । पूर्ववद्विदधे बालः, कोमलालापमञ्जुलम् ॥ ४५३ ॥
तद्वाक्यश्रवणोत्पन्न-प्रेमरङ्गतरङ्गितः । ज्ञानेनाऽवधिनाऽज्ञासी-त्तज्जीवनमहौषधीम् ॥ ४५४ ॥
अस्मिन्नेव महोद्यान, इभ्यो देवधराभिधः । वासितोऽस्ति धनेनाढ्यः, परं पुत्रविवर्जितः ॥ ४५५ ॥
तत्रस्थो बालकोऽप्येष, भविष्यति महासुखी । धनिनां धर्म्मपुत्रोऽपि, स्वपुत्रादतिरिच्यते ॥ ४५६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







ज्ञात्वेति ज्ञानतो यक्ष-स्तमस्विन्यां घृणापरः । इत्यूचे धनिनं यक्षः, सुप्तस्तिष्ठसि किं न वा ? ॥४५७॥
ततो देवधरः प्रोचे, जाग्रदस्मि गुणानघ ! । आदेशं दिशतेदानीं, मां विजानीहि किङ्करम् ॥४५८॥
अथोवाच वचो यक्षो, यक्षं जानीहि मां गुणिन् ! । उद्यानेऽस्मिन्विकाशिद्रु-स्तोमे रम्ये रमे सदा ॥४५९॥
एतस्मिंस्त्वं ममोद्याने, स्थितोऽसि स्थितिवित्तर ! । वृक्षान्न काप्यभांक्षीस्त्व-महृष्यं हृदये भृशम् ॥४६०॥
न कदाचित्त्वया चक्रे, विनाशो मे महीरुहाम् । अहं ते तेन तुष्टोऽस्मि, न वृथा देवदर्शनम् ॥४६१॥
वरं वृणु गुणाम्भोधे !, यक्षेणेत्युदिते सति । ऊचे देवधरः स्वामिन् !, सर्वमस्ति गृहे मम ॥४६२॥
परं लक्ष्म्या ममैतस्य, प्रियायाः प्रीतिकन्दलः । नन्दनो नास्ति तेनाह-मसम्पूर्णमनोरथः ॥ ४६३ ॥
अथोचे व्यन्तरो हृष्टो, यद्येवं मम मन्दिरे । रममाणं कुमारं तं, गृहाण निजपुत्रवत् ॥ ४६४ ॥
तस्यैवाऽघट इत्याख्यां, जानीहि श्रुतिसौख्यदाम् । इत्युक्त्वा विरराामाऽथ, यक्षस्तद्वन्निशाऽपि च ॥४६५॥
इदं निशम्य सार्थेशो, हृष्टो हीष्टश्रुतादिव । अगादसौ प्रियायुक्तो, यक्षाऽऽयतनमुत्तमम् ॥ ४६६ ॥
उभाभ्यां पूजितो यक्षः, स्वर्णपुष्पैस्ततोऽष्टभिः । तदुत्सङ्गगतो दृष्टो, बालकः कोमलाऽऽननः ॥४६७॥
तत्प्रसाद इवाऽऽभ्यां स, बालकः पेशलाऽऽकृतिः । उत्पाटितः करेणापि, पुण्यराशिरिवोज्ज्वलः ॥४६८॥
तद्बालदर्शनादेतौ, हर्षभ्राजिष्णुलोचनौ । पुत्रिणां धुरि मन्येता-माऽऽत्मानं मानवर्द्धितम् ॥ ४६९ ॥
देवलोपपदे पाट-ग्रामे तावथ जग्मतुः । समभूदष्टवर्षीयः, कुमारः स्मरवद्रुचा ॥ ४७० ॥
उपाध्यायात्कलाः सर्वा, अध्यैष्टाऽध्ययनप्रियः । स्तोकैरपि दिनैः सोऽभूत्, समस्तकविकुञ्जरः ॥४७१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बालोऽप्यबालबुद्धिः स, लघुरप्यलघुक्रियः । व्यवहारेण शीलेन, गोत्रवृद्ध इवाऽजनि ॥ ४७२ ॥
आढ्यो देवधरोऽन्येद्युः, सङ्गतोऽघटसूनुना । श्रीविशालापुरीं प्राप, तदुद्याने स्थितः स्वयम् ॥४७३॥
रत्नैर्विशालमापूर्य, स्थालमाट नृपान्तिके । सन्मानितः स भूभर्त्रा, सर्वौचित्यविदो नृपाः ॥४७४॥
गते तस्मिन्निजावासे, ज्ञानविद्रहसि स्थितः । नृपाग्रे कथयामास, दृष्ट्वा तमघटं स्फुटम् ॥ ४७५ ॥
स्वामिन्निभ्यसुतश्चैष, विशालानगरीश्वरः । त्वयि जीवति सम्भावी, प्रभावी विभवी नयी ॥ ४७६ ॥
श्रुत्वेति भूपतिर्दध्यौ, सैष बालो ममाऽहितः । सदाश्चर्यचरित्रोऽयं, तेनापि हि न मारितः ॥ ४७७ ॥
एतद्रक्षापरं दैवं दैवज्ञकथका मम । द्वयोर्मध्यान्न च वेद्मि, कः केनापि विनाश्यते ? ॥ ४७८ ॥
अयं मयैव व्यापाद्यः, सद्यः प्रज्ञाप्रयोगतः । यदवश्यं विधेयं तत्, स्वयमेव विधीयते ॥ ४७९ ॥
इति ध्यात्वा स्वयं राजा, वीक्ष्यमाणच्छलं बली । दिनं निर्गमयामास, शाकिनीव दुराशयः ॥४८०॥
द्वितीये दिवसे देव-धरोप्यघटसङ्गतः । आस्थानीं भूपतेः प्राप्तो, नमश्चक्रे महीभुजे ॥ ४८१ ॥
अविहत्थमथाऽऽहत्य, सस्नेहमगदन्नृपः । महेभ्य ! तव पुत्रोऽयं, मोदकृन्मम नेत्रयोः ॥ ४८२ ॥
ददाम्यस्मै वरं देशं, प्रसादेन मनोरमम् । अथ श्रेष्ठ्यवदन्नत्वा, नैतद्युज्येत मे कुले ॥ ४८३ ॥
सदैव देव ! वणिजां, जातिर्भीतिं निषेवते । अलं प्रसाददानेन, निर्निदानेन भूपते ! ॥ ४८४ ॥
अथाऽघटोऽप्युवाचेदं, किमिदं तात ! भाषसे ? । किं चक्रिणः पिता चक्री, श्रूयते दृश्यते नु किम् ? ॥४८५॥
श्रुत्वेदं वचनं तस्य, सोत्साहं सपराक्रमम् । ददे मथुरा राज्ञा, पुरी मधुरभाषिणा ॥ ४८६ ॥

नवमो भवः

जिनदेशनायां तपोधर्मे अघटकुमार-वृत्तान्तम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





गृहीत्वा पत्तलां प्राप्तो, मथुरां नगरीमसौ । अथ श्रेष्ठ्यपि वेगेन, ग्रामं देवलपाटकम् ॥ ४८७ ॥
तद्ग्रामसम्भवो लोक-स्तद्गुणै रञ्जिताशयः । विज्ञातवृत्तस्तां प्राप, गुणैः कः को न रज्यते ? ॥ ४८८ ॥
तद्ग्रामवासिकेभ्यः स, प्रसादं प्रददौ भृशम् । औचित्याऽऽचरणं नाम, शिक्ष्यन्ते किं विचक्षणाः ? ॥४८९॥
ततः सुघटितोर्वीशो, ध्यातवानिति मानसे । अघटोऽघटपुण्यौका, विफलीकृतमत्क्रियः ॥ ४९० ॥
जितशत्रुजयायोच्चै-र्विग्रहे दक्षिणादिशि । प्रैषि विक्रमसिंहाख्यः, सजामिस्तु मया सुतः ॥४९१॥
समीपे प्रेष्यते तस्या-ऽघटः सुघटिताऽऽकृतिः । तदाऽऽदेशेन पुत्रो मे, हनिष्यत्येनमादरात् ॥४९२॥
ध्यात्वेति भूपतिर्लेख-युग्मं द्रुतमलीलिखत् । एकोऽघटकुमारस्य, विक्रमस्याऽपरो पुनः ॥४९३॥
सलेखयुगलः प्रैषि, भूभुजा लेखवाहकः । स गत्वा मथुरां लेख-मर्प्पयन्मथुरेशितुः ॥ ४९४ ॥
वाचयित्वा स लेखं तं, भक्तिवान् पृथिवीभुजि । चतुरङ्गचमूयुक्त-श्चलितो दक्षिणां प्रति ॥ ४९५ ॥
अथ विक्रमसिंहस्य, तं लेखं लेखवाहकाः । समादायाऽपरं शीघ्र-मचालीत्तत्पथं प्रति ॥ ४९६ ॥
इतश्च यक्षस्तत्पुण्य-प्रेरित इव चेतसि । बभार मानसे क्काऽस्ति, मम सूनुर्महाबलः ॥ ४९७ ॥
वीक्षामास ततश्चैनं, प्रसुप्तं लेखवाहकम् । तस्यार्थं वाचयामास, बद्धेऽपि सुरशक्तितः ॥ ४९८ ॥
विक्रमसिंह ! दद्यास्त्व-मघटस्य समागमे । विषं तालपुटं नाम, विचार्यं हि न किञ्चन ॥४९९॥
इत्यक्षराणामेतेषां, स्थाने यक्षो विलक्षधीः । दिव्यशक्त्याऽलिखदिदं, सुघटं पुण्यतोऽखिलम् ॥५००॥
कुमार्या रत्नसुन्दर्याः, पाणिग्रहमहोत्सवः । अघटेन कुमारेण, सार्द्धं कार्यो यथाविधि ॥ ५०१ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लिखित्वेति ततो यक्ष-स्तिरोऽभूद्गगनाङ्गणे। घटकस्फोटकानां तु, नालमित्यस्ति यच्छ्रुतिः ॥ ५०२ ॥
विक्रमसिंहसामीप्य-मथ प्राप्तोऽघटस्ततः । प्राप्तश्वरणचारेण, सलेखो लेखवाहकः ॥ ५०३ ॥
उत्थाय विक्रमेणाऽथ, लेखो राजप्रसादवत् । आदाय पाणिपद्माभ्यां, न्यस्तः शेषेव मस्तके ॥ ५०४ ॥
पूजितो विविधैः पुष्पै-र्वाचितः स्वयमादरात् । गुर्वागम इव ज्ञेयो, लेखो गुरुजनाऽऽगतः ॥ ५०५ ॥
लेखार्थमवगम्योच्चै-र्दृष्ट्वा सुघटिताऽऽकृतिम् । अघटञ्च मदोत्कर्षै-रभ्यपूर्यत भूभुजः ॥ ५०६ ॥
आजूहवद्वेत्रिणा स, गणकं गणकोत्तमम् । स समागत्य वेगेन, निविष्टः स्वोचिताऽऽसने ॥ ५०७ ॥
विज्ञ ! दैवज्ञ ! मज्जामेः, शुद्धिं वैवाहिकां शुभाम् । निरीक्षस्व यथाशास्त्रं, किञ्चिन्नाऽज्ञातमस्ति वः ॥५०८॥
समस्तग्रहसञ्चारं, शुद्धबुद्ध्या विचार्य सः । ऊचे शृणु महीपाल-सूनो ! मम वचो नृतम् ॥ ५०९ ॥
अद्यैव शुद्धिरेतस्या, उपयाममहोत्सवे । अन्यथा हायनाऽतीता, साऽपि नोत्सर्गिका परम् ॥ ५१० ॥
श्रुत्वेति विक्रमो दध्यौ, राजाऽऽदेशो यथार्थवान् । नरदेवा विभाषन्ते, ह्यविचार्य वचो नहि ॥५११॥
सङ्क्षेपेण दिने तस्मिन्, विवाहः समभूत्तयोः । अन्यथा चिन्तितं कार्य-मन्यथा दैवतो भवेत् ॥ ५१२ ॥
रात्रेर्जागरणादस्य, विक्रमस्य विशूचिका । वात्ययैव तया तस्यो-न्मूलितो जीवितद्रुमः ॥ ५१३ ॥
और्ध्वदेहिकमेतस्य, चकाराऽसौ सुदुःखितः । ज्ञापितश्च महीभर्ता, कथाशेषश्च विक्रमम् ॥ ५१४ ॥
लेखार्थं पुत्रमृत्युश्च, ज्ञात्वा सुघटितो नृपः । एवं पपाठ पटुधी-र्दैवोपालम्भकोविदः ॥ ५१५ ॥
अघटितघटितानि,घटयति,सुघटितघटितानि जर्जरीकुरुते। विधिरेव तानि जनयति,यानि पुमान्नैव चिन्तयति५१६

नवमो भवः

जिनदेशनायां तपोधर्मे अघटकुमार-वृत्तान्तम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







इतश्च समवासार्षी-दुद्याने केवली मुनिः। तं प्रणीतुमगादेष, आर्त्ता भक्तिपरा यतः ॥ ५१७ ॥
नत्वा केवलिनं साधुं, नरदेवो यथोचिते। आसने निषसादाऽधः तन्मुखप्रहितेक्षणः ॥ ५१८ ॥
विज्ञाय केवली साधु-स्तदाऽऽशयमसंशयम्। मुञ्च खेदं विवेकित्वं, पुषाण क्षितिवल्लभ ! ॥ ५१९ ॥
त्वया पुरा विराद्धोऽय-मघटः सम्पदां पदम्। पदं तव गृहीता स, श्रूयतां कारणं हि तत् ॥ ५२० ॥
(तथाहि—) अस्यामेव महापुर्यां, धनदो नाम वित्तवान्। स्वज्ञातिमदराजिष्णु-र्न किञ्चिदपि मन्यते ॥५२१॥
स्तोकैरपि दिनैस्तस्य, चञ्चला श्रीर्मृगीयिता। तन्मदद्वीपमीत्येव, दूरं दूरं पलायिता ॥ ५२२ ॥
न कोऽपि मन्यते तस्य, वाक्यं ग्रहिलवाक्यवत्। न तं निरीक्षते कोऽपि, गोहत्याकारकोपमम् ॥५२३॥
ततो वैराग्यमापन्नः, सम्वेगाम्भःपवित्रितः। जग्राह तीर्थकृद्दीक्षा-मसौ विशदवासनः ॥ ५२४ ॥
अभ्यसन् स द्विधा शिक्षा-मधीतश्रुतपावनः। पारणानि महासत्त्व, आवर्षाद् द्वादश व्यधात् ॥५२५॥
मलेन कलिताऽङ्गोऽयं, जीर्णशीर्णधृताऽम्बरः। तपसा क्षीणदेहोऽभूद्, दृश्यमानशिरावलिः ॥५२६॥
अन्येद्युः पारणे राजन् !, स प्रविशन् पुरीं तव। सन्मुखिनः त्वया दृष्टो, द्रष्टव्यानां शिरोमणिः ॥५२७॥
त्वया व्यामोहमूढेन, मार्गेऽपशकुनीकृतः। अथ तस्य मनःकुण्डे, क्रोधवह्निरदीप्यत ॥ ५२८ ॥
उत्तमाऽन्वयजातोऽहं, दीक्षावानुत्तमाद्गुरोः। उत्तमः सर्वसाधूना-मुत्तमव्रतधार्यहम् ॥ ५२९ ॥
कथमेतेन पापेन, कृताऽपशकुनोऽस्म्यहम् ?। तदस्य दर्शयिष्यामि, कोपद्रुममहाफलम् ॥ ५३० ॥
तपस्तप्तं मया यच्च, तत्प्रभावादसंशयम्। एतस्मिन् जीवति क्षोणी-नाथः स्यां भावि जन्मनि ॥५३१॥



For Private and Personal Use Only

बहुमूल्यतपोरत्नं, विक्रीतं काकिणीकृते। पौर्वापर्यविचाराऽर्हा, कोपान्धानां कुतो मतिः ? ॥५३२॥
जातेर्मदेन मृत्वाऽथ, जातो दासीतनूद्भवः। कुर्वन् मदादिकं प्राणी, विपरीतं तदश्नुते ॥ ५३३ ॥
इयं दासीसुतो राजं-स्तव राज्यं करिष्यते। नहि नैदानिकं कर्म, शक्यते कर्तुमन्यथा ॥ ५३४ ॥
श्रुत्वेत्यघटसम्भूतं, चरितं जगतीपतिः। नत्वा केवलिनं प्राप, पुनः स्वाऽऽवासमुत्तमम् ॥ ५३५ ॥
यद्यमुं न नृपं कुर्वे, तथापि भविता नृपः। आगतोऽभ्यागतो हन्त !, हसतां रुदतामपि ॥ ५३६ ॥
ध्यात्वेति भूपती राजा-ऽऽदेशं प्रेष्य तदा मुदा। अघटोऽथ समाहूतः, प्रभूतसुकृताऽऽदृतः ॥५३७॥
स स्वागः क्षामयामास, वासनापूतमानसः। विज्ञातजिनधर्माणां, क्षामणा मूलसाधनम् ॥ ५३८ ॥
तस्मै राज्यं ददौ स्वागः, प्रायश्चित्तविशुद्धये। राजाऽपि जगृहे दीक्षां, केवलज्ञानिनोऽन्तिके ॥ ५३९ ॥
सुदुश्चरं तपस्तप्त्वा, ततः प्रकृतिदुस्तपम्। देवभूयमगादेष, तस्मान्निर्वाणमेष्यति ॥ ५४० ॥
भुजिष्यामालिकश्रेष्ठि-प्रभृतीनां यथाविधि। सचक्रेऽघटभूपालः कृतेः प्रतिकृतिः शुभा ॥ ५४१ ॥
सुचिरं रत्नमञ्जर्या, भुञ्जानस्याऽघटेशितुः। अभवन्नन्दनः सोम-श्चन्दनो नागरीदृशाम् ॥ ५४२ ॥
तस्मिन् राज्यं निवेश्योच्चैः, प्राप्ततीर्थङ्करव्रतः। सुदुष्करतपाः प्राप, देवलोकं महाव्रती ॥ ५४३ ॥

नैकाचितानां तमसां निहन्ता, निःशेषपद्मोदयमाविधाता।
विवेकपूर्वाचलमौलिमाली, जीयात्तपोभानुरनूनतेजाः ॥ ५४४ ॥

इति अघटभूपालस्य तपःकथानकं तृतीयम् ॥

नवमो भवः

जिनदेशनायां तपोधर्मे अघटकुमार-कथानकम्

आनन्दकन्दलावापो, भावकल्पमहीरुहः। स्वर्गाऽपवर्गसौख्यौघ-फलैः फलति पेशलैः ॥ ५४५ ॥
दान-शील-तपोधर्मा, अमी भावं विना त्रयः। तथाविधफला न स्यु-स्तरुवद्दतुमात्मनः ॥ ५४६ ॥
भावना मेघलेखेयं, धर्मकन्दलसेचने। तस्याः प्रभावतः प्राप-दिलापुत्रः परं पदम् ॥ ५४७ ॥
इहैलावर्द्धनं नाम, पूरिलाखीविभूषणम्। श्रेष्ठी तत्रेभ्यनामा-ऽभूद्धनैर्धनदविभ्रमः ॥ ५४८ ॥
धारिणी गृहिणी तस्य, शीलालङ्कारधारिणी। तयोरपुत्रतादुःख-मन्येद्युरजनि स्फुटम् ॥ ५४९ ॥
मालतीपुष्पवद्बालं, प्रत्यहं लालयन्ति ये। तेषां जन्म कृतार्थं स्या-न्मनोरथलतावताम् ॥ ५५० ॥
(यतः—) दिवा भानुर्निशामिन्दुः, प्रदीपो मन्दिरोदरम्। प्रकाशयति पुत्रस्तु निष्कलङ्कः कुलद्वयम् ॥५५१॥
अथ प्रोवाच स श्रेष्ठी, हे प्रिये! मुञ्च चेतसः। चिन्तां यत इलादेवी, बहिरस्ति सुतप्रदा ॥ ५५२ ॥
अनेत्राणां ददौ नेत्रे, निःसुतानां सुतानपि। बहु वित्तमवित्तानां, साक्षात्कामगवी क्षितौ ॥ ५५३ ॥
अथाऽऽदरेण स श्रेष्ठी, पुत्रीयमुपयाचितम्। सप्रियो विदधेऽमुष्याः, पुत्रार्थे किं न तन्यते! ॥५५४॥
सुतश्चेद्भविता देवि!, तत्ते नाम प्रदास्यते। यात्रां च कारयिष्यामि, महतीं तव मन्दिरे ॥ ५५५ ॥
भवितव्यतयाऽमुष्याः, सञ्जातो गर्भसम्भवः। कालेन सुषुवे पुत्रं, तेजःपुञ्जविराजितम् ॥ ५५६ ॥
इलादेव्या अथाऽऽगारे, यात्रां निर्माय भूयसीम्। सूनोरिलापुत्र इति, द्वादशेऽह्न्यभिधां ददौ ॥५५७॥
वर्द्धमानः सुतो गेहे, सुमेरौ कल्पवृक्षवत्। कलाशास्त्राण्यधीयानः, स यौवनमुपाययौ ॥ ५५८ ॥
साकं दुर्ललितैर्मित्रै-र्विकारैरिव मूर्त्तिगैः। स्वैरवृत्तिरिलापुत्रो, दुर्जयो यौवनोदयः ॥ ५५९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्येद्युर्नगरस्यान्ते, खेलन्तीं लङ्खकन्यकाम् । रूपेणाऽप्रतिमां प्रेम्णा, निरैक्षिष्ट वणिक्सुतः ॥ ५६० ॥
असौ दध्यावहो ! रूप-मतिप्रीतिप्रदं दृशाम् । अहो ! लवणिमा काऽपि, देवीनामपि दुर्लभा ॥५६१॥
अहो ! विज्ञानकौशल्य-महो ! गीतकला कला । किं बहुना ? कृता येन, स त्वन्यः पद्मसम्भवः ॥५६२॥
एवं विचिन्तयन्नस्याः, महतीं गुणमयीं कलाम् । आलिख्यमयवत्तस्थौ, तद्गुणैरिव यन्त्रितः ॥ ५६३ ॥
अमुमीदृशमालोक्य, बाहौ धृत्य सुहृद्गणाः । वदन्ति स्म सखे ! किन्तु, ध्यायसि स्वान्तपङ्कजे ॥५६४॥
तदुक्तं नाऽशृणोदेष, एडवद्विपुलश्रुतिः । न किञ्चिज्जल्पति स्मोच्चै-रवागिव निषिद्धवत् ॥ ५६५ ॥
विमुच्य कुलमर्यादां, दूरं मुक्त्वा त्रपामपि । नव्यां विलीनचेतस्को, जगाद सुहृदो मुदा ॥ ५६६ ॥
यद्येनां परिणेष्यामि, कुरङ्गाऽक्षीं नटात्मजाम् । तदा मे जीवितं भावि, वह्नौ साधनमन्यथा ॥ ५६७ ॥
श्रुत्वेति निर्मदैर्मित्रैः, स कथञ्चन मन्दिरे । भूताऽऽविष्ट इवोत्पाट्य, निन्यिरे स्मरजर्जरः ॥ ५६८ ॥
विसंस्थूलममुं वीक्ष्य, तत्पिता सुहृदोऽवदत् । किमेतदिति तेऽप्यूचु-र्नटीरूपविमोहनम् ॥ ५६९ ॥
वज्राहत इवाऽशेषं, तदाऽऽकर्ण्य पिताऽवदत् । किं रे विवसितश्चोक्षो-न्त्यजान्नं सक्षुदिच्छति ? ॥ ५७० ॥
न किमस्ति दुराचार !, नारी रूपवती पुरे । यन्नव्यां रागवान् जात-स्तन्मेऽद्य नटितं मनः ॥ ५७१ ॥
अथाऽऽलापीदिलापुत्रः, सर्वं जाने तवोदितम् । किं नु कामः प्रसह्योच्चै-र्वामो मां दहति स्फुटम् ॥५७२॥
( यतः- ) यद्वामाभिनिवेशित्वम्, यतश्च विनिवार्यते । दुर्लभत्वञ्च यन्नार्याः, कामिनः साऽपरा रतिः ॥५७३॥
सुस्थावस्थैः कुलाचार-श्चर्यते ग्रन्थचर्यया । स्वां पुत्रीं गृहिणीश्चक्रे, स्मरार्त्तो हि प्रजापतिः ॥५७४॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अचिकित्स्यममुं ज्ञात्वा, स श्रेष्ठी तमुपैक्षत । उपेक्षणीया विबुधैः, कुबुद्धय इति स्मरन् ॥ ५७५ ॥
अथ मित्रैर्वृतः कामी, नटांस्तानित्यभाषत । प्रदत्त कन्यकामेनां, तोलयित्वा सुवर्णतः ॥ ५७६ ॥
तेऽप्यूचुर्न बहुस्वर्णैः, कार्यं कार्यज्ञ ! चिन्तय । जङ्गमा कल्पवल्लीयं, वाञ्छितार्थसमर्थिका ॥५७७॥
अस्यां चेदस्ति ते चित्तम्, पेटकं स्वीकुरूद्भुतम् । भवान् मिलतु निःशेषं विद्वन् ! कौशल्यशेवधिन् ! ॥५७८॥
अथ प्राग्भवसम्बन्धा–दैतस्यामतिरागवान् । सद्य एव मिमीलैषां, का त्रपा कामरङ्गिणाम् ? ॥ ५७९ ॥
अथेत्यूचुर्नटा वित्तं, तमुपार्ज्येति पुष्कलम् । उपयेथा नटीमेनाम्, जननयनकार्मणाम् ॥ ५८० ॥
ओमिति प्रतिपाद्यैषां, वाचं स नटपेटकः । धनमर्जयितुं प्राप पुरं विख्यातटाभिधम् ॥ ५८१ ॥
अस्य व्यतिकरं ज्ञात्वा, कौतुकी काश्यपीपतिः । ददाववसरं तस्य तद्विज्ञाननिरीक्षया ॥ ५८२ ॥
महाराज्ञी महामात्याऽऽ-दिभिः परिवृतस्ततः । ईक्षितुं नाटकं तस्यो-पाविक्षत् क्षितिवासवः ॥ ५८३ ॥
अथाऽऽबध्य वरात्राभि-र्चतुर्दिशि महीतटम् । तत्र व्यधीयत प्रोच्चै-र्वंशः पर्वशताकुलः ॥ ५८४ ॥
तस्योपरि महाकाष्ठ-फलकं तैर्न्यवेश्यते । तस्याऽन्तर्निहितौ द्वौ द्वौ, सुदृढं लोहकीलकौ ॥ ५८५ ॥
एककालमवाद्यन्त, वादित्राणि मुहुर्मुहुः । आह्वातुं नाटकाऽऽलोके, लोकानामिव दूरतः ॥ ५८६ ॥
कृपाणखेटकव्यग्र-पाणिः श्रेष्ठितनूद्भवः । सच्छिद्रे परिधायांह्री, पादुके आरुरोह तम् ॥ ५८७ ॥
मन्द्रमध्यादिभेदेन, जगौ रागतरङ्गितम् । गाथकीवृन्दगा वंश-मूले नटतनूद्भवा ॥ ५८८ ॥
वंशाग्रे नर्तयन् खड्ग-खेटके खेलनाऽऽकुलः । अहरज्जनचेतांसि, शिल्पात् को हि न रज्यते ? ॥५८९॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सप्त पश्चादिकया (?) स, सप्ताभिमुखान्यपि । कीलके पादुकारन्ध्रे, तन्वानः किरणान्यदात् ॥५९०॥
तेन नाट्येन लोकानां मस्तकानि चकम्पिरे । अत्युत्तमं यतः शिल्प-मुत्तमाङ्गेन वर्ण्यते ॥ ५९१ ॥
तस्य त्यागं नरेन्द्रेण, दीयमानं पुरीजनः । प्रत्यैक्षिष्ट परं राजाऽऽ-ज्ञयैव विधृतः करे ॥ ५९२ ॥
नटीरक्तो नृपो दध्यौ, नटीमेनां विवाहये । यद्यसौ वंशतो दैवात्, पतित्वा म्रियते स्वयम् ॥ ५९३ ॥
शापादिव शची क्षोण्यां, किमायाता सुलोचना ? । अच्युतत्वादियं लक्ष्मीः, श्रीपतेः किमुपागता ? ॥५९४॥
न विचार्यं बुधैः किञ्चित्, स्त्रीरत्नं दुष्कुलादपि । ग्राह्यमेव यतः शक्त्या, शिवोऽपि प्रतिभासते ॥५९५॥
इलापुत्रं प्रति स्माह ध्यात्वेति क्षितिवल्लभः । न ध्यातानि मया सम्यक्, तदेतानि पुनः कुरु ॥५९६॥
अथ पौरजनः सर्वो, वीक्ष्याऽऽपन्नोऽप्यजायत । पुनः प्रवृत्तेर्यद्येषः, निपतन् म्रियते खलु ॥ ५९७ ॥
इलापुत्रस्तु लोभान्ध-स्तान्यकार्षीत्पुनस्तराम् । कुर्वन्ति दुष्करमपि, लोभेनोपहता नराः ॥५९८॥
पुनस्तत्पतनं वाञ्छं-स्तथैवाऽऽह रसाऽधिपः । ततः पौरेण विज्ञातं, नटीरक्तो महीपतिः ॥ ५९९ ॥
(यतः-) दशं न खण्डयत्येषः, कुरुतेऽङ्गविमोटनम् । तस्माद् विषमबाणेन प्रहतः सर्वशासिना ॥ ६०० ॥
इलासूरपि लोभान्ध-स्तान्यदात् सम्पदाशया । वन्ध्या विचाराऽऽचारेषु, प्रत्याऽऽशा हि सुदुर्जया ॥६०१॥
अथ दध्यौ नृपोऽभ्यासा-दसौ न पतति क्षितौ । अस्माकं विफलो जातो, मनोरथमहातरुः ॥ ६०२ ॥
बलात्कारेण गृह्णामि, यद्येनां स्मरजीविनीम् । अकीर्तिः स्फुरति स्फीता, ह्येष नार्पयति स्वयम् ॥६०३॥
अथाऽमुं स्माऽह भूयोऽपि भूपः पातककौतुकी । अदरिद्रं करोमि त्वां, तुर्यवेलां करोषि चेत् ॥ ६०४ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनस्तदा तदाऽऽकर्ण्य, विरागी भूपतौ तथा। यथा साक्षादपि क्रोशं, दातुं प्रववृतेतराम् ॥ ६०५ ॥
(यतः–) भवेत् पिधानं कुम्भानां, शतस्य नहि देहिनाम्। सर्वोऽपि प्रायशो न्याय-पक्षं पक्षीकरोति यत् ॥६०६॥
इलापुत्रोऽपि भूपस्य, तं विवेद दुराशयम्। नटीलुब्धोऽप्ययं हन्त!, दुर्जयं कामशासनम् ॥ ६०७ ॥
तदा विहरतः कांश्चिन्, मन्दं क्षान्तिभरादिव। सर्वाङ्गशीलसन्नाहान्, बिभ्रतो मोहनिर्जये ॥ ६०८ ॥
पिण्डपाणैषणां शुद्धिं, वीक्षमाणान् गृहे गृहे। गृह्णतः प्रासुकं दानं, सर्वदोषैर्विवर्जितम् ॥ ६०९ ॥
गुप्तित्रयपवित्राङ्गांस्तपःक्षामवपुष्टरान्। भिक्षार्थमागतान् साधून्, पथि वंशस्थ ऐक्षतः ॥ ६१० ॥
॥ त्रिभिर्विशेषकम् ॥
अथ दध्याविलासूनुः, साम्यैकरसरञ्जितः। कटरे! विकटः कामो, येनाऽहं तु विडम्बितः ॥ ६११ ॥
कुले जातोऽस्मि सम्पूर्णे, शीतांशोरपि निर्मले। सुधीभिरिभ्यपुत्रीभिः, प्रार्थितोऽस्मि, दिवाऽनिशम् ॥६१२॥
एतस्यां हन्त रक्तोऽस्मि, यद्वार्ताभिर्विवेकवान्। लज्जते तत्र सज्जोऽस्मि, निर्लज्जानां शिरोमणिः ॥६१३॥
यज् ज्ञातं शासनं जैनं, यच्च ज्ञातं बहुश्रुतम्। तस्येदृशं मया लोके, ही फलं दर्शितं खलु ॥६१४॥
मच्चरित्रेण दुष्टेन, लज्जितः साधुसङ्गमे। न तिष्ठति पिता किन्तु गृहकोणगतोऽजनि ॥ ६१५ ॥
नात्मनो लघुतां दध्यौ, नाऽश्रौषं गुरुणोदितम्। अत्यजं कुलवैदुष्यं, नाऽस्मरं तत्त्वनिर्णयम् ॥ ६१६ ॥
देवैर्विषयिकैः सौख्यैः, काष्ठैरिव हुताशनः। नायं तृप्तो दुराचारः, प्राणी भावविवर्जितः ॥ ६१७ ॥
नीचान्नीचतरो राजा, ममाऽऽधीनां नटीमपि। यदयं ध्यायति स्वान्ते, त्रपां यद् हरति स्मरः ॥ ६१८ ॥



For Private and Personal Use Only

धन्यास्ते पुण्यभाजस्ते, ये रामां वीक्ष्य चक्षुषा । धाराहतोक्षवद्यान्ति, वीक्षमाणाः क्षितेस्तलम् ॥६१९॥
बालत्वादप्यवज्ञात-स्मरोड्डामरविभ्रमाः । पालयन्तो व्रतं ब्रह्म, धन्यास्ते बालसाधवः ॥ ६२० ॥
अस्मादृशा निर्विवेका, मूढा रामासु वर्ष्मणि । यासामीदृग् स्वरूपं तु, विदितं जिनशासने ॥ ६२१ ॥
(यदूचे-) धत्ते स्त्रीपाणिभिस्स्पृष्टो, हृष्टो रोमाञ्चकञ्चुकं । स्मरयन्ति न किं स्वस्य, कुटशाल्मलिकण्टकान् ॥६२२॥
इन्दुलेखेव या वक्रा, सन्ध्येव क्षणरागिणी । निम्नगेव निम्नगति-र्वर्जनीया नितम्बिनी ॥ ६२३ ॥
न प्रतिष्ठां न सौजन्यं, न दानं न च गौरवम् । न च स्वात्महितं वामा, न पश्यन्ति मदान्धलाः ॥६२४॥
यदि स्थिरो भवेद्वायु-श्चलन्ति यदि पर्वताः । दैवात्तथापि नारीणां, न स्थेम्ना स्थीयते मनः ॥ ६२५ ॥
ईदृश्यामनुरक्तोऽस्मि, नार्यां त्यक्तकुलक्रमः । अनङ्गेनाऽपि ही शश्वत्, साङ्गोऽपि हि विडम्ब्यते ॥६२६॥
एवम्भावयतस्तस्य, भावनापूतचेतसः । उत्पेदे केवलज्ञानं, लोकाऽलोकप्रकाशकम् ॥ ६२७ ॥
भावं भूपस्य विज्ञाय, दध्यौ साऽपि नटी हृदि । धिग्मे लावण्यलहरी, धिग्मे यौवनसम्पदम् ॥६२८॥
एकेन मत्कृते मुक्तम्, कुलं शीलं त्रपा ह्यपि । तथेच्छति द्वितीयोऽपि, धिग्मे रूपविडम्बनाम् ॥६२९॥
विवेकोऽस्य समुदितः, सर्वथा पारदोपमः । मद्रूपस्मरसन्तापा-दिव कल्याणकारणम् ॥ ६३० ॥
तयाऽपि भववैराग्य-विरञ्जितमनस्तया । अवापि केवलज्ञानं, भावान्मोक्षः करस्थितः ॥ ६३१ ॥
पट्टदेव्यपि पीठस्था, भावं विज्ञाय भूभुजः । दध्याविति स्मरेणान्धा, नाऽकृत्यमपि जानते ॥ ६३२ ॥
अयं क्षितिपतिः क्वापि, क्वापीयं लङ्खपुत्रिका ? । क्व स्वर्णं पित्तलं क्वापि ?, क्व धर्मः क्व च पातकम् ॥६३३॥

नवमो भवः

जिनदेशनायां भावनायां इलापुत्र-वृत्तान्तम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विडम्बनालता कामः, कामः कपटनाटकम् । कामः कालः सुतत्त्वानाम्, कामः केलिस्तु दुर्गतेः ॥६३४॥
इत्थं प्रसृमरोत्कर्ष-भावनायां महीभुजः । पट्टदेव्याः समुत्पेदे, पञ्चमज्ञानमञ्जसा ॥ ६३५ ॥
लोकाऽपरागमुद्वीक्ष्य, वंशं राजत्रपाकरम् । विरक्तः कामभोगेषु, नरेन्द्रोऽपीत्यचिन्तयत् ॥ ६३६ ॥
कन्दर्पपटलैरद्य, प्रहता मे विवेकदृक् । प्रभुत्वं पातितं मूला-न्नरकायुर्मयाऽर्जितम् ॥ ६३७ ॥
सुखैर्विषयिकैरात्मा दुष्पूरोऽयमहर्निशम् । नद्यौघैरिव पाथोधि-स्तर्पणैरिव पावकः ॥ ६३८ ॥
इति भावमहावह्नि-दग्धकर्मेन्धनो नृपः । आरुह्य क्षपकश्रेणीं, केवलज्ञानमासदत् ॥ ६३९ ॥
एवञ्चतुर्णामप्येषां, लब्धकेवलसम्पदाम् । अर्पयामास वेषादि, जैनी देवी स्थितिर्यतः ॥ ६४० ॥
तच्चरित्रचमत्काराद्, व्यन्तरैरथ मस्करः । पञ्चीकृतः स्थितस्तत्र, भगवान्मुनिसत्तमः ॥ ६४१ ॥
ततस्तत्र समासीनः, प्रतिबोधपरोऽजनि । पुरातनभवं प्रोचे, सनातनसुखाश्रयी ॥ ६४२ ॥
वसन्तनगरेऽभूवं, ब्राह्मणो ह्यग्निशर्मकः । अग्रहीष्यमहं धर्मं, जात्यरत्नमिवाऽनघम् ॥ ६४३ ॥
सन्निधाने प्रवर्तिन्या, व्रतं जग्राह मत्प्रिया । नामुञ्चद् गृहिणी रागं, पूर्वाभ्यासवशाऽऽगतम् ॥६४४॥
मम प्रिया व्रतस्थाऽपि, न जातेर्मदमत्यजत् । विज्ञातजिनतत्त्वाऽपि, दुस्त्यजा कुलवासना ॥६४५॥
अनालोच्य चिरं राग-मप्रतिक्रम्य कुत्रचित् । देवभूमिमगादन्ते, स्वर्गो दूरे कियद्व्रतात् ? ॥६४६॥
व्रतिन्यपि च कालेन, समाचारितसद्व्रता । ममाऽभ्यर्णेऽभवद्देवी, प्रेम जन्मान्तरेऽपि यत् ॥ ६४७ ॥
पूर्णीकृत्य निजायुष्क-मिभ्यपुत्रो महालये । सोऽहमिलासुतो जातो, सेयं जातिमदान्नटी ॥ ६४८ ॥



For Private and Personal Use Only

पूर्वाभ्यासान्नटीस्नेहोऽभवद्दुःसहदुःखदः। स्नेहेन रहितो दीपो, निर्वाणो भवति स्फुटम् ॥६४९॥
तदीयचरितं श्रुत्वा, प्रबुद्धाः पुरवासिनः। केचिच्च सर्वविरतिं सम्यक्त्वमपि केचन ॥ ६५० ॥
ते चत्वारो निहततिमिराः केवलज्ञानभानो-र्भव्याम्भोजं जिनसुवचनैर्भानुभिर्भासयन्तः।
प्रापुर्मुक्तेः सुखमविकलं भावनायाः प्रभावा-त्तस्माद्यत्नो भविकनिकरैर्भावनायां विधेयः ॥ ६५१ ॥

इति इलातीपुत्रस्य भावनाकथानकं चतुर्थम् ॥

इत्थं चतुर्विधं धर्मं, श्रीसुव्रतमुखोदितम्। श्रुत्वा सुव्रतभूपालो, जगाद विनयोत्तरम् ॥ ६५२ ॥
स्वामिन्! तव मुखाऽम्भोज-किञ्जल्कं देशना श्रुता। मम हंसस्तया कामं, प्रीणितो मानसाश्रयी ॥६५३॥ नवमो भवः
भावचारित्रवान् नाथ! जातस्त्वद्देशनाश्रुतेः। द्रव्यचारित्रवान् भावी, सुते राज्यनिवेशनात् ॥ ६५४ ॥
अथोत्थाय गतो राज-गृहं सुव्रतभूपतिः। आहूय जयसेनाख्यं, पुत्रं राज्ये न्यवीविशत् ॥ ६५५ ॥ प्रभोः गण-
दत्त्वा शिक्षां स्वपुत्रस्य, सुव्रतः क्षितिवल्लभः। पौरैः प्रमुदितैः साक-मचालीत्सुव्रतान्तिके ॥ ६५६ ॥ धरादयः
मोचिता बन्धनात्सर्वे, कारागारस्थिता नृपाः। दत्तान्यनेकदानानि, जिनार्चाः पूजितास्तथा ॥ ६५७ ॥
महता विस्तरेणाऽथ, स्फीतसङ्गीतमङ्गलः। देवैर्व्योमस्थितैर्वीक्ष-माणः कौतुकितेक्षणैः ॥ ६५८ ॥
प्रविव्रजिषुभिश्चान्यै-र्यथा वृद्धपुरःसरः। यशोदेव्या समं देव्या, प्रव्रज्यादाननिष्ठया ॥ ६५९ ॥
महान्तमुत्सवं कृत्वा, प्रदक्षिणिततीर्थकृत्। उवाचेति नृपो भक्त्या, नाथ! तारय संसृतेः ॥ ६६० ॥
अथ सुव्रतभूपाल-प्रमुखान्नरपुङ्गवान्। यशोदेवीप्रभृतिका, योषितो भावनाभृतः ॥ ६६१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सामायिकव्रतोच्चार - पूर्वं सुव्रततीर्थकृत् । स्वयं प्रव्राजयामास, वासनिक्षेपपूर्वकम् ॥ ६६२ ॥
इन्द्रादयो गणधरा, विभोरष्टादशाऽभवत् । सम्वेगाम्भःकृतस्नाना, निर्निदानतपःपराः ॥ ६६३ ॥
उत्पाद् - विगम - ध्रौव्य - त्रिपद्यास्तेऽनुसारतः । द्वादशाङ्गान्यपूर्वाणि, रचयामास रंहसा ॥ ६६४ ॥
वाचनाऽन्तरतो मल्लि-सुव्रताद्या गणेश्वराः । अभूवन् जगताम्भर्तु - र्द्वादशाऽऽगमकारिणः ॥६६५॥
अनिलानाम साध्वीनां, निःशेषाणां मतल्लिका । महत्तरा गुणग्रामै - र्भुवनेऽपि महत्तरा ॥ ६६६ ॥
गङ्गदत्ताऽभिधः श्राद्धो, बभूव प्रथमः प्रभोः । द्वादशव्रतमाणिक्य-मुकुटः प्रकटो धिया ॥ ६६७ ॥
उपासिका विभोर्जज्ञे, प्रथमा विजयाऽभिधा । सम्यक्तत्त्वेन गुणिना, हारेणेव विभूषिता ॥६६८॥
इत्थं चतुर्विधः सङ्घः, समभूज्जगदीशितुः । चतुर्गतिकसंसार - पारावारतरीयितः ॥ ६६९ ॥
पौरुष्यन्ते विभोः पुत्र - पूत्रः क्षितितलाऽधिपः । तण्डुलानां चतुःप्रस्थिं, चतुःस्थालस्थितां व्यधात् ॥६७०॥
वज्रभृन्निहितैर्गन्धै - र्द्विगुणीकृतसौरभैः । सौधादाऽऽनाययामास, तूर्यगीतपुरस्सरम् ॥ ६७१ ॥
ढौकिता पत्युरग्रेऽसौ, दिव्यपूजामनोहरम् । ऊर्ध्वमुत्क्षिप्यत क्षिप्रं, तदर्द्धं जग्रहुः सुराः ॥ ६७२ ॥
भूगतार्द्धं नृपेणाऽऽत्तं, परमानन्दशालिना । शेषमर्द्धं विभज्योच्चै - र्गोत्रवज्जगृहे जनैः ॥ ६७३ ॥
पूर्वोत्पन्ना रुजः सर्वा, नवीना न भवन्ति यत् । षण्मासीं यावदेतस्य, बलेर्माहात्म्यतोऽङ्गिनाम् ॥६७४॥
अथोत्तस्थौ जगन्नाथः कूर्मलक्ष्मा निजासनात् । अन्तरद्वारमार्गेण, निर्ययौ च सुरैः समम् ॥ ६७५ ॥
द्वितीयवप्रमध्यस्थे - शानकाष्ठाविभागगे । देवच्छन्दे विभुस्तस्थौ, गत्वा विश्रामहेतवे ॥ ६७६ ॥



नवमो भवः

प्रभोश्चतु-
र्विधः सङ्घः



For Private and Personal Use Only

तदानीं सुव्रतो नाम, सद्वीर्गणधरोत्तमः । स्वामिनः पादपीठस्थ-श्चक्रे धर्मस्य देशनाम् ॥ ६७७ ॥
खेदच्छेदो जिनेन्द्रस्य, शिष्यौघे गुणदीपनम् । सभायां प्रत्ययो द्वाभ्यां, गणभृत्कथने गुणः ॥ ६७८ ॥
गणभृद्देशनाप्रान्ते, प्रणम्य त्रिदशेश्वराः । स्थानं निजं निजं जग्मुः, स्मरन्तः स्वामिदेशनाम् ॥ ६७९ ॥
तत्तीर्थे करुणो नाम, यक्षस्त्र्यक्षश्चतुर्मुखः । उक्षासीनो जटी श्वेत-वसनः कमलाशनः ॥ ६८० ॥
मातुलिङ्ग-गदा-बाण-शक्तिभृद्भिर्महाभुजैः । चतुर्भिर्दक्षिणैः राजन्, जिनधर्मैरिवाऽऽस्तिकः ॥६८१॥
नकुलाक्ष-धनुः-पर्शु-धारिभिस्त्वपरैर्भुजैः । तीर्थङ्करपदाम्भोज-सेवाहेवासितच्छदः ॥ ६८२ ॥
॥ त्रिभिर्विशेषकम् ॥

नवमो भवः

नरदत्ताऽभिधा देवी, गौरी भद्रासनस्थिता । भाति दक्षिणदोर्भ्याञ्च, वरदेनाऽक्षसूत्रिणा ॥ ६८३ ॥
सबीजपूर-शूलाभ्यां, वामदोर्भ्याञ्च भूषिता । सुव्रतस्वामितीर्थे सा, जज्ञे शासनदेवता ॥ युग्मम् ॥६८४॥

प्रभोश्चतुर्विधः सङ्घः

विनयनिचुलिताभिर्गीर्भिरुच्चैर्जयेति, प्रकटनपरितोषैर्वासवैः सेव्यमानः ।
कनककमलमालाः स्मेरयन्पादपातै-र्व्यवहरत जिनभानुः सुव्रतोऽन्यत्र तस्मात् ॥ ६८५ ॥

इत्याचार्यश्रीविनयचन्द्रविरचिते श्रीमुनिसुव्रतस्वामिचरिते महाकाव्ये विनयाङ्के दान-शील-तपो-भावनानुगत-मङ्गल-सुभद्रा-अघटभूपति-इलातीपुत्रचरित्रगर्भितो देशनाव्यावर्णनो नाम चतुर्थः सर्गः ॥ छ ॥
ग्रंथाग्रम् ७०० ॥ मूलतो २७५० ॥ छ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# पञ्चमः सर्गः

सुरासुरपरीवारो, विहरन् वसुधातले । उपोरिनदि तीर्थेशो, भगवान् समवासरत् ॥ १ ॥
प्राग्वत् समवसरणं, तत्रैत्य त्रिदशा व्यधुः । तदध्यास्त विभुः पूर्वा-भिमुखः सम्पदां पदम् ॥ २ ॥
भूयांसो ग्रामवास्तव्या, भूयांसो व्रजवासिनः । भूयांसो नाहला लोका-स्तत्रेयुर्जिनवन्दने ॥ ३ ॥
अथ त्रिजगतां नाथो, हरिवंशमतल्लिकः । कषायाऽग्निजलाऽऽसारां, विदधे धर्मदेशनाम् ॥ ४ ॥
यो भावान् कथितान् भव्यो नियमात्परिरक्षति । प्रेत्याऽमुत्र श्रियः पात्रं, स भवेद् वङ्कचूलवत् ॥ ५ ॥
( तथा हि- ) विराटविषयोत्तंसं, पुरं भरतमण्डनम् । विजयोपपदं चारु, सदाचारपरैर्नरैः ॥ ६ ॥
उन्नतारिशिरःशूलो-ऽनुकूलो नयवर्त्मनि । उत्खातवैरिमूलौघः, श्रीचूलस्तत्र भूपतिः ॥ ७ ॥
तस्याऽभूद् धारिणी नाम, प्रेयसी धर्मधारिणी । पुष्पचूल-पुष्पचूले-ऽपत्ये जाते तयोर्वरे ॥ ८ ॥
पुष्पचूलः कलापात्र-मपि व्यसननिष्ठधीः । जहार हारयामास, हारादीन्पौरमन्दिरात् ॥ ९ ॥
पीड्यमानः पुरीलोकः, प्रत्यहं तेन निर्दयम् । विदध्याविति किं कार्यं क्षेत्रमत्ति वृतिस्तु यत् ॥ १० ॥
एकमेष दुराचारः, परिवारोऽपि तादृशः । विनिवारः कथङ्कारं, कार्योऽस्माभिरहर्दिवम् ॥ ११ ॥
अगान्महीभृतः पार्श्वे, विमृश्येति पुरीजनः । एवं विज्ञपयामास, न कोऽपि भयविद्रुतः ॥ १२ ॥
पौनःपुण्येन भूपेन, पृष्टोऽभाषत नागरः । देव! दैवात्पुष्पचूलो, वङ्कचूलो जनेऽजनि ॥ १३ ॥
श्रुत्वेति भृकुटीभङ्ग-भीषणो भूमिपालकः । आजूहवत्पुष्पचूलं, मूलं दुर्नयशाखिनः ॥ १४ ॥



For Private and Personal Use Only

सभ्रूक्षेपश्च साक्षेप-मब्रवीत्काश्यपीपतिः । कुतः कलङ्कपङ्कस्ते, कुलीनस्याऽपि दुर्नयात् ॥ १५ ॥
निरपेक्षः कुलाचारे, व्यवहारे निरादरः । साऽऽदरो व्यसने मत्तो-ऽवकरः कल्मषस्य किम् ? ॥ १६ ॥
भवान् राज्यधुरे धुर्यो, भविता वार्द्धके मम । महीमहमिवाऽशेषां, पालयिष्यसि नीतिवत् ॥ १७ ॥
उद्धरिष्यसि नामानि, वंश्यानां धर्मकीर्तनैः । एवंरूपा गताः सर्वे, वृथा मम मनोरथाः ॥ १८ ॥
अद्य प्रभृति नो कर्ता, भवान्नागः कथञ्चन । तदा तिष्ठाऽन्यथा याहि, दूरतो मम चक्षुषः ॥ १९ ॥
अथोत्थाय कुमारोऽपि, द्विगुणं दुष्टकर्मणि । प्रवृत्तो घृतसक्तोऽग्निः, तर्पणैः किं नु शाम्यति ? ॥ २० ॥
अमिलन्नागराः केऽपि, किङ्कर्तव्यपरायणाः । यामो देशाऽन्तरं कुर्मः, स्वप्राणव्यपरोपणम् ॥ २१ ॥
छन्नं विज्ञपयामोऽमु-मथवा नृपमेकदा । एकः प्रश्नो हि दोषाणां, शतं हन्त ! व्यपोहति ॥ २२ ॥
अथैत्य भूपमानम्य, कौमारं वृत्तमूचिरे । अमुमाकारयामास, ततोऽसौ कुपितो नृपः ॥ २३ ॥
मत्कुले विमले जन्म, धिक् धिक् पुत्र ! तवाऽजनि । यदिदं कर्म दुष्कर्म, कुरुषे कुलपांशुन ! ॥ २४ ॥
यदीदृक्षः कुमारत्वे, नृपत्वे भविता कथम् ? । किंपाकः पादपः सर्वा-ऽवस्थासु प्राणविप्रियः ॥ २५ ॥
वत्स ! तुच्छमते ! मुञ्च, विषयं निखिलं मम । अथवा तिष्ठ गेहेऽपि, नाऽऽगः सोढास्म्यहं परम् ॥ २६ ॥
श्रुत्वेति ध्यातवानेष, हि मे जन्मविडम्बना ! भूतवद्वणिजामग्रे, ताड्यमानोऽस्मि भूभुजा ॥ २७ ॥
न केनापि प्रदत्तानि, राज्यादीनि भवन्ति यत् । किं मृगैर्नृपनिर्भेदी, मृगनाथोऽभिषिच्यते ॥ २८ ॥
राज्यं तृणमिव त्यक्त्वा, वङ्कचूलो विनिर्ययौ । पुष्पचूलिकया सार्द्धं, बद्धया प्रेमबन्धनैः ॥ २९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भगिन्या मूर्त्यैक्ययेव, सहितो नगराद् व्रजन् । कीनाशक्रीडनाऽऽगारं, भयानकरसाऽऽकरम् ॥ ३० ॥
श्रूयमाणो मृगाधीश-महानादं पदे पदे । कौलेयकैः खाद्यमान-हतकुञ्जरचर्मकम् ॥ ३१ ॥
मार्यमाणाऽध्वनीनाऽऽर्त्तनादैर्नादितपुष्करम् । अपतत्पादचारेण, काननं खननं दृशः ॥ ३२ ॥ विशेषकम् ॥
तरवो यत्र शाखाग्र-स्मेरपुष्पविलोकनैः । वीक्षन्ते दैवकीयद्रु-काननं कौतुकादिव ॥ ३३ ॥
गिरिनद्यो बभुर्यत्र, वञ्जुलैः कलितान्तराः । स्मरविस्मेरभल्लीनां, सङ्केतस्य गृहैरिव ॥ ३४ ॥
तमालश्यामलैर्यत्र, लुलायूनां युयुत्सताम् । विषाणाऽऽस्फेटसंसर्पि-स्फुलिङ्गैर्दीपिकायितम् ॥ ३५ ॥
यस्मिन्नजगरैः स्फार-फूत्कारैस्तरुपल्लवाः । शैलूषैरिव नर्त्यन्ते, वाद्यनादानुगैरिव ॥ ३६ ॥
यस्मिन् वानरपुच्छानि, शाखाऽग्रेषु स्थितान्यभान् । सुवृद्धाया अरण्यान्या, हस्तालम्बनयष्टिवत् ॥ ३७ ॥
मार्गाऽमार्गं वङ्कचूलो, न जानन् दिग्विमोहितः । अध्यारुरोह शाखाभि-रभ्रंलिहमनोकहम् ॥ ३८ ॥
तस्मिन्नारुह्य लोलाक्षो, वीक्षमाणश्चतुर्दिशम् । धूमध्वजं दीप्यमानं, वीक्षामास प्रदीपवत् ॥ ३९ ॥
उत्तीर्याऽनार्यचरितो व्यसनादिव पादपात् । एकं शबरमद्राक्षी-द्यमदूतमिवाग्रिमम् ॥ ४० ॥
साक्षात्पापस्थितिमिव, खलचित्तमिवाऽसितम् । धूमबद्धं दाहमिव, सत्रासस्येव यामिकम् ॥ ४१ ॥
चामरीचर्मवसनं, सदनं दुष्टकर्मणाम् । कालरात्रेः सुतमिव, नरकस्येव सोदरम् ॥ ४२ ॥
दोर्दण्डचण्डकोदण्डं, बिभ्राणं त्वरितक्रमम् । घट्टयन्तं रदैः क्रूर-सूकरस्य महाऽऽननम् ॥ ४३ ॥
॥ चतुर्भिरादिक्रियाकुलकम् ॥



For Private and Personal Use Only

आसन्नीभूय कृच्छ्रेण, तं जगाद नृपात्मजः । वदावद ! वदाऽमुष्मिन्, मार्गं मे दिग्विमोहनात् ॥ ४४ ॥
सोऽप्युवाच गिरिं पश्य, पुरः शबरसोदरम् । रक्षणान्नृपधाटीनां, कन्दरोदरमन्त्रिराट् ॥ ४५ ॥
अश्मदिव तमः पुरं, गुहागेहेषु यो गिरिः । बहिर्बिभर्ति शृङ्गेषु, तमालतरुकैतवात् ॥ ४६ ॥
शृङ्गोच्चपादपश्रेणि-शोणपल्लवदम्भतः । नभो लेढुमिव प्रेतै-स्तत्र जिह्वा प्रकाशिता ॥ ४७ ॥
अन्यतो भीषणं किञ्चि-दस्तीति शबरोऽवदत् । वंशालीः छद्मना दध्रे, ऊर्ध्वीभूताङ्गुलीरिव ॥ ४८ ॥
आरण्यजोक्षभाङ्कार-व्याजेनाव्याजभीषणः । आश्रयन्तु दुराचारा ! मां गिरिर्वदतीव यः ॥ ४९ ॥
अचलं निकषा भद्र !, पल्लिरस्ति सुविस्तरा । शिक्षन्ते यत्र डिम्भानि, चौर्यं बाल्यादपि स्फुटम् ॥ ५० ॥
यत्राऽस्थिकूलनिचयै-र्जज्ञे प्राकारविभ्रमः । नान्दीमङ्गलघोषश्च, वध्यमानाऽर्त्तनिस्वनैः ॥ ५१ ॥
वङ्कचूल इति श्रुत्वा, पल्लीं वल्लीं कुकर्मणः । हृष्टो जातो निजस्वान्ते, समानस्थानलम्भनात् ॥ ५२ ॥
तदा पल्लीपतिः प्राणै-रमुच्यत विधेर्वशात् । पदाऽर्थे कलहायन्ते—ततश्चौराः परस्परम् ॥ ५३ ॥
पल्लीमहत्तरैरेष, वीक्षितः शस्तलक्षणः । पृष्टश्च स यथावस्थं—निजं सद्भावमब्रवीत् ॥ ५४ ॥
ततस्तस्य पदे न्यस्तो, वङ्कचूलः शुभे क्षणे । कर्पूरपात्रके किं न, क्षिप्यते हिङ्गुरङ्गिभिः ? ॥ ५५ ॥
बभञ्ज पत्तनान्येष, जग्राहाऽध्वगसश्चयान् । ग्रामादिकमुपाद्रौषी-दहारीदपि गोधनम् ॥ ५६ ॥
शप्तान् ददाह स ग्रामान्, नक्तं वृत्तिविधित्सया । अदापयच्च खात्राद्या-नाययत्परसुन्दरीः ॥ ५७ ॥
अन्योऽपि यो दुराचारो, वर्तते त्रिजगत्यपि । अलम्भविष्णुस्तत्रैष, श्रुतः पापैरिवाऽबलैः ॥ ५८ ॥

नवमो भवः

जिनदेशनायां वङ्कचूलकथा

आधिपत्यमरण्यान्या, एकच्छत्रं वितन्वतः। अमुष्य पापवश्यस्य, प्रावृट्काल उपेयिवान् ॥ ५९ ॥
विद्युल्लता अदीप्यन्त, चलन्तो दीपिका इव। नष्टं द्रष्टुमिव क्वापि, भीष्मतापकरं भुवः ॥ ६० ॥
प्रतिस्फलद्गुहासन्धौ, शुश्रुवे घनगर्जितम्। वर्षालक्ष्मीसमारम्भ-नान्दीघोष इवाऽपरः ॥ ६१ ॥
सुरचापं बभौ यत्र, नभः पीठे लसद्द्युतिः। विन्यस्ततोरणमिव, विधात्राऽऽकाशमण्डपे ॥ ६२ ॥
मानिनामग्रणीरेष, एक एव जवासकः। यः परप्रेरितं वारि, पीत्वा च परिशुष्यति ॥ ६३ ॥
नीलकण्ठाः प्रनृत्यन्ति, कामं जलधरोदये। मलिना एव हृष्यन्ति, मलिनानां समागमे ॥ ६४ ॥
सम्प्राप्ता जलमाहात्म्यं, तटिन्योऽभ्यासपादपान्। उन्मूलयन्ति सहसा, दधत्यः कुप्रभुक्रियाम् ॥ ६५ ॥
श्यामान्याऽऽसामुखान्यासन्, दुर्दिनाऽभ्युदये सति। नीलकण्ठाद् विनोत्सर्पि, मदमेदुरनिस्वनात् ॥ ६६ ॥
वर्षारात्र इति प्राप्ते, चलितो नगरात्पुरा। सार्थेशोऽप्यागमत्तत्र, मूलमार्गपरिच्युतः ॥ ६७ ॥
श्रीमन्तो मानतुङ्गाख्या, आचार्या अमुना समम्। चलितास्तामरण्यानीं, पेतुर्गच्छविभूषिताः ॥ ६८ ॥
चौरैरुपद्रुतः सार्थो, नश्यति स्म दिशोदिशि। भ्रमन्तः सूरयस्तेऽपि, चौरग्रामं प्रपेदिरे ॥ ६९ ॥
ततोऽम्बुदस्तथा वृष्टो, धारासारैरहर्दिवम्। उच्चनीचविभागोऽपि, येन न ज्ञायते क्वचित् ॥ ७० ॥
नवाङ्कुरैर्धरापीठं, तथाऽव्यापि समन्ततः। यथा निर्ग्रन्थपादानां, सञ्चारोऽजनि दुष्करः ॥ ७१ ॥
क्वापि चैत्ये बहिः स्थित्वा, साधवः सूरिभिस्ततः। पृष्टाश्च ते विधातव्य-मस्माभिः किमतः परम्? ॥ ७२ ॥
क्षितिरङ्कुरिता सर्वा, दुस्तराः सरितस्तताः। अध्वाऽनागतसञ्चारा, व्याप्ता जीवैर्जलैरिव ॥ ७३ ॥

एष पल्लीनिवासोऽस्ति, चेच्चोक्षो वीक्ष्यते क्वचित् । अतियामश्चतुर्मासीं, रक्षासंयमबाधनाम् ।। ७४ ।।
इत्याज्ञप्ता महासत्त्वाः, तेभ्यः साधू च वाग्मिनौ । पल्लीं विविशितुश्चौरीं, हल्लीसकसमाकुलाम् ।। ७५ ।।
ततः पापपराश्चौरा, अन्योऽन्यं करसंज्ञया । श्रावकं दर्शयन्त्युश्चै-र्हीं पापं साधुहीलनात् ।। ७६ ।।
क्रमशः वंकचूलं तौ, पृच्छन्तौ जग्मतुस्तराम् । विनयादयमुत्तस्थौ, विनयैः क्षत्रियः किल ।। ७७ ।।
तौ दृष्ट्वा तस्य सम्पन्नः, संवेगः कर्मलाघवात् । अहो ! एतौ महासत्त्वौ, परमानन्दभाजनम् ।। ७८ ।।
यदेतौ दुर्लभं किश्चि-दत्यन्तं प्रार्थयिष्यतः । ततः सर्वं प्रदास्यामि, श्रेयः सत्पात्रसङ्गमः ।। ७९ ।।
ध्यात्वेति वङ्कचूलोऽपि कोशीकृतकरद्वयः । प्रोवाचाऽऽदिश्यतां साधू !, सततं किं करोम्यहम् ।। ८० ।।
गुरूपदिष्टौ निर्ग्रन्थौ, वदतः स्म वदावदौ । सुविशुद्धं निराबाध- मर्पय त्वमुपाश्रयम् ।। ८१ ।।
वङ्कचूल उवाचाऽथ, सर्वं कुर्वे यथाविधि । परं जीवेषु त्राणात्मा, धर्मो वाच्यो न हि क्वचित् ।। ८२ ।।
यतः–प्राणिनां निधनं कार्यं, मृषा वाच्यं दिवानिशम् । ग्राह्यं वित्तमदत्तं वा, भोज्या परवधू र्भृशम् ।। ८३ ।।
भोक्तव्यं सुतरां मांस-मिति मेऽस्ति प्रियङ्करम् । विज्ञातसर्वतत्त्वानां भवतामप्रियङ्करम् ।। ८४ ।।
अथोचतुर्मुनी भद्र ! भवत्विदं प्रियङ्करम् । स्वार्था संयमयात्राह्यु-पदेशः परतारकः ।। ८५ ।।
वङ्कचूलस्ततो गत्वा, नत्वाऽऽचार्यान् विचारभृत् । आकार्योपाश्रयं चारु, दत्तवानुपमन्दिरम् ।। ८६ ।।
मुनिस्वाध्यायगम्भीर-निस्वनं श्रोतुमुन्मनः । दिवाऽनिशं पर्युपासाञ्चक्रे पल्लेरधीश्वरः ।। ८७ ।।
भक्तपानादिकं सौख्यं, दधानः पल्लीनायकः । आचार्यान् वाहयामास, चतुर्मासीमुपासनः ।। ८८ ।।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





व्यतीतायाश्चतुर्मास्यां, विहारं कुर्वतो गुरून् । अनुगन्तुमनाः सोऽपि, भक्तिभरपरायणः ॥ ८९ ॥
निजसीमान्तमापन्नो, गुरूनत्वैष चाऽभ्यधात् । नातः परं विजह्रेऽहं, विना नाथ ! तमस्विनीम् ॥ ९० ॥
दासोऽस्मि भवतां नित्यं, मा भैष्ट मुनिपुङ्गवाः ! । पूज्यैरहमनुग्राह्यो, विस्मार्यो न हि मानसात् ॥ ९१ ॥
अथो ज्ञानोपयोगं ते, दत्त्वोचुर्मुनिपुङ्गवाः । जाता ह्युपकृतिस्त्वत्त, ऊनं तव नहि क्वचित् ॥ ९२ ॥
उपाश्रयस्त्वया दत्तो, भक्तपानादि पूरितम् । अतिक्रान्ता चतुर्मासी, तव साहाय्यगौरवात् ॥ ९३ ॥
धर्मोपदेशादप्यन्या, भवेदुपकृतिः कुतः ? । धर्ममूलोदिता प्राज्ञैः, पुमर्थानां चतुष्टयी ॥ ९४ ॥
यतः–धनार्थिनां निधिर्धर्मो, धर्मः कल्याणशासनम् । धर्मो मोक्षलताबीजं, धर्मः सर्वार्थसाधनम् ॥ ९५ ॥
वङ्कचूलो बभाणाथ, भवन्तो ज्ञानपारगाः । यथोदकैस्तथा भक्तै–रादेशो दीयतां मम ॥ ९६ ॥
शीलधर्मादिकं पूज्याः !, सर्वं कर्तुमनीश्वरः । तद्विभागं वदन्तूच्चै-र्निर्धेरंशेन जीव्यते ॥ ९७ ॥
अथोचुः सूरयः कार्यं, नाऽज्ञातफलभक्षणम् । पदसप्ताष्टकं पश्चा-द्देयं जीववधक्षणे ॥ ९८ ॥
मातेव प्रेयसी राज्ञो, मान्या ब्रह्मव्रते त्वया । नाधिकं श्रूयते किञ्चि-द् व्रतं ब्रह्मव्रतात्परम् ॥ ९९ ॥
सर्वमांसेषु काकानां, मांसं भक्ष्यं त्वया नहि । चत्वारो नियमा एवं, चतुर्गतिनिवारणम् ॥ १०० ॥
ततःपल्लीपतिः प्रीतो, नियमान् गुरुणोदितान् । जग्राहाऽथाऽवदत्पूज्याः !, प्रसादो मेऽनघः कृतः ॥१०१॥
विजह्रुः शमिनोऽन्यत्र, प्रणता नृपसूनुना । साधूनां स्थितिरेकत्र, समीरण इवाऽस्ति न ॥१०२॥
शतैश्च पञ्चभिः साकं, चौराणां स परिवृतः । निहन्तुं कञ्चन ग्रामं, जगाम बहुगोधनम् ॥ १०३ ॥

नवमो भवः

जिनदेशनायां वङ्कचूलकथा



For Private and Personal Use Only

सोऽपि तस्याऽऽगमं श्रुत्वा, नक्तं नष्टः सगोधनः। तत्रैत्य पल्लिपो व्यर्थ-प्रयत्नोऽजनि दैवतः॥ १०४ ॥
निवृत्तोऽयं ततो मन्द-चेतस्कस्तस्करैः समम्। इतो भीष्मोऽजनि ग्रीष्मो, नरवंपचरजो भृशम्॥ १०५ ॥
क्रूरखरकराऽऽक्रान्त-शुष्को गिरिनदीचयः। जवासका प्रवर्द्धन्ते, चौरा इव सकण्टकाः॥ १०६ ॥
स्मरकिंशुकपुष्पौघ-छद्मना वनदेवताः। विदधुः पाणिग्रहणे, शिखितप्तान्कुटानिव॥ १०७ ॥
शोणपल्लवदम्भेन, ग्रीष्मतापकरालिताः। जिह्वा इव स्फुटी कुर्व-न्तस्ते विरेजुरंह्रिपाः॥ १०८ ॥
वल्लभा अपि पद्मिन्य-स्तुहिनेन कदर्थिताः। इत्यदो हन्तुमुष्णांशु-रम्यप्राप-दिशोत्तराम्॥ १०९ ॥
इति प्रभवति ग्रीष्मे, क्रूरलूकारुणाऽऽकृतौ। स्पृहयालुर्जलं शीतं, शयालुः सलिलाशये॥ ११० ॥
ग्रहयालुरसावन्नं, भटानिति समादिशत्। भद्रा! वीक्षत पाथांसि, पक्कानि च फलान्यपि॥१११॥ [युग्मम्]
न मेऽस्ति मृगयाशक्ति-रस्ता तापेन भूयसा। श्वापदौघोऽपि लूतायाः, भीतेः क्वापि न्यलीयते॥११२॥
ततस्ते दस्यवो नीर-फलादिकाऽवलोकनम्। कुर्वाणा ददृशुर्वृक्षं, किम्पाकं फलभङ्गुरम्॥ ११३ ॥
जहृषुर्दस्यवो दृष्ट्वा, किम्पाकञ्च फलेग्रहिम्। फलानि त्रोटयामासु-रायूंषीवाऽऽत्मनः क्षणात्॥११४॥
दर्शितानि पुरोऽमुष्य, नेत्राऽऽनन्दकराण्यपि। नियमः स्मृतिमायातो, यः प्रदत्तो महात्मभिः॥११५॥
पृष्टास्तेनाऽखिलाश्चौराः, संज्ञाऽमीषां समस्ति का। तेऽप्यूचुर्नहि जानीमो, न दृष्टानि श्रुतान्यपि॥११६॥
सोऽप्यूचे नाहमेतानि, भुञ्जे गुरुनिषेधतः। पालनं ग्रहणाच्छ्रेयो, नियमानामहोऽङ्गिनाम्॥११७॥
तेऽप्यूचुस्त्वयि पल्लीशे, क्षुधार्त्ते भोजनं कुतः?। एकयोगप्रवृत्तानां, दृश्यते हि समा स्थितिः॥११८॥

सुस्थाऽवस्थासु पल्लीश!, पाल्यतां नियमो निजः। कृच्छ्रे हि सर्वं कर्त्तव्यं, देहः सुकृतसाधनम् ॥११९॥
सोऽप्यूचे लभ्यते, शुद्धिः, परीक्षाकृतप्रयोगतः। करिणः करिसंफेटे, स्वर्णस्य कषपट्टके ॥ १२० ॥
श्रुत्वेति भोक्तुमारब्धाः, फलानि धनहारिणः। व्याख्यानयन्तस्तेषां तु, रसस्वादेन सुन्दरम् ॥ १२१ ॥
अहो! परिमलः कोऽपि, परिपाकोऽपि नूतनः। आस्वादः पेशलः कोऽपि ते व्याख्यामिति तेनिरे ॥१२२॥
( ततश्च ) मीलन्नेत्रपुटा-श्चौरास्तेऽस्वपन् सुखनिद्रया । फलाऽनुभावतो दैवा-द्दीर्घनिद्रां प्रपेदिरे ॥१२३॥
पल्लीशस्य पुनर्निद्रा, क्षुधयाऽऽर्त्तस्य नाऽगमत् । विकालवेलाकुलोऽभूत्, पल्लीवनविहारकः ॥१२४॥
अद्याऽप्येते स्वपन्त्युच्चै-श्चिन्तासन्तानवर्जिताः। उत्थास्यन्ति कथममी, प्रमीला गर्दभा इव ॥ १२५ ॥
ध्यात्वेति पल्लीपो दस्यू-नुत्थापयितुमुत्थितः। प्रत्येकं धीरनादेनाऽऽह्वयामास नामतः ॥ १२६ ॥
मुष्टा इव धृष्टा इव, पृष्टाः पाशैरिवाऽन्तकैः। कृतमौना इव शुचो, नो ददुः किञ्चिदुत्तरम् ॥ १२७ ॥
वीक्षामास घनोच्छ्वासं, निःश्वासं पल्लिनायकः। अबोधि निधनं प्राप्ता-नेकाऽऽलोचपरानिव ॥ १२८ ॥
जीयासुर्गुरवस्तेऽपि, ज्ञानाऽऽविर्भूतमतिश्रियाः । यैर्मे नियमदानेन, प्रदत्तं जीवितं वने ॥ १२९ ॥
अहो! गरलवृक्षोऽपि, यज्ज्ञानसुधयोक्षितः । कल्पपादपवज्जज्ञे, मम प्राणफलप्रदः ॥ १३० ॥
नियमस्य प्रभावेण, प्राप्तहर्षोऽधुनाऽभवम् । चौरमृत्योर्व्यषीदत्तु, चित्रं तुल्यमिह क्षणे ॥ १३१ ॥
इतस्तस्मिन्नपि दिने, समाऽऽगादीन्द्रजालिकः। याचितोऽवसरस्तेन, गेयरंगे हि जीविका ॥ १३२ ॥
मा ज्ञासीत्कोऽपि मे पल्लीं वङ्कचूलविवर्जिताम्। ध्यात्वेति नरवेषाभूत्, पुष्पचूला निशाऽऽगमे ॥१३३॥

आतुरासनमासाद्य, नर्तितो हि तया नटः । ददे दानं हि यशसो, नान्यज्जगति कार्मणम् ॥१३४॥
नरवेषाऽप्यसौ तल्पे, सा सुप्ता भ्रातृदारयुक् । इतोऽप्यागाद् वङ्कचूलः, प्रसुप्तं दृष्टवान्नरम् ॥ १३५ ॥
तत्कालोदीर्णरोषाऽऽन्ध-तमसाऽऽज्वललोचनः । कोऽयं यमाऽतिथिर्भावी ?, यो मे धाम्नि विचेष्टते ॥१३६॥
आचकर्ष ततः कोशात्, कृपाणं निःकृपाशयः । यावद्‌घातचिकीस्तावत्, स्मृतोऽस्य नियमः परः ॥१३७॥
पदसप्ताऽष्टकं पश्चाद्-भूय भूकम्पकृत्पदैः । यावद्धातचिकीरेष, दधावे वेगवत्तरः ॥ १३८ ॥
सुधौतधाराजिह्वाल-करवालः करस्थितः । भारपट्टेऽस्खलत्ताव-त्कुर्वन् झणझणारवम् ॥ १३९ ॥
एतस्य प्रतिशब्देन, सहसा जागृता स्वसा । वङ्कचूलश्चिरं जीया-द्रुतनिद्रेत्यभाषत ॥ १४० ॥
तस्याः शब्दं निशम्यैष, मुक्तरोषो ननाम ताम् । सविस्मयमुवाचाऽथ, नरवेषः किमेष ते ? ॥ १४१ ॥
ततः सा नटवृत्तान्तं, शुभवृत्ता यथातथम् । उवाच रूप्यघण्टानु-कारिण्या सौम्यया गिरा ॥ १४२ ॥
श्रुत्वेत्यभाषत प्रीत, उच्चरोमाञ्चकञ्चुकः । सूरीणामुपकारस्य, भवेयमनृणः कथम् ? ॥ १४३ ॥
एकं रामावधोऽन्यच्च, सोदर्या भगिनी सती । न मेऽस्ति नरके स्थानं सम्पूर्णविहितैनसः ॥ १४४ ॥
सर्वदस्युकुटुम्बानां, प्रादुर्भूतेऽथ वासरे । युगपज्जगदे मृत्यु-र्हि चित्रं भवनाटकम् ॥ १४५ ॥
श्रुत्वेति दुस्सहं वाक्यं, तान्यरोदन्मुहुर्मुहुः । रोदनादपरं शोको-द्गारे भैषज्यमस्ति किम् ? ॥१४६॥
आश्वासितानि सद्युक्त्याऽमून्यनाथानि दस्युना । मा विषीदन्त दैवाद्धि, बली नास्ति जगत्त्रये ॥१४७॥
एकोऽप्यहं कुटुम्बानां, सारां कर्ताऽस्मि सर्वदा । प्रीणाति सुधियाऽप्येको, महाऽम्भोधिं नभःसदः ॥१४८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अमुना बोधितान्येव - मेतानि स्वगृहं ययुः । बभार हृदयेप्येवम्, वङ्कचूलः सुदुःखितः ॥ १४९ ॥
नाऽहं निर्वाहशक्तोऽस्मि, ग्रामाणां केवलत्वतः । न पूर्वमर्जितं धनं, दिनद्वितयजीविका ॥ १५० ॥
आश्रितस्य भृतं दातुं, यः क्षमो न भवेद्विभुः । कृतचित्रनराऽऽकारः, स नरः कीर्तितो नरैः ॥१५१॥
यावच्चौरसुता नैते, वर्द्धन्ते क्रमशोऽखिलाः । आकाशोत्पातयित्वाऽपि, तावद्देयं हि भोजनम् ॥१५२॥
तनुग्रामे तनुगृहे, न ममाशा समर्थ्यते । जगद्भिः शाम्यते किन्तु, ऋजुकालाऽनलक्षुधा ॥ १५३ ॥
ममेच्छयाऽनुरूपं श्री - पुरं नामाऽस्ति विश्रुतम् । तस्मिन् गतस्य सम्पूर्णा, ममाशा भाविनी भुवि ॥ १५४ ॥
इति ध्यात्वा गतः श्रीमान्, श्रीपुरोपवनाऽन्तरम् । तावद् वसुपतिः प्राप - दस्ताद्रिं तद्भयादिव ॥१५५॥
प्रससार तमःपूर - स्तद्वाञ्छौघ इवाङ्गवान् । ध्वान्तव्रातैर्वृतो भिल्लै - रिवात्मानममन्यत ॥ १५६ ॥
प्रविष्टे नगरे तस्मि - न्निःशङ्कं धनिवेश्मसु । यामिकैर्दीयमानेषु, सर्वतः प्रहरेष्वपि ॥ १५७ ॥
स क्षत्रं क्षत्रियाऽग्रण्य - नन्दनो धनिवेश्मनि । पपात कमलाऽऽकारं, सर्वं साध्यं हि दोष्मताम् ॥१५८॥
ततोऽपवरकाऽऽसीनं, कलादघटनापटुम् । शिक्षयन्तं सुतं चौर्यं सम्प्रदायेन दृष्टवान् ॥ १५९ ॥
अहो ! अहं महाचौरो, मत्तोऽप्येष खलाग्रणीः । यः स्वपुत्रेऽपि दुःशिक्षां, दत्ते दुर्गतिकारणम् ॥१६०॥
नाऽहमेतस्य गृह्णामि, द्रविणं चौरिकाऽर्जितम् । मातेव भूयसी नक्त - मुखा भद्रङ्कराऽस्ति मे ॥१६१॥
ततोऽन्यत्र गतो वङ्क - चूलश्चपललोचनः । क्षत्रदानाद्ददर्शाऽथ, श्रेष्ठिनं सूनुना समम् ॥ १६२ ॥
तदा देशान्तरायातं, कलाकौशल्यशालिनम् । समुपार्जितकोटीकं, लेख्या संपूर्णरूपकम् ॥ १६३ ॥

नवमो भवः
जिनदेशनायां वङ्कचूलकथा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पौनःपुन्येन गणना-निरतं [1]न्यञ्चमम्बकम् । उपानहा ताडयन्तं, रे! रे! रे! वचनैरिति ॥ १६४ ॥
॥ त्रिभिर्विशेषकम् ॥
अस्यां देशान्तरगतौ, हारितो रूपकस्त्वया । श्रियो निर्गममार्गोऽयमिति मूढप्रकाशितः ॥ १६५ ॥
नाकाद्यारञ्जितो मुग्धः, पीडितो रूपकोष्मितैः । अस्थाने हि गतं रिक्थं, नृणामुद्वेगवेगकृत् ॥ १६६ ॥
एवं निर्भर्त्सनोत्सिक्तं, सुतमेनं, विलोक्य सः । पलितेभ्यो न जिह्रेति, विमुह्यति धनाशया ॥ १६७ ॥
धनं निदधतोऽमुष्य, निधनं विस्मृतं हृदि । अहो आशा–पिशाचीयं, तरुणी वार्द्धकेऽपि हि ॥ १६८ ॥
यदभूद्द्रविणे हानि-स्तत्किमेतस्य हीयते । चेत्पुत्र-गृहिणी-कान्ता-श्वशुरस्य किमागतम्? ॥ १६९ ॥
रूप्यकाऽर्थे सुतं द्वेष्टि, योऽयं लोभाऽन्धमानसः । तदस्य द्रविणेऽप्याप्ते, भावि किं मम पातकम्? ॥ १७० ॥
विपुलं श्रीपुरमिदं, रजन्यपि गरीयसी । खात्रदानेऽप्यहं सज्जो, निर्लज्जोऽत्र स्थिऽतोऽस्मि किम्? ॥ १७१ ॥
ध्यात्वेति निर्गतस्तस्मात्, क्षत्रदानादवैक्षत । पणाङ्गनां रतीभूत-देहां धवललोचनाम् ॥ १७२ ॥
रममाणां गलद्घ्राण-कुष्ठिना सह पुष्टये । कृमिभिः पूतिसंच्छन्नैः, ललनामितिकुर्वता ॥ १७३ ॥ युग्मम् ॥
अहो! वराकी लोभाऽन्धा, निजरूपं मनोहरम् । दूषयत्यमुना सार्द्ध-ममृतं विष्ठया समम् ॥ १७४ ॥
किमत्र नररूपेषु, दुर्भिक्षं प्रेक्षते क्षितौ । किमत्र निर्धना जाताः, पुमांसो मुषिता इव ॥ १७५ ॥
लोकसर्वस्वहरयो-र्मुखे मधुरयोर्द्वयोः । किमन्तरं विलोक्येत, वेश्यागरलयोर्बुधैः ॥ १७६ ॥
पापोपार्जितमेतस्या, न धनं युज्यते मम । काकमांसं तदुच्छिष्टमिति सत्यं वचो यथा ॥ १७७ ॥



१ अधमं पितरम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





राजवेश्म विना चौर्यं, सांप्रतं मे न सांप्रतम्। उपशाम्यति दीपैः किं, विना सूर्यं जगत्तमः ॥१७८॥
ध्यात्वेति पल्लिपः प्राप राजवेश्म महानिशि । रज्जोरालम्बनात् प्राप, तृतीयां भूमिकां ततः ॥१७९॥
इतः प्रणयकोपेन, बहिःस्थाऽऽवासवेश्मनः । विचारधवलक्षोणी-स्वामिनः प्राणवल्लभा ॥ १८० ॥
नाम्ना वसन्तसेनाऽऽख्या, राजन्त्याऽऽभरणद्युता। एतस्य पुरतस्तस्थौ, पुरो देवीव जङ्गमा ॥ १८१ ॥
तद्दर्शनात्समुद्भूत-मन्मथाऽऽवेशधारिणी । साऽभिलाषं पप्रच्छामुं, कोऽसि कौतस्कुतोऽनघ! ॥ १८२ ॥
स निःशङ्कमिदं प्राह, यो रात्रौ परवेश्मगः। नरो भवति सोऽस्म्यत्र, सत्या गीः सत्त्वशालिनाम् ॥ १८३ ॥
अथोवाच प्रिया राज्ञ-स्त्वं प्रेयान् भव मेऽधुना । यथा करोमि भूपत्वे, त्वां सात्त्विकमतल्लिकम् ॥ १८४ ॥
अहं विचारभूपस्य, देव्यस्मि स्मितसुन्दर ! । मा मे वाचाऽन्यथा कार्या, विचार्यं नाऽपरं हृदि ॥ १८५ ॥
ततः प्रोवाच पल्लीशो, न युक्तं गदितं त्वया । राजा पितेव तत्पत्नी, मातेव गुरुणोदिता ॥ १८६ ॥
माऽवादीरीदृशं प्रेम–सुभगानां शिरोमणे!। वीणायां वाद्यमानायां, वेदोद्गारो न शोभते ॥१८७॥
अयमेड इवामुष्या, न शुश्रावतरां वचः । प्रत्युत्तरं ददावुच्चै-र्नाप्यन्यस्थमना इव ॥ १८८ ॥
रे रे चौर! दुराचार! क्षान्तोऽसि तावतीं भुवम्। इदानीं कोपवह्नौ मे, भविता हुतिरद्भुते ॥ १८९ ॥
अथोचे पल्लिपो मात–स्त्वत्तो मे निधनं कुतः ? । दुर्जातं जायतेऽपत्यं, जनन्यजननी तु किम् ? ॥ १९० ॥
नाऽहं मृत्योर्बिभेम्युच्चैः, चौर्यतो मरणं ध्रुवम् । न पुनः कामयामि त्वं, मानयामि स्वजामिवत् ॥ १९१ ॥
इत्यमुष्य वचः श्रुत्वा, विलक्षा क्षितिपप्रिया। पूत्कारमकरोत्कामं, हि रामा कपटे पटुः ॥ १९२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्पाद्य मण्डलाऽग्राणि, यामिकास्तु ढुढौकिरे । भूपेन ज्ञातवृत्तेन, निषिद्धा हननोद्यताः ॥ १९३ ॥
धृतो निर्बन्धवृत्त्याऽसौ, न्यायात्सौख्यं विपत्स्वपि । प्रातरास्थानमानीतो, भटैः क्षितिपतेः पुरः ॥ १९४ ॥
तद्दर्शनेन साऽऽनन्दो, जगाद क्षितिवल्लभः । उत्तमकुलजातस्या - ऽवस्था हि कथमीदृशी ? ॥ १९५ ॥
महत्तायाः कुलस्योच्चै - र्नाऽवदन्मौनभागिव । ततो विचारभूपेन, पुत्रत्वेनाऽभिनन्दितः ॥ १९६ ॥
(यतः—)यत्त्वया जननीत्वेन, प्रपन्ना मम वल्लभा । तदुत्तमोऽसि वीराणां, त्वदाऽऽधीना मम क्षितिः ॥१९७॥
विन्यस्तो युवराजत्वे, स राज्ञा विपुलोत्सवात् । न तीरे योज्यते क्वाऽपि, पारीन्द्रः परकूलगः ॥ १९८ ॥
इति दध्यौ मनःपद्मे, विचारस्मेरकर्णिके । प्रशस्या मुनिहंसास्तु, सदाऽऽचरणरङ्गिणः ॥ १९९ ॥
येषां प्रसादमाहात्म्य - सुलब्धनियमोत्सवात् । ईदृग्रूपाऽभवद्भूतिः, साधुसेवोत्सवे फलम् ॥ २०० ॥
विमृशन्निति सुश्राद्ध - जिनदत्तेन संततम् । सङ्गतिं विदधे चारु, श्रावकत्वविधित्सया ॥ २०१ ॥
अकारयज्जिनेशानां, चैत्यानि विधिपूर्वकम् । सिषेवे सुगुरून्पञ्च - महाव्रतधुरन्धरान् ॥ २०२ ॥
अन्येद्युः श्रीपुरावासि - कामरूपमहीभुजा । विपुलो विग्रहो जातो, राजानो विग्रहप्रियाः ॥ २०३ ॥
विचारधवलो भूपो, जयढक्कामवीवदत् । मानिनो मानदलनाः, किं सहन्ते लवानपि ॥ २०४ ॥
अथ ज्ञातस्वरूपोऽसौ, महीनाथं व्यजिज्ञपत् । मृगपूगे महाऽऽटोपः, पारीन्द्रस्य भवत्यहो ! ॥ २०५ ॥
तव प्रसादाद्भूपालं साधयामि भटोपमम् । मयि सत्यपि किं सज्जं, विधातुं युज्यते किल ? ॥ २०६ ॥
ततस्तद्वचनं श्रुत्वा, विचारधवलोऽतुषत् । चतुरङ्गबलैः सार्द्धं स एनमभ्यषेणयत् ॥ २०७ ॥



For Private and Personal Use Only

प्रयाणैरुत्प्रयाणैश्च, बहुभिः क्षितिपाऽङ्गजः । श्रीपुराभ्यर्णमायासी- त्किं दूरं मानिनां खलु ॥ २०८ ॥
कामराजमहीन्द्रोऽपि, सज्जां सेनां चकार सः । केशरी केशराऽग्रस्य, छेदनं सहते नु किम्? ॥२०९॥
उत्तिष्ठत भटा! वर्म, गृह्णीत समितीच्छया । सज्जीकुरुत मत्तेभान्, पर्याणयत वाजिनः ॥ २१० ॥
निजाऽऽयुधानि चाऽऽदत्त, कुरुत व्यूहमञ्जसा । रक्षत पार्ष्णिग्राहाऽऽदि, रथानाऽऽनयताऽधिकम् ॥२११॥
एवं कोलाहलो जज्ञे, दुःश्रावो बलयोर्द्वयोः । नारदर्षेः श्रवोयुग्मं, प्रीणयन्निव चोत्थितः ॥ २१२ ॥
सवरूथो रथाऽऽरूढप्रौढप्रहरणप्रियः । स वङ्कचूल उत्तस्थौ, समं प्रतिमहीभुजा ॥ २१३ ॥
रणतूर्यैर्वाद्यमानै- र्वीरलक्ष्मी रणाङ्गणे । ननर्ति दन्तिसङ्घट्ट- दन्तठात्कारतालतः ॥ २१४ ॥
उच्छलद्भिः खगैर्व्योम, पिदधे वायुवेगिभिः । शूरस्याऽपि हि का वार्ता?, विषमा रणसंस्थितिः ॥२१५॥
भल्लाभल्लिर्मुष्टामुष्टिः, खड्गाखड्गिस्तलातलि । केशाकेशि दण्डादण्डि, बाणाबाणि गदागदि ॥ २१६ ॥
कुन्ताग्रहतवैरीभ- निर्गच्छच्छोणितच्छलात् । बुभुक्षितकृतान्तस्या- ऽऽचमनं विधिना ददे ॥ २१७ ॥
बाणकुन्तपतद्दण्डै, रूप्यस्थलायितं भुवि । वीराणां पतितैः शीर्षैः सर्वतः कवलायितम् ॥ २१८ ॥
माद्यन्ति कोणपाः कामं, नरीनृत्यति नारदः । नश्यन्ति कातराः काल- वक्त्रादिव रणाऽङ्गणात् ॥२१९॥
नेशुर्युयुधिरे केऽपि, श्रेमुः पेतू रणाङ्गणात् । विचित्राः सुभटास्तत्र, कर्मप्रकृतिचारवः ॥ २२० ॥
म्रियमाणेषु वीरेषु, मूर्च्छितेषु च केषुचित् । ढुढौके वङ्कचूलस्तु क्रुद्धकालाऽनलोपमः ॥ २२१ ॥
प्राप्तो विपक्षभूपाल- मेवमूचे क्षितीन्द्रसूः । रे रे! स्थिरो भवाऽमुष्मिन्, रणे वीररसायने ॥ २२२ ॥

मम स्वामिविरोधद्रो-रथ त्वं फलमाप्नुहि। सज्जो भव रणे घोरे, स्मर देवीं कुलेश्वरीम् ॥ २२३ ॥
इति ब्रुवाणं तं राजा, कोपाऽऽटोपनटायितः। बाणेन ताडयामास, कुमारं रणरङ्गितः ॥ २२४ ॥
अथोवाच कुमारोऽसौ, न हतः सुष्ठु मर्मणि। मम चक्रप्रहारस्य, रसं विद्धि विशुद्धये ॥ २२५ ॥
तेन तस्य शिरश्छिन्नं, राहोरिव बलिद्विषा। उच्चैर्जयजयारावं, उच्चचार स्वचारिणाम् ॥ २२६ ॥
उद्गीर्णं बन्दिभिर्बाढं, माङ्गल्यं जयवृद्धिकृत्। वृष्टं देवैर्दिवः पुष्प-वृष्ट्या पञ्चर्द्धिवर्णया ॥ २२७ ॥
शोभितः समरस्तेन, सुधिया नव्यकाव्यवत्। समागाच्छ्रीपुरं वङ्क-चूलश्चूरितशात्रवः ॥ २२८ ॥
प्रवेशितो महोत्सव-पूर्वकं जगतीभुजा। सम्मानितो विशेषेण, विक्रमी कस्य न प्रियः ? ॥ २२९ ॥
इतो वर्षासु जातासु, गर्जत्सु जलदेष्वपि। कन्दवद्धिशिखाऽऽघात-स्तस्याऽऽविरभवत्तनौ ॥ २३० ॥
उपचारशतैरेष, न शान्तिं विदधे क्वचित्। ततः कश्चित् भिषक् प्राह, वेद्मि राजन् ! महौषधम् ॥ २३१ ॥
नृपोऽवादीत् भिषक् ! ब्रूहि, भैषज्यमिति सोऽवदत्। मांसाऽदने ध्विकस्याऽयं, भवेदाऽऽमयवर्जितः ॥ २३२ ॥
श्रुत्वेति पल्लिपोऽवादीत्, स्मरन् नियममाऽऽत्मनः। नाऽहं भोक्ष्ये महीपाल !, स्वमांसमिव तत्तनुम् ॥ २३३ ॥
महीश ! सुगुरूपान्ते, ध्विकस्य पलमत्यजम्। कथं भोक्ष्ये नु तदहं, वान्ताऽशनमिवाऽधुना ॥ २३४ ॥
नृपोऽप्यूचे सुधाभिज्ञ !, परं देहकृते कृतिन् !। सर्वं कार्यं यतो धर्म-मूलं देहः प्रकीर्तितः ॥ २३५ ॥
भवे भवे भवेद्देह-स्तात ! नो नियमस्थितिः। भङ्गं न तस्याः कुर्वेऽहं, स्वयं विन्यस्तवल्लिवत् ॥ २३६ ॥
अमुना वचसा तस्य, पीडितः काश्यपीपतिः। अथोचे कोऽपि पार्श्वस्थो मा विषीद शृणु स्फुटम् ॥ २३७ ॥

नवमो भवः

जिनदेशनायां वङ्कचूलकथा

इहाऽऽसन्नपुरे श्रेष्ठि-**जिनदत्तेन** सङ्गतम्। वर्त्ततेऽमुष्य तस्योक्त्या, सर्वमेष विधास्यति ॥ २३८ ॥
आजूहवदमुं राजा, वेत्रिणं प्रेष्य कञ्चन। उपोद्यानं समागच्छन्, सुदतीं रुदतीं मुहुः ॥ २३९ ॥
पादाभ्यां धरणीपीठ-मस्पृशन्तीं सुलोचनाम्। काश्चिद्ददर्श दुर्दर्श्य-नेपथ्यद्युतिभासुराम् ॥ २४० ॥युग्मम्॥
सदयं श्रेष्ठिना पृष्टा, काऽसि किं नामधरिणी ?। कुतो रोदिषि दुःखाऽऽर्त्ता, ? ग्राम्यनारीव तद् वद ॥२४१॥
साऽप्यूचे **मेघनादस्य**, व्यन्तरस्य वधूरहम्। **सुलोचना**ऽभिधानाऽस्मि, सांप्रतं च्युतभर्तृका॥ २४२ ॥
**वङ्कचूलो**ऽप्यसौ देव!, पर्यन्ताऽऽगतजीवितः। त्वं चेन्नैष्यो भविष्यस्त-दनुरूपो वरो मम ॥ २४३ ॥
पूर्वमङ्गीकृतचतु-र्नियमत्वादसौ शुचिः। उपार्जिताऽसुरभवो, भद्रधीर्भद्रधर्मभृत् ॥ २४४ ॥
इदानीं तव सान्निध्या-द्विहिताऽनशनक्रियः। देवलोकं गमी तस्मा-द्रोदीमि श्राद्धपुङ्गव! ॥ २४५ ॥
अथोवाच वणिग्नेता, मा विषीद **सुलोचने**!। भविता पतिलाभस्ते, न वृक्षः **फलति क्षणात्** ॥ २४६ ॥
इति देवीं समाऽऽश्वास्य, गत्वा भूपनिकेतनम्। ननाम भूपतिं श्रेष्ठी, देवाऽऽदेशं प्रदीयताम् ॥ २४७ ॥
राजोवाच वणिग्नेत-स्त्वन्मित्रो मम नन्दनः। त्वद्वाक्येन यथा काक-मांसमत्ति तथा कुरु ॥ २४८ ॥
प्रायश्चित्तमहं पश्चा-दाचरिष्यामि निश्चितम्। पातकान्महतः शुद्धि-र्गुरुणैव वितन्यते ॥ २४९ ॥
अथोत्थायाऽऽस्तिकः प्राप, वङ्कचूलं सुदुर्बलम्। सोऽप्युवाच कियन्मात्रा, तवाऽस्ति वपुषि व्यथा ॥ २५० ॥
सोऽप्यभाषिष्ट विद्धि त्वं, दुःसहा वेदना मम। दुःखस्मृतिकरी भद्र!, नारकाणां पदे पदे ॥ २५१ ॥
अथोवाच वणिग्मित्रो, व्यथाशान्तिर्भवेत्तव। आदिष्टमगदङ्कारै-रगदं चेत्करिष्यसि ॥ २५२ ॥

कतरत्कथ्यतां मित्रो - दिते तु वङ्कचूलिना । सोऽप्यूचे काकमांसस्य, भुक्तिं कुरु व्यथाक्षिते ॥२५३॥
स्मित्वाऽथ स्माऽऽह पल्लीशः, कीदृग् श्राद्ध ! विभाषसे ? । इभः स्यादङ्कुशान्मत्तः, कस्य पूत्कुर्महे पुरः ॥२५४॥
नियमत्रयमाहात्म्या - दिहाऽभून्मम निर्वृतिः । अमुष्याऽतिशयाद्देव !, देवलोको भविष्यति ॥ २५५ ॥
अप्यौषधकृते जग्धं, काकमांसमुपासकः । न नित्याऽङ्करं भावि, कुतो धर्मक्षितेः सुखम् ? ॥२५६॥
यदि त्वं हितकृन्मेऽस्ति, श्रीमत्सर्वज्ञभाषिताम् । आराधनां विशुद्धात्मन् !, मां कारय घृणालय ! ॥२५७॥
अथ श्रेष्ठी जिनेन्द्रेणो - पदिष्टां धीरया गिरा । अकारयत्तरामारा - धनां भूधननन्दनम् ॥ २५८ ॥
समुत्पन्नसमाधिः सः, शुभध्यानपरायणः । देवभूयमथ प्राप, ततो निर्वाणमेष्यति ॥ २५९ ॥
ये केऽपि विवेकभृतो, विदधति नियमान् गुरूदितान् लक्ष्म्या । कतिचित्तेषां करतल-कमले हंसीयितं सततम् २६०
चौरोऽपि वङ्कचूलः, प्रतिकूलः सुनयपद्धतेः प्रथमम् । क्रमशो नियमग्रहणात्, धर्मद्रोरजनि वरमूलम् ॥२६१॥
तुच्छा जिनवचनरुच - स्तुच्छाः सम्यक्त्वधारिणो लोके । अतितुच्छा निजनियम - ग्रहणप्रतिपालकाः पुरुषाः २६२
इत्थं श्रुत्वा त्रिभुवनगुरो - र्देशनां केऽप्यगृह्णन्, दीक्षां केचिद्विनयविनताः साम्यवल्लीं वसन्तः ।
केचित्कांश्चिन्नियमनिकरान् प्रापुरत्यन्तशुद्ध्या, नाथस्तस्मादपि सह सुरैर्दीप्यमानैर्विजह्रे ॥ २६३ ॥

इत्याचार्यश्रीविनयचन्द्रविरचिते श्रीमुनिसुव्रतस्वामिचरिते महाकाव्ये विनयाङ्के नियमफलानु-गत - वङ्कचूलकथानकगर्भित उरितरङ्गिणीतीर - समवसरणव्यावर्णनो नाम पञ्चमः सर्गः समाप्तः ॥ ग्रन्थाग्रम् ॥ २६३ ॥ मूलतो ३०१३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## षष्ठः सर्गः



यत्तीर्थमद्याऽपि कुमारपाल-क्षोणीश्वरः सुन्दरमुद्दधार ।
नाम्ना च कूर्माऽङ्कपदाऽभिपूतं, तत्स्थानकं सिद्धपुरं चकार ॥ १ ॥
इतश्च लाटदेशश्री-ललाटतिलकोपमम् । सङ्केतनिलयं श्रीणां, भृगुकच्छाऽऽह्वयं पुरम् ॥ २ ॥
( यत्र च ) प्रातः स्नानमिवाकरोद्दिनकरो रेवाजले निर्मले, सङ्क्रान्तप्रतिमाच्छलेन विपुलप्रीतिप्रनृत्यत्करः ।
पद्मोल्लासि तमोविनाशि कलयन्नक्षत्रमालाक्षया, तेजः प्रापदितीव सोऽयमधिकं विश्वस्य विद्योतकम् ॥ ३ ॥
ज्योत्स्नासु चिन्तितास्तारा, यत्र स्फाटिकवेश्मसु । पुष्पोपहारतां यान्ति, कृतामिव गृहश्रिया ॥ ४ ॥
जितशत्रुर्नृपस्तत्र, पौरुषेण यथार्थवान् । अखण्डशासनं पाक-शासनः स्वरिवागतः ॥ ५ ॥
अथेशो विहरन्नुर्व्या-मुर्वीपतिनिषेवितः । उद्याने समवासार्षी-न्नाम्ना कोरिंटके कले ॥ ६ ॥
विज्ञातत्रिजगन्नाथ-समागममहोत्सवः । सपौरो वन्दितुं वेगा-दचालीदचलापतिः ॥ ७ ॥
समागच्छन्तुरङ्गाणां, रेणुभिः खुरसंभवैः । चकार गगनं राज-सविता स वितानवत् ॥ ८ ॥
रेणौ हयखुरोत्क्षिप्ते, घनमण्डलिविभ्रमे । बलाकायितसम्फुल्ल-निर्मलाऽऽतपत्रवारणैः ॥ ९ ॥
निस्वाननिस्वनोत्तान-स्तनितैर्जगतीपतिः । चलकुण्डलमाणिक्यैः, विद्युत्पुञ्ज इवाऽऽबभौ ॥ १० ॥युग्मम्॥
प्राप्य वप्रं द्वितीयं स, मुक्त्वा वाजिनमात्मनः । त्रिश्च प्रदक्षिणीकृत्य, प्रभोः सुश्राव देशनाम् ॥ ११ ॥
रोमाञ्चिताऽङ्ग उत्कर्ण-श्चित्रन्यस्त इव स्थितः । सुश्राव देशनां भर्तु-र्जितशत्रुतुरङ्गमः ॥ १२ ॥

नवमो भवः

कोरिंटकोद्याने समवसरणम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गणभृत्समयेऽपृच्छ-द्विश्वं विनयवामनः । स्वामिन्! समवसरणे, प्रवेदे धर्ममत्र कः ? ॥ १३ ॥
स्वाम्यप्युवाच नो धर्मं, प्रत्यपद्यत कश्चन । विनैकं वाजिनं जात्यं, जितशत्रुनरेशितुः ॥ १४ ॥
सविस्मयो महीपालः, पप्रच्छाऽथ जगद्गुरुम् । कोऽयमश्वो जगन्नाथ!, यो जैनं धर्ममाददतः ॥ १५ ॥
अथाऽऽचख्याविति स्वामी, गजगामी निरामयः । पत्तने पद्मिनीखण्डे, वनखण्डेन मण्डिते ॥ १६ ॥
वणिग्वेणुखरो दानी, महाजनैकपुङ्गवः । जिनधर्माभिधानोऽभू-ज्जिनधर्मपरायणः ॥ १७ ॥
समस्तपौरमान्योऽस्य, मित्रं सागरदत्तकः । सोऽन्वहं भद्रकत्वेन, जैनचैत्येषु जग्मिवान् ॥ १८ ॥
अपरेद्युः सुसाधुभ्य, इत्यश्रौषीत्सभास्थितः । योऽर्हद्बिम्बानि शस्तानि, कारयेदिति शास्त्रतः ॥ १९ ॥
उपविष्टस्य देवस्यो-र्ध्वस्य वा प्रतिमा भवेत् । द्विविधाऽपि युवावस्था, पर्यङ्कासनगादिमा ॥ २० ॥
देवस्योर्ध्वस्य बिम्बं स्या-ज्जानुलम्बिभुजद्वयम् । श्रीवत्सोष्णीषसंयुक्तं छत्रादिपरिवारयुक् ॥ २१ ॥
छत्रत्रयं च नासाग्रो-त्तारि सर्वोत्तमं भवेत् । नासाभालान्तयोर्मध्यं, कपोले वेधकृत्पुनः ॥ २२ ॥
रक्षितव्यः परीवारे, दृषदां वर्णसङ्करः । विषमाऽङ्गुलसङ्ख्येष्टा, प्रतिमामानकर्मणि ॥ २३ ॥
अन्योऽन्यजानुस्कन्धान्तात् तिर्यक्सूत्रनिपातनात् । केशान्ताऽञ्चलयोश्चान्तःसूत्रैक्याच्चतुरस्रता ॥ २४ ॥
नवतालं भवेद्रूपं, तालः स्याद् द्वादशाऽङ्गुलः । अङ्गुलानि न कम्बायाः, किन्तु रूपस्य तस्य हि ॥ २५ ॥
ऊर्ध्वस्थप्रतिमामान-मष्टोत्तरशतांऽशतः । आसीनप्रतिमामानं, षट्पञ्चाशद्विभागतः ॥ २६ ॥
भालनासाऽऽननग्रीवा-हृन्नाभी गुह्यमूरुके । जानुजङ्घांह्रि चेत्येका-दशाङ्कस्थानकानि तु ॥ २७ ॥

नवमो भवः

कोरिंटकोद्याने समवसरणम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चतुःपञ्च चतुर्वह्नि-सूर्याकार्को जिनाब्धयः । जिनाब्धयश्च मानाङ्का, ऊर्ध्वादूर्ध्वस्वरूपके ॥ २८ ॥
उत्ताना द्रव्यनाशाय, सचिन्ता स्यादधोमुखी । वक्रा विदेशगमना, तैरश्ची व्याधिकारिणी ॥ २९ ॥
विनिद्रा गतनिद्रा सा, सुप्ताङ्गी क्षयकारिणी । रौद्री रोगप्रदा चैव, चिपिटा दुःखदायिनी ॥ ३० ॥
नासाऽग्रनिहिता शान्ता, प्रशस्ता निर्विकारिणी । वीतरागस्य मध्यस्था, कर्त्तव्या दृष्टिरुत्तमा ॥ ३१ ॥
व्याधिं मन्दोदरी दद्यात्, हृद्रोगं हृदये कृशा । अंसहीना सुतं हन्यात्, कटिहीना च वाहनम् ॥ ३२ ॥
पादहीना जनं हन्यात्, शुष्कजङ्घा नरेन्द्रहा । सदोषा ह्यासने हीना, वक्त्रहीना च भोगिनी ॥ ३३ ॥
शिरोहीना न पूज्या स्या-दर्चकाभ्युदयाय च । ज्ञात्वैवं कारयेद्बिम्बं, जैनं दोषविवर्जितम् ॥ ३४ ॥

नवमो भवः

दन्तकाष्ठदृषल्लेप-लोहानां प्रतिमा गृहे । न पूज्या भाविकैर्यस्मा-त्कुलनाशापहारका ॥ ३५ ॥
पित्तलस्वर्णरूप्याणां, रत्नानां प्रतिमा गृहे । पूजयन्ति स्ववृद्ध्यर्थं, लौहीमिच्छन्ति केचन ॥ ३६ ॥
प्रासादद्वारमानेन, त्रिविधा प्रतिमोदिता । एकाङ्गुलात्समारभ्य, यावदेकादशाङ्गुला ॥ ३७ ॥
गृहेषु प्रतिमा पूज्या-ऽधिका हीना च दोषदा । चित्रजा लेपजा चित्र-शस्त्रोत्कीर्णा च पाकजा ॥ ३८ ॥

भृगुकच्छे अश्वस्य प्रतिबोधः

चतुर्धा प्रतिमा प्रोक्ता, देवेन प्रतिमा स्वयम् । पटे कुड्ये च पाषाणे, चित्रजा प्रतिमा मता ॥ ३९ ॥
लेप्या तु पार्थिवी ज्ञेया, लोहजा पाकसम्भवा । शैलजा वृक्षजा चैव, शस्त्रोत्कीर्णा च पाकजा ॥ ४० ॥
स्फाटिकी पार्थिवी शस्ता, न काचप्रतिमा शुभा । राजावर्तोद्भवा कार्या, मणिरत्नप्रवालजा ॥ ४१ ॥
अन्यायद्रव्यनिष्पन्ना, परवस्तुदलोद्भवा । हीनाऽधिकाङ्गी प्रतिमा, स्वपरोन्नतिघातिनी ॥ ४२ ॥



For Private and Personal Use Only

द्वारोच्छ्रयस्य यन्मानमष्टधा तं प्रकल्पयेत् । ततो भागं परित्यज्य, शेषं त्रिधा विभागयेत् ॥ ४३ ॥
भागेनैकेन पीठं स्याद्, द्वाभ्यां च प्रतिमा भवेत् । कनिष्ठा प्रतिमा ह्येषा, सर्वदा सुखदा नृणाम् ॥ ४४ ॥
द्वारोच्छ्रयस्य मानं तु, विभज्य नवधा ततः । भागमेकं परित्यज्य, शेषं कृत्वा त्रिधा पुनः ॥ ४५ ॥
भागो ह्येको भवेत्पीठं द्वाभ्याञ्च प्रतिमा भवेत् । कथिता द्वारमानेन, मध्यमा प्रतिमा स्मृता ॥ ४६ ॥
द्वारदैर्घ्यं त्रिधा भङ्क्त्वा, पीठं भागेन कल्पयेत् । भागाभ्यां प्रतिमा कार्या ज्येष्ठा तु प्रतिमा शुभा ॥ ४७ ॥
मुक्ताशैलैः स्फटिकमणिभिः स्वर्णरूप्यादिभिर्वा, बिम्बं सौम्यप्रकृतिविलसल्लक्ष्मवर्ष्मोपपन्नम् ।
स्फारज्योतिर्भवभयभिदस्तीर्थनाथस्य भक्त्या, नेत्राऽऽनन्दप्रसवि कृतिनः केऽपि निर्वर्तयन्ति ॥ ४८ ॥
दौर्भाग्यं दीनता दौस्थ्यं, वैरूप्यं व्याधिजं भयम् । एतज्जिनाऽऽर्चाकर्तॄणां, न जायेत विवेकिनाम् ॥ ४९ ॥
श्रुत्वा सागरदत्तस्तु, काञ्चनं बिम्बमर्हतः । विधाय विधिवद्भूरि-स्वव्ययैः प्रत्यतिष्ठिपत् ॥ ५० ॥
नगरस्य बहिर्भागे, प्रोत्तुङ्गं शिवमन्दिरम् । तेनाऽऽसीत्कारितं पूर्वं, दृशां विश्रामपल्लवः ॥ ५१ ॥
अथ सागरदत्तोऽसौ, कम्बलप्रावृतः शुचिः । तत्रोत्तरायणेऽगच्छद्, दर्भमुद्राङ्किताऽङ्गुलिः ॥ ५२ ॥
तस्मिन् प्राक् सञ्चितस्त्यान-घृतकुम्भपरम्पराः । कष्टुं शिवाऽर्चकाः सर्पिः, कम्बलाय कृतोद्यमाः ॥ ५३ ॥
पिण्डीभूयाऽधरे तेषां, घटानामुपदेहिकाः । बभूवुर्बहवो लग्नाः, क्षौद्रे क्षौद्रा इवाऽभितः ॥ ५४ ॥
तस्थुर्भ्रेमुः क्षितौ नेशुः, प्रसस्रुरुपदेहिकाः । घटाऽधस्तात् न्यषीदंश्च, रन्ध्रान् कांश्चन निर्ममुः ॥ ५५ ॥
सञ्चरद्भिश्चूर्णमाणा-स्ता उदीक्ष्य कृपापरः । अपनेतुं स्ववस्त्रेण, सागरोऽथ प्रचक्रमे ॥ ५६ ॥

नवमो भवः

भृगुकच्छे अश्वस्य प्रतिबोधः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रे रे श्वेताम्बराऽऽचार्यैः, शिक्षितोऽसीति जल्पता । पूजकेन ततस्तास्ता-श्चूर्णिताश्चरणद्वयात् ॥ ५७ ॥
तद्वीक्ष्य सागरः कामं समभूत्करुणापरः । यतन्ते जीवरक्षायै, विज्ञातजिनशासनाः ॥ ५८ ॥
अहिंसातत्परत्वेन, विलक्षीभूय सागरः । तच्छिक्षाऽर्थमुदैक्षिष्ट, तदाऽऽचार्यमुखं तदा ॥ ५९ ॥
उपेक्ष्यमाणे तस्मिंश्च, तत्पापं दृक्पथागतम् । सागरश्चिन्तयामास, धिगिमान्निर्दयाऽशयान् ॥ ६० ॥
कथमेते गुरोर्बुद्ध्या, वन्द्यन्ते हन्त निर्घृणाः । कथमेभ्यो भवस्यान्त-र्लोहपातादिवाम्बुधेः ॥ ६१ ॥
तैर्दृष्टं परमं ज्योति-स्तैस्तत्त्वमुपलक्षितम् । तैः कृता देवतापूजा, यैः कृता प्राणिनां दया ॥ ६२ ॥
विमृश्येत्युपरोधेन, तत्कृत्वा कर्म सागरः । अलब्धदर्शनो दान-शील-धर्मप्रसङ्गतः ॥ ६३ ॥
महारम्भाऽर्जितद्रव्यैः, परिमित्या विवर्जितः । जात्यस्तवाऽयमश्वोऽभू-त्तद्बोधार्थमिहाऽऽगमम् ॥ ६४ ॥
भवान्तरकारितायाः, प्रतिमायाः प्रभावतः । श्रुत्वा स्म देशनामेषां सम्बुद्धो नरपुङ्गव ! ॥ ६५ ॥
एवं भगवताऽऽख्याते, केवलज्ञानभास्वता । क्षामयित्वा क्षमाभर्त्रा, स्वैरचारी हयः कृतः ॥ ६६ ॥
पाणिसम्पुटमायोज्य जितशत्रुर्महीपतिः । इत्युवाच विभुं नत्वा, स्वामिन् ! यदुदितं त्वया ॥ ६७ ॥
अलब्धदर्शनश्रेष्ठी, जातोऽश्वस्तव वेश्मनि । तत्किं नु दर्शनं नाम, दर्शनं सर्वसम्पदाम् ॥ ६८ ॥
सदृष्टान्तं साऽतिचारं, तद्ब्रूत जगतांपते ! । परप्रबोधनिरता, जिना एव जगत्त्रये ॥ ६९ ॥
अथ त्रिजगतां नाथो, भावं ज्ञात्वा महीभुजः । इदं जगाद वदतां-वरः प्रबलकेवलः ॥ ७० ॥
तलपादस्थिरत्वेन, प्रासादो नाऽन्यथा स्थिरः । दर्शनस्यैव संस्थैर्ये, ज्ञानचारित्रसंस्थितिः ॥ ७१ ॥

नवमो भवः

भृगुकच्छे अश्वस्य प्रतिबोधः



For Private and Personal Use Only

द्वारं मूलं प्रतिष्ठान-माधारो भाजनं निधिः । साधु-श्रावकयोर्हेतु-र्धर्मयोः शुद्धदर्शनम् ॥ ७२ ॥
गुणतो दोषतश्चैव, लक्षणैर्भेदतोऽपि च । पृथक् पञ्चविधं ज्ञेयं, सम्यक्त्वं दशधा त्रिधा ॥ ७३ ॥
स्थैर्यं -प्रभावना-भक्ति,-पाण्डित्यं जिनशासने । तीर्थयात्राऽपि पञ्चाऽस्य, गुणा निर्वृतिरङ्गिणः ॥ ७४ ॥
शङ्का काङ्क्षा जुगुप्सा च, कुतीर्थिकपरिस्तवः । कुतीर्थिकोपसेवेति, दोषाः सम्यक्त्वनाशिनः ॥ ७५ ॥
शम-संवेग-निर्वेदाः, तथा सत्त्वाऽनुकम्पिता । अस्तिबुद्धिः पदार्थेषु, दर्शनव्यक्तिलक्षणम् ॥ ७६ ॥
औपशमं-सास्वाद-क्षायोपशमं च वेदकं क्षयजम् । सम्यक्त्वं विज्ञेयं पञ्च-विधं तत्समासेन ॥ ७७ ॥
नैसर्गिकमुपदेशिक-माज्ञारुचिस्सूत्रबीजभेदेन । अभिगमविस्ताररुची, क्रियासङ्क्षेपधर्मरुचि ॥ ७८ ॥
जीवाऽजीवाऽऽश्रवा बन्धो, मोक्षः संवरनिर्जरे । एतानि सप्त तत्त्वानि, भाषितानि मनीषिभिः ॥ ७९ ॥
सर्वदोषैर्विनिर्मुक्तं, गुणैर्युक्तं यथाविधि । इदं चम्पकमालेव, पालयेन्मुक्तिकारणम् ॥ ८० ॥
तथा हि भरतक्षेत्रे, विशालेति त्रिधा पुरी । ललिताङ्गनृपस्तत्र, तस्य प्रीतिमती प्रिया ॥ ८१ ॥
तयोरुपरिजातानां, सुतानामुग्रचेतसाम् । सुता चम्पकमालाऽभू-ज्जयन्तीव दिवस्पतेः ॥ ८२ ॥
महोपाध्यायकुमुद-चन्द्राऽन्ते तन्द्रयोज्झिता । अधीतिनी सुता राज्ञः, शास्त्राणि ज्ञातवत्यसौ ॥ ८३ ॥
अतिप्रवीणा वीणासु, भारते भरतो मुनिः । दक्षा शिक्षासु साहित्ये, ससौहित्या नृपाऽऽत्मजा ॥ ८४ ॥
सतर्का तर्कशास्त्रेषु, लक्षणे लक्षिताऽऽशया । सस्मृतिः स्मृतिवाक्येषु, पट्वी नाटकपेटके ॥ ८५ ॥
उपाध्यायाऽन्विताऽन्येद्यु-रास्थानीङ्गतवत्यसौ । ननाम भूपतेः पादौ, पादपीठाऽधिदेवते ॥ ८६ ॥

नवमो भवः

जिनदेशनायां सम्यक्त्वोपरि चम्पकमाला-कथा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्सङ्गे न्यस्तवानेनां, नृपः प्रीतितरङ्गिताम् । अस्याऽपत्याऽङ्गशैत्येन, न रुचिश्चन्दनेऽजनि ॥ ८७ ॥
इतः कुणाला भूपाला - रिकेशरिनिदेशतः । तत्राऽमरगुरुः प्राप्तो, गुणी राजगुरुः कृती ॥ ८८ ॥
उचितप्रतिपत्त्याऽसौ, निषसादोपभूपतिम् । द्वयोः कुशलवार्ताऽऽदि-प्रश्नो जज्ञे परस्परम् ॥ ८९ ॥
इमां रूपवतीं दृष्ट्वा, रतेरपि ह्रियः पदम् । मद्भर्तुः प्रेयसी योग्या, योग्या कुसुमधन्विनः ॥ ९० ॥
इति दध्यौ गुरुश्चित्ते, विस्मयस्मेरमानसः । अनयोः सङ्गमः श्लाघ्यो, गङ्गासागरयोरिव ॥ ९१ ॥
अथ पप्रच्छ भूपालः, सुते! किं पठितं त्वया? । मूलादाऽऽरभ्य वाह्लभ्य-चिन्तारत्नकरण्डके! ॥ ९२ ॥
निवेदय तरां साऽथ, व्रीत्यादूचे न किञ्चन । प्रायः सभासु भीरूणां, विधत्ते जडतां मतिः ॥ ९३ ॥
इतोऽभ्यधायि साऽऽनन्दं, कुमुदेन नरेश्वरः । अपाठि सर्वं वैशिष्य-मस्याश्चूडामणौ पुनः ॥ ९४ ॥
निशम्येत्यमरः प्राह, सहास्यं तव क गतिः? । भविता रमणः कस्ते? किं नाम? कति सूनवः? ॥ ९५ ॥
सलज्जाऽधोमुखीभूता, प्रातः कुमुदिनीयिता । ततः कुमुद ऊचे तां, का ह्री प्रश्नप्ररूपणे ॥ ९६ ॥
प्रश्नात्सोवाच वर्षाऽन्ते, वरो भाव्यरिकेशरी । रसेश्वरं वरं प्राप्य, विरहो द्वादशाऽब्दिकः ॥ ९७ ॥
षण्मासेनाऽधिकात्तस्मा-द्रज्यते स्वयमेव मे । ततः परं सुतद्वन्द्वं, भावि वेद्मीति सद्गुरो! ॥ ९८ ॥
अपृष्टमपि ते किञ्चिद्वच्मि राजगुरो! पुरः । इतो दिनादशमेऽह्नि, मृतस्ते प्रथमः सुतः ॥ ९९ ॥
अस्यामेव तमस्विन्यां, प्रेयसी तव नन्दनम् । असूत लक्षणोपेतं, रत्नं वैडूर्यभूरिव ॥ १०० ॥
अथाऽसौ शोकहर्षाभ्या-मभ्यपूर्यत सोमपः । पृष्टवानिति मत्सूनु-र्जीवितान्तं कथङ्गतः ॥ १०१ ॥



For Private and Personal Use Only

अथ चूडामणेरर्थं, नारीचूडामणिश्चिरम् । विभाव्याह नृपाऽऽदेशा - द्यदा त्वं चलितः पुरात् ॥ १०२ ॥
तदा त्वामनु सम्प्राप्त - स्तत्र सूनुरनूनधीः । त्वया निर्भर्त्सितः प्राप, कुणालां मातृसन्निधौ ॥ १०३ ॥
तत्राऽस्थाद्दिवसानेष, कतिचित्खेलनैरलम् । जग्राह तरवारिं ते, निषिद्धस्तव जायया ॥ १०४ ॥
अपमानमिति स्वाऽन्ते, विभ्रत्प्रकृतिरोपणः । निर्गत्य पुरतो वाप्या - मदाज्झम्पां मदान्मृतिः ॥ १०५ ॥
वापीपङ्कनिमग्नोऽसौ, नेक्षितो वीक्षणादपि । ततः कुरङ्गकः प्रैषि, तत्र वार्तानिवेदकः ॥ १०६ ॥
सोऽस्ति राजसभाद्वारे, स्थितः स्थाणुरिव स्थिरः । आहूयतामसौ सम्यग्, वचसि प्रत्ययोऽस्ति मे ॥१०७॥
इति श्रुत्वा वचोऽमुष्याः, सर्वज्ञोदीरितोपमम् । आजूहवदमुं राजा, सर्वोऽपि ज्ञानकौतुकी ॥ १०८ ॥
सभामेत्य कुरङ्गोऽथ, नृपं नत्वाऽमरं गुरुम् । कुमारिकोदितं सर्वं, यथातथमुवाच सः ॥ १०९ ॥
उवाचाऽथाऽमरो राजन् !, सर्वज्ञीभूतशेमुषी । युष्मद्गृहेऽवतीर्णेयं, कौतुकादिव भारती ॥ ११० ॥
कुमुदेन्दुस्ततो राज्ञा, हेमदानेन भूयसा । सुमेरुकूटप्रतिम - श्चक्रे विद्यादरिद्रहृत् ॥ १११ ॥
हेमलक्षाऽनुमानं स, दत्तवान् शासनं नृपः । प्रभूतं प्रददे लोकै - र्वस्त्रादि कुमुदेन्दवे॥ ११२ ॥
ततः कुमारी भूपाल - मानम्य कुमुदेन्दुना । अगादध्ययनाऽगारं, भूयः पठनकर्मठा ॥ ११३ ॥
ललिताङ्ग उवाचाऽथ, भूमिनाथेन मामसुम् । हेतुना प्रेषितः केन, वदावद ! निवेद्यताम् ॥ ११४ ॥
अथाऽमरगुरुः प्राह, देव ! कालिञ्जरो गिरिः । जगृहे दम्भसञ्ज्ञेन, पल्लीशेनेति चिन्त्यताम् ॥११५॥
स गृह्यतां त्वया तत्र, मुच्यतां भवता बलम् । इत्यादेशः प्रदत्तोऽस्ति, कुणालास्वामिना तव ॥११६॥

नवमो भवः

जिनदेशनायां सम्यक्त्वोपरि चम्पकमाला-कथा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ललिताङ्ग उवाचाऽथ, सम्प्राप्तो दुर्ग एव सः । कियत्पल्लीपतेर्धाम, चलतो विग्रहे मम ॥ ११७ ॥
अथ सन्मानितो राज्ञा, गतो राजगुरुः पुरात् । गुणैश्चम्पकमालाया, बद्धो दृढतमैरिव ॥ ११८ ॥
कृतस्वस्तिवचो राजा, गुरुः स्वोचितविष्टरे। निविष्टः कथयामास, विशालामगमं पुरीम् ॥ ११९ ॥
मण्डलेशेन विदधे, तेन मेऽपचितिर्भृशम् । राजप्रसादपात्रं हि, सर्वत्र किल पूज्यते ॥ १२० ॥
परं दृशोः फलं प्राप्तं, यद्दृष्टा तत्तनूद्भवा । भाग्यसौभाग्यसंस्त्यायं, जगन्नयनकार्मणम् ॥ १२१ ॥
सभाग्यं देव ! सौभाग्यं, वाणी पीयूषपोषिणी । निःसामान्या गुणा यस्याः, मतिस्तत्त्वगतिः खलु ॥१२२॥
चूडामणिषु कौशल्यं, वर्ततेऽस्या जगत्रये । ततः सविस्मयो राजा, जज्ञे ग्राम्यजनोपमः ॥ १२३ ॥
ततो राजगुरुः सर्वं, यथाश्रुतमुवाच तत् । गुणी गुणिषु रागी स्या–त्सूरो रक्ताम्बुजेष्विव ॥ १२४ ॥
यदि पुण्यप्रबन्धेन, सम्बन्धो भवतो भवेत् । पुरुषार्थस्तृतीयोऽपि, सर्वेषां प्रथमः किल ॥ १२५ ॥
पलायितं विचारेण, राज्ञ उत्कण्ठयोदितम् । नर्तितश्च प्रमोदेन, सज्जितं पुष्पधन्विना ॥ १२६ ॥
व्याजहार गुरुं राजा, मदर्थे याचिता नु किम्? । अनूढा प्रौढयत्कन्या, सर्वसाधारणी भुवि ॥१२७॥
मा भूरुत्कः क्षमापाल !, त्वमेव भविता पतिः । वर्षान्तेऽदस्तयाऽभाणि, ग्राव्णि रेखेव तद्वचः ॥१२८॥
अथोवाच कुणालेशः, कल्पान्त इव हायनः । यास्यामि जीवितस्याऽन्तं, न तस्यान्तमहं गुरो ! ॥१२९॥
तदीक्षणतृषार्ते मे, लोचने चारुलोचन ! । अलमन्यद्विचारेण, बाधते मां मनोभुवः ॥ १३० ॥
स्थगीधरोऽप्यहं भूत्वा, त्वया सह पुरीं गतः । चम्पकमालां द्रक्ष्यामि, ततो मे जीवितं गुरो ! ॥१३१॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(यतः–) तावद्विवेकः पाण्डित्य – मौचित्यं तत्त्वनिश्चयः। यावत् खेलेन्न पञ्चेषु - रङ्गे रम्भा - सुकोमले ॥१३२॥
व्याघूट्य पादैस्तैरेव, भूरिभूतबलो गुरुः। सार्द्धं स्थगीधरेणाऽथ, विशालां नगरीं ययौ ॥ १३३ ॥
अगाद्गुरुः सभामस्य, सिंहासननिषेदुषः। उवाचेति गुरो! राजा, कुतस्तूर्णं समागमः ॥ १३४ ॥
यावद्विवक्षुरस्त्येष, तावदागान्नृपाङ्गजा। पृष्टा किमर्थमत्राऽऽगा - द्गुरुरेवं सुते! वद ॥ १३५ ॥
असौ प्रश्नं विचार्योच्चै - रूचे वाचं सुकोमलाम्। कार्ये स्थगीभूतोऽमुष्य, न नतौ येन वः पदौ ॥ १३६ ॥
अथ बुद्ध्वा कुणालेशं, ललिताङ्गो जनेश्वरः। उपगृह्य स्वबाहुभ्यां, सिंहासने न्यवीविशत् ॥ १३७ ॥
कृत्वा रूपपरावर्तं, स्वामिन्निह समागमः। श्रुत्वा चम्पकमालाया - श्चूडामणिमुखोदितम् ॥ १३८ ॥
महत्सुकृतमस्माकं, यन्नेता स्वयमीयिवान्। तुष्टा कुलेश्वरी नोऽद्य, सत्याऽर्था निखिलाऽऽशिषः ॥१३९॥
स्वीक्रियन्तामिदं राज्यं, सकोशं बलबन्धुरम्। तत् कृताऽनुग्रहप्रीतं, कृत्ये मां विनियोजय ॥ १४० ॥
स्मितशुभ्राऽधरदलो, निजगादाऽरिकेशरी। अभ्यागतस्य मे युक्तं, कन्यादानं सनातनम् ॥ १४१ ॥
ललिताङ्ग उवाचाऽथ, स्मितपूर्वं रसापतिः। कन्या चूडामणिज्ञानात्, प्रदत्तेयं मया पुरा ॥ १४२ ॥
किन्त्वेषाऽस्याऽऽह वर्षाऽन्ते, भूमिनाथ करग्रहः। अथोवाचाऽमरो राजन्नेषेमो लग्नमस्ति न ॥ १४३ ॥
(यतः–) गुरुक्षेत्रगते भानौ, भानुक्षेत्रगते गुरौ। विवाहादि न कुर्वन्ते, वाञ्छन् शुभपरम्पराम् ॥१४४॥
ततः कुमारिकापाणेः, पत्रिकां ज्ञानकन्दलीम्। लिखितामर्पयामास, विशालाधिपतेः करे ॥ १४५ ॥
तां गृहीत्वा राजगुरु–रुवाच यदिति स्फुटम्। फाल्गुनश्वेतैकादश्यां, पञ्चग्रहबलानुगम् ॥ १४६ ॥



For Private and Personal Use Only

लत्तापातादिनिर्मुक्तं, हर्षकृत् हर्षणान्वितम्। रविकृक्षबलोपेत-मस्ति लग्नं सुशोभनम् ॥ १४७ ॥
॥ युग्मम् ॥
सुलग्नपत्रिकां धात्री-धवः पात्रीचकार ताम्। ललितप्रार्थितो राजा, जगाम स्नानमन्दिरम् ॥ १४८ ॥
स्नानीयवसनो राजा, स्नातो भृङ्गारवारिणा। मुक्तश्च भोज्यशालायां, नानाभोज्यमनोहृतौ ॥ १४९ ॥
सन्मानितः कुणालेशः, प्राभृतैर्द्युतिसम्भृतैः। उवाच प्रेष्यतामेषा, मया सार्कं कुमारिका ॥ १५० ॥
यदि मे परमा भक्तिर्यदि मे परमं मनः। प्रेषयाऽऽत्मसुतां तत्त्वं, मया सार्कं गुणानघ! ॥ १५१ ॥
ओमित्युक्त्वा विशालेश-श्चम्पकां सपरिच्छदाम्। सुदिने प्रेषयामास, वैरिकेशरिणा सह ॥ १५२ ॥
ततः कुणालानगरीं, तस्याः प्रासादमर्पयत्। तत्र स्थिता दशोर्दत्ते, पूर्णिमासीव संमदम् ॥ १५३ ॥
मध्याऽह्ने भूपतिः सार्कं, गुरुणा गौरवाऽन्वितम्। समेत्य चम्पका विद्व-द्गोष्ठीवैशिष्ट्यमन्वभूत् ॥१५४॥
ऊचे राजा कुरङ्गाक्षि!, यत्नः कार्यः कलागृहे। इन्दुः क्षीणोऽपि कालेन कलाभिरभिवर्द्धते ॥१५५॥
ऊचे चम्पकमालाऽथ, न प्रमाणं कला क्वचित्। निर्वृत्तेः कारणं पुंसां, धर्मस्यैव कला यतः ॥ १५६ ॥
ऊचे राजगुरुर्धर्म-विचारो युज्यते नहि। कुलक्रमागतः कार्यो, दानयज्ञादिबन्धुरः ॥ १५७ ॥
(यतः–) दुःशीला चेद्भवेन्माता, तद्विचारः क्रियेत किम्?। वैद्यौषधोपदेशः किं, विचार्यः शुद्धबुद्धिना? ॥१५८॥
अथोवाच सरोजाक्षी, विहस्य मधुरस्वरा। कुलक्रमागतं सेव्यं, दारिद्र्यं किं न सेव्यते? ॥ १५९ ॥
दुःशीला यदि माता स्यात्, पूज्यते तनयैस्तु ते। मूर्धाधिरूढः किं रेणु-र्न पात्येताऽश्चलैश्चलैः ॥१६०॥

तस्माद्विचार्य सद्बुद्धे !, धर्मो ग्राह्यः सनातनः । समस्तानां पुमर्थाना - माधारोऽसौ निगद्यते ॥ १६१ ॥
यतः–धर्मादर्थोऽर्थतः कामः, कामात्सुखफलोदयः । अतिरिक्तः परं मोक्ष - स्तेभ्यः सर्वज्ञभाषितः ॥१६२॥
सारं धर्मस्य जानीत, जीवरक्षाऽऽदिमं व्रतम् । तदभावे मुधा सर्वं, विना चक्षुर्यथा तनुः ॥ १६३ ॥
धृतिरग्निर्मनः कुण्डं, सन्तोषः समिधाश्चयः । यत्रेन्द्रियं पशुगण– एष यज्ञः सनातनः ॥ १६४ ॥
एवं युक्तिभिरुर्वीशः, पुरोधा प्रतिबोधितौ । प्राप्तवन्तौ च तीर्थेश - धर्मं सम्यक्त्वभासुरम् ॥ १६५ ॥
एकोऽपि हायनो राज्ञः, कल्प - कल्पः प्रगल्भितः । तदन्ते ललिताङ्गेन, कारितं पाणिपीडनम् ॥१६६॥
भुञ्जानः पञ्चधा भोगां–स्तया सह रसेश्वरः । ससौख्यमन्वतिष्ठच्च, शच्येव हरिवाहनः ॥ १६७ ॥
अन्येद्युरमरः स्वप्ने, आत्मानं विगताम्बरम् । लुलायपृष्ठमारूढं, प्रौढकृष्णविलेपनम् ॥ १६८ ॥
ताड्यमानं नदीतीरे, मार्यमाणं कशाऽऽदिभिः । आहूयमानं कृष्णाज्ञ्या, विभाते दृष्टवानसौ ॥ १६९ ॥युग्मम्॥
तद्भयादिव निर्निद्रः, स्मृतपञ्चनमस्कृतिः । स्वप्नार्थमथ सस्मार, निरपस्मारमानसः ॥ १७० ॥
स्वप्नार्थं न शुभं वेद्मि, ततः सज्जो भवाम्यहम् । तत्त्वार्थसाधने देवीं, दृष्ट्वा स्वप्नार्थवेदिनीम् ॥ १७१ ॥
ध्यात्वेति स शुचीभूय, पूजयित्वा जिनेश्वरम् । सभां गत्वा जजल्पाऽग्र, स्वप्नं प्रातर्महीभुजः ॥ १७२ ॥
राजाऽप्युवाच स्वप्नार्थं - मपृष्टाऽपि मम प्रिया । गदिष्यति ततः सर्वं, यथौचित्यं विधीयताम् ॥ १७३ ॥
उभावप्यागतौ देव्याः, समीपे पीतवाससौ । समाख्यच्चम्पकमाला, स्वप्नार्थं दृष्टिदृष्टवत् ॥ १७४ ॥
आयुर्मासा दश तव, विद्यते धौविधायकम् । साधयस्व परं लोकं जिनधर्मप्रसङ्गतः ॥ १७५ ॥

नवमो भवः

जिनदेशनायां सम्यक्त्वोपरि चम्पकमाला-कथा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथोवाचाऽमरो देवि!, पुराऽपि त्वं गुरुर्मम । मयाग्रेऽप्यर्हतो धर्मो, विज्ञातस्त्वत्प्रसादतः ॥ १७६ ॥
इदानीं परलोकस्य, साधनं मे निगद्यताम् । परोपकारतल्लीनाः, प्रार्थ्यंते के न सज्जनाः ? ॥ १७७ ॥
साऽप्युवाच शते सार्द्धे, योजनानां मनोहरम् । पुरमस्ति पुराणाऽऽख्यं, नूतनं वास्तुविस्तरैः ॥१७८॥
तत्राऽस्ति केवली सिद्धः, सिद्धान्त इव विश्रुतः । तस्य पार्श्वे व्रतं प्राप्य, याताऽसि परमां गतिम् ॥१७९॥
श्रुत्वेति नृपमाऽपृच्छ्य, दत्त्वा दानानि सर्वतः । ज्यायांसं नन्दनं न्यस्य, गृहभारेऽथ धुर्यवत् ॥१८०॥
नत्वा गुरुमिव क्ष्माप-पत्नीं सम्पन्नवासनः । पुरं प्राप पुराणाऽऽख्य-मपुराणसुखाऽऽशया ॥ १८१ ॥युग्मम्॥
ततः प्राप्य व्रतं शुद्धं, तपस्तप्त्वा सुदुष्करम् । सर्वकर्मक्षयादाप-दमरः परमं पदम् ॥ १८२ ॥
(इतश्च-) दुर्लभोपपदा देवी, भूपतेः पूर्ववल्लभा । तुतोष सुलसां दानै-ररुणाम्बरधारिणीम् ॥१८३॥
साऽप्यूचे तनये! किं ते, कार्यमस्ति सुदुष्करम् । येनाऽहं पूरयाम्यद्य, रञ्जिता दानकर्मणि ॥१८४॥
उवाच दुर्लभा देवी, नृपश्चम्पकमालया । रञ्जितो मां न नेत्राभ्यां, वीक्षते दुर्भगामिव ॥१८५॥
तथा तपोधनेऽमुष्याः, कलङ्कः कोऽपि दाप्यताम् । येन मां पूर्ववत्प्रीत्या, विधत्ते वल्लभां भृशम् ॥१८६॥
साऽप्युवाचाऽर्हते धर्मे, लीना चम्पकमालिका । कलङ्कः शक्यते दातुं, न तस्या दूषणं विना ॥१८७॥
अतो भगवति! प्राज्यैः, सद्दानैरसि तोषिता । सुदुष्करक्रियाकाण्डे, प्रचण्डाऽसि प्रसीद मे ॥ १८८ ॥
सुलसा सहसा दध्यौ, नूनं तस्याः समस्ति किम् ? । सम्पादनप्रयोगेण, तां प्रयामि प्रगे प्रसुम् ॥१८९॥
हुं! त्वमुष्याः सुतो नास्ति, तदुपायप्रसादनात् । गता किञ्चिच्छलं प्राप्य, कर्त्री कार्यं समीहितम् ॥१९०॥

नवमो भवः

जिनदेशनायां सम्यक्त्वोपरि चम्पकमाला-कथा



For Private and Personal Use Only

ध्यात्वेति मानसे प्रीत्या, विभाते सुलसौकसः । अगाच्चम्पकमालायाः, प्रासादं साऽऽदराशया ॥१९१॥
देवीं विज्ञपय द्वास्थे !, सुलसा त्वां दिदृक्षते । दध्यौ देवीति सम्यक्त्वे, किं मालिन्यकृतयाऽमुया ? ॥१९२॥
वारंवारं निषिद्धाऽपि, सुलसाऽगात्तदन्तिके । न्यपीदद्विहिताशीश्च, लिङ्गिनामीदृशी स्थितिः ॥१९३॥
चम्पके ! नास्ति ते पुत्रो, मनोरथकथाऽधिपः । तं विना राज्यसौख्यानि, निःशेषाणि न किञ्चन ? ॥१९४॥
गृहाण मूलिकामेनां, पुत्रसन्ततिकारिणीम् । कालीदेव्याः सपर्याञ्च, कुरु भक्त्या महीयसीम् ॥१९५॥
श्रुत्वेति चम्पकाऽवादीत्, सुलसे ! धूर्तपत्न्यसि । आर्हती परया भक्त्या-ऽन्यपूजां किं करोम्यहम् ॥१९६॥
न देवीपूजया पुत्राः, न मूलीग्रहणादपि । भवितारो भवन्त्येवं, मरौ कल्पद्रुमा इव ॥१९७॥
चेद्रक्षाकण्डकैः पुत्राः, जायन्ते हरिणीदृशाम् । वन्ध्या भवेयुः का नाम ?, वन्ध्याशब्दो हि निष्फलः १९८
एवं निर्भर्त्सिता देव्या, दशन्ती त्वधरच्छदम् । कोपेन कम्पमानाङ्गी, सुलसाऽगान्निजं गृहम् ॥१९९॥
विद्यामाहात्म्यवत्येषा, निशायां वासवेश्मनि । गते भूमिपतौ प्रीत्या, नृरूपं विचकार च ॥ २०० ॥
तं दृष्ट्वा कुपितो राजा, कृतभ्रुकुटिभीषणः । तिरश्चोपक्ष्मन्ते हि, नाऽपरः किमु तादृशम् ? ॥ २०१ ॥
यावत्खड्गपरो भूत्वा, पल्यङ्कादुत्थितो नृपः । तावददर्शनी जातो, हन्त विद्याबलं महत् ॥ २०२ ॥
वरं मृत्युर्वरं बन्धो वरं दारिद्र्यविद्रवः । न पुनः शीलमालिन्य-दुष्टरामाऽङ्गसङ्गमः ॥ २०३ ॥
विज्ञातजिनतत्त्वाऽपि, यदेषा विषयाऽऽतुरा । सुधा विषायते नित्यं, जलं तु ज्वलनायते ॥ २०४ ॥
मारयामि कथञ्चैनां, धर्मदातृत्वतो गुरुः । परन्तु सङ्गमः कार्यो, नाऽमुष्या विषयातुरैः ॥ २०५ ॥

विमृश्येति चिरं राजा, तदङ्गस्पर्शमत्यजत् । नृरूपं प्रत्यहं पश्यन्ना-ऽऽप्यागाद्वासवेश्मनि ॥ २०६ ॥
घनवृष्ट्यार्द्रकौसुम्भ-गलद्रागमिव प्रियम् । वीक्ष्य ज्ञातवती प्रश्नात्, सुलसाचेष्टितं हृदि ॥ २०७ ॥
भोगान्तरायो मे कर्मा-ऽशर्मकृत्समुपस्थितम् । विवाहादपि यत्पूर्वं, विज्ञातं ज्येष्ठबन्धुवत् ॥ २०८ ॥
स्वयमेव कृतं कर्म, स्वयं भोक्ता यथा तथा । न कोऽपि सुखकृल्लोके, दुःखकृन्नाऽपि तत्त्वतः ॥२०९॥
विषान्नानीव विषयान्, दधती नृपतिप्रिया । विशेषात् पौषधं चक्रे, शुभध्यानेन पर्वसु ॥ २१० ॥
प्रथमाना प्रबोधेन, पुरातनमुनेः कथा । खिद्यते कर्मणे स्वस्मै, भावयन्ती सुभावनाम् ॥ २११ ॥
त्रिधा पूजां जिनेन्द्रस्य, कुर्वती परमार्हती । सुलसोपकृतं देव्य-नुमेने परमं गुणम् ॥ २१२ ॥ युग्मम् ॥
अथोवाचाऽन्यदा देवीं, धर्माधीनां महल्लिका । कथं त्वयि महीपालो, नीराग इव लक्ष्यते ? ॥२१३॥
स्मित्वोवाच प्रिया राज्ञः, पृच्छसे कर्म निर्मितम् । नानारूपैर्यतो जीवो, दृश्यते भवनाटके ॥ २१४ ॥
साऽप्युवाच कुरङ्गाक्षि !, वैराग्यं कारणं शृणु । तवाऽऽयाति रताऽऽगारे, कोऽपि विद्याधरो नरः ॥२१५॥
श्रुत्वेति चम्पका दध्यौ, प्रवादोऽजनि मे कथम् ? । लोके हास्यकरः कामं, दुर्घटं घटते विधिः ॥२१६॥
ज्ञातं चूडामणेर्लोके, कृतः सुलसया मम । प्रवादो धनवाञ्छाभिः, किं न कुर्वन्ति लोभिनः ! ॥२१७॥
तथा कथं यतिष्येऽहं यथोत्तममनांस्यपि । भवन्ति कीर्तिकान्तानि, कीर्तिरेवाऽविनश्वरी ॥ २१८ ॥
प्रत्यक्षं वीक्ष्यते पुंसा, कोपो भूपस्य सांप्रतम् । अनुमाने परोक्षे वा, मीमांसा हि महात्मनाम् ॥२१९॥
अस्मिन्नकीर्तिपटहे, ताड्यमाने जगत्यपि । लज्जते जिनधर्मोऽयं, सुकरं धर्मदूषणम् ॥ २२० ॥

नवमो भवः

जिनदेशनायां सम्यक्त्वोपरि चम्पकमाला-कथा

अद्य श्वो वा गमिष्यद्भि-र्जैयाऽस्माभिरपत्रपा । जगत्कल्पान्तनित्योऽयं, धर्मो लज्जिष्यतेऽर्हतः ॥२२१॥
एवमुक्तवतीं देवीं, नेपथ्याऽन्तरितो नृपः । श्रुत्वा पल्यङ्कमासीन-श्चिन्तयाऽऽचक्षवानिदम् ॥२२२॥
भवेद्दैवादियं शील-विकला ललनोत्तमा । दिव्यादपि न शुद्धा स्या-द्दिव्या दिव्यस्य सङ्गतिः ॥२२३॥
इतो विद्वानिवोर्वीश-भावं मङ्गलपाठकः । इदं पपाठ सत्कण्ठ, उपश्रुतिविशेषतः ॥ २२४ ॥
आसीस्त्वं निशि राजरक्तहृदयेतीर्ष्यालुना वज्रिणा, प्रातः शङ्कित एव दिव्यपदवीं गत्वाऽऽत्मनः शुद्धये ।
औवोत्तापितवार्द्धितापकतलादाकृष्टमुक्तो बहिः, प्राच्याऽसौ नृप ! तप्तमाषक इव प्रद्योतनो द्योतते ॥२२५॥
श्रुत्वेति नृपतिर्दध्यौ, शुद्धत्येषा महासती । अमूषां दिव्यवाणी च, नाऽन्यथा भुवि भाविनी ॥२२६॥
कृतप्रभातकृत्योऽथ, समाहूयाऽखिलं पुरम् । धर्माऽधिकरणं प्राप्य, राजाऽऽख्यादिति सद्वचः ॥२२७॥
भो ! भो ! चम्पकदेवीयं, दुःशीला नृप्रवादतः । प्रवादश्चेत्प्रयात्येष, दिव्यान्मे भोजनं तदा ॥२२८॥
पौरा बभाषिरे राजन् !, वचो ग्राम्योचितं वदन् । विचारविकलोऽभाषि, नेदं युक्तं भवादृशाम् ॥२२९॥
सत्यमेतद्वचः पौरा !, इत्यजल्पद्रसाधिपः । तेजस्विनोऽपि वर्तन्ते, कलङ्कोज्झितये किल ॥ २३० ॥
( यतः – ) विरुद्धस्तथ्यो वा भवति वितथो वा किमपरं ?, प्रतीतः सर्वस्मिन् हरति महिमानं जनरवः ।
कुलोत्तीर्णस्यापि प्रकटनिहताशेषतमसो, रवेस्तादृक्तेजो नहि भवति कन्यागत इति ॥ २३१ ॥
इत्युदित्वा नृदेवोऽथ, देवीमाह्वातुमुद्यतः । शुद्धान्तमध्यसञ्चारां, प्रजिघाय महल्लिकाम् ॥ २३२ ॥
साऽपि चूडामणेर्ज्ञात्वा, तदभिप्रायमुच्चकैः । अपारयद्व्रतं पूर्णं, पौषधं पौषधाऽऽलयात् ॥ २३३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कृतस्नाना जिनाधीश-मभ्यर्च्य विधिपूर्वकम्। परिधाय सिते वस्त्रे, तन्नृपाऽऽस्थानमभ्यगात् ॥२३४॥
दुर्लभदेविका मुख्या, अन्तःपुर्यो दिदृक्षया। नेपथ्याऽन्तरिताः, तस्थु-र्विसंस्थुलमनस्तलाः ॥२३५॥
अथ प्रज्वलितो वह्नि-ज्वालाजालभयङ्करः। तापितं तेन तत्तैलं, यत्कटाहोदरस्थितम् ॥ २३६ ॥
यथा यथा ज्वलत्यग्नि-स्तैलं शब्दायते यथा। मनांस्यपि विपक्षाणां, दहतीव तथा तथा ॥ २३७ ॥
धर्माऽधिकरणाऽऽधीशैः, प्रक्षिप्तस्तप्तमाषकः। प्रलयाऽनलकीलाभो, भवेत् स्नेहगतोऽप्यलम् ॥२३८॥
इतश्चम्पकमालाऽथ, विस्मेराऽऽननशालिनी। उवाचेति मृदुध्यानं, संयोज्य करकुड्मलम् ॥२३९॥
मनोवचनकायैश्च, स्वप्नान्तेऽपि परो नरः। ध्यातः स्मृतश्च चेद्वह्ने!, दह्या मे करकुड्मलम् ॥२४०॥
कर्मणा मनसा वाचा, हास्येनाऽपि परः पुमान्। विधृतो वीक्षितश्चाऽस्ति, दह्या मे करकुड्मलम् ॥२४१॥
एवमुक्तवती याव-द्देवी चम्पकमालिका। तावत्स्वचेष्टितं वीक्ष्या-श्चक्रे दुर्लभदेविका ॥२४२॥
सुलसाचेष्टितं सर्व-मत्कृतं भविता स्फुटम्। गुह्यं न सहते प्रायः, सर्वदा क्षोणिमण्डलम् ॥२४३॥
अस्याः शापप्रदानेन, भाविनी भस्मसादहम्। सती प्रकोपिता यस्मा-द्देशभङ्गाय जायते ॥ २४४ ॥
ध्यात्वेति दुर्लभा देवी प्रणम्य प्रणयाऽन्वितम्। देवीं चम्पकमालाञ्च, विजिज्ञपदिदं वचः ॥२४५॥
ममाऽभ्यर्थननूर्णायाः, सुलसाया विजृम्भितम्। देवि! जानीहि ते क्वाऽपि, कलङ्कः किल विद्यते? ॥२४६॥
देहि प्रष्ठेऽभयकरं, सतीजन्ममतल्लिके!। विनम्रे सव्यलीके च, महात्मानः कृपापराः ॥२४७॥
यतः—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपजीविकेषु विमुखाः सुजना, न भवन्ति दुर्विनीतेषु। वत्सव्यथितेऽप्यूधसि, सुरभिर्नोत्क्रमयति क्षीरम् ॥२४८॥
एवमुक्तवतीं देवीं, स्वाऽपराधप्रकाशिनीम्। तुतोषाऽभयदानेन, विशालेशतनूद्भवा ॥ २४९ ॥
राजाऽपि निजगादैवं, कलङ्कः क्व नु मे भवेत्। रेणुश्चन्द्रं प्रति क्षिप्तः, क्षेप्तारमवगूहति ॥२५०॥
जिनशासनमाहात्म्यात्, क्व ते मालिन्यसम्भवः ?। विवाहादपि ज्ञानेन, विरहः कथितस्त्वया ॥२५१॥
इतो नभसि दध्वान, दुन्दुभिर्मङ्गलाऽग्रणीः। तस्याः कण्ठेऽपतन्माला, लपन्तीवाऽलिनिःस्वनैः ॥२५२॥
इदमप्यद्भुतं वीक्ष्य, चक्षुषा सुलसा भयात्। ननाम चम्पकां देवीं, भयाऽऽर्ताः परमादराः ॥२५३॥
प्राणभिक्षां प्रदेहि त्व-महिंसाव्रततत्परे!। त्वत्प्रभावादिमे देवाः, सेवाहेवाकिनो बभुः ॥ २५४ ॥
कथङ्कारमहं पारं, प्राप्नोमि भववारिधेः। विना प्रसादपोतं ते, शुभकाष्ठाप्रतिष्ठितम् ॥ २५५ ॥
तव प्रसादतो मेऽस्तु, जिनधर्मः कृपाऽऽत्मकः। वैरात्क्रमागतः स्नेहः, शतशाखः प्रवर्द्धते ॥ २५६ ॥
विद्यासामर्थ्यतो राज्ञो, दर्शितोऽन्यो मया नरः। प्रवादश्च कृतश्चाऽपि, मूढया धनवाञ्छया ॥२५७॥
यदि मां हन्ति भूमीशो, बद्ध्वा बद्ध्वा चतुष्पथे। तथाऽप्यमुष्य पापस्य, प्रायश्चित्तं भवेन्न मे ॥२५८॥
ब्रुवाणां सुलसामेवं, चम्पकोवाच मञ्जुलम्। न त्वया मे कृतं किञ्चिद्, कृतं पूर्वोत्थकर्मणा ॥२५९॥
एवं चम्पकमालोक्तं, वचः श्रुत्वाऽभ्यधुर्जनाः। विज्ञातजिनतत्त्वाया- अस्या एता सुधोर्मयः ॥२६०॥
अथाऽभिनन्द्यमानाऽसौ, वन्द्यमाना पदे पदे। अगादन्तःपुरं देवी, दत्तहस्ता महीभुजा ॥ २६१ ॥
प्रतिग्रामं प्रतिपुरं, प्रतिदिशं नृपप्रिया। कारयन्ती जिनाऽऽगारं, सुतयुग्ममसूत सा ॥ २६२ ॥







For Private and Personal Use Only

आद्योऽभूद्भुवनानन्दो, नामतस्तनयः सुधीः । करिसिंहः परः सूनुः, सुता च जयसुन्दरी ॥२६३॥
विन्यस्य भुवनानन्दे, राज्यं राजा महाबलः । परिपाल्य व्रतं श्राद्धं, सौधर्मे त्रिदशोऽजनि ॥२६४॥
सम्यक् चम्पकमालाऽपि, सम्यग्दर्शनमद्भुतम् । परिपाल्य गता देव-भूयं तस्माच्च निर्वृतिम् ॥२६५॥
जिनसमयजलनिधिसुधा-कार्मणमर्हत्पदस्य निर्मूलम् । व्रतनृपतिसार्वभौमः, स्यात् सम्यक्त्वं महारत्नम् ॥२६६॥
लक्षणमिव सन्नाम, व्योमेव व्यापकं महत्त्वेन । अरकेषु द्वादशसु, प्रकटं दर्शनमिदं जयति ॥२६७॥
यथा क्षीराऽम्भोधिर्निखिलजलराशौ क्षितितले, यथा हंसः पक्षी शकुनिषु यथेन्दुर्ग्रहगणे ।
यथा श्रीर्देवीषु त्रिदशशिखरी चाद्रिषु यथा, तथा सारं सारं जिनपतिमते दर्शनमिदम् ॥ २६८ ॥

नवमो भवः

यथा तथा महीपाल-पालितं दर्शनं परम् । तथाऽन्यैरपि कर्तव्यं, लोकद्वयसुखावहम् ॥ २६९ ॥
शङ्कया दूष्यते सम्य-ग्दर्शनं मोक्षदर्शनम् । चित्रं लुठति मष्येव, स्वैरिण्येव महाकुलम् ॥ २७० ॥
यथा निर्गामितं जन्म, धनपालेन शङ्कया । दूष्यं नहि तथा सम्य-ग्दर्शनं सर्वपावनम् ॥ २७१ ॥

जिनदेशनायां शङ्कादोषे धनपाल-दृष्टान्तः

तथा हि—
पुरे क्षितिप्रतिष्ठाऽऽख्ये, धनो नाम धनी वणिक् । धनश्रीः प्रेयसी तस्य धनपालः सुतस्तयोः ॥२७२॥
अमुष्य बालभावेऽपि, सञ्जज्ञे जननीमृतिः । महद्दुःखनिदानं हि, बालानां जननीमृतिः ॥२७३॥
शिशूनां जननीनाशो, भार्यानाशस्तु यौवने । वृद्धस्याऽऽत्मजनाशश्च, दुःखमेभ्यः परं नहि ॥२७४॥
धनपालममुं बालं, धनो वीक्ष्य व्यचिन्तयत् । पूतरः कुञ्जरीकर्तुं, कथं शक्यः स्त्रियं विना ॥२७५॥



For Private and Personal Use Only

विमृश्येति धनः श्रेष्ठी, धनदानाद्धनश्रियम् । उपायंस्त प्रशस्ताऽङ्गीं, गृहिणी गृहमीरितम् ॥२७६॥
यतः–न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते । गृहन्तु गृहिणीहीन-मरण्यसदृशं मतम् ॥ २७७ ॥
ततः सूतमसूतैषा, विषयारम्भिकं फलम् । सपत्नीसंभवं पुत्रं, निजपुत्रमिवैक्षत ॥ २७८ ॥
पठितुं ज्ञानशालाया-मिमौ यान्तौ महामुदा । पयः समरिचं पुष्टेः, प्रगे साऽपाययत्तराम् ॥ २७९ ॥
तत्पुत्रो धनदेवस्तु, निःशङ्कं पिबति प्रगे । पयःपानं विना पाठः, कथं शक्येत पाठकैः ? ॥२८०॥
पयः समरिचं दृष्ट्वा, समाक्षिकं विरेकया । धनपालः पपौ दुग्धं, विमात्राऽऽशङ्कया सदा ॥२८१॥
विमातेयं कथं मे स्यात्, सर्वथा हितकारिणी । एवं दुश्चिन्तनादेष, क्षीयते स्म दिने दिने ॥ २८२ ॥
तस्यास्ताडनभीतोऽसौ, धनपालः पयोऽपिबत् । अस्याऽभूद्वल्गुलीवातो, जीवितव्यद्रुघातकः ॥२८३॥
वैद्यानां दर्शितः सोऽथ, धनेन धनदायिना । न साध्यमूचे दुर्ध्यातं, मतिः कर्माऽनुसारिणी ॥२८४॥
क्षताङ्गः प्राप पञ्चत्व-मेष वल्गुजवायुना । शङ्कयाऽऽरेकया किन्न, भवेद्भवभृतां किल ॥ २८५ ॥
निःशूकं धनदेवोऽथ, पिबन् दुग्धमनारतम् । अधीती क्रमशो गेहा-ऽधिपती राजते स्म सः ॥२८६॥
इहलोकसुखादेष, शङ्कया निरमुच्यत । निर्वृतेर्जनकात्तद्वत्, सम्यक्त्वात्तत्त्वसेवधिः ॥ २८७ ॥
काङ्क्षया सर्वधर्माणां, दूष्यते हन्त दर्शनम् । जितशत्रुर्महीपाल-दृष्टान्तोऽत्र निशाम्यते ॥ २८८ ॥
(तथा हि-) पुरे क्षितिप्रतिष्ठाऽऽख्ये, जितशत्रुर्महीपतिः। सुबुद्धिः सचिवस्तस्य, बुद्धिरत्नमहोदधिः॥२८९॥
अमुष्याऽन्येद्युर्वायु-विजिनोर्वाजिनोर्द्वयम् । छन्नवृत्त्याऽरिभूपालैः, प्रेषितं प्राभृतीकृतम् ॥ २९० ॥

नवमो भवः

जिनदेशनायां शङ्कादोषे धनपाल-दृष्टान्तः

भूपालसचिवौ वाजि-रत्नपृष्ठमधिष्ठितौ । जवजिज्ञासया वाजि-लक्षणाऽऽक्षिप्तमानसौ ॥ २९१ ॥
उभौ यथा यथा वल्गां, सुदृढां चक्रतुश्चिरम् । तथा तथा भुवं बह्वीं, जहतुर्वायुवज्जवैः ॥ २९२ ॥
खेदादमुचतां दूरा-दुत्तेरतुरुभौ ततः । क्षुत्तृष्णापीडितौ जातौ, विपदः संपदः क्षणात् ॥ २९३ ॥
अध्यासामास मेधावी, चाभ्रंलिहं महीरुहम् । दूरादुड्डीयमानां स, वीक्षाञ्चक्रे बलाकिकाम् ॥ २९४ ॥
तद्दर्शनाज्जलस्थानं, विज्ञाय नृपमन्त्रिणौ । जग्मतुः पिबतः स्माऽम्बु, सस्नतुः शीतवारिणा ॥ २९५ ॥
फलालीं जक्षतुर्वन्यां, सस्वपतुर्दिवात्यये । द्वितीयेऽह्नि बलं प्राप, तत्पादन्यासमुच्चितम् ॥ २९६ ॥
तौ पुरं प्रापतुः स्वीयं, स्वबलेन महीयसा । पौरैर्महोत्सवश्चक्रे, किं न स्यात् स्वामिसङ्गमे ? ॥ २९७ ॥
उवाच सूपकारं राट्, सर्वमन्नं पच द्रुतम् । यथा सुचिरकालोत्था, क्षुधा संक्षीयते स्म मे ॥ २९८ ॥
उपविष्टे नृपे भोक्तुं, ततः सर्वान्नघस्मरे । आयुर्वेदी जगादाऽथ, नाथाऽकाङ्क्षां परित्यज ॥ २९९ ॥
वैद्यवाक्यमशृण्वान-स्तन्वानो भोजने रतिम् । दृतिवत्पूरयामास, जठरं नरपुङ्गवः ॥ ३०० ॥
वैद्यवारप्रतीकारे, वितथे सति सर्वथा । अत्याऽऽहाररसापूर-पूरितायुर्व्यपद्यत ॥ ३०१ ॥
यथाऽमुष्य मृतिर्जज्ञे, निःशेषाऽऽहारकाङ्क्षया । सम्यक्त्वस्य तथा भ्रंशः, परधर्मविधित्सया ॥ ३०२ ॥
सम्यक्त्वं दूष्यते मोहा-दिच्छया विचिकित्सया । दृष्टान्तोऽत्र नृप ! ख्यातो, धर्मदेवस्य विश्रुतः ॥३०३॥
(तथा हि-) श्रावस्त्यां श्रावकः शुद्ध-सञ्ज्ञिको नवतत्त्ववित् । कलाकलापनिलयो, विद्ययाऽभून्नभश्चरः ॥३०४॥
द्वीपं नन्दीश्वरं नाम, जगामाऽसौ महामनाः । ऋषभादिजिनेन्द्राणा-मर्चाः पूजयितुं त्रिधा ॥३०५॥



नवमो भवः

काङ्क्षादोषे जितशत्रु-निदर्शनम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सौधर्माद्याः सुराधीशा - स्तत्रैयुर्जिनभक्तितः । सम्यग्दर्शनसंशुद्ध्यै, भावनातः प्रभावतः ॥ ३०६ ॥
दैवं सङ्गीतकं कान्तं, वीक्षमाण उपासकः । मर्त्योऽपि त्रिदशं मन्ये, जाताऽनिमेषलोचनः ॥ ३०७ ॥
क्षणमष्टाहिकां वीक्ष्य, श्रावस्त्यामगमत्सुधीः । धर्मदेवाऽभिधं मित्रं, सभाजयितुमाययौ ॥३०८॥
दैवं परिमलं प्राप्य, मर्त्यलोकेऽप्यसम्भवि । धर्मदेव उवाचाऽथ, कुतः परिमलस्तव ? ॥ ३०९ ॥
नन्दीश्वरस्वरूपं स, जगाद प्रमदाऽऽकरम् । किं गोप्यमस्ति मित्रेषु, सर्वकार्याऽर्थकारिषु ॥३१०॥
धर्मदेव उवाचाऽथ, तां विद्यां मे निवेदय । यथाऽहं यामि तं द्वीपं, त्वयेव सुगुणानघ ! ॥ ३११ ॥
धर्मदेव ! परं विद्या, साधिता चाऽमितप्रदा । हन्त तत्साधना भद्र !, दुःसाध्या धेहि मानसे ॥३१२॥
धर्मदेवोऽथ सानन्द - मूचे दुःखावहं तु किम् ? । यावन्न चिन्त्यते ताव - दुर्लङ्घ्यो मकराकरः ॥३१३॥
सुप्रसादमना ! ब्रूहि, विद्यासाधनमद्भुतम् । यदि ते सत्यतो मैत्र्यं, पारतन्त्र्यविवर्जितम् ॥ ३१४ ॥
श्राद्धः स्माऽऽह विशुद्धात्मा, भूतेष्टायां महानिशि । एकाकिना श्मशानान्त - र्गत्वा कृत्वा बलिक्रियाम् ॥३१५॥
पूरयित्वा भुवं खातां, ज्वलद्भिः खदिरोल्मुकैः । पदाऽष्टकमनोहारि, तरौ बद्ध्वा च शिक्यकम् ॥३१६॥
स्मृत्वा मन्त्रं पवित्राङ्गः, सोऽष्टोत्तरशतोदितः । एकपादस्त्वया छेद्यः, सद्यः सत्त्ववता सता ॥ ३१७ ॥
॥ त्रिभिर्विशेषकम् ॥
ओमेवमुदिते तेन, धर्माय ददे च ताम् । नाऽदेयं नाम किं लोके, पुंसां दाक्षिण्यशालिनाम् ? ॥३१८॥
समग्रामर्घ्यसामग्रीं, कृत्वोदितमहानिशि । एकाकी नगरीबाह्ये, श्मशानशतभीषणे ॥ ३१९ ॥

नवमो भवः
विचिकित्सायां धर्मदेव-कथानकम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





क्रीडत्कौशिकसञ्चारं, योगिनीचक्रभीषणम् । स्फारफेरण्डफेत्कारं, कारागारमिवाऽन्तकम् ॥ ३२० ॥
श्रूयमाणघुरीघोरं, कुकुरोत्करदुश्चरम् । वृक्षोल्लम्बितचौरौघ-मगात् पितृवनं महत् ॥ ३२१ ॥
॥ त्रिभिर्विशेषकम् ॥
विधाय विधिविस्तार-मारूढस्तरुसिक्यके । जाज्वल्यमानमालोक्या-धस्तादेष विभावसुम् ॥ ३२२ ॥
विद्या सेत्स्यति वा नो वा, दग्धा मे दहनस्तनुम् । एवं विचिन्त्य भीभ्रान्तः, पुनरुत्तारमासदत् ॥३२३॥
वंशाऽग्रे कपिवत्तत्रा-ऽवरोहाऽऽरोहमासदत् । इतो दस्युर्ददौ कोऽपि, खात्रमन्तःपुरे तदा ॥ ३२४ ॥
रत्नपेटां समुत्पाट्य, यावदेषोऽचलत्पथि । तावद्धाविरे राज-यामिकाः सञ्ज्ञिताशयाः ॥ ३२५ ॥
नश्यंस्तेभ्यो भयभ्रान्तो, वृकेभ्य इव बर्करः । तदेव गहनं प्राप, वनखण्डमखण्डितम् ॥ ३२६ ॥
सुभटा अपि तद्दिष्वक्, परिवेष्ट्य व्यवस्थिताः । चौरोऽपि वनखण्डं तद्, भ्राम्यन् वणिजमैक्ष्यत ॥३२७॥
तत्राऽऽरोहाऽवरोहौ तौ, तस्य वीक्ष्य क्षणे क्षणे । स्वाहाप्रियसमुद्योतै-राः कोऽयं राक्षसः पुरः ? ॥३२८॥
राक्षसोऽपि करोत्युच्चै-र्मृतिं साऽप्यागमन्मम । जल्पाम्यहं ततोऽप्येनं, सिद्धिर्भवति साहसात् ॥३२९॥
ध्यात्वेति सोऽवदद्धर्म-देवं किं नाम कोऽप्यसि ? । निशीथेऽपि श्मशानस्थः, कथं शाखिनि शिक्यकम् ? ॥ ३३० ॥
सोऽवदद्धर्मदेवोऽहं, पुरीमध्यादिहाऽऽगमम् । भद्र ! साधयितुं विद्यां, परमग्नेर्बिभेम्यहम् ॥३३१॥
विद्यासिद्धिः शुभायत्ता, रौक्यन्तु दहनं मम । इत्यारुह्यावरोहामि, शिक्यके शिक्यकात्पुनः ॥३३२॥
दस्युरप्युक्तवान्विद्यां, कस्तेऽदात् सोऽथ चाऽब्रवीत् । दत्तवान् जिनदत्तो, मे सद्विद्यां परमार्हतः ॥३३३॥

नवमो भवः

विचिकित्सायां धर्मदेव-कथानकम्



For Private and Personal Use Only

चौरोऽपि ध्यातवानित्थं श्रावकाः सत्यवादिनः । येऽसत्यवचनोच्चारे, प्रायश्चित्तं दधत्यमी ॥३३४॥
क्लीबत्वान्नैष शक्तोऽस्ति निःशङ्कः साधयाम्यहम् । नहि सन्देहदिग्धानां, सम्पद्येत समीहितम् ॥३३५॥
ध्यात्वेति तस्करः प्राह, देहि विद्यां वणिग्वर ! । अथ स्मित्वाऽवदद्धर्म्मः, किमिदं भाष्यते वचः ॥३३६॥
महाकृच्छ्रेण मित्राद - प्यवाप्तेयं विचक्षण ! । अस्या लाभे परं कार्यं श्रावकत्वं यथोदितम् ॥ ३३७ ॥
धर्मदेव ! समाख्याहि, श्रावकत्वं यथाविधि । ततः सोऽप्युक्तवान् धर्मं, श्रावकाणां सविस्तरम् ॥३३८॥
धर्मदेव ! मया धर्मः, प्रपन्नः परमार्हतः । इदानीं देहि मे विद्या - मनवद्यां यशस्करीम् ॥ ३३९ ॥
धर्मदेवोऽभ्यधादेवं, न ते विद्यां प्रदाम्यहम् । याहि याहि निजं स्थानं, कुरु कार्यं यथोचितम् ॥३४०॥
अथाऽकृपः कृपाणीं स्वा - ऽऽमाकृष्यामुमवोचत । पातयिष्ये शिरस्तत्ते, फलमानं तरोरिव ॥३४१॥
यदि यच्छसि मे प्रीत - स्ततो रत्नकरण्डिकाम् । एनां तुभ्यं प्रदास्यामि, गुरवे दक्षिणोपमाम् ॥३४२॥
भीतभीतस्ततो विद्या - मेतस्मै प्रददौ स्वयम् । बन्दीकृता हि यच्छन्ति, सर्वस्वमपि सञ्चितम् ॥३४३॥
चौरोऽप्यस्याऽर्पयामास, प्रीत्या रत्नकरण्डिकाम् । विद्या स्याद्विनयाद्वित्तात्, प्रतिविद्योदितैरपि ॥३४४॥
विद्यासिद्धौ हि सन्देहो, निःसन्देहमिदं धनम् । ध्यात्वेति तां समादाय, तुतोषाऽतुच्छहर्षभाक् ॥३४५॥
निःसन्देहमनाश्चौरो, द्रुममारुह्य शिक्यके । अष्टोत्तरशतं विद्यां, जपित्वा साहसोत्कटः ॥ ३४६ ॥
समं शिक्यकपादांस्तान्, च्छन्नवान्नवविक्रमी । सद्योऽस्य विद्यासिद्धस्य, विमानं समजन्यथ ॥३४७॥
विद्यासिद्धो विमानेन, विहायस्तलमासदत् । अगान्नन्दीश्वरद्वीपं, शाश्वताऽर्हन्नमस्यया ॥ ३४८ ॥

नवमो भवः

विचिकित्सायां धर्मदेव-कथानकम्

इतः प्रभातकालोऽभू-दुदियाय नभोमणिः । सलोप्त्रः स वणिग्लब्धो, बद्धश्चौरधिया भटैः ॥३४९॥
स भटै रासभे न्यस्य, निम्बादिकविडम्बितः । वध्यभूमिमुपानिन्ये, भूमिपालनिदेशतः ॥ ३५० ॥
इतश्च तस्करोऽप्राक्षी-न्निजां विद्याऽधिदेवताम् । प्रदत्तश्रावकत्वो मे, किं गुरुः कुरुतेतराम् ॥३५१॥
ज्ञानाद्विज्ञाय तद्रूपं, यथातथमुवाच सा । कृतज्ञः समगात्तत्र, रभसा नभसाऽसकौ ॥ ३५२ ॥
विधाय वधकांस्तत्र, ततश्चित्रमयानिव । पुर्याः पिधानवच्चक्रे, उपरिष्टान्महाशिलाम् ॥ ३५३ ॥
पुरद्वाराणि सोऽबध्ना-न्नागराश्च चकम्पिरे । आर्तनादैर्नभोऽव्यापि,-वज्रपातसहोदरैः ॥ ३५४ ॥
द्विपाः स्तंभान् समुन्मूल्य, भ्रेमुरूर्ध्वकराः पुरे । धर्तुकामा महास्थामा, निपतन्तीं शिलामिव ॥३५५॥
आत्रोट्य मन्दुराः कामं, चेलुः प्रजविनो हयाः । फेलाभिरुल्लङ्घयितुं, शिलामिव महौजसा ॥३५६॥
शिलां व्योम्नि समालोक्य, कल्पकालसखीमिव । चक्रन्दुः पुरवास्तव्याः प्रादुर्भूतगलग्रहाः ॥३५७॥
वाटकक्षिप्ततैरश्च्य-साधर्म्यं पुरवासिनि । प्रतोलीबन्धतो जातं, भयभ्रान्तो नृपोऽजनि ॥ ३५८ ॥
ततोऽर्द्धशाटकं भूपः, परिधाय स दैन्यधीः । आकाशाऽभिमुखं पाणि-मुत्क्षिप्यैवमवोचत ॥३५९॥
देवो वा दानवो वाऽपि, यः कोऽपि कुपितः पुरः । स मे प्रसादमाधाय, वदेत्तस्याऽस्मि किङ्करः ॥३६०॥
सिद्धविद्योऽप्यवाक् हृद्यं, नभस्थो जगतीपतिम् । विमन्तुस्तु वणिग् योऽस्ति, स भटैः संयतः प्रगे ॥३६१॥
तं प्रसादय गत्वाऽऽशु, रक्षामि क्ष्मापते ! यथा । अन्यथा भस्मसात्कुर्वे, त्वत्पुरं निखिलं खलु ॥३६२॥
ततस्तत्र नृपो गत्वा, सपौरः सपरिच्छदः । पतितः पादयोरस्य, सद्भक्त्येदमवोचत ॥ ३६३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हन्त श्रेष्ठिन्! महाभाग! प्राणभिक्षां प्रयच्छ नः । अविचारितमेतन्मे, कृतं दुष्कृतमद्भुतम् ॥३६४॥
एवं प्रसाद्य वासांसि, दिव्यानि परिधाप्य सः । विभूष्य भूषणैर्नव्यै-रधिरोप्य करीश्वरे ॥ ३६५ ॥
निःशेषपुरमध्येन, निनायैनं नृपो गृहम् । आसाञ्चक्रे च तस्याऽग्रे, पदातिरिव भक्तितः ॥ ३६६ ॥युग्मम्॥
इतोऽपहृत्य तां गुर्वीं, शिलां सोऽपि मलिम्लुचः । तत्राऽऽगात्स्वविमानेन, यत्राऽऽसीनो नरेश्वरः ॥३६७॥
असह्यतेजा मध्याह्ने, पूषेवाऽऽभरणद्युता । नत्वाऽमुं चोरवृत्तं स्वं, नरेन्द्राय न्यवेदयत् ॥ ३६८ ॥
तदाऽऽकर्ण्य महीशोऽपि, परमं विस्मयं गतः । प्रपेदे श्रावकत्वं त-न्निजधाम जगाम च ॥ ३६९ ॥
अथ नत्वाऽगमच्चौरो, विमानेन नभलस्तम् । गच्छतोत्तम्भितास्तेऽपि, वधकाः स घृणी यतः ॥ ३७० ॥
विद्या यदत्र नाऽसिद्ध्यद्व-णिजोऽस्य विचिकित्सया । दस्योरकृतशङ्कस्य, सिद्धिसौधमुपेयुषी ॥३७१॥ नवमो भवः
तथा सम्यक्त्वमेवाऽस्य, दूषितव्यं न शङ्कया । निःशङ्कितैः पालनीयं, साधुभिः श्रावकैस्तथा ॥ ३७२ ॥ विचिकित्सायां
मिथ्यादृशां प्रशंसा न, विधेया मोक्षमिच्छुना । ऋषिदत्ता यथा चक्रे, प्रत्यहं मोहदूषिता ॥३७३॥ धर्मदेव-कथानकम्
(तथा हि–)अस्त्यत्र भरतक्षेत्रे, वर्द्धमानजिनोदितम् । श्रीवर्द्धमानपौराढ्यं, वर्द्धमानाऽभिधं पुरम् ॥३७४॥
संप्रतिभूपतिस्तत्र, त्रिखण्डभरताऽधिपः । तस्मिन् वृषभसेनाऽऽख्यः, सार्थवाहो महर्द्धिकः ॥३७५॥
प्रिया वीरमती तस्य, धीमती परमार्हती । सहदेव-वीरदासौ, ऋषिदत्ता च पुत्रिका ॥ ३७६ ॥
तस्या गुणैः समाऽऽकृष्टा, आजग्मुस्तत्कृते वराः । तेषां मिथ्यादृशामेष, नाऽदत्त परमार्हतः ॥ ३७७ ॥
परमश्रावकस्याऽपि, देया नाऽन्यस्य भूभुजः । अयमर्थः प्रसिद्धोऽभूत्, ख्यातिर्वात्येव सर्वगा ॥३७८॥

For Private and Personal Use Only

इममाकर्ण्य वृत्तान्तं चन्द्रकूपाऽऽख्यपत्तनात् । तदर्थी रुद्रदत्ताख्यः, समागात्तत्र सार्थपः ॥३७९॥
गृहे कुबेरदत्तस्य, सख्युर्भाण्डं निधाय सः । यावत्तस्या पणे तस्थौ, वीक्षमाणः पुरश्रियम् ॥ ३८० ॥
असौ तावदिमां यान्तीं, ऋषिदत्तां निरीक्ष्य ताम् । मित्रं पप्रच्छ स च्छन्नं, किमियं वृषभात्मजा ? ॥३८१॥
सोऽवक् सेयं परं नाप्या, विना श्राद्धत्वमुच्चकैः । तल्लिप्सुः श्रावकीभूतो, रागान्धाः किं न कुर्वते ? ॥३८२॥
सप्तक्षेत्र्यां धनं दत्ते, शृणोत्याऽऽर्हतशासनम् । वन्दते सुगुरुं शश्व-दृषिदत्ताजिघृक्षया ॥ ३८३ ॥
तद्वृत्तमथ सद्वीक्ष्य, वृषभो रञ्जितो गुणैः । आत्मनैव ददौ पुत्रीं, छद्मना वञ्च्यते जगत् ॥ ३८४ ॥
परिणीय चिरं स्थित्वाऽपृच्छत् श्वशुरमात्मनः । पितृलेखाऽऽगमात् प्राप, स्वपुरं प्रियया समम् ॥३८५॥
गलद्रागोऽभवद्धर्मे, ह्युपाधिस्स्तोककालिकः । ऋषिदत्तापि मिथ्यादृक्, सर्वः संस्तवगोचरः ॥३८६॥
(यतः–)स्तौति मिथ्यादृशः प्रीते-र्वन्दते च दिवाऽनिशम् । दानं ददाति भावेन, विस्मृतं दर्शनं वरम् ॥३८७॥
तयोः स्वरूपमाकर्ण्य, सन्देशस्थितिरेव न । पितृभ्यां रचिता धर्म-विकलाद्धि मृतो वरः ॥ ३८८ ॥
ऋषिदत्ताऽन्यदाऽसूत, सुतं द्यौरिव भाःपतिम् । स महेश्वरदत्ताऽऽख्यो, ववृधे कल्पवृक्षवत् ॥३८९॥
इतोऽस्ति वर्द्धमानाऽऽख्ये, नगरे तस्य मातुलः । सहदेवः प्रिया तस्य, सुन्दरी नाम सुन्दरी ॥३९०॥
तस्या आपन्नसत्त्वत्वा-दोहदो दुर्लभोऽजनि । सा क्रमाचन्द्रलेखेव, कृशा श्यामलपक्षगा ॥ ३९१ ॥
सहदेवस्तथाभूतां, प्रियां पप्रच्छ वत्सलः । साऽवददोहदान्नाथ !, दौर्बल्यं मम वर्तते ॥ ३९२ ॥
सोऽप्यूचे दोहदः कस्ते ?, दोहदं शंस तन्मम । साऽवदन्नर्मदातीरे, गन्तुं मम मनोरथः ॥ ३९३ ॥

नवमो भवः

प्रशंसादोषे
ऋषिदत्ता-
कथानकम्



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

अथ कृत्वाऽस्य सामग्रीमाऽऽश्वास्यैनां सुलोचनाम् । स नर्मदानदीं प्राप-दविखण्डैः प्रयाणकैः ॥३९४॥
सहस्रार्जुनवच्चक्रे, नर्मदायाः स नर्मवित् । अव्रीडो मज्जनक्रीडां, भार्यया सह सस्मयः ॥ ३९५ ॥
संपूर्णे दोहदे तस्या, नर्मदापुरसञ्ज्ञिकम् । पुरं निर्माय तत्रैवा-कारयद्देवमन्दिरम् ॥ ३९६ ॥
याताऽऽयातैर्नृणां सार्थै-र्वसद्भिर्धनिनां गणैः । प्रख्यातिं महतीमगात्, काव्यैरिव महाकविः ॥३९७॥
प्रेयसी सहदेवस्य, पूर्णसर्वमनोरथा । सुखेन सुषुवे पुत्रीं, सर्वलक्षणलक्षिताम् ॥ ३९८ ॥
सहदेवो व्यधात्तस्याः, सुतवत्कन्यकोत्सवम् । नर्मदासुन्दरीत्यस्या, नाम चक्रे च साऽन्वयम् ॥३९९॥
सा क्रमाद्ववृधे बाला, कलाकौशल्यशालिनी । अभूदतीव विदुषी, समग्रेश्वरमण्डले ॥ ४०० ॥
विलासकुसुमारामां, लोकनेत्राऽध्वगप्रपाम् । लावण्यपण्यविपणीं, सा यौवनमशिश्रियत् ॥ ४०१ ॥
रूपमप्रतिमं तस्याः, श्रुत्वा श्रोत्रप्रमोदकृत् । ऋषिदत्ता ध्यातवती, सर्वः स्वहितवाञ्छकः ॥ ४०२ ॥
कथं मे भविता सूनोः, सा कान्ता करमङ्गलात् । अथवा क्व शुभं मेऽस्ति, त्यक्तायाः सुजनैः समम् ॥४०३॥
अर्हद्धर्मोऽपि मिथ्यात्वा-सक्तया मदमत्तया । चिन्तामणिरिव त्यक्तः, कुलक्रमसमागतः ॥ ४०४ ॥
समं मया विमुक्तं यै-ऽऽरालापाद्यपि वैरिवत् । ते दास्यन्ति कथं पुत्रीं, मत्सूनोर्नर्मदां शुभाम् ॥४०५॥
ध्यात्वेति साऽरुदत्कामं, दृष्ट्वा तामुक्तवान्पतिः । मयि प्रिये ! त्वदधीने, दुःखं बिभर्षि किं हृदि ? ॥४०६॥
दुःसाध्यं साधयाम्युच्चै-स्तदहं क्षणमात्रतः । दुष्प्रापं तत्पूरयामि, बहुभिर्द्रविणव्ययैः ॥ ४०७ ॥
ब्रूहि सुभ्रु ! भ्रमं मुक्त्वा, ततः सा न्यगदत्स्फुटम् । दीकते कार्यकोटीं हि प्रस्तावे भाषितं वचः ॥४०८॥

नवमो भवः

प्रशंसादोषे ऋषिदत्ता-कथानकम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तत् श्रुत्वा तत्सुतोऽवादी - त्तात! प्रेषय मां द्रुतम्। मातुः पितृगृहे कार्य - सिद्धिर्नो दूरवर्तिनाम् ॥४०९॥
विनयादिगुणग्रामैः, सर्वानाराध्य तां सुताम्। परिणीय विधाताऽस्मि, मातुर्मङ्गलसम्पदम् ॥ ४१० ॥
रुद्रदत्तोऽप्यथोवाच,युक्तमाऽऽख्याति मत्सुतः। दौहित्रे यादृशी प्रीतिः,पौत्रे हन्त! न तादृशी ॥४११
इत्युक्त्या रञ्जितः सार्थ - वाहः सर्वं विधाय सः। प्रजिघाय ततः पुत्रं, नर्मदानगरं प्रति ॥ ४१२ ॥
निवेश्याऽथ बहिः सार्थं, द्वितीयकपुरोपमम्। जगाम मन्दिरं माता - महस्य दुहितुः सुतः ॥ ४१३ ॥
भक्त्या मातामहाऽऽदींश्च, परितोषं निनाय सः। मानयाञ्चक्रिरे तेऽपि, सर्वस्याऽऽभ्यागतो गुरुः ॥४१४॥
विनयाद्यैर्गुणैरेषः, सुबुद्धिस्तानतोषयत्। विनयः कार्मणं लोके, मन्त्रतन्त्रविवर्जितम् ॥४१५॥
तांश्च प्रार्थयते कन्यां, ज्ञात्वा तद्भावमङ्गिनाम्। अन्यधर्माऽभिभूतत्वा - द्ददते न च ते क्वचित् ॥४१६॥
याते विचारे धर्मस्य, कन्यया प्रतिबोधितः। भावितात्माऽजनि श्राद्धः, सम्यक् सम्यक्त्वसौम्यधीः ॥४१७॥
अथाऽऽदायि सुताऽमुष्मै, मातुः पित्रा धनव्ययैः। अप्रीयत तया सोऽपि, धर्मकामानबाधयत् ॥४१८॥
अन्यदा स्वजनान् पृष्ट्वा, नर्मदासुन्दरीपुरात्। नर्मदासुन्दरीं प्राप्य, स जगाम पितुर्गृहम् ॥४१९॥
स्वोचितप्रतिपत्त्याऽसौ, श्वश्रू - श्वशुर - संहतिम्। वशीचकार स्वगुणैर्विनयात् को न रज्यते? ॥४२०॥
स महेश्वरदत्तोऽपि, तया सह दिवाऽनिशम्। गणयन् धन्यमात्मानं, कल्याणी भक्तिरर्हति ॥४२१॥
रुद्रदत्तार्षिदत्ते च, जिनधर्मकथानकात्। पुत्रप्रबोधमाहात्म्या - द्भूतां पुनरार्हतौ ॥ ४२२ ॥
अन्येद्युर्मुखमादर्शे, वीक्षमाणा गवाक्षगा। नर्मदासुन्दरी क्षोणी - मनवेक्ष्य प्रमादतः ॥ ४२३ ॥

नवमो भवः

प्रशंसादोषे ऋषिदत्ता-कथानकम्



For Private and Personal Use Only

ताम्बूलरसमक्षेप्सी-त्सोऽपतन् मुनिमस्तके । ततः प्रकुपितः स्माऽऽह, साधुर्भ्रूकुटिभीषणः ॥ ४२४ ॥
याऽऽच्छोटयति मां पापा, सा भूयात्प्रियवर्जिता । ममाऽभक्तिफलं प्राप्य, स्वाद्यतां शोकजो रसः ॥४२५॥
[ युग्मम् ]
तच्छ्रुत्वा वचनं क्रूरं दुःसहं चक्रपातवत् । उत्तीर्य जालकादाशु, वस्त्रैर्मुनिममार्जयत् ॥ ४२६ ॥
अपतत्पादयोस्तस्य, निन्दन्ती बहुशः कृतम् । दैन्येन विनयेनाऽपि, क्षमय स्वेदमाख्यत ॥ ४२७ ॥
अक्षिपं दुःखपाथोधौ, चात्मानं त्वदभक्तितः । अमुश्चं भोगसौख्यानि, मुक्तताम्बूलदम्भतः ॥४२८॥
निन्द्येभ्योऽपि निन्द्याऽहं, पापेभ्योऽपि हि पापिनी । यन्मया चक्षुषा साधु-र्वीक्षितो न हितेच्छया ॥४२९॥
कुरु कारुण्यपाथोधे! मम शापादनुग्रहम् । अशनेरमृतस्यापि, योनयो वशिनोऽब्दवत् ॥ ४३० ॥
श्रुत्वेति नर्मदावाक्यं, मुनिनोदीरितं वचः । साम्प्रतं मम कोपाह्नि-र्निर्ववौ विनयाऽम्भसा ॥ ४३१ ॥
अनाभोगादपि मया, वचः शापोपमं त्वयि । उदीरितं परं कर्म-विपाको भविता तथा ॥ ४३२ ॥
त्वयाऽनुभाव्यं तत्कर्म, भवान्तरनिकाचितम् । हेतुकर्तृसमोऽभूवं, नान्यथा भवितव्यता ॥ ४३३ ॥
( यतः- ) अदान्तैरिन्द्रियहयै-श्चलैरपथगामिभिः । हसद्भिः क्रियते कर्म्म, रुदद्भिरनुभूयते ॥४३४॥
भाव्यर्थं सा ततो ज्ञात्वा, प्रणम्य व्यसृजन् मुनिम् । अथाऽऽख्यद्रुदती पत्यु-स्तां कथां दुःसहव्यथाम् ॥४३५॥
सोऽप्यूचे दयिते! नित्यं, कुरु पूजां जिनेशितुः । जिनाऽर्चासु निलीनानां, प्रत्यूहः शान्तिमृच्छति ॥४३६॥
स्वमोपदेशवत्तस्य, तदङ्गीकृत्य कृत्यवित् । भेजे जैनेश्वरं धर्मं, सविशेषं सुलोचना ॥ ४३७ ॥
सुहृद्भिः सुहृदां गोष्ठीं, गतोऽन्येद्युरभाष्यत । नराणां यौवनं भद्र!, विभवोपार्जनक्षणः ॥ ४३८ ॥

नवमो भवः

प्रशंसादोषे ऋषिदत्ता-कथानकम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पितुर्लक्ष्मीपरिभोगो, बालत्वे किल युज्यते । स्तन्यपानमिवाऽऽवयो - र्यौवने तु त्रपाकरः ॥ ४३९ ॥
नर्मदासुन्दरीजाने !, धनमर्जय कोटिशः । व्रज त्वं यवनद्वीपं, शिक्षितां दर्शयन् कलाम् ॥ ४४० ॥
ओमित्युक्त्वा ततः सोऽपि, प्रबोध्य पितरौ भृशम् । तद्वीपयायी सद्भाण्ड – मग्रहीन्मित्रमण्डितः ॥४४१॥
सस्नेहं नर्मदामूचे, स्थेयं मातुस्त्वयाऽन्तिके । पारे गन्ताऽस्मि पाथोधे–स्तव खेदाऽसहं वपुः ॥ ४४२ ॥
अथोचे नर्मदा स्वामिन् !, माऽवादीर्वल्लभेदृशम् । जीमूतं स्वपतिं त्यक्त्वा, किं खेलति तडिल्लता ? ॥४४३॥
अथैनां सममादाय, पुरान्निर्गत्य सार्थपः । उपरत्नाकरं पोते – ष्वारुरोह तया समम् ॥ ४४४ ॥
अम्बुधौ गच्छतां रात्रौ, केनापि मधुरस्वरम् । गीतं गातुं समारेभे, मन्द्रमध्यादिभेदवत् ॥ ४४५ ॥
तच्छ्रुत्वा नर्मदाऽवादी - त्स्वरलक्षणपण्डिता । प्रियाऽसौ गाथकः पाथः - पूर्णमेघतनुच्छविः ॥४४६॥
परं बर्बरकेशोऽयं, रणरङ्गी तु साहसी । द्वात्रिंशदब्दकः स्थूल – पाणिश्चिपिटनासकः ॥ ४४७ ॥
अमुष्याऽस्ति मषो गुह्ये, प्राणनाथ ! तिलाकृतिः । तन्निशम्य प्रियो दध्यौ, मत्प्रियाऽनेन सङ्गता ॥४४८॥
एतावन्तं क्षणं यावत्, अभूदेषा महासती । इदानीं तु निराधारं, शीलरत्नं विनङ्क्ष्यसि ॥ ४४९ ॥
तत्किमब्धावब्धौ क्षिपाम्येनां, मोटयामि कृकाटिकाम् । किं हन्मि शातशस्त्रेण, किम्वा नासां छिनद्म्यहम् ४५०
एवं मिथ्याविकल्पेन, यावत्तस्थौ विसंस्थुलः । तावत्कूपाग्रगोऽवादी - द्धृत्त पोतान् महाधियः ! ॥४५१॥
प्राप्तोऽयं राक्षसद्वीपो, गृह्यताऽमुत्र सत्पयः । पोता पोता इव धृता - स्ततस्तस्य गिराऽखिलाः ॥ ४५२ ॥
यावज्जलेन्धने लोके, द्वीपाद् गृह्णन्ति सर्वतः । तावत्तां मायया स्माह, नरः कूटशते पटुः ॥ ४५३ ॥

नवमो भवः

प्रशंसादोषे ऋषिदत्ता-कथानकम्



For Private and Personal Use Only

कान्तेऽयं कामिनीद्वीप-स्तदुत्तीर्य निरीक्ष्यते । ओमित्युवाच सा पोता-दुत्ततार सुखादिव ॥ ४५४ ॥
वनाद्वनं भ्रमन्ती सा, पिबन्ती सारसं पयः । जलकेलिं वितन्वन्ती, लतागारमथैक्षत ॥ ४५५ ॥
ततः पल्लवपल्यङ्के, प्रसुप्तौ दम्पती क्षणम् । निद्राणायां नर्मदायां, स वैरीव व्यचिन्तयत् ॥ ४५६ ॥
असतीत्वं पतेदस्या, मुक्त्वा चेन्म्रियते स्वयम् । राक्षसैर्भक्ष्यते चेद्वा, क्षुधया च विडम्ब्यते ॥ ४५७ ॥
चिन्ताऽनुरूपोऽप्यर्थः स्या-दिति ध्यात्वा महेश्वरः । शनैरपससाराऽथ, न विचारो विरागिणि ॥४५८॥
उपपोतमथाऽयासी-द्वुरोदासाविति स्फुटम् । हा प्रिया भक्षितेदानीं, राक्षसेन दुरात्मना ॥ ४५९ ॥
परित्रातुमशक्तस्तां, कातराणां शिरोमणिः । पूरयध्वमतः पोतान्, माऽऽगमो रक्षसोऽस्त्विह ॥४६०॥
भयभीतैस्ततः पोताः, पूरितास्तैः क्षणादपि । मायया वञ्च्यते लोकः, शब्दैः कूटतरात्मकैः ॥४६१॥
नाऽऽहारमेष जग्राह, विललाप दिवानिशम् । विलुलोठ महीपीठे, परप्रत्ययतापरः ॥ ४६२ ॥
प्रबोध्य पौतिकैरेष, महाकष्टेन भोजितः । मायावी तनुते पाप-मपवादं च रक्षते ॥ ४६३ ॥
गतोऽथ यवनद्वीपं, प्राप्य पण्यानि कोटिशः । तथैवाऽगान्निजपुरं, लाभोऽभूद्वाञ्छिताऽधिकः ॥४६४॥
मातापित्रोर्नर्मदाया रुदन् वृत्तान्तमाख्यत । मायाऽमुष्यदुराशस्य, रामाभ्योऽपि गरीयसी ॥४६५॥
दुःखार्तौ पितरौ तस्या-श्चक्राते कृत्यमन्त्यगम् । सोऽपि वित्तव्ययश्चक्रे, सदृशो सदृशः शठः ॥४६६॥
इतश्च-
निर्निद्रा नर्मदादेवी नाऽपश्यन्ती परं प्रियम् । उवाच नर्मणा नाथ!, क्व लीनोऽसि लतान्तरे ? ॥४६७॥

नवमो भवः

प्रशंसादोषे ऋषिदत्ता-कथानकम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





देहि मे दर्शनं नाथ !, वनेऽमुत्र बिभेम्यहम् । परिहासेन पर्याप्त-मिदानीं प्रियदर्शन ! ॥ ४६८ ॥
गतोऽस्ति वल्लभः क्वाऽपि, मुखप्रक्षालनाकृते । मद्योग्यं नीरमानेतुं, कथं त्यजति मां वने ? ॥ ४६९ ॥
हा नाथ ! त्वां विना भीमे, कान्तारेऽत्र म्रियेतराम् । देहि प्रतिवचस्तूर्ण-मबला सान्वया वने ॥४७०॥
अथोत्तस्थौ च साक्षेपं, कण्टकैः पीडिता क्रमे । उपाविक्षदथाऽचालीत्, स्खालीभूतमनोरथा ॥ ४७१ ॥
अमुष्यास्तादृशीं वीक्ष्य, दशां दशदिशाम्पतिः । अनीश्वरः परित्रातुं, ममज्ज सरिताम्पतौ ॥ ४७२ ॥
प्रससार रसापीठे, तमस्तोमस्य विस्तरः । महतामापदि प्रायः, खलः खेलति हेलया ॥ ४७३ ॥
तस्मिन्नेव लतागारे, रुदती बिभ्यती सती । सुष्वाप तरुपल्यङ्के, निद्रां तत्याज वेगतः ॥ ४७४ ॥
सस्मार पितुरागार-सुखं पत्युः सुखं ततः । मुमूर्च्छ च पपातोच्चै, रुरोद करुणारवैः ॥ ४७५ ॥
एकाकिनी न जानामि, बहिर्गन्तुं गुणाकर ! । कथमेवम्विधे भीमे, कान्तारेऽत्र भ्रमाम्यहम् ॥ ४७६ ॥
इति चिन्तानिशाचर्या, ग्रस्ता तद्भूतिरङ्गना । चतुर्युगोपमां दैवा-च्चातुर्यामीमवाहयत् ॥ ४७७ ॥
अथोत्थाय प्रगे देवं, स्मरन्ती ध्यातवत्यदः । रे रे जीव ! कथङ्कारं, वने विलपसि स्फुटम् ? ॥ ४७८ ॥
एवं दैन्यपरा निन्ये, दिनानां पञ्चकं सती । निराशा दिवसे षष्ठे, पोतस्थानमुपागमत् ॥ ४७९ ॥
आलोक्य वहनस्थानं, मुक्तकण्ठं रुरोद सा । रोदनान्नापरं भीरो-रौषधं हृदि शल्यहृत् ॥४८०॥
सप्तमे दिवसे प्राप्ते, प्रक्षाल्य चरणद्वयम् । जैनबिम्बं व्यधान्मृत्स्ना-मयं पुष्पैरपूजयत् ॥ ४८१ ॥
फलैर्गिरिभवैरेषा, प्राणवृत्तिमथ व्यधात् । व्यचिन्तयदिमं वार्द्धिं, लङ्घयिष्याम्यहं कथम् ? ॥ ४८२ ॥

नवमो भवः

प्रशंसादोषे ऋषिदत्ता-कथानकम्

॥ १२२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यालोच्य तया वार्द्धि-तटे प्रोत्तम्भितो ध्वजः। लक्षणं भग्नपोतानां, जीवो जीवेदुपायतः ॥४८३॥
इतश्च वीरदासाऽऽख्यः, पितृव्योऽस्याः कथञ्चन। प्रयान् बर्बरकुले च, तत्राऽऽगाद्दत्तशब्दवत् ॥४८४॥
चिह्नं वीक्ष्य पताकाया, उत्तीर्य पद्चारतः। तत्राऽऽगाद्वीक्षयामास, नर्मदासुन्दरीं सुताम् ॥ ४८५ ॥
पूजयन्तीं जिनं भक्त्या, स्तुवन्तीं सरसैः पदैः। नृत्यन्तीं च पुरो भावान्, नमन्तीं प्रणिधानतः ॥४८६॥
तां दृष्ट्वा चिन्तयामास, नेयं मे नर्मदा सुता!। क्व सा क्व चाऽयमम्भोधिः, कथमेकाकिनी च सा ॥४८७॥
उपलक्ष्य पितुर्भ्राता, महास्नेहमनोहरम्। तत्कण्ठपीठमालम्ब्य, रुरोदाऽऽरावभैरवम् ॥ ४८८ ॥
सोऽपि तां प्रत्यभिज्ञाय, बाष्पपूर्णेक्षणोऽजनि। पृच्छति स्म कथं भद्रे!, कान्तारे देवतासखि! ॥४८९॥
यथावृत्तं सुषुप्ता सा, तं वृत्तान्तमचीकथत्। घटते दैवतः पुत्रि!, मा विषीदेति सोऽब्रवीत् ॥ ४९० ॥
देहशुद्धिं विधाप्याऽथ, भोजयित्वा सुनन्दिनीम्। प्रयातो बर्बरकुले, स पोतादुत्ततार च ॥ ४९१ ॥
विस्तार्याऽथ पटकुटीं, तत्र विन्यस्य नर्मदाम्। उपराजं गतः पोत-नायकः प्राभृतोत्तरः ॥ ४९२ ॥
राज्ञा सम्मानितः कामं, निजाश्रयमशिश्रियत्। इतश्च तत्र वास्तव्या, हरिणीति पणाङ्गना ॥ ४९३ ॥
वेश्यानां स्वामिनी राज-गौरवाऽर्हा मनस्विनी। सर्ववेश्याऽर्जितं द्रव्यं, स्वस्याऽपि भूभुजेऽर्पयत् ॥४९४॥
तस्यै पोताधिपो बाह्यो, निखिलो नृपशासनात्। दीनाराणां दशशतीं, ददात्यष्टाऽधिकां धनी ॥४९५॥
अन्येद्युः प्रेषिता चेटी, वीरदासमवोचत। अभूमिगोचरी देवी, कामुकी हरिणी तव ॥ ४९६ ॥
वीरदासो बभाषेऽथ, स्मित्वा स्मरपराजयी। स्वदारतोषिवान् भद्रे!, कामये नाऽपरामपि ॥ ४९७ ॥

नवमो भवः

प्रशंसादोषे ऋषिदत्ता-कथानकम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





आभाव्य दानं तद्योग्यं, गृहाणेदं विशेषतः । तदादायाऽर्प्पयत्तस्यै, तत्स्वरूपमभाषत ॥ ४९८ ॥
कथमेतत्त्वयाऽऽनीतं, भद्रे! पोताधिपं विना । न मे गृहेऽस्ति वित्तस्य, सङ्ख्या राजप्रसादतः ॥ ४९९ ॥
तमानय वणिग्नाथं, मानयामि स्मरान्धला । नररूपे तु रक्ताऽस्मि, विरक्ताऽस्मि धनग्रहे ॥ ५०० ॥
सा गत्वा तदमुष्याऽथ, यथाबुद्धि स्म भाषते । सोऽप्यूचे मृत्युकालेऽपि, शीलमुज्झाम्यहं नहि ॥५०१॥
इतस्ततः क्षिपन्ती सा, चक्षुर्दिक्षु विचक्षणा। नर्मदासुन्दरीं वीक्षा-मास कासरदोज्ज्वलाम् ॥ ५०२ ॥
तां दृष्ट्वा चिन्तयामास, यस्यैषा वरवर्णिनी । नूनं बिभर्ति स स्वीय-दारसन्तोषभाग्व्रतम् ॥ ५०३ ॥
स्वकीयहावभावैस्त-मक्षुब्धं वीक्ष्य चेटिका । गत्वोवाच स्वरूपं सा, स्मित्वैवं पुनरब्रवीत् ॥ ५०४ ॥
स्वामिन्यमुष्य सा कापि, देवीव वरवर्णिनी । सा चेत्पार्श्वगता ते स्यात्तदा त्वं नायिकादिमा ॥५०५॥
श्रुत्वेति दम्भसंरम्भात्, सा पुनः प्रेषिता तया । नाथाऽर्प्पयाङ्गुलीरत्नम्, क्षणमेकं ममान्तिके ॥५०६॥
यथा मे स्वामिनी नाथ!, तव मुद्राऽनुसारतः । कारयिष्यति तन्मुद्रा-मिमां सोऽपि तदाऽऽर्प्पयत् ॥५०७॥
तामाऽऽदाय गता चेटी, प्रयातेऽन्यत्र पौतिके। पुनरेत्य छलं प्राप्य, नर्मदामिदमब्रवीत् ॥ ५०८ ॥
सुभगे! वीरदासस्त्वामाह्वाययति मन्मुखात् । तव प्रत्यायनकृते, मुद्रामेनां विलोकय ॥ ५०९ ॥
वीरदासाऽभिधानेनाऽ-ङ्कितां तां वीक्ष्य चक्षुषा । निर्विकल्पमतिः प्राप, तदाऽऽगारं तया सह ॥५१०॥
अपद्वारेण तां नीत्वा, न्यस्यद्भूमिगृहे द्रुतम् । तस्य प्रत्यर्प्पयन्मुद्रां, धूर्ताः सर्वं हि जानते ॥५११॥
गतः स्थानं निजं सोऽथ, नर्मदामनिभालयन् । पृच्छन् परिजनं सर्वं, सर्वत्रेक्षितवानसौ ॥ ५१२ ॥

नवमो भवः

प्रशंसादोषे ऋषिदत्ता-कथानकम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अप्राप्तशुद्धिलेशोऽपि, ध्यातवानित्यसौ हृदि । मयि सत्यत्र मत्रासा-न्न कोऽपि स्फुटयिष्यति ॥५१३॥
तदहं यामि वेगेन, ध्यात्वेति चचलाऽम्बुधौ । भृगुकच्छपुरं प्राप, तदुपायैकमानसः ॥ ५१४ ॥
तस्मिन् सखाऽस्य जैनेन्द्री, जिनदत्ताऽभिधः सुधीः । द्वैतीयकमिव स्वान्तं, तं वृत्तं तस्य चाऽवदत् ॥५१५॥
याहि तत्राऽऽशु तां बाला- मन्वेष्याऽऽनय नीतिवित् ! । नष्टेष्वार्त्तेषु भीतेषु,
कालक्षेपो हि मृत्युवत् ॥ ५१६ ॥
तद्वृत्तं ज्ञापयामास, स वीरो नर्मदापुरे । तच्छ्रुत्वा दुःखपाथोधौ, स्वजना न्यपतंस्तदा ॥ ५१७ ॥
इतश्च-
वीरदासं गतं ज्ञात्वा, हरिणी पणहारिणी । उवाच नर्मदामेवं, वेश्यात्वं रतये कुरु ॥ ५१८ ॥
भुङ्क्ष्व वैषयिकं सौख्यम्, नरैर्नवनवैर्भृशम् । द्रविणं विद्रवाऽशेषं, मामकीनं मनोरथैः ॥ ५१९ ॥
तन्निशम्य जगादाऽसौ, मा वादीर्दुःश्रवं वचः । कुलटात्वेन लज्जन्ते, सलज्जाः कुलबालिकाः ॥५२०॥
रुष्टाऽथ हरिणी दुष्टा, कशाभिस्तामताडयत् । गैरिकारेणुरक्तेव, साऽभूद्रुधिरबिन्दुभिः ॥ ५२१ ॥
इमामूचे ततश्चेटी, वीक्ष्य स्वात्मानमात्मना । उत्फुल्लकिंशुकमयं, प्रतिपद्यस्व तद्वचः ॥ ५२२ ॥
विहस्य नर्मदा प्राह, नैतत्कर्त्र्यस्मि चेटिके ! । भवे भवे भवेद्देहो, नो शीलं मूलमुन्नतेः ॥ ५२३ ॥
एकदा दुःखदः प्राणाऽ-पहारः सर्वजन्मिनाम् । शीलाऽपहारः सर्वार्थ-ध्वंसकर्ता भवान्तरे ॥ ५२४ ॥
अथ रुष्टा पणवधू-र्दण्डैः कष्टायते भृशम् । स्मरन्पञ्चनमस्कारं, भद्रा भद्रायतेतराम् ॥ ५२५ ॥

नवमो भवः

प्रशंसादोषे ऋषिदत्ता-कथानकम्

For Private and Personal Use Only

नमस्कारप्रभावेण, गतप्राणा पणाङ्गना । मूलोदेहिकवल्लीव, पपात क्षितिमण्डले ॥ ५२६ ॥
विज्ञाय हरिणीप्राण-संहारं नरनायकः । उवाच मन्त्रिणं काञ्चि-त्तत्पदे कुरु कामिनीम् ॥ ५२७ ॥
अथ मन्त्री नृपादेशा-द्धरिणीगृहमीयिवान् । नर्मदारूपमाऽऽलोक्य, विस्मयं गतवान् भृशम् ॥५२८॥
भद्रे! कुर्वे नृपादेशाद्, भवन्तीं हरिणीपदे । निर्गमोपायमाधाय, साऽत्रोचत भवत्विति ॥ ५२९ ॥
विन्यस्य तत्पदे मन्त्री, गतवान्नृपपर्षदि । ददौ साऽपि धनं तस्या,-दीनोद्धारविधित्सया ॥ ५३० ॥
अन्येद्युर्याप्ययानं राट्, प्रेषयामास तत्कृते । तं निरीक्ष्य निदध्यौ सा, रक्ष्यं शीलं कथं मया ? ॥५३१॥
वित्तं गतमपि प्रायः, प्राप्यते प्राणिभिः कथम् । न कदापि शीलरत्नं गृहीतं रागतस्करैः ॥ ५३२ ॥
ततः सतीतमा शील-रक्षोपायपरायणा । वहन्त्यङ्कोल्लसद्भूरि-कृमिजालकरम्बितम् ॥ ५३३ ॥
गृहश्रोतो जानुदघ्नं, दुर्गन्धं जीर्णधान्यवत् । साक्षान्नरकसङ्काशं, वीक्षते स्म कृतस्मिता ॥ ५३४ ॥ युग्मम्
ध्यात्वेति याप्ययानात्सा, समुत्तीर्य महासती । विड्वराहीव तत्पङ्के, लुठति स्माऽशठाशया ॥ ५३५ ॥
अहो! पीयूषकल्पोऽयं, मनुष्यजलभूरसः । इत्युक्त्वा सा पपौ नीरं, शीलार्थे किं न तन्यते ? ॥५३६॥
क्रुद्धेव क्रोशति स्मैषा, जनान् गालिप्रभाषणात् । शुष्कोर्व्यां विलुलोठोच्चै-र्वडवेव श्रमाविला ॥५३७॥
उवाच वाहमुर्वीश-माताऽस्मि देवतास्म्यहम् । एवं शीलस्य रक्षायै, ग्रहिलेव व्यचेष्टते ॥ ५३८ ॥
अथ विज्ञातवृत्तो राट्, प्रेषयन्मान्त्रिकान्वरान् । तद्ग्रहं निग्रहं कर्तु-मसमर्था वृथाऽभवन् ॥ ५३९ ॥
अथ तैरपि सा मुक्ता, ग्रहिलत्वं वितन्वती । अक्रोत्ताण्डवं डिम्भै-र्मण्डिता रेणुगुण्डिता ॥ ५४० ॥

प्रशंसादोषे ऋषिदत्ता-कथानकम्

ददती तीर्थनाथानां, रासकान्प्रतिमन्दिरम् । निर्माल्यं मालिनीमौलौ, चक्रे हल्लीसकं सती ॥५४१॥
साऽज्ञायि जिनदेवेन, नर्मदेयं महासती । परं कुतो बभारैषा, ग्रहिलत्वं दिवाऽनिशम् ॥ ५४२ ॥
उद्याना - भिमुखी साऽथाऽचालीद्धूलीविगुण्डिता । ववाल बालकैर्लोकः, कः प्रयाति निरर्थकम् ॥५४३॥
दूरं गत्वा रहः स्थित्वा, साऽकार्षीच्चैत्यवन्दनाम् । जिनदेवोऽपि तत्राऽगात्, तत्स्वरूपाऽवबोधने ॥५४४॥
ताम्वीक्ष्याऽसौ नमन्मौलि-र्वन्दे वन्दे गद न्विति । साऽपि तं श्रावकं बुद्ध्वा, याथातथ्यमवोचत ॥५४५॥
असौ जगाद त्वत्कार्ये, वीरदासेन नन्दिनि ! । भृगुकच्छात्प्रेषितोऽहं, मा विषीद मनागपि ॥५४६॥
प्रातर्घण्टापथे मुक्तं, हविःपूर्णं महासति ! । कुट्टयेर्लकुटैः कुम्भ-सहस्रं नवपात्रवत् ॥ ५४७ ॥
सङ्केतमिति दत्त्वाऽसा-वुभौ प्रविशतां पुरे । द्वितीये दिवसेऽभाङ्क्षीत्, कुम्भान् किलकिलारवम् ॥५४८॥
जिनदेवस्ततः कृत्वा, शाखोद्धारं नृपान्तिके । गत्वाऽवोचत साक्षेपं, मार्यन्ते पोतवाहकाः ॥५४९॥
देवोत्तिष्ठ यथा तेऽहं, दर्शयामि महापथे । वणिजः प्रायशो राजन् !, प्रत्यक्षं निगदन्ति यत् ॥५५०॥
ततो भूपतिमादाय, घटभङ्गमदर्शयत् । देव! लाभो गतो हानिं, लाभार्थे सोद्यमा वयम् ॥ ५५१ ॥
ग्रहिलायाः स वृत्तान्त-मवबुद्ध्याऽऽह पौतिकम् । क्षिपैनां परतोऽम्भोधे-रस्माकमुपदेशतः ॥ ५५२ ॥
इयमत्र स्थिता पापा-ऽनर्थानेवं विधास्यति । हन्तुं न शक्यते रामा, किमु ग्रहिलमानसा ॥ ५५३ ॥
ओमित्युक्तेऽथ तेनोच्चैः, सुदृढं केशतन्तुना । नियम्याऽक्षेपि यत्पोते, गूढमन्त्रा वणिक्क्रिया ॥५५४॥
पोतप्रयाणतः प्राप, भृगुकच्छपुरं वणिक् । तत्तातं ज्ञापयामास, प्रहृष्टो नर्मदापुरं ॥ ५५५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तदाऽऽगमनमाङ्गल्यं, श्रुत्वाऽस्या जनको मुदा । तामुपानेतुमभ्यागा-न्नाह्लादो हि विलम्बकृत् ॥५५६॥
ततो ऋषभसेनाद्यै-र्मिलितैः सुतया समम् । आनन्दबाष्पधाराभिः, क्षितौ धाराधरायितम् ॥ ५५७ ॥
पितुर्निदेशादाचख्यौ, निजं वृत्तान्तमात्मजा । द्विगुणः शोकपूरोऽभूत्, तदोत्पन्न इवाञ्जसा ॥ ५५८ ॥
तत्सङ्गमसुखे जाते, चैत्ये पूजामहोत्सवः । अक्रियत महादान- मदीयत दिवाऽनिशम् ॥ ५५९ ॥
आदीयतांऽशुकं सद्यो, गुप्तेर्मोक्षो व्यधीयत । प्रत्यूहे सङ्गमे वाऽपि, धर्म एव निजं धनम् ॥ ५६० ॥
अथ सन्मानितः श्रेष्ठी, जिनदेवेन सादरम् । समं नर्मदया मोदा-न्नर्मदापुरमीयिवान् ॥ ५६१ ॥
दिनेषु सुखपूर्णेषु, यातेष्वस्याः महोत्सवैः । दशपूर्विण आजग्मुः, सुहस्त्याऽऽख्या मुनीश्वराः ॥५६२॥
तान्वन्दितुमगादेषा, सपौरा पितृसंयुता । गुरुणाऽपि समारेभे, देशना मोहनाशिनी ॥ ५६३ ॥
प्राप्य प्रस्तावमूचेऽथ, वीरदासोऽनया नु किम् ? । कृतं कर्माऽशुभं येन, त्यक्ता पत्या सरित्पतौ ॥५६४॥
अथोवाच मुनिस्वामी, विन्ध्याद्रिस्तत्र नर्मदा । आपगा तदधिष्ठात्री, मिथ्यादृग् नर्मदासुरी ॥५६५॥
अन्येद्युर्नर्मदातीरे, स्थितं धर्मरुचिं मुनिम् । वीक्ष्य क्रुद्धोपसर्गैस्तं, नानाऽऽकारैरताडयत् ॥ ५६६ ॥
साधोर्निश्चलतां वीक्ष्य, प्रणता नर्मदासुरी । प्रतिबोध्याऽमुना चक्रे, सम्यक् सम्यक्त्वधारिणी ॥५६७॥
सा च्युत्वा भ्रातृपुत्रीयं, नर्मदासुन्दरीत्यभूत् । नर्मदामज्जने तस्या-दोहदः पूर्वयोगतः ॥ ५६८ ॥
यत्साधुरनया काम-मुपसर्गे विडम्बितः । तत्कर्म भुक्तमम्भोधि-परीहारे निकाचितम् ॥ ५६९ ॥
उदये कर्मणामेषा, गातुर्गीतं महाध्वनेः । स्वरूपं न्यगदत् पत्युः, स तत्याजाऽसतीत्वतः ॥ ५७० ॥

नवमो भवः

प्रशंसादोषे ऋषिदत्ता-कथानकम्



For Private and Personal Use Only

एवं स्वचरितं श्रुत्वा, नर्मदा प्राग्भवश्रुतेः। प्रव्रवाज गुरोः पार्श्वे, जज्ञेऽस्या अवधिर्भृशम् ॥ ५७१ ॥
गुरुणा स्थापिता साध्वी-तमा प्रवर्तिनीपदे। विहरन्ती क्रमेणाऽऽप, चन्द्रकूपं महापुरम् ॥ ५७२ ॥
ऋषिदत्तानिवासस्था, बहुसाध्वीपरिच्छदा। सा महेश्वरदत्तस्य, प्रबोधनकृतोद्यमा ॥ ५७३ ॥
स्वरमण्डलशास्त्रस्य, परावर्तनकं व्यधात्। जैनैः सर्वं परिज्ञेयं, न कर्तव्यं यथातथा ॥ ५७४ ॥
ईदृग्वर्णो भवेन्मर्त्य, इदृश्ध्वनिना खलु। अमूदृशेन नादेन, गुप्तदेशे मखाऽङ्कितः ॥ ५७५ ॥
एवं श्रुत्वा दधौ चित्ते, निश्चितं मम भार्यया। अमुयेव हि यद्भाव्यं, स्वान्तरेषा परा हि वाक् ॥५७६॥
विललाप ततः सार्थ-वाह एवं मुहुर्मुहुः। यन्मयाऽत्याजि पाथोधौ, पापिना देवतासखी॥ ५७७ ॥ नवमो भवः
अविचारकृतां पुंसा-महमस्मि धुरन्धरः। यन्मया शुद्धशीलाऽपि, त्यक्ता कुहनचेतसा ॥ ५७८ ॥ प्रशंसादोषे
एवं विलापं कुर्वाण-माह धीरं प्रवर्तिनी। नर्मदासुन्दरी साऽहं, या मुक्ताऽब्धौ त्वयाऽनघ! ॥५७९॥ ऋषिदत्ता-
त्वत्प्रसादमहाकूपा-दात्तसंयमवारिणा। तन्मलं क्षालयिष्यामि, निर्मलात्मा भवाम्यहम् ॥ ५८० ॥ कथानकम्
उक्त्वेति संयमं प्राप-दागतार्यसुहस्तिनः। अन्तिके सुगुरोर्मात्रा, स तेपे दुस्तपं तपः ॥ ५८१ ॥
ततो मातासुतौ चारु, चरित्रं परिपाल्य च। अभूतां स्वर्गिणौ तस्मा-देष्यतो मोक्षसंपदि ॥ ५८२ ॥
आयुःक्षयं परिज्ञाय, शुभध्याना प्रवर्तिनी। देवभूयं गतिं प्राप, सुप्रापा द्यौः महाव्रतात् ॥५८३॥
परपाखण्डशंसाभिः, सम्यक्त्वं तत्कलङ्कितम्। प्रागृषिदत्तया राजं-स्तथा दूष्यं परेण न ॥ ५८४ ॥
दूष्यते दर्शनं सम्यक्, परपाखण्डशंसया। मन्त्रितिलकदृष्टान्तः, समासेन निगद्यते ॥ ५८५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तथाह्यासीत्पुरे रम्ये, विजयोपपदे नृपः । नलो नाम सुदुर्वार–वैरिद्रुमदवानलः ॥ ५८६ ॥
सौभाग्यसुन्दरी नाम, भाग्यसौभाग्यमन्दिरम् । देवी देवीव रूपेणाऽ–मुष्य शीलेन शालिनी ॥५८७॥
मन्त्री मन्त्रितिलकाऽऽख्यो, राज्यभारधुरन्धरः । समभूदस्य नीतिज्ञः, प्राज्ञः स ज्ञानशेवधिः ॥५८८॥
अन्येद्युर्मन्त्रिणा साक–मारूढो मुद्गभोजिनि । मृगयायै गतो लुब्धै–र्लुब्धकैः पापवाहिभिः ॥ ५८९ ॥
वनमावृत्य सैन्येन, स्थितोऽन्तर्भूपतिः स्वयम् । कार्दमिकाम्बरधरः, सपत्तिः सशरासनः ॥ ५९० ॥
यावत् कोदण्डमाकृष्य, बाणं क्षिपति भूपतिः । तावन्मृगो जगादैवं, गम्भीरं नरभाषया ॥ ५९१ ॥
कोऽयं न्यायः पशुः स्वामिन्!, कांदिशिकोऽपि हन्यते? ।
जिघांसन्तं जिघांसीया–दिति वेदविदां श्रुतिः ॥ ५९२ ॥

नवमो भवः

न हृतं भवतः किञ्चि–न्नापराद्धं मया तव । वने भ्रमामि पवनं, पिबामि क्षत्रियाग्रणी? ॥ ५९३ ॥

संस्तवदोषे मन्त्रितिलक-दृष्टान्तः

श्रुत्वेदं भूपतिः स्माऽऽह, मन्त्रिन्नेष मृगः कथम् । भाषते नर भाषाभि–र्दिव्यरूपसुरो नु किम्? ॥५९४॥
गन्तुं वने प्रवृत्तोऽथ, हरिणो मन्दचर्यया । विलोकमानो भूपालं, मुहुर्विवलिताऽऽननम् ॥ ५९५ ॥
अथ मन्त्री जगादाऽथ, गम्यतामस्य पृष्ठतः । किं करोति कुतो याति?, सर्वाऽऽश्चर्यकरो मृगः ॥५९६॥
ओमित्युक्त्वा महीपालोऽ–नुमृगं यान् शनैः शनैः । मुनिमेकं महारण्ये, कायोत्सर्गपरायणम् ॥ ५९७ ॥
नासाग्रदत्तदृग्द्वन्द्वं, पश्यन्तं परमं महः । ततः परंपदं वाञ्छ–न्न द्राक्षीत् क्षतमन्मथम् ॥ ५९८ ॥युग्मम्–
भो! भो! नमत निर्ग्रन्थं, चेद्यूय भवभीरवः । इत्युवाच मृगो भूपं, प्रति प्रीतितरङ्गितः ॥ ५९९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो मन्त्रिमहीपाला-ववतीर्य तुरङ्गमात् । अवन्देतां मुनिं भक्त्या, पञ्चाङ्गस्पृष्टभूतलौ ॥ ६०० ॥
धर्मलाभाशिषं साधु-स्तैताभ्यां प्रदत्तवान् । धर्मध्यानं समापूर्य, साधुः परहिते रतः ॥ ६०१ ॥
उपविष्टे महीनाथे, सनाथे वरमन्त्रिणा । सद्धर्मदेशनामेवं, चकार मुनिसत्तमः ॥ ६०२ ॥
मानुष्यं दुर्लभं प्राप्य, समिलायुगयोगवत् । हारयन्ते हरन्तोऽन्य–जीवितव्यानि देहिनः ॥ ६०३ ॥
यतः–जीवाः सर्वेऽपि वाञ्छन्ति, जीवितं निधनं न हि । तस्मात्प्राणिवधं घोरं, न कुर्वन्ति तपोधनाः ॥६०४॥
मनःक्रीडाकृते मूढा, जीवान्निघ्नन् निरागसः । लोहखण्डाय किं मूढ!, न भिनत्यम्बुधौ तरीम् ? ॥६०५॥
निशम्येति नृपोऽवादी–द्युक्तमुक्तं त्वया विभो ! । जीवघातान्निवृत्तोऽसि, सुनयी कुनयादिव ॥६०६॥
अद्यप्रभृति नो कार्यो, जीवघातो मया क्वचित् । ततोऽयं तत्र पादाग्रे, प्रपन्नो नियमो मया ॥ ६०७ ॥
परं मुने ! कथं जातं, वैराग्यं तव यौवने । त्वं साधुपदवीं येन, दुष्करां प्रतिपेदिवान् ॥ ६०८ ॥
अथोवाच मुनी राजन्!, पुरा सिद्धपुरं पुरम् । तस्मिन् भुवनपालाख्यो, भूपालो नयवारिधिः ॥६०९॥
कनकश्रीः प्रिया तस्य, सुशीला स्तोकभाषिणी । तस्य मन्त्री नयाम्भोधि-र्यथार्थो नयसागरः ॥६१०॥
दाक्षिणात्या नराः केचित्, समागत्य नृपाग्रतः । प्रारम्भते स्म सङ्गीतं, तततन्त्रीलयानुगम् ॥ ६११ ॥
आक्षिप्तहृदयो राजा, यावत्तिष्ठति विस्मितः । जजल्पाऽकालजो मेघो, वर्षाबद्धोऽत्र भूपुरः ॥ ६१२ ॥
देवाष्टाङ्गनिमित्तज्ञः, पुस्तिकापाणिरुत्तमः । गणको बहिरस्त्येव तत्राऽऽदेशः प्रदीयताम् ॥ ६१३ ॥
अवक्तरि नृपे स्माह, सचिवो मतिसागरः । स्वाधीनं नाटकमिदं, न पुनर्ज्ञानिदर्शनम् ॥ ६१४ ॥

नवमो भवः

संस्तवदोषे मन्त्रितिलक-दृष्टान्तः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ततो निजगदे राज्ञा, मुच्यतां गणकोऽधुना । परन्तु हृदयादूर्ध्व-ञ्जीर्वाच्या समये यतः ॥ ६१५ ॥
तेनाऽपि गणको मुक्तो, निविष्टस्स्वोचिताऽऽसने । दत्त्वाऽऽशिषं महीभर्तुः, श्रवणप्रियकारिणीम् ॥६१६॥
सङ्गीतान्ते महीभर्त्रा, पृष्टोऽसौ गणकाऽग्रणीः । क्षेमस्ते सोऽप्यथाऽवादीत्, क्षेमः कस्यापि नाऽत्र भोः! ॥६१७॥
ततोऽवादीन्महीपालः, पतिष्यति नभः किमु ? । परचक्रं किमागन्ता, किं वाऽकाण्डे युगक्षतिः? ॥६१८॥
किं वा कोऽपि सुरः क्रुद्धः, क्षेप्ता क्षोणिं रसातले ? । किं वा कल्पानिलो भावी, किं वाऽन्धो जलविप्लवः ? ॥६१९॥
ततः प्रोवाच मन्त्रीशः, मा कुपः काश्यपीपते ! । पृच्छाऽमुमेव गणकं, ज्ञानी ज्ञात्वा हि भाषते ॥६२०॥
सभ्रूक्षेपं महीपालो-ऽभाषिष्टाऽत्यन्तनिष्ठुरम् । भवता हेतुना केन ?, समाऽक्षेमो निगद्यते ॥ ६२१ ॥
अथोचे गणको राजन् !, मा कुपः मे गुणाकर ! । ज्ञानिनो ज्ञानदृष्ट्या हि, दृष्टमेव गदन्ति यत् ॥६२२॥
मुशलाकारधाराभि-र्नृप ! सम्प्रति वारिदः । विधाता महतीं वृष्टिं, कल्पान्तसमयोपमाम् ॥ ६२३ ॥
एवमस्य ब्रुवाणस्य, कौबेर्यां दिशि वारिदः । कपोतकन्धराकारः-कालरात्रिकटाक्षवत् ॥ ६२४ ॥
तेनाऽव्यापि वियद्देशो, देहीव दृढकर्मभिः । ववृषे गुरुधाराभिः, पयःपूर्णा क्षणात् क्षितिः ॥ ६२५ ॥
यथा यथा भवन्त्युच्चैः, खाङ्कारा हन्त विद्युताम् । तथा तथा त्रुटन्त्याशु, मनांसि पुरवासिनाम् ॥६२६॥
क्षणाद्रथ्या नदीयन्ते, वार्द्धीयन्ति च निम्नगाः । निषिद्धजनसञ्चारो, हन्त ज्ञानी त्रिकालवित् ॥६२७॥
पौराशा इव सर्वत्र, पेतुः प्राकारभित्तयः । नेशुरुच्चं स्थलं सत्त्वाः, प्राणानादाय सर्वतः ॥ ६२८ ॥
कुहिरे घृतपात्राणि, पतिताद्रिभ्य उच्चकैः । तरन्ति स्म कणा विष्वक्, सुस्थिराम्बुकणा इव (?) ॥६२९॥

नवमो भवः

संस्तवदोषे मन्त्रितिलक-दृष्टान्तः



For Private and Personal Use Only

पुरक्षोभस्ततो जज्ञे, हाहाकारपुरस्सरः । पयःपूरेण सौधं तद्, व्याप्तं मूर्तैर्भयैरिव ॥ ६३० ॥
क्षणान्नृपसभा व्याप्ता, पयःपूरेण सर्पता । स ततः सप्तमीं भूमि-मारूढो भयविद्रुतः ॥ ६३१ ॥
ज्ञानवित्सचिवाभ्याञ्च, साकं साकं परिग्रहः । तत्राऽस्थात्कुरु नैमित्त-शकुनाशावलम्बनम् ॥ ६३२ ॥
कोऽपि स्तनन्धयं स्कन्ध-मारोप्य सुरसद्मनः । उपरिष्ठात्तिष्ठति स्म, ही मृत्योर्नापरं भयम् ॥६३३॥
यावत्सलिलसम्पूरैः, पूर्णाः सप्ताऽपि भूमयः । तावज्जगाद भूपालः, संवेगवेगरङ्गितः ॥ ६३४ ॥
हाऽस्माभिर्न कृतो धर्मो, हाऽस्माभिर्जन्म हारितम् । मुधा गमितमायुश्च, स्फुरितो दण्डको हरेः ॥६३५॥
साधयामि कथङ्कारं, परलोकमहं किल । इष्टे नष्टे कृतः शोकः, किम्विधत्ते विवेकिनाम् ॥ ६३६ ॥
पूर्वजानां महीशानां, लुप्तो मार्गो मया किल । यत्तेऽभूवन् महासत्त्वा, यतयो यौवनेऽपि हि ॥६३७॥
धनं मे ध्यायतोऽकस्मा-न्निधनं समुपागतम् । एकाक्षरस्य लाभे हि, ही शोचन्ति कथं जनाः ॥६३८॥
वराटिकाकृते कोटि-र्हारिता ही मयाऽधुना । यल्लब्ध्वाऽपि नरेन्द्रत्वं, प्रमादः सादरं कृतः ॥ ६३९ ॥
इतः पोतं समायातं, व्यूढं भूपवरण्डिकाम् । निर्यामकैधार्यमाणं, वरिणि दृष्टवान्नृपः ॥ ६४० ॥
अथोच्छ्वासं समासाद्य, जजल्प मतिसागरः । प्राप्तो राजन्नयं पोतः, प्रेरितः श्रेयसा तव ॥ ६४१ ॥
आपदां भविता राजन् !, निस्तारस्तव निश्चितम् । अध्यास्व सत्वरं पोतं, नार्त्तः कालविलम्बकृत् ॥६४२॥
श्रुत्वेति मन्त्रिणा प्रोक्तं, यावद्राजा वरण्डिकाम् । अध्यास्य चरणं पोते, क्षिपति प्राज्यसाध्वसः ॥६४३॥
तावन्न सलिलं मेघं, विद्युतं न च गर्जितम् । अद्राक्षीत् क्षितिनेताऽथ स्वप्नदृष्टोपमं क्षणात् ॥ ६४४ ॥

नवमो भवः

संस्तवदोषे मन्त्रितिलक-दृष्टान्तः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सिंहासनसमासीन-मात्मानं दृष्टवान्नृपः । पुरस्ताच्च भटान् सर्वान्, कुर्वाणान्नाटकं क्षणम् ॥ ६४५ ॥
इत्यद्भुतमदो वीक्ष्य, क्षोणीशो मतिसागरम् । उवाच किमिदं जातं, सर्वथाऽऽश्चर्यचित्रितम् ॥ ६४६ ॥
मयेन्द्रजालिनाऽनेन, विहितं प्रीतये तव । न कोऽपि ज्ञानवित् क्वापि, न कोऽपि जलदोदयः ॥६४७॥
परमेष दृशां बन्धं, विज्ञाय जालकारकः । अत्यद्भुतं चकारोच्चै-र्द्रव्यार्थी कुरुते न किम् ? ॥६४८॥
यथा विघटितो मेघः, कुटुम्बमपि सत्तथा । यथा विद्युल्लता लोला, तथा श्रीरपि भूयसी ॥ ६४९ ॥
यथा सप्तभुवो व्याप्ताः, पयःपूरैः समन्ततः । रोगोद्रेकैः क्षणाद्भूतैस्तथा देहाश्च देहिनाम् ॥ ६५० ॥
यत् ज्ञानी स गुरुस्तत्त्व-निःशेषार्थनिवेदकः । यद्वत्पोतो व्रतं तद्वद्, भवाम्भोनिधितारकम् ॥६५१॥
उक्त्वेति सर्वमेवेदं राज्ये विन्यस्य नन्दनम् । अजनिष्ट स राजर्षि-र्वैराग्याद्दुष्करं न हि ॥ ६५२ ॥
सोऽहमस्मि महीपालः, विहरन्नत्र चाऽऽगमम् । मया कर्मक्षयाल्लेभे, तुर्यं ज्ञानं मनोहरम् ॥ ६५३ ॥
अथोवाच नलो राजा, भवतश्चरितश्रुतेः । उत्पन्नं मम वैराग्यं, गुरुसङ्गान्न किम्भवेत् ? ॥ ६५४ ॥
परं राज्यमहं त्यक्तुं, नेच्छामि स्मरशासनः । सुकरः कथ्यतां कोऽपि, धर्म्मः शर्मकरो मम ॥ ६५५ ॥
अथोवाच मुनी राजन् !, गृह्यतां दर्शनं वरम् । यत्रार्हद्दैवतं साधु-र्गुरुस्तत्त्वं जिनोदितम् ॥ ६५६ ॥
शङ्का-काङ्क्षा-विचिकित्सा-परपाखण्डशंसनम् । संस्तवश्चेति पञ्चाऽपि, दोषा हेया विवेकिना ॥६५७॥
श्रुत्वेत्युभौ विनम्राङ्गौ, प्रतिपन्नौ सुदर्शनम् । यतो धर्मस्य तन्मूलं, परकूलं भवाम्बुधेः ॥ ६५८ ॥
आचष्टे स्म महीनाथो, नाथ ! कोऽयं वनेचरः । कारितं येन मे स्वामि-स्त्वया साकं सुदर्शनम् ॥६५९॥

नवमो भवः

संस्तवदोषे मन्त्रितिलक-दृष्टान्तः



For Private and Personal Use Only

सोऽप्युवाच महीनाथ !, पुरातनभवः सखा। मोहनो नामतो कृत्स्न-लोकाचारपरायणः ॥ ६६० ॥
भवन्तं समनुज्ञाप्य, कृत्वा बालतपो बहु। अरण्येऽमुत्र सञ्जज्ञे, व्यन्तरो नरपुङ्गव! ॥ ६६१ ॥
त्वां दृष्ट्वा मृगयाऽऽसक्तं, प्रीत्या पूर्वभवोत्थया। मृगरूपेण मत्पार्श्वं, समानीतोऽसि बोधये ॥ ६६२ ॥
प्रत्यक्षीभूय यक्षोऽथ, स्वागतप्रश्नपूर्वकम्। उवाच काश्यपीनाथं, मित्राणि प्रियकृन्ति हि ॥ ६६३ ॥
अद्यप्रभृति कर्तव्यो, जिनधर्मः सुदर्शनः। मयाप्यस्य मुनेः पार्श्वे, प्रपन्नं श्रावकव्रतम् ॥ ६६४ ॥
राजाऽप्युवाच सस्नेहं, सत्यमेव गुणानघ! । दुर्गतेर्मूलमार्गाच्च, जीवघातान्निवारितः ॥ ६६५ ॥
किं ते प्रियङ्करोम्यद्य, सोऽप्युवाच प्रियं नु मे। यदाऽऽर्हतः पदोपास्ति-र्यच्च दर्शनपालनम् ॥६६६॥
अथ नत्वा मुनिं तौ द्वा-वाऽऽपृच्छय व्यन्तरं सुरम्। साकमायातसैन्येन, प्रापतुः स्वपुरं क्रमात् ॥६६७॥
अथ राजा जिनाधीश-बिम्बं निर्माय भासुरम्। त्रिसन्ध्यं विदधे पूजां, सचिवोऽपि महामतिः ॥६६८॥
कोऽपि प्रव्राजको धूर्त-स्तौ ज्ञात्वा परमार्हतौ। आगान्मन्त्रीगृहं जैनं, धर्मं व्याख्यातवान्बहु ॥६६९॥
ततोऽमुष्य महामन्त्री, भक्तिं चक्रे दिवाऽनिशम्। धूर्तानां लक्षणमिदं, तुल्ये तुल्यप्रवर्तनम् ॥६७०॥
तेनाऽऽगतं सहाऽऽलोक्य, नृपः प्रोवाच मन्त्रिणम्। दूषयसि परं हन्त!, सम्यक्त्वं परसंस्तवात् ॥६७१॥
राजन्नेष महाश्राद्धोऽन्यदर्शन्यपि कौतुकम्। राजाऽप्युवाच धूर्तोऽयं, नास्त्ययं परमार्हतः ॥ ६७२ ॥
दृशोश्चञ्चलता कामं, धृष्टत्वं स्मेरताऽऽननम्। परिव्राजकवेषत्वं, श्रावकत्वं कथम्भवेत्? ॥ ६७३ ॥
चेत्परिव्राजकः श्राद्धो, धत्ते किमु परं व्रतम्। युगपत्सङ्गमो नास्ति, नक्तंदिवसयोरिव ॥ ६७४ ॥

नवमो भवः

संस्तवदोषे मन्त्रितिलक-दृष्टान्तः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सोऽप्युवाच महीनेत-श्चित्तशुद्धिर्विवेकिना । विधातव्या किमन्येन ?, बाह्याचारेण चारुणा ॥६७५॥
वक्रामुक्तिमिमां वीक्ष्याऽमुष्योवाच जनेश्वरः । निरीक्ष्यतान्तरामस्य, वेषाद्यं तु ममाऽग्रतः ॥ ६७६ ॥
यावद्दक्षैः क्षणाच्चक्रे, वेषाऽपनयनं ततः । तावत्कङ्कमयी दृष्टा, कार्तिकोरुनियन्त्रिता ॥ ६७७ ॥
भाषितः सचिवो राज्ञा, तव साधर्मिकः खलु । न कस्याऽपि विधातव्यः, प्रत्ययो हितमिच्छुना॥६७८॥
निग्रहस्थानमाप्तोऽपि, न हतोऽसि मयाऽधुना । एकोऽपराधः सर्वस्य, क्षन्तव्य इति यच्छ्रुतिः ॥६७९॥
एवमुक्तवति क्ष्मापे, भयविभ्रान्तमानसः । सचिवोऽमुच्यत प्राणै-र्हि राजाऽर्थविनाशकृत् ॥६८०॥
राजाऽपि चिरमादृत्य, सम्यक्त्वं च यथाविधि । अवाप सुगतिं तस्य, भाविनी निर्वृतिस्ततः ॥६८१॥
यथाऽनेन परं तत्त्वं, मन्त्रितिलकमन्त्रिणा । दूषितं न तथाप्यन्यै-र्न सारमस्त्यतः परम् ॥ ६८२ ॥

नवमो भवः

संस्तवदोषे मन्त्रितिलक-दृष्टान्तः

श्रुत्वेदं सातिचारं जिनपतिगदितं मूलसूत्रं गुणानां,
भूमीपालो परेऽपि प्रमुदितमनसः प्राप्य सम्यक्त्वरत्नम् ।
वन्दित्वा तीर्थनाथं पुनरपि विनयाद्भावयन्तो जिनोक्तं,
जग्मुः स्वं स्वं निवासं हृदि परममुदं बिभ्रतः कोटिरूपाम् ॥ ६८३ ॥

इत्याचार्यश्रीविनयचन्द्रविरचिते श्रीमुनिसुव्रतस्वामिचरिते महाकाव्ये विनयाङ्के सम्यक्त्वप्रशंसा-ऽतिचारेषु चम्पकमाला - धनपाल - जितशत्रु - नृपति - धर्मदेव - ऋषिदत्ता - मन्त्रितिलक - कथानक-गर्भितोऽष्टमभवव्यावर्णनो नाम षष्ठः सर्गः समाप्तः ॥छ॥ ग्रन्थाग्रम् मूलतो ॥३६९४॥



For Private and Personal Use Only

# सप्तमः सर्गः ।

सुव्रतस्य जगद्भर्तु-स्तत्राऽवस्थितिशालिनः । अभवन्मेदिनीकम्पो, वाताऽऽन्दोलितकेतुवत् ॥ १ ॥
गिरयः कन्दुकायन्ते, आमूलश्लथबन्धनाः । मृत्स्ना पिण्डायते पृथ्वी, कम्पमानकुलाचला ॥ २ ॥
भीतभीता जनाः पौरा, अस्मरदेवतागुरून् । भीरवो भीरवो भर्तृ-कण्ठं स्वभुजयाऽरुधन् ॥ ३ ॥
जितशत्रुर्महीपाल-श्चकितोऽजनि मानसे । किमयं कल्पकालोऽभूदकाण्डेऽपि महीतटे ॥ ४ ॥
अथवा यत्र तीर्थेशः, साक्षाद्विहरति क्षितौ । तत्राऽशिवानि भूयांसि, प्रशाम्यन्ति विनिश्चितम् ॥ ५ ॥
अथवा कुपितः कोऽपि, महर्षिर्विदधेतराम् । अथवा जगतां नाथे, कः सन्देहोऽत्र तिष्ठति ? ॥ ६ ॥ नवमो भवः
ध्यात्वेति भूपतिः पौरै-रन्वितो जगताम्पतिम् । आगात्समवसरणे, द्वितीये दिवसे सुधीः ॥ ७ ॥ भूकम्पकारणे
प्रभुं प्रणम्य न्यगद-न्महीकम्पोऽद्य तीर्थप ! । कथङ्कारमभूद्भूया-द्विहृतेऽत्र जिनेश्वरे ॥ ८ ॥ विष्णुकुमार-
अथ प्रोवाच भगवान्, सनीरजलदध्वनिः । शृणु क्षोणितटीकम्प-कारणं काश्यपीपते ! ॥ ९ ॥ वृत्तान्तः
तथाहि जम्बूद्वीपेऽस्य, प्राग्विदेहस्य भूषणम् । सुकच्छविजये ख्यातं, पुरा श्रीनगरं पुरम् ॥ १० ॥
प्रजापालनृपस्तत्र, प्रजापालनलालसः । वैरिवारयशोराज-मरालजलदोदयः ॥ ११ ॥
कदाचिदेष सौधस्थो, वरीवृषति वारिदे । प्रज्वलत्पूलकाकारं, विद्युत्पातमवैक्षत ॥ १२ ॥
तं दृष्ट्वाऽध्यादेषोऽपि, यथाऽसौ पतितः क्षणात् । तथा कृतान्तदण्डोऽपि, निपतद्रक्ष्यते कथम् ? ॥ १३ ॥
पदातीनां पुरःस्थानां, नृपात्माऽपि स्वकर्मभिः । नीयमानो निर्विशेषं, रक्ष्यते न वृषं विना ॥ १४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ध्यात्वेति भूपतिर्जातः, समाधिसुधयोक्षितः। समाधिगुप्तराजर्षे-रन्तिके व्रतमात्तवान् ॥ १५ ॥
संयमं संयमी भूरि, पालयित्वा सुदुष्करम्। अभूदच्युतकल्पेश-स्तपः फलति निश्चितम् ॥ १६ ॥
अमुष्मिन् जम्बूद्वीपस्य, क्षेत्रे भरतसञ्ज्ञिके। समस्तसम्पदां पात्र-मस्ति श्रीहस्तिनापुरम् ॥ १७ ॥
नृपः पद्मोत्तरस्तत्र, स्मेरपद्मविलोचनः। पद्मानिकेतनं पाणि-जितपद्ममहाहृदः ॥ १८ ॥
अमुष्य पट्टदेव्यस्ति, ज्वाला नाम गुणोज्ज्वला। कलिकालमषीकूलं-कषा हृषितमानसा ॥ १९ ॥
एतयोः प्रथमः सूनुः, केशरिस्वप्नसूचितः। अभूद्विष्णुकुमाराख्यः, स्वर्कुमार इव श्रिया ॥ २० ॥
स प्रजापालजीवोऽपि, च्युत्वा तत्कुक्षिकोटरे। चतुर्दशमहास्वप्न-सूचितोऽजनि नन्दनः ॥ २१ ॥
महापद्म इत्यमुष्य, नाम धाम महौजसाम्। ज्ञाताऽशेषकलावृन्दौ, वव्रृधाते उभावपि ॥ २२ ॥
महापद्मः कुमारोऽपि, पद्मोत्तरमहीभुजा। यौवराज्यपदे न्यस्तो, जिगीषुरिति सद्दिने ॥ २३ ॥
इतोऽवन्त्यां महापुर्यां, श्रीवर्मा नाम भूपतिः। नमुचिः सचिवस्तस्य, मिथ्यात्वरुचिचेतनः ॥ २४ ॥
अस्माकं सुव्रतः सूरिः, शिष्यसङ्घपरिवृतः। वन्दित्वाऽस्मान् पुरी राज-गृहेऽस्माकं निदेशतः ॥ २५ ॥
विहरन्बोधयन्भव्या-नीर्यासमितिसङ्गतः। अन्यदोज्जयिनीपुर्या-मुद्याने समवासरत् ॥ २६ ॥ युग्मम् ॥
सर्वर्द्ध्या गच्छतस्तस्य, वन्दनाय पुरीजनान्। श्रीवर्मा प्रैक्षतोत्तुङ्ग-सौधस्थः पुष्पितेक्षणः ॥ २७ ॥
का नामाऽकालयात्रेयं ?, यस्यां शृङ्गारभासुराः। पौरा यान्तीति भूपालः, पप्रच्छ नमुचिं शुचिः ॥ २८ ॥
सोऽप्यूचे श्रमणाः केचि-दुपोद्यानमुपागताः। तेषां नमस्कृते पौरा, यान्त्येव बहुमानिनः ॥ २९ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यामो वयमपि क्षोणी-नेत्रेत्युक्तेऽब्रवीदसौ । चेद्वः सद्धर्म्मशुश्रूषा, वक्ष्ये तं श्रुतिसङ्गतम् ॥ ३० ॥
राजाऽप्युवाच सद्धर्मः, श्रुतस्तव मुखाद्बहुः । स्वप्रत्ययकृतेऽन्यत्र, श्रोतव्यो हि मनीषिणा ॥ ३१ ॥
यः सर्वसम्मतो धर्म्मो, हितः स्वपरयोश्च सः । स एव व्यवहर्तव्यः, पूर्वापराऽविरोधतः ॥ ३२ ॥
नूनं वयं गमिष्यामः, श्रीवर्मा पुनरब्रवीत् । परीक्षकाणां तत्त्वेषु, परीक्षाक्षेपशेमुषी ॥ ३३ ॥
विज्ञाय निश्चयं राज्ञो, नमुचिः सचिवोऽवदत् । स्थेयं तत्र गतैः पूज्यै-र्माध्यस्थ्यस्थितिशालिभिः ॥ ३४ ॥
तथैव तान्विवादेन, पराजिग्ये पशूनिव । यथा पाखण्डिपाण्डित्यं, मुण्डास्ते न हि कुर्वते ॥ ३५ ॥
भवत्वेवं नृपेणोक्ते, भूमीशः सपरिच्छदः । जगाम सुव्रताचार्य–सन्निधौ विविधाशयः ॥ ३६ ॥
अथोचे सचिवो मुण्ड !, पाखण्डं विधृतं कथम् ? । गृहाश्रमसमो धर्मो, न भूतो न भविष्यति ॥ ३७ ॥
यस्मिन्कन्याफलादीनि, सुकृतानि सहस्रशः । तत्राऽक्षमेण कर्तव्यो, धर्मः पाखण्डिनां मतः ॥ ३८ ॥
अपुत्रत्वात्कथङ्कारं, मूर्खः स्वर्गं गमिष्यति । नाऽद्यापि हि गतं तेऽस्ति, गृहिधर्मं समाश्रय ॥ ३९ ॥
एवमुच्चावचैस्तस्य, वचोभिर्नमुचेर्मुनिः । क्षमामेकामसौ चक्रे, नास्ति सौख्यं क्षमासमम् ॥ ४० ॥
अमुं मौनिनमालोक्य, विजितोऽयं मयाऽधुना । ध्यात्वेति शासनं जैनं, बाढं निन्दितवानसौ ॥ ४१ ॥
श्लेष्मवद्दुर्जनो लोको, मधुरैः परिकुप्यति । प्रत्युत कटुकैस्तीक्ष्णः, प्रशान्तिमुपगच्छति ॥ ४२ ॥
ध्यात्वेति सुव्रताचार्य–पादान्नत्वा विनेयकः । अभ्यधादिति वादाय, जिह्वा कण्डूयतेतराम् ॥ ४३ ॥
तिष्ठन्तु सूरयो देव !, आवयोर्बालयोरिव । विवादोऽस्तु महीपाल !, सभ्यीभूय प्रगल्भ्यताम् ॥ ४४ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मद्गुरोर्वादिसिंहस्य, पुरस्तात्त्वं कथं स्थितः ? । किमिदं न श्रुतं वाक्य-मिति कद्वद ? वाक्पटो ! ॥ ४५ ॥
रे रे ! काननसैरिभ ! प्रतिदिनं, पुच्छच्छटाछोटनं, कुर्वाणेन किमेष केसरिरिपुर्मूढ ! त्वया कोपितः ।
दृष्टं येन मदान्धसिन्धुरघटागण्डस्थलीपाटन– व्यग्रेणाऽपि रणाङ्गणे विवलितग्रीवेण कान्ताननम् ॥ ४६ ॥
श्रुत्वेति क्षौल्लिकीं वाचं, कोपाज्जज्वाल सोऽधिकम् । उवाच दूषय क्षुल्ल !, गृहिधर्मो मयोदितः ॥ ४७ ॥
उवाच क्षुल्लकः क्षिप्रं, कथं शस्यो गृहाश्रमः ? । यत्र तिष्ठन्ति पञ्चाऽपि, सूना नित्यमुदीरिताः ॥ ४८ ॥
खण्डनी - पेषणी - चुल्ली - जलकुम्भः - प्रमार्जनी । पञ्च सूना गृहस्थानां स्वर्गं तेन न यान्त्यमी ॥ ४९ ॥
कन्या - फलादि धर्माय, यत्त्वयोदीरितं वचः । तच्च तत्त्वपथोत्तीर्णं, विस्तीर्णं भववर्द्धनम् ॥ ५० ॥
(यदूचे—)
भवभ्रमणबीजेन, दाम्पत्येन नियोजिता । योजयित्रे परं कन्या, पाप्मानमुपयच्छति ॥ ५१ ॥
संसारकारणं कामः, सर्वतन्त्रैर्निगद्यते । तस्य प्रबोधं धर्माय, ब्रुवतां कौशलं महत् ! ॥ ५२ ॥
मन्मथस्य परित्यागो, यथा निर्वाणसाधनम् । तथैव सङ्ग्रहस्तस्य, सिद्धं संसारसाधनम् ॥ ५३ ॥
अपुत्रस्य गतिर्नास्ति, यदिदं कथ्यते त्वया । स्वर्गसौख्यभुजः कोऽस्ति, पुत्रः पवनजन्मनः ? ॥ ५४ ॥
बहुपुत्रत्वतः स्वर्गो, यदि स्यादङ्गिनामिह । तर्हि कुर्कुटगोधासु, स्वर्गोऽपि बहुसूतिषु ॥ ५५ ॥
यत्त्वया तीर्थकृद्धर्मो, निन्दितो दुष्टचेतसा । एतावता निविष्टः किं, यदिदं न श्रुतं वचः ॥ ५६ ॥
हिंसा त्याज्या नरकपदवी सत्यमाभाषणीयम्, स्तेयं हेयं विषयविरतिः सर्वसङ्गान्निवृत्तिः ॥



For Private and Personal Use Only

जनो धर्मो यदि न रुचितः पापपङ्काप्लुतेभ्यः, सर्प्पिर्दुष्टं किमिदमियता यत्मेप्रघी न भुङ्क्ते ॥ ५७ ॥
विषयी विषयासक्तं, सधनः सधनीं गृही गृहिणमेव । सारम्भस्सारम्भं न तुल्यदोषस्तु तारयति ॥ ५८ ॥
विषयी विषयाऽरक्तं, सधनोऽस्तधनं गृही गृहवियुक्तं । सारम्भोऽसारम्भं, संसृत्य भवार्णवं तरति ॥ ५९ ॥
क्षुल्लकेन महामात्य, इत्थङ्कारमपोहितः । स्याद्वादवादिनी वाणी, न क्वचित्प्रतिहन्यते ॥ ६० ॥
स्वस्थानमगमन्मन्त्री, कृताऽधोमुखकोटरः । परनिन्दापराणां हि, कुत ऊर्ध्वस्थितिर्भृशम् ॥ ६१ ॥
राजादिभिः श्रुतो धर्म्मः, श्रीमत्सुव्रतभाषितः । को नाम रत्नमादातुं, नोत्को भवति कोविदः ॥ ६२ ॥
राज्ञि राजजने वापि, प्रयाते निजवेश्मसु । स मन्त्री निशि चोत्तस्थौ, निशाचर इवाऽपरः ॥ ६३ ॥
जज्वाल क्रोधशिखिना, धारालतरवारिभृत् । उपोद्यानमसौ प्राप, तद्वधाय कृतोद्यमः ॥ ६४ ॥
ततः शासनदेव्यासौ, मान्त्रिकेणेव पन्नगः । स्तम्भितो ददृशे प्रातः, पौरैर्वन्दितुमागतैः ॥ ६५ ॥
तदाश्चर्यं तदा प्रेक्ष्य, राजा राजजनोऽखिलः । जहर्षुः प्रतिपेदाना, जैनं धर्मं सनातनम् ॥ ६६ ॥
मुक्तः शासनदेव्यासौ, स मन्त्री हस्तिनापुरम् । अगाद्विदेशगमनं, युज्यते ह्यपमानिनाम् ॥ ६७ ॥
महापद्मः स्वसाचिव्ये, युवराजो व्यधादमुम् । अन्यप्रधानसन्मान-सावधाना विवेकिनः ॥ ६८ ॥
इतः पल्लीवनाध्यासी, महादुर्गेण दुर्जयः । सिंहो नामाऽस्ति पल्लीशः, साक्षात् सिंहपराक्रमः ॥ ६९ ॥
अवस्कन्द्य महापद्म-मण्डलं निखिलं छलात् । प्रविवेश महादुर्गं, धर्तुं शक्यो न केनचित् ॥ ७० ॥
चतुर्दिक्षु महानद्य-स्तरवोऽभ्रंलिहास्ततः । रोगकारीणि वारीणि नाहलाः कालकेलयः ॥ ७१ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महापद्मबलं सर्वं, न किञ्चित्करताङ्गतम् । तेजस्विनोऽप्यलं योद्धुं, न भटा स्तम्भभित्तिषु ॥ ७२ ॥
रुषितोऽथ महापद्मो, दशन्नोष्ठदलं रुषा । उवाच नमुचिं वेत्सि, किञ्चित् सिंहजये बलम् ॥ ७३ ॥
सोऽप्यूचे देव ! जानेऽहं, किं भूयो भाषितैर्वृथा । सैंहं पराजयं देव ! मद्बुद्धिः कथयिष्यति ॥ ७४ ॥
त्वत्प्रसादान्महापद्म !, न गेहेनर्दिनो वयम् । मर्दिनः परमानानां, कोऽयं पल्लीपतिर्मम ? ॥ ७५ ॥
अथाऽऽदिष्टः प्रहृष्टेन, महापद्मेन तत्क्षणम् । स ययौ तस्य तद्दुर्गं, महावात इवाऽस्खलन् ॥ ७६ ॥
तद्दुर्गं सन्धितो भङ्क्त्वा, बुद्ध्या किं न हि सिद्ध्यति ? । जीवग्राहश्च जग्राह, सिंहं पल्लेरधीश्वरम् ॥ ७७ ॥
अन्येद्युस्तीर्थकृद्बिम्ब–सनाथो रथ उत्तमः । महापद्माम्बयाऽकारि, ज्वालया तत्त्वमालया ॥ ७८ ॥
तदा लक्ष्म्याऽज्ञया मिथ्या–दृशा तस्याऽपराम्बया । तत्प्रातिकूल्यतो ब्रह्म–रथोऽकार्यत सत्वरम् ॥ ७९ ॥
पूर्वं भ्राम्यत्वयं ब्रह्म–रथो निखिलपत्तने । पश्चाद्रथो जिनेन्द्रस्य, लक्ष्म्या राजेत्ययाच्यत ॥ ८० ॥
ज्वालाऽपि भूपतिं प्रोचे, मया जैनो महारथः । कर्णीरथायितोऽकारि, संसाराम्बुधितारणे ॥ ८१ ॥
स्वामिंस्तव प्रसादेन, परिभ्राम्यतु मे रथः । प्रायो मिथ्यादृशो जैन–मुत्सवमसहिष्णवः ॥ ८२ ॥
अधोमुखमथोवाच, भूपो लक्ष्मीवचोऽखिलम् । पूर्वं मम तयाज्ञप्तं, प्रतिपन्नं मया च तत् ॥ ८३ ॥
क्रोधोज्ज्वालमथो ज्वाला–ऽलापीद्यदि रथो मम । न भ्रमिष्यति पूर्वं तत्, कर्तास्म्याऽऽहारवर्जनम् ॥ ८४ ॥
श्रुत्वेदं भूधनोऽध्याय–दितो व्याघ्र इतस्तटी । अयं न्यायः समायातो, ह्यविमोच्याग्रहास्त्रियः ॥८५॥
ततः संशयमापन्न, उभयो रथयोरपि । राजाऽऽसीन्महायात्रां, विग्रहे निर्णयः कथम् ? ॥ ८६ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

अथ स्वमातृदुःखेन, महापद्मः प्रपीडितः। पुत्राणां मातृभक्तानां, किमदेतन्निगद्यते ॥ ८७ ॥
निशीथे तु महापद्मः, सुप्तेषु पुरवासिषु। निर्ययौ हस्तिनापुरा-दभिमाने कुतः स्थिरः ? ॥ ८८ ॥
स क्रमादटवीं प्राप-देकां कालसहोदरीम्। तत्राऽपि पर्यटन्नेष, तापसाश्रममैक्षत ॥ ८९ ॥
सच्चक्रे तापसैरेष, प्रियपान्थसमागमैः। एकोऽपि तत्र चाऽवासी-न्निजागार इवोज्ज्वले ॥ ९० ॥
इतश्चम्पामहापुर्यां, भूधनो जयमेजयः। रुद्धः कालमहीन्द्रेण, युद्धाऽनश्यत्कथश्चन ॥ ९१ ॥
कालराजभटैः काल-चरैरिव महापुरी। लुण्ट्यते स्म गतप्राणा, पुरनाथे पलायिते ॥ ९२ ॥
तस्यान्तःपुरपद्मिन्यः, कुरङ्गीव दवानले। काकनाशं स्म नश्यन्ति, गतिः काऽन्या हि भीजुषाम् ॥ ९३ ॥
चम्पेशितुः प्रिया नाग-वती स्वसुतया सह। प्रनष्टा मदनावल्या, तत्राऽऽगात्तापसाश्रमम् ॥ ९४ ॥
अमुष्य मदनावल्या, समम् विषयबाणतः। अन्योऽन्यदर्शनाज्जज्ञे,-ऽनुरागः प्रकटो हृदि ॥ ९५ ॥
जातरागामिमां ज्ञात्वा, प्रोवाच मदनावलीम्। मा कार्षीश्चापलं पुत्रि ! स्मर नैमित्तिकं वचः ॥ ९६ ॥
षट्खण्डभरतक्षेत्रं, शासितुस्त्वं भविष्यसि। पत्नी निमित्तकेनेति, ख्यातमस्ति पुरः स्मर ! ॥ ९७ ॥
यत्र वा तत्र वा पुंसि, माऽनुरागं वृथा कुरु। न भाति चरणे बद्धं, करभस्य हि नूपुरम् ॥ ९८ ॥
एवमुक्ताऽपि वात्सल्यात्, रागं तु मदनावली। दधार मानसगतं, दुर्जयं स्मरवल्गितम् ॥ ९९ ॥
यतः—
अपि चण्डानिलोद्भूत-तरङ्गस्य महोदधेः। शक्येत प्रसरो रोद्धुं, नानुरक्तस्य चेतसः ॥ १०० ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

तद्विप्लवभयात्पद्म-मवोचत तपोधनः। वत्स! स्वच्छमते! मार्गो, गच्छतस्ते शिवाय च ॥ १०१ ॥
श्रुत्वाऽध्यायदसौ पद्मो, युगपच्चक्रिणौ नहि। मच्चित्तमस्यां रक्तं तु, भवेयं चक्रभृत्ततः ॥ १०२ ॥
ममैव हि गृहिण्येषा, भविता कमलानना। निषिद्धमपि यच्चित्त-मस्यां धावति साम्प्रतम् ॥ १०३ ॥
निश्चित्येति महापद्मो, मुक्तवांस्तापसाश्रमम्। भ्रमन्नाप पुरं सिन्धु-सदनं नाम सुन्दरम् ॥१०४॥
तत्र पूर्वदिगुद्याने, नागपुंनागमालिनि। वहत्कुल्यातटीटीक-मानमानसपक्षिणि ॥ १०५ ॥
महामधूत्सवे पौर-नार्यः शृङ्गारचारवः। जगुर्गीतानि ननृतुः, पञ्चमस्वरबन्धुरम् ॥ १०६ ॥ युग्मम् ॥
जलकेलिं व्यधुः काश्चि-ज्जलदेव्य इवोज्ज्वलाः। प्रियं कनकशृङ्गीभिः, सिञ्चन्त्यः प्रेमपादपम् ॥१०७॥
अनुयान्ति कुरङ्गाक्ष्यः, प्रेयांसमपि सागसम्। आदेशादिव दुर्जेय-मनोभवगुरोर्गुरोः ॥ १०८ ॥
तत्केलितुमुलं श्रुत्वा, महासेनमहीभुजः। हस्तीन्द्रः स्तम्भमुद्भ्रान्तो,-ऽभनक्कदलिकाण्डवत् ॥ १०९ ॥
आरोहकौ निपात्योच्चै-र्भञ्जन्पुरवरण्डकान्। गोणीरुच्छालयन्व्योम्नि, नालिकेरफलोपमाः ॥ ११० ॥
देहे वायोरपि स्पर्शे, सहमानो न जातुचित्। प्रतीकारैः परित्यक्तः, प्रतीकाराक्षमैरलम् ॥ १११ ॥
सबलः प्रबलं गर्जन्, मुक्त्वा नगरगोपुरम्। नगरीबहिरुद्यानं, द्विपः सर्पन्नुपाययौ ॥ ११२ ॥
॥ त्रिभिर्विशेषकम् ॥
प्रणेशुर्दूरतः पौरा, नार्यस्तत्रावतस्थिरे। गजेन्द्रगर्जितैः क्रूर-मन्त्रस्तम्भितविग्रहाः ॥ ११३ ॥
नक्रग्रस्तमरालीव कुररीव चलेक्षणाः। क्रोशन्तीः प्रेक्ष्य पद्माक्षीः, पद्मोऽजनि दयापरः ॥ ११४ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतासां युगपत्प्राप्तं, मरणं केलिकानने । एतास्त्रातुं पुरोऽभ्येति, न वीरः कोऽपि विक्रमी ॥ ११५ ॥
विभाव्येति महापद्मः, सद्म स्थाम्नां महीयसाम् । अरे रे ! व्यालवेताल !, वीक्षस्व मम सन्मुखम् ॥११६॥
इत्युक्त्वाऽभिमुखं तस्य, दधावे व्यालकुञ्जरः । काश्यपीं पादविन्यासैः, कम्पयन्कर्णतालवत् ॥ ११७ ॥
असदथ महात्माऽयं यमागारे न्यचिक्षिपत् । आस्यं दत्त्वा निजप्राणा–नित्यूचुः पौरयोषितः ॥११८॥
जिञ्जिद्दिद्धीति वाक्यौघैः, खेलयन्व्यालदन्तिनम् । खेदयामास निःशेष–शस्त्रशास्त्रार्थकोविदः ॥११९॥
क्षणादागच्छतस्तूर्णं, तस्य व्यालस्य सन्मुखम् । कुण्डलीकृत्य चिक्षेप, निजोत्तरपटं पुरः ॥ १२० ॥
विव्याध सिन्धुरो मत्तो, दन्ताग्रैरुत्तरच्छदम् । मलिनानां मदान्धानां, कुतः स्यान्मदनिस्तरः॥१२१॥
पुच्छेनाऽस्य महावंश–मारुरोह नृपात्मजः । कलापं पूरयामास, द्विपश्च वशमानयत् ॥ १२२ ॥
वशीचक्रे महापद्मो, व्यालं बालमिवोच्चकः । उपगण्डश्चपेटाभिः, कण्ठे चाङ्गुष्ठपीडनैः ॥ १२३ ॥
बन्धुबुद्ध्याऽपरो लोकै–र्वर्ण्यमानपराक्रमः । आरोहकाय निर्मान–कायमर्पितवानमुम् ॥ १२४ ॥
नृणां जयजयारावै–राहूत इव भूपतिः । महासेनः समं तत्रा–ऽऽगमत्सामन्तपत्तिभिः ॥ १२५ ॥
प्रधानकुलभूरेष, विक्रमाधिकरूपवान् । वितर्क्येति महीपाल–स्तं निन्ये निजवेश्मनि ॥ १२६ ॥
तेन कन्याशतं स्वीय, भूनेता पर्यणाययत् । आप्यते हन्त केनाऽपि, तादृक्पुण्यधरो नरः ॥ १२७ ॥
भुञ्जानस्य समं भोगा–स्ताभिः साकं नृपात्मजः । संस्मृतिर्मदनावल्या, अजायत दिवाऽनिशम् ॥१२८॥
अन्येद्युः शयितः पद्मः, शय्यायां निशि विद्यया । वेगवत्याऽपजह्रेऽसौ, विद्याभृत्सुतया छलात् ॥१२९॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार–वृत्तान्तः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रतिबुद्धः कुमारोऽथ, नीयमानो नभोऽङ्गणे । मुष्टिमुत्पाटयाञ्चक्रे, वज्रदण्डमिवायताम् ॥ १३० ॥
ततो वेगवती वेगा–दुवाचेदं सुलोचना । मा कुपः स्थामधामेश !, चरितं शृण्विद् वरम् ॥ १३१ ॥
वैताढ्यपर्वते सूरो–दयं नामाऽस्ति पत्तनम् । तस्मिन्निन्द्रधनुर्नाम, सर्वविद्याधरेश्वरः ॥ १३२ ॥
श्रीकान्ता मुख्यकान्ताऽस्ति, जयचन्द्रा सुता तयोः । समानरमणाऽप्राप्तेः, पुरुषद्वेषिणी च सा ॥१३३॥
साऽन्यदा बहिरुद्याने, जयचन्द्रा गती सती । सुश्रावकैस्तरङ्गितं, भवतो गुणगुम्फितम् ॥ १३४ ॥
गीतश्रुतेरभूदुत्का, त्वयि भर्तृत्वकारिणी । अथवा शरणं तस्या, मरण केवलं विभो ! ॥ १३५ ॥
दुःखापन्नामिमां वीक्ष्य, चिन्तासन्तानपूरिताम् । अहमुक्तवती यामि, कस्तवाऽऽधिः प्रगल्भते ? ॥१३६॥
तयोचे कथितं भद्रे !, कः सुखं मे विधास्यति ? । वार्ताप्रश्नपरः सर्वो, न पुनः दुःखहारकः ॥ १३७ ॥
मयोचे सुभगे ! नूनं, तव दुःखं हराम्यहम् । आत्मानमपि संहृत्य, तव वाल्लभ्यवृद्धये ॥ १३८ ॥
जयचन्द्रा ततः स्माह, पुरुषद्वेषिणी पुरा । इदानीन्तु महापद्मे, पतित्वे दत्तमानसा ॥ १३९ ॥
भद्रे ! सर्वं करिष्येऽहमानयिष्ये तव प्रियम् । मा विषादपराऽभूस्त्वं, कार्यसिद्धिः शनैः शनैः ॥१४०॥
अमुमर्थं तयोः पित्रो–र्यथातथमचीकथम् । तावपि प्रीतिमाधत्ता–मनुरूपवरेच्छया ॥ १४१ ॥
देव ! तस्या वयस्याऽहं, वेगवती नभश्चरी । ताभ्यां निर्देशतोऽत्राऽऽगां, तवाऽऽनयनकर्म्मणि ॥१४२॥
एतदर्थे मया चक्रे,–ऽपहारस्तव सुन्दर ! । हृत्पद्मभास्करेदानीं, मुञ्च संक्षोभमात्मनः ॥ १४३ ॥
ततस्तेनाऽभ्यनुज्ञाता–ऽनैषीत्सुरोदये पुरे । उदियाय ततः सूरो, महापद्मदिदृक्षया ॥ १४४ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

अनुज्ञातः प्रगे सूरो-दयनाथेन राजसूः । जयचन्द्रामुपायंस्त, रोहिणीमिव चन्द्रमाः ॥ १४५ ॥
जयचन्द्राविवाहं तं, श्रुत्वा मातुलनन्दनौ। महाविद्यामदान्धौ तौ, गङ्गाधर-महीधरौ ॥ १४६ ॥
मुहुश्चुकुपतुस्तूर्ण - मलङ्घर्मीणविक्रमौ । पद्मं सर्वाभिसारेण, योद्धुकामावुपाययौ ॥ १४७ ॥
महापद्मस्ततः क्रुद्धो, विद्याधरपरिवृतः । नगरान्निरगादेष, विक्रमी रणरङ्गवान् ॥ १४८ ॥
कांश्चन मारयामास, त्रासयामास कांश्चन । अयोधयदरीनेष, एकोऽपि बहुरूपवान् ॥ १४९ ॥
तौ च विद्याधरौ सैन्य-भङ्गमालोक्य विक्रमौ । हन्त श्रेयस्करं लोके, समये हि पलायनम् ॥१५०॥
इतश्चाविरभूद्यक्ष-सहस्रेण विकस्वरम् । भास्करबिम्बवद्भास्व-चक्रमायुधवेश्मनि ॥ १५१ ॥
शस्त्रागारिक एत्याऽऽशु, चक्रोत्पत्तिं महीभुजः । अथ विज्ञपयामास, जयवल्लीमिवोदिताम् ॥ १५२ ॥
ततस्तत्र समागत्य, चक्ररत्नस्य भास्वतः । काश्मीरसलिलैः स्नात्रं, जिनेन्द्रस्येव स व्यधात् ॥ १५३ ॥
पृष्टेऽथ स्थासकांश्चक्री, स्वयं मृगमदैर्व्यधात् । चक्षुर्दोषापहाराय, भारपट्ट इवोच्चकैः ॥ १५४ ॥
सौवर्णैस्तण्डुलैर्मेरु-पर्वतांशैरिवाऽऽगतैः । पुरोऽष्टाशाजयायेव, स लिलेखाऽष्टमङ्गलीम् ॥ १५५ ॥
पुष्पैः सुगन्धिभिर्वासै-र्वासोभिश्च तदर्चयत् । कल्याणीभक्तयोऽन्येऽपि, जनाः पूजितपूजकाः ॥१५६॥
अशोकतरुवत्तीर्थ-करवच्चक्रभृत्ततः । त्रिश्च प्रदक्षिणीचक्रे, चक्रं तुष्टाव चोच्चकैः ॥ १५७ ॥
तत्रैव विहिताऽऽवासो,-ऽष्टाह्निकां तस्य निर्ममौ । मङ्गलस्नानहेतुश्च, स्नानागारमगादसौ ॥ १५८ ॥
तं मुक्तहारनेपथ्यं, धृतस्नानीयवाससम् । तलैः सहस्रपाकाद्यै-रभ्यानञ्जुश्च मर्दकाः ॥ १५९ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

तमाशूद्वर्तयामासु-र्दिव्यचूर्णेन चक्रिणम्। स्वर्णकुम्भैः करोत्क्षिप्तैः, स्नपयामासुरङ्गनाः ॥ १६० ॥
अथ चक्री कृतस्नानः, कृतचारुविलेपनः। संव्यानः शुशुभे वस्त्रै-र्हरहासैरिवोज्ज्वलैः ॥ १६१ ॥
गुणौघैरिव नेपथ्यैः, सर्वाङ्गीणैर्विभूषितः। उद्घोष्यमाणमाङ्गल्य, चक्री द्विरदमासदत् ॥ १६२ ॥
सर्वतो ध्वनयन्योद्धु, व्याहरन्निव विद्विषः। प्रस्थानमङ्गलाख्यायी, दुन्दुभिर्व्यानशे दिशः ॥ १६३ ॥
समदैर्द्विरदैरुच्चै-जङ्गमैरिव पर्वतैः। अश्वैः सूर्याश्वविजय-प्रस्थितैरिव सर्वतः ॥ १६४ ॥
रथैः स्वयंवरागारै-र्मूर्तैरिव जयश्रियः। अन्वितः पत्तिसङ्घातः, सिंहरिव सविक्रमैः ॥ १६५ ॥
त्रयोदशमहारत्नै-र्द्वेषिद्वेषविजित्वरैः। महापद्मो महाबाहु-श्चक्री चक्रानुगोऽचलत् ॥ १६६ ॥
॥ त्रिभिर्विशेषकम् ॥
अनुकूलैस्तदोत्कर्ष-वल्लीपल्लवनाम्बुदः। आख्यायि दिग्जयस्तस्य, शकुनैर्गणकैरिव ॥ १६७ ॥
अथ योजनमानेन, प्रयाणेनान्वहं व्रजन्। जगाम मागधं तीर्थ-मर्थसिद्धेरिवाऽऽलयम् ॥ १६८ ॥
तीर्थकुमारमेषोऽपि, कृत्वा मनसि मागधम्। कृताऽष्टमः संयुगीनं, रथमध्यास्त चक्रभृत् ॥ १६९ ॥
चतुर्घण्टरथारूढो, नाभिदघ्नं पयोऽम्बुधेः। गत्वाऽधिज्यं धनुः कृत्वा, नामाङ्कं बाणमक्षिपत् ॥१७०॥
द्वादशयोजनान्येषो-ऽतिक्रम्य क्षणमात्रतः। मागधेशसभामध्ये, पपात हृदि शल्यवत् ॥ १७१ ॥
तेनास्य मारुतेनेव, क्रोधवह्निरदीप्यत। ऊर्ध्वभ्रूपल्लवोल्लास-धूमवल्लीभयानकः ॥ १७२ ॥
तत्र मन्त्रानिवाऽऽलोक्य, चक्रिनामाक्षराण्यसौ। गूढपादिव शान्तोऽभू-न्नासाध्यं किं धनुष्मताम्! ॥१७३॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सप्राभृतः समागत्य, सोऽव्योचच्चक्रवर्तिनम् । तवाऽऽज्ञाकारकोऽस्मी-ति ब्रुवंस्तेन विसर्जितः ॥१७४॥
आत्मना पत्रिणं मुक्त्वा, कोटीरकुण्डले अपि । तद्दत्ते प्राप्य पूर्वस्या, निरवर्तत चक्रभृत् ॥ १७५ ॥
कटिसूत्रं रत्नमयं, वरदामाऽधिपो ददा । चूडामणिकटकानि, तस्मै प्रभासपस्तथा ॥ १७६ ॥
याम्यायां वरदामाख्यं, पुरं प्राग्वदसाधयत् । प्रतीच्याञ्च प्रभासेशं, पूर्ववच्चक्रनायकः ॥ १७७ ॥
सोऽगात्सिन्धुं तथाऽऽदत्ते, रत्नभद्रासने उभे । ततो वैताढ्यमभ्यगात्, साधयामास तत्पतिम् ॥१७८॥
गुहां तमिस्रां गतवान्, कृतमालमसाधयत् । स्त्रीरत्नयोग्यनेपथ्यं, तद्दत्तं प्राप्य च स्थितः ॥ १७९ ॥
चक्रिणः शासनात्सिन्धु-मुत्तीर्य गुरुवर्त्मना । प्रथमं निष्कूटं सिन्धोः, सेनानीरप्यसाधयत् ॥ १८० ॥
ततो निवृत्त्य सेनानी-श्चक्रिणः पार्श्वमभ्यगात् । उद्घाटयत्तमिस्रां च, स दण्डेन कृताष्टमः ॥ १८१ ॥
चक्रीभरत्नमारूढः, कुम्भेऽस्य न्यस्य दक्षिणे । मणिरत्नं प्रकाशाथ, तमिस्राञ्चाविशद् गुहाम् ॥ १८२ ॥
व्यधादेकोनपञ्चाश-न्मण्डलान्यर्कबिम्बवत् । काकिणीरत्नतोऽगच्छ-त्तदुद्द्योतेन चक्रभृत् ॥ १८३ ॥
उन्मग्नानिमग्ने नद्या-वुत्तीर्य गुरुपद्यया । स्वयमुद्घाटितेनोदक्-द्वारेण च विनियया ॥ १८४ ॥
परभागं गते तस्मिन्, किराता योद्धुमुद्यताः । धिक्परैः परिभूतानां, समाना न परिस्थितिः ॥ १८५ ॥
अथाऽभिद्यन्त करिणो, मृत्स्नापिण्डवदुच्चकैः । कलिङ्गवदखण्ड्यन्त, शातकुम्भैस्तुरङ्गमाः ॥ १८६ ॥
अत्यन्तास्तक्षुरप्रग्रैः, कर्तरीभिरिव ध्वजाः । आन्तरं तापिनिस्वाना, योधर्दण्डैः फलानिव ॥ १८७ ॥
प्रहारमिषमासाद्य, तद्व्यथामथिता इव । लुठन्ति धरणीपीठे, निर्जीवा इव कातराः ॥ १८८ ॥युग्मम्॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नवमो भवः
भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

अमुः पेतुरगुः सङ्ख्या–मेगुर्युयुधिरे परे । रक्ष रक्षेति जगदुः, केचिच्छत्रून्मुहुर्मुहुः ॥ १८९ ॥
अपात्यन्त किरातानां, पत्तयस्तृणमर्त्यवत् । अथ तैः संस्मृतो मेघः, स वृष्टः प्रलयाब्दवत् ॥ १९० ॥
तद्वृष्टिप्रलये प्राप्ते, चक्री चर्म तदाऽस्पृशत् । द्वादशयोजनानीद–मवर्द्धत जलोपरि ॥ १९१ ॥
चर्मोपरि स सैन्यो–ऽभूदूर्ध्ववारिनिवारकम् । छत्ररत्नं दधौ चक्री, चर्मवद्विस्तृतं क्षणात् ॥ १९२ ॥
महापद्मोऽथ दण्डे द्रागू, मणिरत्नं न्यवेशयत् । तेनार्केणेव विद्योत–श्चक्रे सैन्यस्य सर्वतः ॥ १९३ ॥
गृहपत्याह्वरत्नेनो–प्यन्ते ये शालयो प्रगे । लूयन्ते ते च मध्याह्ने, सैन्यं तद्भोजनात्सुखि ॥ १९४ ॥
सप्ताहान्मेघकुमारैः, किराताः प्रतिबोधिताः । नत्वा दत्त्वा च विभवं, तदाज्ञां प्रतिपेदिरे ॥ १९५ ॥
तेनैव चर्मरत्नेन, गत्वा सिन्धोः परं तटम् । प्रसाध्याऽऽगमदुर्वीश–पार्श्वे सेनापतिस्ततः ॥ १९६ ॥
ततो हिमाचलोपान्ते, सैन्यमावास्य तस्थिवान् । विधिवत्तदधीशश्च, साधयामास पत्तिवत् ॥ १९७ ॥
काकिण्याप्येकया जैत्रीं, प्रशस्तिमिव शाश्वतीम् । अद्रौ वृषभकूटाख्ये, स्वसञ्ज्ञां न्यस्तवानसौ ॥१९८॥
साधयित्वाऽथ सेनानी–र्गङ्गाया अपि निष्कुटम् । अगाच्चक्रिणमेषोऽपि, नाट्यमालमसाधयत् ॥१९९॥
महापद्मस्ततश्चक्री, गङ्गायास्तटमासदत् । देवीश्च जाह्नवीश्चक्रे, सिन्धुवद्वशवर्तिनीम् ॥ २०० ॥
द्वादशयोजनायामा, नवयोजनविस्तरा । निधयो नव विस्पष्टा, मञ्जूषाकृतयोऽभवन् ॥ २०१ ॥
नेपथ्याद्वा सुशास्त्राणि, मानाङ्कैः पाण्डुकान्निधेः । नेपथ्यविधयः सर्वे, नृनार्यो पिङ्गलादपि ॥ २०२ ॥
चतुर्दशानां रत्नानां, लक्षणं सर्वरत्नतः । सेनानी गृहपतिश्च, पुरोहितगजौ हयः ॥ २०३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वार्द्धकि[6]स्त्री[7]स्तथा चक्रं[8], छत्रं[9] चर्म[10] मणी[11] असिः[12] । काकिणी[13] दण्ड[14] इत्येके - न्द्रियपञ्चेन्द्रियाण्यपि ॥ २०४ ॥
समस्तवस्तुजातीनां, भक्तीनाञ्च पृथक् पृथक् । गन्धधातुभिदानाञ्च, महापद्मात्समुद्भवः ॥ २०५ ॥
कालात्कालस्य विज्ञानं, भूत - भावि - भविष्यतः । महाकालाद्द्रव्यविधिः, युद्धभेदास्तु माणवात् ॥२०६॥
शङ्खात्संगीतभृत्यादि - विधयः सर्वसम्मताः । तेषामेकैकशोऽधिष्ठा - यका देवा भवन्ति च ॥ २०७ ॥
पल्योपमायुषो नित्य - वास्तव्या यामिका इव । ते देवा निधयश्चापि, महापद्ममुपागताः ॥ २०८ ॥
कृत्वेति भरतक्षेत्रे, षट्खण्डविजयं जयी । दृष्टपूर्वां वधूरत्नं, स स्मरन्मदनावलीम् ॥ २०९ ॥
स्त्रीरत्नेन विनाऽमुष्य, चक्रित्वार्द्धिरपूर्यत । तथाऽऽश्रमपदं पद्म - स्ततोऽगात्सपरिच्छदः ॥ २१० ॥
तापसाश्चक्रुरातिथ्य - मस्मै चक्रधराय ते । जयमेजयभूपोऽपि, दत्तवान्मदनावलीम् ॥ २११ ॥
सञ्जाताऽशेषरत्नार्द्धिः, स ययौ हस्तिनापुरम् । नेमतुः पितरौ भक्त्या, विनयो राजपुत्रतः ॥ २१२ ॥
विज्ञाय चरितं सूनो–र्लोकोत्तरपराक्रमम् । सोल्लासौ पितरौ स्तः स्म, रससिक्तौ लताद्रुमौ ॥ २१३ ॥
तदाऽस्माकं निरोपेण, सुव्रतो गणभृत्तमः । विहरन् परिरुद्याने, सशिष्यः समवासरत् ॥ २१४ ॥
तं ज्ञात्वा समवसृतं, ततः पद्मोत्तरो नृपः । अगाद्विवदिषुः धर्मे, सत्वराः कृतिनो यतः ॥२१५॥
नत्वा सूरिक्रमौ राजा, यथास्थानमुपाविशत् । चकार देशनामित्थं, वैराग्यरसजाह्नवीम् ॥ २१६ ॥
अहिंसा धर्मकल्पद्रोः, सुमेरुगिरिकन्दरा । अहिंसा जिनतत्त्वेषु, सारं परमतत्त्ववत् ॥ २१७ ॥
एकांशेनाऽपि हिंसा स्यात्, पाप्मनि विहिता जनैः । दामन्नकोदाहरण–मत्र शृणुत भावतः ॥ २१८ ॥



भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तथा हि—

पुरं राजगृहं नाम, गृहं सकलसम्पदाम् । सुनन्दो नाम तत्राऽभू–ज्जालिकः पापमालिकः ॥२१९॥

जिनदासाऽभिधस्तस्य, मित्रं पात्रं महाधियाम् । अन्येद्युरगमत्तेनो - द्यानक्रीडाचिकीरसा ॥ २२० ॥

श्रमणानामग्रणीः कोऽपि, तेनाऽदर्शि सुदर्शनः । मूर्तिमानिव तीर्थेश - धर्म्मशर्म्मधुरन्धरः ॥ २२१ ॥

उभावथ मुनिं दृष्ट्वा, ववन्दाते तपोनिधिम् । न्यषीदताञ्च तद्वक्त्र - शीतांशुद्युतिनिर्मलौ ॥ २२२ ॥

जननी सुखकोटीनां, दलनी दुष्टकर्मणाम् । मथनी सर्वपापानां, शोधनी शिवकर्म्मणाम् ॥ २२३ ॥

जिनशासनसर्वस्वं, वश्या विद्यागमस्य च । जीयाज्जीवदया जीव-जीवातुः सर्वदेहिनाम् ॥ २२४ ॥युग्मम्॥

न भोक्तव्यं क्वचिन्मांसं, स्वमांसमिव देहिनाम् । शाकिनी गुरवस्तेषां, निर्दया भक्षयन्ति ये ॥ २२५ ॥

श्रुत्वेति तद्वचः श्रव्य, सुनन्दोऽवददीदृशम् । अतः परं मुने ! जीव - वधं कर्तास्मि न क्वचित् ॥२२६॥

बहुदोषमये सम्यक्, विरक्तो मांसभक्षणे । जन्मन्यद्य दिनं जातं, गणनायां गणेश्वर ! ॥ २२७ ॥

पुनर्नत्वाऽगमद्गेहं, सुनन्दः सुहृदा सह । धर्म कर्तुं प्रवृत्तश्च, निवृत्तश्च महैनसः ॥ २२८ ॥

कदाचिद्भवत्कालः, सर्वथा सस्यवर्जितः । येन नामाऽपि धान्यानां, श्रूयते दृश्यते नहि ॥ २२९ ॥

मांसभोजी जनो जज्ञे, क्षुधार्ताः किं न कुर्वते ? । ततः सुनन्दो भणितः, प्रियया प्रियवाक्यतः ॥२३०॥

उपस्रोतो व्रज प्रेयो !, मत्स्यस्तोमजिघृक्षया । यथा तव कुटुम्बस्य, प्राणितुं भवति स्फुटम् ॥ २३१ ॥

असावूचे प्रिये ! चारु, नोद्यते मुग्धमानसे ! । किं कार्यं जीवितव्येन, जीवहत्याविधायिना ॥ २३२ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वगुरोरन्तिकेऽग्राहि, धर्मो जीवदयापरः । भङ्गं न तस्य कुर्वेऽहं, स्वसिक्तस्येव शाखिनः ॥ २३३ ॥
विहस्याऽथ प्रियाऽवोच–दहो ! ते धर्मबुद्धिता । रक्षन्परमतान्प्राणान्, कुटुम्बं हंसि सौनिकः ॥ २३४ ॥
अथाऽन्ये मिलिताः सर्वे, तत्प्रियापक्षमार्गगाः । युक्तेयं भाषते रामा, कुटुम्बार्थे क्व पातकम् ? ॥२३५॥
स जालं ग्राहितस्तैश्च, प्रसह्याऽसह्यवाक्यतः । पिपीलिकाभिलग्नाभि–र्मार्यते पवनाशनः ॥ २३६ ॥
गत्वा तरङ्गिणीं जालं, क्षिप्तं तेन नदीरये । पुरस्तादिव नृत्यन्तो, मृत्योः पेतुस्तरां झषाः ॥ २३७ ॥
कम्पमानतनूनेनान्, दृष्ट्वाऽभूत्करुणापरः । वासिता जिनवाचा ये, ते स्युरीदृशमानसाः ॥ २३८ ॥
मुक्त्वा जालं नदीतीरे, आकृष्टास्तिमय-स्ततः । तेषां मध्यात्पुनर्भग्ना, पदौ कस्यापि काचन ॥ २३९ ॥
तं नृत्यन्तं समालोक्य, मीनं दीनशरीरकम् । प्रयाताऽस्मि कथं पार–माः पापस्य महीयसः ॥ २४० ॥
अहं कृते कुटुम्बस्य, वधं जीवं करोमि न । करोम्येव दयाधर्म्मं, किं कुटुम्बेन सागसा ? ॥ २४१ ॥
ध्यात्वेति दृढसत्त्वेन, विज्ञातजिनतत्त्वतः । प्रपेदेऽनशन धीर-स्तीर्थङ्करपदस्मृतिः ॥ २४२ ॥
अथाऽसौ मागधे देशे, पूर्वाशामुकुटोपमे । भूभुजा नीतिविज्ञेन, पालिते नरवर्म्मणा ॥ २४३ ॥
मणिकृच्छ्रेष्ठिनः पत्यां, सुलसायां स नन्दनः । उत्पन्नो नन्दनत्वेन, मृतिः पित्रोरथाऽभवत् ॥२४४॥
सकुटुम्बगृहस्यापि, मारिरासीद्भयङ्करः । ततो लोकैर्वृतिश्चक्रे, हन्त प्राणा हि वल्लभाः ॥ २४५ ॥
यतः—
ददाति दयया योऽन्नं, पयः पाययते च यः । तस्याश्चलदलैर्लग्नो, मारिः प्रसरति क्षितौ ॥ २४६ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एकः स बालको दैवा-ज्जिजीव निखिले कुले । निर्ययौ च शुनां चक्रैः, कृतच्छिद्रेण कोलवत् ॥ २४७ ॥
श्रेष्ठि-सागरपोतस्य, भ्रमन्नेष गृहं ययौ । धृतश्च बहिरेत्येष, क्रियासमभिहारतः ॥ २४८ ॥
दामाञ्जनेन बद्धोऽसौ, धृतो गेहे दिवानिशम् । दामन्नक इति ख्यातिं, स प्राप श्रेष्ठिनिर्मिताम् ॥२४९॥
अन्येद्युलक्षणैर्लक्षैः, सङ्कीर्णो बहुभिः शुभैः । क्रीडां कुर्वन्नसौ बालो, वीक्षाञ्चक्रे तपस्विना ॥ २५० ॥
अवलोक्य दिशाश्चक्रं, वक्रेतरगुणो मुनिः । अपरं मुनिमाहैवं, बालो भावी गृहेश्वरः ॥ २५१ ॥
यदूचे—
भो आयन्नहमहवयणुतणुलक्खणेहिं मुणामि । इहु कालउ एयहघरहकम्मिणि भविस्सइ स्सामि ॥२५२॥
सागरश्रेष्ठिनाऽश्रावि, मुनिनोदीरितं वचः । कुड्यन्तरस्थितेनोच्चै-र्वीक्ष्य वाच्यं दिवाऽनिशम् ॥२५३॥
श्रुत्वेति दध्यौ स वणिग्, नैवैतेऽनृतभाषिणः । भवितव्यं कथमिदं, बलिष्ठा भवितव्यता ॥२५४॥
कथमेष गृहस्वामी, मयि पुत्रेऽपि जीवति । परमुपायः कर्तव्यो, यद्भविष्यः सुधीर्हि किम् ? ॥२५५॥
विस्मृत्येव मुनेर्वाचः, सागरो वणिजाम्पतिः । दामन्नकमुपाहन्तुं, प्रारेभे निर्घृणाशयः ॥ २५६ ॥
अथ भूयिष्ठवित्तेन, मोदकानाम्प्रदानतः । चण्डालं चण्डमतिक-स्तोषयामास नित्यशः ॥ २५७ ॥
सोऽप्यूचे वणिजांमुख्य !, निर्देशं देहि मेऽधुना । मारितस्तत्प्रसादेन, नीचा ह्युपकृतिप्रियाः ॥२५८॥
ततो रहसि सोऽप्यूचे, निभृतं दामपुत्रकः । मारणीयो दर्शनीयं, प्रत्यभिज्ञानमाङ्गिकम् ॥ २५९ ॥
प्रतिपन्नमिदं वाक्यं श्वपाकेन विपाकतः । दानात्किं नहि सिद्ध्येत, दुःसाधमपि हेलया ॥२६०॥

नवमो भवः
भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

सायमन्येद्यवि दाम-स्नकः श्रेष्ठिनिरोपितः । चण्डालपाटकेऽयासी-दतो ध्वान्तमभूत् क्षितौ ॥२६१॥
विधाय कर्तिकां हस्ते, शब्दितस्तेन बालकः । सोऽगादज्ञानभावेन, गेहान्तर्बर्करो यथा ॥ २६२ ॥
धृतश्च पाणिना बालो, मृणालमृदुदोर्लतः । संहर्षादिवचैस्तस्य, करुणा तरुणाऽजनि ॥ २६३ ॥
आः! पाप! कथमीदृक्ष-माचरिष्यामि निर्दयः । अमुत्र जातश्चण्डालः, किं मे भावि परत्र तु ॥२६४॥
निराग कथं हन्मि, सापराधमिवाऽर्भकम् । न हस्तौ वहतो मेघं, घ्नतोऽमुं मृदुलाङ्गकम् ॥ २६५ ॥
ध्यात्वेति श्वपचेनाऽथ, रटतः कन्दुनिस्वनम् । कृत्ता कर्तिकया तस्या-ङ्गुलिः कमलनालवत् ॥२६६॥
तेनाऽभ्यधायि तातस्त्वं, किं मां हंसि कुलारिवत् । मुञ्चैकदा, ददत्वाशु, जीवितं तव किङ्करः ॥२६७॥
श्वपचः प्राह जीवस्य, यद्यर्थी व्रज दूरतः । अन्यथा कदलीलावं, लविष्यामि शिरस्तव ॥ २६८ ॥
तेनोचे रुदता तात!, कर्तास्म्येवमसंशयम् । अद्यप्रभृति ते पुत्रो, जीवरक्षाऽऽदिमं व्रतम् ॥२६९॥
एवमस्त्विति तेनोक्ते, मुमुचे सुलसाऽऽत्मजः । दर्शयामास स प्रातः, श्रेष्ठिनोऽङ्गुलिखण्डकम् ॥२७०॥
तद्दर्शनादभूच्छ्रेष्ठी, कृतकृत्य इवाशये । दुर्वारवैरिवाराणां, मारणे हि महासुखम् ॥ २७१ ॥
अथाऽटव्यामटन्नेष, सागरादेशकारिणा । गोकुलस्वामिना दृष्टः, पुण्यसिंहाऽभिधेन सः ॥ २७२ ॥
विलोक्य सुन्दराकारं, बालमेनमुवाच सः । कुतस्त्योऽसि सखे! सोऽथ, बभाषे शृणु बान्धव! ॥२७३॥
अदृष्टमातृकः सोऽहं, पुमानिव निरक्षरः । उत्सन्नवंशजातश्च, दामन्नक इति श्रुतः ॥ २७४ ॥
श्रुत्वेत्युद्यदृयोद्युक्तो, निरपत्यमृगीदृशः । स्वस्याः स्नेहलचित्तेना-र्प्यर्पयदेनं सुतोपमम् ॥ २७५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तद्गुणै रञ्जिता सोच्चै-र्विनयः सर्वकार्म्मणम् । स्वाङ्गजातादप्यधिक-ममुं मेने मनोहरम् ॥ २७६ ॥
अथैष यौवनं प्राप, शृङ्गारद्विपकाननम् । इतश्चाऽऽगाद् वणिग्नेता, सागरस्तत्र कार्यतः ॥ २७७ ॥
सागरः सादरं दृष्ट्वा, व्रजस्याऽधिपनन्दनम् । पप्रच्छ पुण्यसिंहश्च कोऽयमेषः सुलोचनः ? ॥२७८॥
यथातथमुवाचैष, दृष्ट्वैनं करखण्डितम् । सैष एनं विनिश्चित्य, दध्याविति दुराशयः ॥ २७९ ॥
अयं केनचिद्दानेन, श्वपाकेन न मारितः । अथवा यतीनां वाचो, जायन्ते वितथाः कथम् ? ॥२८०॥
यथा स्थितस्य बाह्ये गो-धनस्यायमपि प्रभुः । तथा यदि रमाऽशेष-स्वामी स्यात्सत्यगीर्मुनेः ॥२८१॥
ध्यायन्तमिति गोस्वामी, श्रेष्ठिनं व्याजहार सः । कुतो यूयं चिरादत्र, समायाता नवा इव ॥२८२॥
पुण्यसिंह ! पुरस्तेऽहं, कथयिष्यामि मित्रवत् । परं राजगृहं यावत्, पुरं गत्वा ततः खलु ॥२८३॥
यत्कार्यं विद्यते श्रेष्ठिन्, तत्कार्यं लिख्य पत्रके । येन मे नन्दनो याती-त्यूचे गोधननायकः ॥२८४॥
ओमिति प्रतिपद्याऽसौ, अलिखत्पत्रकेऽखिलम् । दामन्नकः प्रेषितश्च, दत्त्वा शिक्षां यथाविधि ॥२८५॥
गतो राजगृहे मार्गे, श्रान्तो बाह्यसुरालये । स्थितः सुष्वाप कण्ठस्थ-लेखः सुमुखलोचनः ॥ २८६ ॥
अथ तत्र विषा नाम, सागरश्रेष्ठिनन्दिनी । तत्पञ्चबाणपूजायै, कल्याणी भक्तिभासुरा ॥ २८७ ॥
पूजयन्ती स्मरं देवं, सुप्तमेनमथैक्षत । नेत्रदन्तावलाऽऽलानं, कामं सङ्गमिवागतम् ॥ २८८ ॥
वीक्षमाणाऽथ तत्कण्ठे, लेखं ददर्श मुद्रितम् । उन्मुद्र्य वाचयामास, गिरा धीरं प्रशान्तया ॥ २८९ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

स्वस्ति गोकुलात् श्रेष्ठी सागरपोतः सुतं समुद्रदत्तं सस्नेहमालिङ्ग्य कुशलं वार्तयति
कार्यश्च अस्य पुरुषस्य धौतपादस्य विषं दीयतां इत्यर्थे न विकल्पः कार्यः ॥

वाचयित्वेति तं लेखं, विषयाऽचिन्ति सुन्दरः । प्रेयान्ममैष सम्प्राप्त-स्तातेन व्रजमीयुषा ॥ २९० ॥
अतः स्वयमयं गोष्ठात्तातेन प्रेषितः पुरे । विषं मन्नाममात्रायां प्रमादवशतोऽलिखत् ॥ २९१ ॥
कथमस्य महापुंसः, कामस्येव वपुःश्रिया । प्रदीयते विषं घोरं, दीयते हि विषा खलु ॥ २९२ ॥
ध्यात्वेति नेत्रराजीवा-ञ्जनेन मुखविप्रुषा । विदधे शून्यतालोपः, आकारश्च कृतो नवः ॥ २९३ ॥
अथैव मुद्रितो लेखः, पुण्यात्किं न प्रसिद्ध्यति ? । स्वयमागाद्विषा गेहे, सोऽपि निर्निद्रलोचनः ॥२९४॥
लेखः समुद्रदत्तेन, वाचितो मूलमन्त्रवत् । गणकश्च समाहूतो, लेखार्थः प्रकटीकृतः ॥ २९५ ॥
असौ सम्यग्निरीक्ष्योच्चैः, शुद्धिरस्याः करग्रहे । अद्यैव हायनान्ते वा, श्रेष्ठी सर्वविदाम्वरः ॥ २९६ ॥
अथवा कथमेवैनं प्रेषयामास गोष्ठतः । समुद्रदत्त ! कर्त्तव्यः, उद्वाहोऽद्यैव सुन्दरः ॥ २९७ ॥
ततः समुद्रदत्तेन, भूरिवित्तव्ययात्तदा । अकारि सन्ध्यासमये, पाणिग्रहणमङ्गलम् ॥ २९८ ॥
अत्रान्तरे जनैरायन्, गोष्ठाच्छ्रेष्ठीत्यभाषत । साधु साधु त्वया लब्धो, जामाता नयनप्रियः ॥२९९॥
श्रुत्वेत्यधायि तेनाऽथ, परिणीता विषा मम । अहो ! दैवस्य वैदुष्यं, सर्वकर्मीणमुत्थितम् ॥ ३०० ॥
कङ्कणाङ्कितहस्ताब्जं, भवद्धवलमङ्गलम् । वधू-वरं समायातो, दृष्टवान् वणिजांपतिः ॥ ३०१ ॥
यदस्य विग्रहं मूढः, कर्त्तुमिच्छामि किञ्चन । तदस्य जायते पुण्या-द्धिहीनं मुनिभाषितात् ॥ ३०२ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अयं गृहपतिर्जातो, गृहे मूलं मृगीदृशः। तासां तु वल्लभाः पुत्र्यो, जामाता वल्लभस्ततः ॥ ३०३ ॥
वरं वैधव्यमस्याः स्यान्, माऽभूदस्य गृहेशता। वरं निष्कुण्डलः कर्णो, न च्छेदेऽस्य प्रलम्बता ॥३०४॥
विमृश्येत्युपचण्डालं, गत्वाऽवादीत्कुतो नहि। स त्वया मारितो बालः, खड्गपाणिश्च निर्मितः ॥३०५॥
सोऽप्युवाच वणिग्नेतः! स्वं विनष्टं करोम्यहम्। प्राय एकाऽपराधे हि, क्षमन्ते किल कोविदाः ॥३०६॥
यदूचे—
स्थानं सर्वस्य दातव्यमेकवाराऽपराधिनः। द्वितीयपतने दन्ता, वक्त्रेणापि विवर्जिताः ॥ ३०७ ॥
अथ स्मित्वाऽवदच्छ्रेष्ठी, साधु साधु त्वयोदितम्। सायं पद्रेश्वरीचैत्ये, प्रेषयिष्यामि तं खलु ॥३०८॥
स विधेयो गतप्राणो, यदि मे प्राणितप्रदः। सङ्केतमिति दत्त्वाऽगा-ज्जामाता भणितोऽमुना ॥३०९॥
व्रज पूजयितुं भद्र!, कुल्यां पद्रेश्वरीं बहिः। परिणीतैर्नमस्कार्या, पूजनीया मनीषिभिः ॥ ३१० ॥
अथाऽचालीदसौ सायं, स्तोकस्तोकपरिच्छदः। दृष्टः समुद्रदत्तेन, हट्टस्थेन विधेर्वशात् ॥ ३११ ॥
दामन्नक! प्रदोषेऽस्मिन्, कुतो जिगमिषा तव। आचचक्षे स सत्यं तन्-मा गाश्चौरा बहिर्यतः ॥३१२॥
तव स्थाने त्वहं देवी-मिदानीमर्चयामि भोः!। त्वमत्र तिष्ठ सन्तुष्टः, प्रस्थितोऽहमितोऽधुना ॥३१३॥
सूचीभेद्यस्तमस्तोम-स्तदपुण्यादिवोत्थितः। बलिव्यग्रकराम्भोजः, सोऽगात्पद्रेश्वरीमठे ॥ ३१४ ॥
प्रविशन्नेष बाणेन, चण्डालेन निपातितः। द्वैतीयीकपदातिश्च, नंष्ट्वाऽगाच्छ्रेष्ठिनो गृहे ॥ ३१५ ॥
समुद्रदत्तवृत्तान्तः, कथितः श्रेष्ठिनः पुरः। तेनाऽऽहतो मृतो बाण-बन्धुनेव वणिग्वरः ॥ ३१६ ॥

नवमो भवः
भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

दामन्नकः स्वयं गेहे, नेताऽभून्मुनिभाषितात् । प्रातः पपाठ कोऽप्येतद्, बन्दी मङ्गलपाठकः ॥३१७॥
अणुपुंखमावहन्ता वि, आवया तस्स ऊसवा हुन्ति । सुहदुक्खकच्छपडहो, जस्स कयंतो वहइ पक्खम् ॥३१८॥
दामन्नको निशम्येदं, स्वचरित्रानुगं वचः । सहस्रत्रितयं हेम्नो, बन्दिने तुष्टये ददौ ॥ ३१९ ॥
अधिकं वणिजां दानं, निशम्य क्षितिवासवः । अमुमाह्वययामास, पप्रच्छ स्वयमागतम् ॥ ३२० ॥
गाथाश्रवणमात्रेण, दानं ते बन्दिनोऽधिकम् । सोऽप्याख्यान्मूलतः स्वीयं वृत्तमाश्चर्यकार्मणम् ॥३२१॥
तद्वृत्तश्रुतिसन्तुष्टः, पुष्टपुण्यमहर्द्धये । भूपालः प्रददावस्मै, स्वामित्वं वणिजां मतम् ॥ ३२२ ॥
अन्येद्यवि वणिग्नेता, निशाशेषेत्यचिन्तयत् । अन्तराया ममायाताः, अभूवन्नुत्सवा इव ॥ ३२३ ॥
विज्ञास्यामि कथमिदं चिन्तयन्निति चेतसि । चक्रिवान्देवपूजादि, प्रातःकृत्यं सुकृत्यधीः ॥ ३२४ ॥
धर्म्ममित्राऽभिधो मित्र-मवादीदिति कोमलम् । उद्याने विमलबोधः, सूरिरागाद्विरागधीः ॥३२५॥
तद्वचःश्रुतिसन्तुष्टो, गत्वा सूरिमवन्दत । वाञ्छिताथ पृच्छति स्म, स पूर्वभवमुज्झगौ ॥ ३२६ ॥
यज्जीवा निहताः पूर्वं तद्विपाकः कुलक्षयः । यद्रक्षिताः परं मत्स्याः, दीर्घायुष्यं ततस्तव ॥ ३२७ ॥
यतः—
स्यात् ज्ञानी ज्ञानदानेन, सुखी सत्पात्रदानतः । दीर्घायुरभयदाना-द्दीने दानाच्च भोगभाक् ॥ ३२८ ॥
यदेकस्य तिमेः पक्षो, भग्नो जालविवर्तिनः । तत्तवाङ्गुलिका भग्ना, कृतेः प्रतिकृतिर्यतः ॥ ३२९ ॥
दामन्नक इति श्रुत्वा, स्वचरित्रं महामुनेः । प्रपेदे तीर्थकृद्धर्म्मं, क्रमात्स्वर्गं जगाम च ॥ ३३० ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





श्रुत्वेति सुव्रतेनोक्तं, राजा पद्मोत्तरोऽवदत् । श्रुत्वा सुनन्दवृत्तान्तं, कम्पते मम मानसम् ॥३३१॥
एकस्यापि हि मत्स्यस्य, भग्नायां हन्त पक्षतौ । अभूद्दुःखं सुनन्दस्य, जीवस्य परजन्मनि ॥ ३३२ ॥
अस्माभिर्निर्दयस्वान्तै-ररयो निहता हठात् । बाला वियोजिता मातु-रात्तं परधनञ्च यत् ॥ ३३३ ॥
तदस्य सुव्रताचार्य !, पापस्य परिमोक्षणम् । कथङ्कारं करिष्यामि, तन्मार्गं मे समादिश ॥ ३३४ ॥
अथोचे सुव्रतसूरि-र्मुनिसुव्रतदीक्षितः । निःशेषपाप्मनां हन्त्री, जिनदीक्षैव नाऽपरम् ॥ ३३५ ॥
अथोचे भूपतिः पद्मो-त्तरः सुविनयोत्तरः । संस्थाप्य नन्दनं राज्ये, दीक्षां लाताऽस्मि साम्प्रतम् ॥३३६॥
तावान्तेतरिह स्थेयं, हेयोपादेयवेदकः । अथोचे सुव्रताचार्यः, स्थितोऽहमिति निश्चितम् ॥ ३३७ ॥
तत्पादानभिवन्द्याऽसौ, प्राविक्षन्नगरं नृपः । आहूय सत्वरं विष्णु-कुमारमिदमूचिवान् ॥ ३३८ ॥
दुःखखानिरयं वत्स !, 'संसारः सारताहतः । तमहं मोक्तुमिच्छामि, भवति न्यस्य वभवम् ॥ ३३९ ॥
विष्णुरप्यवदत्तात !, दुःखखानौ भवान्कथम् ? । मां विनिक्षिप्य नित्याय, सौख्याय यतसे भृशम् ॥३४०॥
अनु त्वां प्रव्रजिष्यामि, गमिष्यामि त्वदध्वना । इदं राज्यं मया त्यक्तं, निष्ठ्यूतमिव दूरतः ॥ ३४१ ॥
ततोऽसौ पद्ममाहूय, सोपरोधमवोचत । उपादत्स्वाऽखिलं राज्यं, प्रव्रजामोऽधुना वयम् ॥ ३४२ ॥
अभ्यधाद्विनयात्पद्म, आर्ये सत्यपि वः पदम् । कथङ्कारं मया ग्राह्यं, राजनीतिपरो नयः ॥ ३४३ ॥
विष्णो राज्यमलम्भूष्णो-र्युवराजा भवाम्यहम् । ततः पद्मोत्तरोऽवादी-न्निषेधं विष्णुनोदितम् ॥३४४॥
पद्मोत्तरो महापद्मं, निजे राज्ये न्यवेशयत् । उत्तमानां कुलाचारो, वार्द्धके व्रतपालनम् ॥३४५॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

पद्मोत्तरोऽप्यलाद्दीक्षां, गणभृत्सुव्रतान्तिके। सार्कं विष्णुकुमारेण, नैकाकी पुण्यवान् क्वचित् ३४६
आर्हतं मातृकं पद्मः, स्वपुरेऽभ्रामयद्रथम् । शनैः कार्याणि सिद्ध्यन्ति, नौत्सुक्यात्कार्यमेधते ॥३४७॥
प्रतिरथ्यं प्रतिरथ्यं, पूज्यमानं पुरीजनैः । स्वशासनमिवाकार्षी-द्धरण्यां भूपती रथम् ॥ ३४८ ॥
रासकाः परमार्हत्या, दीयन्ते स्म प्रतित्रिकम् । प्रतिस्थानं स्म तन्यन्ते, नाटकानि महात्मनाम् ॥ ३४९ ॥
रथभ्रमणकालं तु, श्रीमत्सुव्रतसूरयः । तत्रैव नगरे तस्थु-र्महापद्मोपरोधतः ॥ ३५० ॥
उन्नतिर्जिनधर्मस्य, विदधे पद्मचक्रिणा । कारयाञ्चक्रिरे विष्वग्, चैत्यान्यद्रीनिवोच्चकैः ॥ ३५१ ॥
सुचिरं गुरुभिः सार्द्धं, विहृत्य नृपसंयमी । उत्पन्नकेवलज्ञानः, शिवं पद्मोत्तरो ययौ ॥ ३५२ ॥
अस्य विष्णुकुमारस्य, तप्यमानस्य सत्तपः । अभूवन् लब्धयः सर्वा, याः श्रुता नाऽन्यतीर्थिभिः ॥३५३॥
पक्षिराज इवोत्तुङ्गे, सुमेरौ विजहार सः । कामरूपधरो लब्धे-र्विद्यासिद्ध इवाऽत्रनौ ॥ ३५४ ॥
विविधाऽभिग्रहग्राही, निगृहीतमनोभवः । अनुज्ञाप्य गणाधीश-मेकाकी विहृतः क्षितौ ॥ ३५५ ॥
अन्यदा सुव्रताचार्या वर्षाकल्पविधित्सया । साधुशैक्षसमाकीर्णा, हस्तिनापुरमाययुः ॥ ३५६ ॥
विदित्वा सुव्रताचार्याऽऽगमनं नमुचिः स्मरन् । प्राग्वैरं प्रतिचिकीर्षु-र्व्यजिज्ञपदिलापतिः ॥३५७॥
प्रतिपन्नो वरः प्राच्यः, स च मह्यं प्रदीयताम् । न्यासाऽपहारिणः सन्तो, न भवन्ति बहुश्रुताः ॥३५८॥
याचस्वेति नृपेणोक्तोऽब्रवीन्नमुचिमन्त्रिराट् । यावत्क्रतुं विधास्यामि, तावद्देह्यखिलामिलाम् ॥ ३५९ ॥
तथेति प्रतिपेदानः, सत्यसन्धो रसापतिः । न्यस्तवान् स्थापनाचार्य-मिव राज्ये महत्तमम् ॥ ३६० ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ततोऽन्तःपुरमभ्यागात्, स्वयं चक्रधरः सुधीः । प्रतिज्ञापालने सन्त-स्तरन्ते दुष्करेऽपि हि ॥ ३६१ ॥
निर्गत्य नगरादेष, कपटात्क्रतुपाटके । वीक्षितोऽजनि दुष्टात्मा, त्रेताग्निकुण्डपूरकः ॥ ३६२ ॥
तस्याऽभिषेकमाङ्गल्यं, कर्तुकामाः पुरीजनाः । आगच्छल्लिङ्गिनः सर्वे, विना श्वेताम्बरान्वरान् ॥ ३६३ ॥
सर्वेऽपि लिङ्गिनोऽप्यैयु-र्विना निर्मलचीवरान् । मात्सर्यादिव दुर्बुद्धि-स्तच्छिद्रं स्फुटमैक्षत ॥ ३६४ ॥
आगत्य नगरस्यान्तः, सापेक्षं तानदोऽवदत् । कस्मान्ममाभिषेकाय, नाऽऽयाताः श्वेतभिक्षवः ? ॥ ३६५ ॥
ये केऽपि लिङ्गिनोऽप्यासं-स्तेऽप्यायासुर्मम क्रतौ । राजाऽभिगम्यः सर्वैर्हि, राजायत्तास्तपोधनाः ॥ ३६६ ॥
यद्विप्रिया पुनर्यूयं, भवतां विप्रियोऽप्यहम् । सदृशे सदृशं कुर्या-दिति वेदविदां श्रुतिः ॥ ३६७ ॥
केचित्परस्य माहात्म्यं, नहि द्रष्टुं सहिष्णवः । मुखबन्धः कृतः पद्मै-रिन्दावपि कलापतौ ॥ ३६८ ॥
त्यजतां मामकं राज्यं, गम्यतामन्यतो द्रुतम् । स्थातव्यं भवद्भिर्नात्र, मर्यादावर्जिताशयैः ॥ ३६९ ॥
यद्यत्र भवतां किञ्चि-द्वीक्ष्येऽहं श्रमणं क्वचित् । तदा तं मारयिष्यामि, न दोषः कथिते सति ॥३७०॥
अथोचे सूरिरप्येवं, येऽमी लोकोत्तरक्रियः । अथ भूपो जगादैवं, त्यजतां विषयो मम ॥ ३७१ ॥
सप्ताहात्परतो ह्यत्र, तिष्ठतां दस्युवन्मृतिः । भविष्यतितरां मुण्डाः !, कथितं पौरसाक्षिकम् ॥ ३७२ ॥
इत्युदित्वा जगामैष, सूरिरप्यवदन्मुनीन् । विधातव्यं किमत्रार्थे ?, यथामति निगद्यताम् ॥ ३७३ ॥
यतः—
त्रैलोक्यवन्द्यपादाब्जो, भृगुकच्छपुरे स्थितः । दूरेऽस्ति सुव्रतस्वामी, कथं क्षेमो भविष्यति ? ॥३७४॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

परं जीवाकुलः कालः, प्रयातुं तन्न युज्यते । अयं मिथ्यात्ववान् मन्त्री, विचारयत सम्प्रति ।। ३७५ ।।
अथैषः सूरिरित्यूचे, षष्ठिवर्षशतीं तपः । तेपे विष्णुकुमारर्षि-र्भूत्वा चाखिललब्धिमान् ।। ३७६ ।।
साम्प्रतं मन्दरगिरौ, सोऽस्ति वर्षावधिस्थितिः । अग्रजश्चक्रिणोऽमुष्य, तद्वाक्यादेष शान्तिमान् ।।३७७।।
यस्तपोलब्धिभृद्भिक्षु-स्तमानेतुं प्रयातु सः । सङ्घकार्येषु लब्धीना-मुपयोगो हि लब्धये ।।३७८।।
तत्रैको मुनिरप्यूचे, सहसाऽहं विहायसा । तत्र गन्तुं समर्थोऽस्मि, नाऽऽगन्तुं तपसोऽल्पतः ।। ३७९ ।।
अथोचुः सुव्रताचार्या, विष्णुरेव महामुनिः । त्वां समानेष्यते नूनं, तस्य शक्तिः प्रथीयसी ।।३८०।।
अथासौ सुव्रताचार्या-न्नत्वा तार्क्ष्य इवाम्बरे । उत्पत्य मन्दरक्षोणी-धरेऽगाच्चित्तवल्लघु ।।३८१।।
विष्णुसाधुरमुं दृष्ट्वा, चिन्तयामासिवानिदम् । प्रावृट्काले कथं साधो-र्विहारो भवति क्षितौ ।।३८२।।
परं संघस्य सम्भाव्यं, कार्यं किञ्चन नाऽन्यथा । अयं महाव्रतधरः, परिपालितसत्त्वयः ।। ३८३ ।।
इति ध्यानपरं विष्णु-मुनिं मुनिरवन्दत । तं निजागमने हेतुं, जगाद क्रोधबन्धुरम् ।। ३८४ ।।
क्षणाद्विष्णुरमुं साधुं, गृहीत्वा गमनं रयात् । हस्तिनापुरमायासी-द्ववन्दे सुव्रतक्रमौ ।। ३८५ ।।
विष्णुर्नमुचिमभ्यागा-दथ साधुपरीवृतः । ववन्दिरे नृपो विष्णुं, विना नमुचिमन्त्रिणम् ।।३८६।।
विष्णुः प्रशमिनाम्मान्यः, सशान्तमिदमब्रवीत् । आप्रावृषमिहैवास-न्मुनयः सन्तु पत्तने ।।३८७।।
अयं वर्षर्तुरत्यन्तं, बहुजीवसमाकुलः । कथमेते महासत्त्वा, विहरन्ते दयाभृतः ।। ३८८ ।।
अमीभिर्भिक्षुभिर्भिक्षा-वृत्तिभिस्तव पत्तने । वसद्भिः का क्षितिर्नाम, प्रत्युताऽशिवरक्षणम् ।। ३८९ ।।

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

अथोचे नमुचिः क्रुद्ध - स्त्वां विनाऽमी ममाऽखिलम् । मुञ्चतु विषयं मान्य - स्त्वं तु पद्माग्रजत्वतः ॥३९०॥
विष्णुरप्यवदत् स्मित्वा, विषयास्ते मनोहराः । येष्वमी विहरन्त्युच्चैः, पावयन्तो भुवः स्फुटम् ॥३९१॥
यतः—
व्रतिनो जङ्गमं तीर्थं, सदाचारपरायणाः । न सन्ति येषु देशेषु, कुतस्तेषां पवित्रता ॥ ३९२ ॥
यमुपार्जयन्ति वित्तं, कायक्लेशं विधाय मुनयोऽमी । साधयति तमक्लेशेन, नरपतिः पालनात्तेषाम् ॥३९३॥
इक्ष्वाकुवंशसम्भूतै - र्भरताद्यैर्नरेश्वरैः । ये वन्दिताः कथं मन्त्रिन् !, निःसारयसि तानिह ॥ ३९४ ॥
इत्युक्ते विष्णुना मन्त्री, प्रत्यूचे कुत्सिताशयः । अलं सामवचोभिस्ते, श्राद्धोद्बोधविधायिभिः ॥३९५॥

नवमो भवः

वासं नेह ददाम्येषां, को निषेद्धा ममाधुना । राज्ञो विप्रियकारित्वात्, प्रत्यक्षा राक्षसा अमी ॥३९६॥

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

पुनरप्युक्तवान् विष्णुः, प्रशमामृतपूरितः । तिष्ठन्तूद्यान एवाऽमी, नगरीतः पृथक्कृताः ॥ ३९७ ॥
तमृषिं विहितामर्षं, न्यगदत्सचिवब्रुवः । पुरो बहिरपि स्थातुं, दद्मो नहि वयं क्वचित् ॥ ३९८ ॥
यद्यमीषां तु मर्यादा - हीनानां विप्रियात्मनाम् । विज्ञप्तिश्चेद्विधाता त्वां, हनिष्यामि शृगालवत् ॥३९९॥
इत्युक्तेरकुपद्विष्णु - र्मुक्त्वा प्रशमशीतताम् । अतिनिर्मथनादग्नि - श्चन्दनादपि जायते ॥४००॥
अशुचे ! नमुचे ! देहि, स्थानं मे त्रिपदीमिह । अथो नमुचिरित्यूचे, दत्तैषा मुण्डधारक ! ॥ ४०१ ॥
ये त्रिपद्या बहिर्मुण्ड्याः, पश्यामि तानहं स्वयम् । दस्युवन्मारयिष्यामि, निक्षिप्य नृपवेश्मनि ॥४०२॥
एवमस्त्विति तेनोक्ते, मुनिना सह मन्त्रिराट् । आगादुपवनं काला - ननं तस्यैव मूर्तिमत् ॥ ४०३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः प्रववृते साधुः, किरीटी मणिकुण्डली । पाणौ कृपाणं बिभ्राणः, कालरात्रिकटाक्षवत् ॥ ४०४ ॥
वामे वज्रं भुजे भीमं, ज्वालामालाविभीषणम् । खेचरान्फारफूत्कारैः, नाशयन्बालकानिव ॥ ४०५ ॥
पाददर्दरिकाघातै-रधः क्षोणीं क्षिपन्निव । उत्कल्लोलान् जलनिधिः, निर्मर्यादानिवाचरत् ॥ ४०६ ॥
आपगा अपि कुर्वाणः, स्थाने स्थाने प्रतीपगाम् । चिक्षेप जक्ष-चक्राणि, हारच्छिन्नमणीनिव ॥ ४०७ ॥
वाल्मीकोत्करवत्कामं, दारयन्पर्वतानपि । दहन्महीरुहव्यूहान्, कल्पकालाऽनिलायितः ॥ ४०८ ॥
भूपीठस्वर्गयोरन्त-रालं मातुमिवोन्नतम् । सदेहोऽपि कथङ्कारं, स्वर्गे गन्तुमना अयम् ॥ ४०९ ॥
लोकरूपधरः कोऽपि, मूर्तीभूतः पुमानयम् । एवमस्तोकलोकानां, विकल्पान्कल्पयन्नलम् ॥ ४१० ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः

॥ सप्तभिः कुलकम् ॥

प्रणष्टं दिग्गजैर्भीतैः, कुर्वाणैर्मुखचीत्कृतिम् । कथञ्चनाऽभिभूपीठ-मूहे पवनभोजिनः ॥ ४११ ॥
महातेजा महोरस्को, भुवनस्य भयङ्करः । वर्द्धमानो बभौ बाढं, देवाद्रिप्रतिहस्तकः ॥ ४१२ ॥
अथो भुवनभाग्येन, प्रणुन्न इव नाकिनः । पत्युरासनकम्पोऽभू-द्भूकम्पेन सहोच्चकैः ॥ ४१३ ॥
अज्ञासीद् भुवनक्षोभं, सहस्राक्षो महामुनेः । ततः कटाक्षविस्मेराः, समादिक्षत्सुराङ्गनाः ॥ ४१४ ॥
विष्णुर्नमुचिना भद्राः !, कोपितोऽस्ति महामुनिः । अमुं सान्त्वयितुं यात, गीतं गायत बन्धुरम् ॥४१५॥
अथादिष्टा सुधाहार-रमण्यो देवगायनैः । सुकेशी-मञ्जुघोषाद्या, आतोद्यनववादनात् ॥ ४१६ ॥
आगत्य मुनिमानम्य, तस्थुरंशस्थले मुनेः । कर्णमूले जगुस्तस्य, पञ्चमग्रामसुन्दरम् ॥ ४१७ ॥

For Private and Personal Use Only

सर्वज्ञशासनाभिज्ञ!, ननु रूपं करोषि किम्?। कोपात्तपांसि भूयांसि, दह्यन्ते मुनिसत्तम! ॥ ४१८ ॥
कोपेनापि हताः साधो!, स्वार्था दग्धा विपद्यपि। प्रयान्ति नरकं घोरं, भ्रमन्ति च भवार्णवम् ॥४१९॥
देशोनपूर्वकोट्या य-दर्जितं व्रतमर्हतः। तत्कषायमनोवृत्तिः, हारयत्येव संयमी ॥ ४२० ॥
एवं शमयितुं कोपं किन्नरास्त्रिदशाङ्गनाः। शशंसुर्विष्णुनिर्ग्रंथं वारंवारं ववन्दिरे ॥ ४२१ ॥
भयार्त्तो नमुचिः पाद-लग्नः कोपवताऽमुना। मध्ये पूर्वाऽपराम्भोधे, चिक्षिपे कन्दुकोपमः ॥४२२॥
चकितो मन्त्रिदोषेण, प्रमादेनाऽपि चात्मनः। विज्ञातवृत्तपद्मोऽपि, तत्राऽऽयासीद्द्विवन्दिषुः ॥४२३॥
नेत्राश्रुजलकल्लोल-प्रक्षालितमुनिक्रमः। तं महर्षिं नमस्कृत्य, चक्री जल्पितवानिदम् ॥ ४२४ ॥
त्रातः, पद्मोत्तरोऽद्यापि, त्वयि जीवति जीवति। किं सङ्घाशातनाकारी, त्वयि जीवति जीवति ॥४२५॥
चक्रे नमुचिना यादृक्, तादृक् फलमुपस्थितम्। अपात्रे यादृशं चक्रे, तादृक् फलमुपस्थितम् ॥४२६॥
एकाऽपराधे त्रैलोक्य-मागतं प्राणसंशये। त्रायस्व करुणागार! जीवरक्षापरायण! ॥ ४२७ ॥
एवमन्येऽपि भावेन, सुरासुरनरेश्वराः। सङ्घोऽपि सान्त्वयामास, भक्तिवाक्यैश्चतुर्विधः ॥ ४२८ ॥
अतिदूरत्वतः साधु-र्नाशृणोद् भक्तिसंस्तवम्। भूयोभूयः क्रमस्पर्शं, सङ्घश्चक्रे चतुर्विधः ॥ ४२९ ॥
धीमत्सर्वज्ञशास्त्रार्था-नुगैर्गीतैः सुरस्त्रियः। जातस्मृतेरिवाऽऽत्मानं, सस्मार मुनिसत्तमः ॥ ४३० ॥
सङ्घं पादाम्बुजे लीनं, चक्रिण भ्रातरं तथा। सुरासुरानपि प्राज्यान्, दृष्ट्वा कोपं स्म मुञ्चति ॥ ४३१ ॥
संहृत्य वपुषा रूपं, ग्रन्थार्थमिव सत्कविः। मूलरूपधरो विष्णु-रभूद्भुवनविश्रुतः ॥ ४३२ ॥

ततः प्रभृति निर्ग्रन्थ-स्त्रिपद्या पूतया तया । त्रिविक्रम इति ख्यातिं, प्रापाऽसौ जगतां त्रये ॥ ४३३ ॥
सङ्घश्चतुर्विधो नत्वा, त्रिविक्रममहामुनिं । सुरा विद्याधराश्चापि प्रापुर्निजनिजां स्थितिम् ॥
सङ्घकार्यमिदं कृत्वा ततस्तप्त्वा तपः परम् । उत्पन्नकेवलज्ञानो विष्णुर्निर्वृतिमासदत् ॥ ४३४ ॥
पद्मोऽपि राज्यमुत्सृज्य, संसारोद्विग्नमानसः । उपादाय परिव्रज्यां, प्राप निर्वृतिवैभवम् ॥ ४३५ ॥
कृतो विष्णुकुमारेण, भूमिकम्पः सुदारुणः । वर्षेऽत्र भारते जज्ञे, भृगुकच्छपुरेश्वर ! ॥ ४३६ ॥
श्रुत्वेति स्वामिना प्रोक्तं, जितशत्रुर्महीपतिः । श्राद्धधर्ममुपादाय, स्वकृतार्थममन्यत ॥ ४३७ ॥
अथोवाच महीपालः, श्रुत्वेदं विभुभाषितम् । पञ्चेन्द्रियवधात्पापं, विदधे मुनिना कुतः ? ॥४३८॥
विभुरप्यवदद्भूप ! सङ्घार्थे चक्रिणो बलम् । निखिलं हन्यते शक्त्या, साधुना मोक्षबन्धुना ॥ ४३९ ॥
स स्यादाराधकः साधुः, सर्वकर्मविलुम्पकः । आत्मार्थं हि कृतो जीव-घातः सुगतिशातनः ॥ ४४० ॥
( यतः- ) अहितं चैत्यबिम्बानां, निन्दकं मतभेदकम् । वारयेन्निखिलस्थाम्ना, पूर्वं सामप्रकाशनात् ॥४४१॥
( यतः- ) इदं दर्शनसर्वस्व-मिदं दर्शनजीवितम् । सामर्थ्येन यदर्थेन, क्रियते शासनोन्नतिः ॥४४२॥
इदं ज्ञानमिदं तत्त्व-मिदं धर्मस्य शासनम् । यत्क्रियत आर्हते धर्मे, सर्वस्थाम्ना प्रभावना ॥ ४४३ ॥
धर्मवक्ता शासनज्ञो, वादी ज्ञानी महातपाः । विद्यावित् सिद्धविद्यश्च, कविरष्टौ प्रभावकाः ॥ ४४४ ॥
अथोवाच महीनाथो, जिननाथ ! प्रभावनाः । विधीयन्ते कथङ्कारं, जिनशासनपावनाः ॥ ४४५ ॥
विभुरप्युक्तवानेवं, बिम्बचैत्यप्रतिष्ठया । यात्रया च रथादीनां, श्रीमत्सङ्घसपर्यया ॥ ४४६ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

श्रुत्वेदं विभुना प्रोक्तं, प्रणम्य जगताम्पतिम् । जगाम धाम भूमीशो, नाथं पश्यन् पुरःस्थितम् ॥४४७॥
स्वाम्यप्यन्यत्र विहृतः, प्रातः साकं सुरासुरैः । उपकारपराणां हि, नैकत्रावस्थितिर्यतः ॥ ४४८ ॥
तस्मिन्नेव महोद्याने, जिननाथपवित्रिते । जीवन्तस्वामिनो बिम्बं, प्रतिष्ठाप्य न्यवेशयत् ॥ ४४९ ॥
अश्वरूपं मनोहारि, कारयाश्चकृवान्नृपः । सुवर्णरत्नपाषाणैः, प्रासादश्च विनिर्मितः ॥ ४५० ॥
"अश्वावबोध" इत्याख्यं, तत्तीर्थं प्रथितं भुवि । पशवोऽपि प्रसिद्धाः स्युः, स्वामिदेशनया तया ॥४५१॥
प्रत्यहं स्वामिनो बिम्बं, पूजयामास भूपतिः । नाट्यश्च कारयामास, प्रतिपर्व महोत्सवैः ॥ ४५२ ॥
लेप्यास्तीर्थकृतामर्चाः, सर्वेषामप्यकारयत् । नगरे रथयात्रां च, महद्भूतप्रभावनाम् ॥ ४५३ ॥
अश्वावबोधतीर्थं विनयेन चिरेण पूजयित्वाऽसौ । जितशत्रुमहीपालो, भेजे माहेन्द्रदेवत्वम् ॥४५४॥
तस्माच्च्युत्वा स विपुल-मतिर्नाम भूत्वा नरेन्द्रो, वप्राभिख्ये विपुलविजये भूरिलक्ष्मीनिवासे ।
तीर्थाधीशक्रमविनयतः प्राप्य निर्ग्रंथमुद्राम्, याता मोक्षं निरुपमततं शाश्वतं नित्यसौख्यम् ॥ ४५५ ॥

इत्याचार्यश्रीविनयचन्द्रविरचिते **श्रीमुनिसुव्रतस्वामिचरिते** महाकाव्ये विनयाङ्के पद्मोत्तरक्षिती-श्वर-विष्णुकुमारमहर्षि-महापद्मचक्रधर-सुनन्द-दामन्नक-कथानकगर्भितः श्रीअश्वावबोधमहातीर्थोत्पत्तिव्यावर्णनो नाम **सप्तमः सर्गः** ॥ ७ ॥

नवमो भवः

भूकम्पकारणे विष्णुकुमार-वृत्तान्तः



For Private and Personal Use Only

## अष्टमः सर्गः ।

भुवनोपचिकीः स्वामी, भृगुकच्छपुरात्ततः। अन्यदा समवासार्षी - द्विहरन् हस्तिनापुरम् ॥ १ ॥
तस्मिन्नेव पुरे राजा, जितशत्रुरिति श्रुतः। यद्गुणैर्ग्रथिता कीर्ति-पटी छादयते दिशः ॥ २ ॥
श्रावकप्रतिमोद्वाही, विज्ञातजिनशासनः । श्रेष्ठी वणिक्सहस्रेशः कार्तिकः परमार्हतः ॥ ३ ॥
पञ्चविंशतितत्त्वज्ञः, कषायवसनः शुचिः । तस्मिन्नेव पुरेऽतिष्ठन्, मुनिर्भागवतव्रतः ॥ ४ ॥
मासं मासमुपावासी, मठवासी स संयमी । अपूज्यत भृशं पौरै-र्महादरपुरस्सरैः ॥ ५ ॥
विनैकं कार्तिकं पौरैः, पारणे पारणेऽनिशम् । निमन्त्र्यत मुनिर्भक्त्या, जनाः पूजितपूजकाः ॥ ६ ॥
ईर्ष्यमाणश्छलं तस्य, चुकोप श्रेष्ठिनो मुनिः। तपो निरर्थकं चक्रे, विना शाम्यं न सिद्धिकृत् ॥ ७ ॥
न्यमन्त्रि पारणेऽन्येद्यु-रसौ क्षोणीभुजा स्वयम्। प्रायस्तपसि सर्वेषां, बहुमानः प्रगल्भते ॥ ८ ॥
स परिव्राजकोऽप्याख्यत्, क्षणं स्थित्वा विमृश्य च। कुरुते कार्तिकश्रेष्ठी, यदि मे परिवेषणम् ॥ ९ ॥
तदा त्वदालये भुञ्जे, राजन्! राजीवलोचन!। अन्यथा पारणं न स्याद्, भूयात् प्राणविडम्बनम् ॥ १० ॥
श्रुत्वेति भूपतिर्दध्या-वयमाग्रहतत्परः । अपरः श्रावको व्याघ्र-तटीभून्न्याय आगतः ॥ ११ ॥
परं साम्ना वणिग्मुख्य-मनुशास्मि कथञ्चन । यतस्तपस्विनोऽप्यस्य, ह्याग्रहो बालकोपमः ॥ १२ ॥
ध्यात्वेत्योमिति सम्भाष्य, ययौ राजाऽस्य वेश्मनि। ससंभ्रममथोत्तस्थौ, सोऽपि भूपसमागमे ॥ १३ ॥
विधाय स्वोचितां राज्ञो, भक्तिमित्यूचिवानिति। इदं गेहमियं लक्ष्मी-स्त्वया समनुगृह्यताम् ॥ १४ ॥

नवमो भवः

कार्तिकश्रेष्ठि-वृत्तान्तः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथोचे भूपतिर्लब्ध्वा, प्रस्तावं वदतांवरः । परिवेष्यं त्वया भोज्यं, कषायाम्बरधारिणः ॥ १५ ॥
राजन्न युज्यतेऽस्माक-मेतत्पाखण्डधारिषु । परं तवाऽऽज्ञया कुर्वे, नोल्लङ्घ्यं वचनं प्रभोः ॥ १६ ॥
पुराऽपि प्राव्रजिष्यं चे-न्नाकरिष्यमिदं खलु । सम्यग्दर्शनमालिन्यं गृहस्थस्योपजायते ॥ १७ ॥
राजाभियोगप्रमुखा, आगारा जिनभाषिताः । त्रिकालवेदित्वमिदं, किंस्विद्भगवतोऽधिकम् ॥ १८ ॥
एवं विचिन्तयन्खेदा-द्राज्ञि राजकुलं गते । कार्तिकोऽपि ययौ शून्य-चेतस्को राजमन्दिरम् ॥१९॥
परिवेषयतोऽप्यस्य, कषायी कार्तिकस्य सः । अङ्गुलीदर्शनाच्चक्रे, निकारं तपसो यथा ॥ २० ॥
परिवेष्याऽनिच्छयाऽपि, निर्वेदी वणिजां पतिः । साकं वणिक्सहस्रेण, गत्वा नाथमवन्दत ॥ २१ ॥
स्वामिनो देशनां श्रुत्वा, परमार्थामृतप्रपाम् । तदन्ते प्राव्रजत् श्रेष्ठी, वणिग्लोकसहस्रयुक् ॥ २२ ॥
द्वादशाब्दीं व्रतं कृत्वा, द्वादशाङ्गविशारदः । मृत्वा सौधर्मकल्पेऽभूत्, कार्तिकस्त्रिदशेश्वरः ॥ २३ ॥
परिव्राडपि मृत्वाऽसा-वाभियोगिककर्मणा । अमुष्य वाहनं जज्ञे, ऐरावण इति द्विपः ॥ २४ ॥
इन्द्रं प्रेक्ष्य स सामर्षं, प्रारेभेऽथ पलायितुम् । वीक्ष्याऽहिर्नागदमनीं, स्फुटाटोपं करोति किम् ? ॥ २५ ॥
बलात्कारादमुं धृत्वाऽऽ-रुरोहैनं प्रभुत्वतः । अमुच्यततरां प्राणी, नाभुक्तादपि कर्मणः ॥ २६ ॥
द्वे शीर्षे स विचक्रेऽथ द्विमूर्तिं विष्णुरप्यगात् । प्रतिकृतिकृतिं कुर्या-दिति नीतिगिरं स्मरन् ॥ २७ ॥
एवं सहस्रशीर्षः स, तद्वदिन्द्रो बलादभूत् । नूनं वैक्रियरूपाणां, न स्यात्परिमितिर्यतः ॥ २८ ॥
भूयो भूयो भराक्रान्तो, नश्यन्वज्रेण वज्रिणा । ताडितोऽक्रियत क्षिप्रं, स क्षणेन वशंवदः ॥ २९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्वानुभूत सद्धर्म-सामर्थ्यात्रिदशश्रियम् । भोक्ष्यते स चिरं शक्रो, धर्म्मात् किं न हि जायते? ॥ ३० ॥
ततश्च्युत्वा सुराधीशो, भारतेऽमुत्र विश्रुते । आगामिन्याश्चतुर्विंश-तौ जिनेन्द्रो भविष्यति ॥ ३१ ॥
सर्वानुभूतिरित्याऽऽख्यो, महाभूतिविभूषितः । सम्यक्त्वं पालितं शुद्ध-मार्हत्याय प्रगल्भते ॥ ३२ ॥
अस्ति स्वस्तिकरा जिष्णु-प्रासादा दीप्रवप्रभृत् । श्रावस्ति नाम नगरी, श्रिया पौरन्दरी पुरी ॥ ३३ ॥
जितशत्रुर्नृपस्तत्र, जयश्रीकुलमन्दिरम् । प्रियाऽस्य धारिणी नाम, शुद्धधर्मानुसारिणी ॥ ३४ ॥
शक्त्या स्कन्द इवोन्मत्त-नृपस्कन्धो महाभुजः । स्कन्दकाऽऽख्यः कुमारोऽभू-त्तयोरास्कन्दनाहितः ॥ ३५ ॥
पुरन्दरयशाः पुत्री, श्रिया पौरन्दराङ्गना । दम्पत्योर्भवमाकन्द-मञ्जरी मञ्जुलस्वना ॥ ३६ ॥
कुम्भकारपुरेशेन, दण्डकेन महीभुजा । पुत्री पुरन्दरयशाः, परिणीतोपरोधतः ॥ ३७ ॥
अन्येद्युः पालको नाम, द्विजो दण्डकिभूभुजा । प्रेषितः प्रेमपोषाय, भूरिप्राभृतसम्भृतः ॥ ३८ ॥
प्रविवेश सभां राज्ञः, प्रतीहारप्रकाशितः । उचितप्रतिपत्त्याऽसौ, यथास्थानं व्यवस्थितः ॥ ३९ ॥
पप्रच्छ स्वागतं राजा, वंश्यप्रीतिविवर्द्धये । सुप्रापविपदां प्रायः, स्वागतं मङ्गलं यतः ॥ ४० ॥
सुखी दण्डकी भूपालो, यथाकालं त्रिवर्गकृत् । धर्मशास्त्रप्रमाणाध्व-पान्थः सद्धर्मकर्मठः ॥ ४१ ॥
विहस्य पालकः स्माह, त्रिवर्गाः केऽपि विश्रुताः? । राजोचे पटुधी ! धर्म्मः, प्रथमस्तेषु कीर्त्यते ॥ ४२ ॥
चार्वाकः पालकः स्माह, धर्मो नास्ति नृप ! क्वचित् । यस्यासतः प्रकीर्त्यन्ते, भावा व्योमलतोपमाः ॥ ४३ ॥
जितशत्रुरुवाचाऽथ, स्याद्वादी परमार्हतः । सर्वप्रमाणसंसिद्धो, धर्मस्त्रैलोक्यगोचरः ॥ ४४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इतश्च—विहस्य स्कन्दकोऽवादीत्, प्रत्यक्षं सङ्गतं तव। प्रत्यक्षाऽविषया वंश्या, नानुमन्यास्त्वया नु किम् ॥४५॥
एवं निरुत्तरं चक्रे पालकं स्कन्दको धिया। नाग्रे स्याद्वादसिंहस्य, स्थातुं वादिमृगाः क्षमाः ॥ ४६ ॥
अन्तः कोपज्वलन्नेष, खसूची विस्मृतोत्तरः। शृगाल इव दिग्वक्त्रं, वीक्षामास समन्ततः ॥ ४७ ॥
राजोवाच कुमारैभि-र्वादीव वदसे किमु। अतिथित्वादसौ पूज्यो, जामातुश्च पुरोहितः ॥ ४८ ॥
विशेषतो महीभर्त्रा, पूजितः काञ्चनैरसौ। अभेदेनैव मन्यन्ते, मित्राऽमित्रे मनीषिणः ॥ ४९ ॥
अन्तः समत्सरीभूय, स्वदेशं पालको गतः। मत्सराध्मातचित्तानां, नैकत्राऽवस्थितिर्यतः ॥ ५० ॥
(इतश्च—)सुरासुर परीवारो, विहरन् भूमिमण्डले। श्रावस्त्यां सुव्रतस्वामी, भगवान् समवासरत् ॥ ५१ ॥
तस्यां समवसरणं, विचक्रुर्व्यन्तरामराः। प्रभुश्चतुर्मुखीभूय, निविष्टस्तत्र विष्टरे ॥ ५२ ॥
विभुं वन्दितुमुर्वीशो, ययौ स्कन्दकसूनुना। प्रणम्य भगवत्पादौ, निविष्टश्च यथाविधि ॥ ५३ ॥
विभुनाऽपि समारेभे, मोहध्वान्तदिवामुखम्। आधारो नवतत्त्वानां, देशना मोहनाशिनी ॥ ५४ ॥
स्वर्गाऽपवर्गयोर्मूलं, धर्मो दुर्गतिबन्धनम्। अर्थकामादयस्तस्मात्, प्रसूता नन्दना इव ॥ ५५ ॥
(यदूचे—)अर्थकामार्थिभिर्ध्वस्तो, धर्मस्तज्जनकोऽपि यैः। मत्सरादिव तौ तेषां, मूलच्छेदाय धावतः ॥ ५६ ॥
स द्विधा गदितो धर्मः, साधुश्रावकभेदतः। साधुधर्मो विषयिणां, दुष्करः सुकरः परः ॥ ५७ ॥
अधीरधीरयोरेवं, विशेषोऽत्र निगद्यते। अधीराः प्रतिपद्यन्ते, न चारित्रं परे पुनः ॥ ५८ ॥
श्रुत्वेति स्कन्दकोऽवादीत्, स्वामिन्! मां कातरेतरम्। कुरु व्रतरणक्रोडं, विशुद्धक्षत्रियोऽस्म्यहम् ॥ ५९ ॥

नवमो भवः

स्कन्दकाचार्य-
कथानकम्



For Private and Personal Use Only

राजाऽनुमतितः स्वामी, राजभटशतैः समम् । पञ्चभिः पञ्चमज्ञानी प्राव्राजयदनुक्रमम् ॥ ६० ॥
अभ्यस्तद्वादशाङ्गोऽथ, लब्धिरत्नैकरोहणः । आचार्यत्वे कृतः सर्व-विदा स्कन्दकसंयमी ॥ ६१ ॥
पञ्चशतमुनिग्राम-ग्रामणीरग्रणी धिया । विजिज्ञपद्विभुं नत्वा, कुम्भकारपुरे गमी ॥ ६२ ॥
वत्स ! तत्रोपसर्गो वो, भावी भूरिभयङ्करः । सोऽप्यूचे नाथ ! भावी स, क्लेशदो मृत्युदोऽथवा ॥ ६३ ॥
विभुरप्युक्तवानेवं, मारणस्तु भविष्यति । सूरिरूचे भविष्यन्ति, के तत्राऽऽराधकाः खलु ॥ ६४ ॥
आचार्य ! त्वां विना सर्वे, मुनयो मुक्तिगामिनः । आय–व्ययतुलां सूरे !, विचारय चिरं हृदि ॥ ६५ ॥
श्रुत्वेति विभुमानम्य, यतिपञ्चशतीयुतः । विहरन्जामिजीवेश-पुरं प्राप मुनीश्वरः ॥ ६६ ॥
पूर्वतः स्कन्दकाचार्यं, समायान्तं पुरं प्रति । निशम्योद्यानमालासु, साधुयोग्यासु सर्वतः ॥ ६७ ॥
अस्मरन्नायतिं चित्ते, पालको बालकोपमः । च्छन्नं धौताऽसिशस्त्राणि, क्षेपयामास मूढधीः ॥ ६८ ॥युग्मम्॥
कथासंयोगतः काक-तालीयन्यायतः स्थितः । तास्वेवोद्यानमालासु, निर्विवादं विभोर्वचः ॥ ६९ ॥
वन्दनार्थमगाद्राजा, राजमान्यैर्नरैः सह । कौमुदीक्षणवज्जज्ञे, तद्दिनं निखिलं क्षणैः ॥ ७० ॥
गो-व्याघ्र-मश्व-महिषं, ब्राह्मण-श्रमणं तथा । इति स्वभाववैरित्वं, दधानो हृदि पालकः ॥ ७१ ॥
उवाच भूपतिं रात्रौ, विजने विनयोत्तरम् । अविचारपराः प्रायः, पशुपाला भवादृशाः ॥ ७२ ॥
विहस्योचे नृपो भद्र !, किमकारि विचारहृत् ? । पथि भ्रष्टो हि किं मूढः, स्थाप्यते विदिताऽध्वना ॥ ७३ ॥
पालकः स्माह भूपाल !, यत्ते शालकसंयमी । समागात्तत्र विज्ञातं, प्राज्ञ ! किञ्चन कारणम् ॥ ७४ ॥

नवमो भवः

स्कन्दकाचार्य-कथानकम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ससम्भ्रममथोवाच, राजा तद् ब्रूहि सत्यतः । ततः सोऽधोमुखीभूतः, पाटवं कपटे पटोः ॥ ७५ ॥
अयं सूरिस्तव प्राज्यं, राज्यं हर्तुमिहाऽऽगतः । दर्शनच्छद्मना तन्वन्, विश्वासं बकचेष्टितः ॥ ७६ ॥
( यतः– ) एकतानमनः पापे, नीचानामचिराद्भवेत् । ध्यानं कोटौ बकोटस्य, याति जन्तुजिघित्सया ॥ ७७ ॥
भग्नोऽयं भिक्षया राजन् !, अविचाराद्व्रताद्व्रतात् । ग्रहीतुं पैतृकं राज्यं विज्ञातो नायमिच्छति ॥ ७८ ॥
राजपुत्रैः सहाऽऽलोच्य, साधुभिः सह दुर्मतिः । विप्रतारयितुं देवं, निर्धनोऽयमुपागतः ॥ ७९ ॥
( यतः– ) किमौद्धत्यं किमौज्वल्यं, कुर्यान्निधनता यदि । हित्वा हिमाद्रिं हेमाद्रि-माद्रियन्ते दिवौकसः ॥८०॥
शङ्कितोऽथ नृपोऽवादीत्, प्रमाणं किमिह द्विज ! । सोऽभ्यधादेष शस्त्राणि, च्छन्नं क्षोणितलेऽक्षिपत् ॥ ८१ ॥
श्रुत्वेत्याप्तान्नृपः प्रैषी-त्ते गत्वैक्षंत तान्यपि । सुप्रयुक्तस्य दम्भस्याऽ-विसंवादि वचो यतः ॥ ८२ ॥
विज्ञप्तं तैरथागत्य, यथा दृष्टं यथा स्थितम् । तच्छ्रुत्वा कोपसप्तार्चि-रज्वलन्नृपमानसे ॥ ८३ ॥
विचारवल्लरीं मूला-द्देहे देहेऽस्य पूर्वतः । युक्तायुक्तविचारो हि, कोपान्धानां कुतो भवेत् ? ॥ ८४ ॥
साधु साधु द्विज ! प्राज्य-राज्यपालकपालक ! । यदुक्तं कुरुताऽप्यस्य, पापिनो ब्रह्मराक्षसः ॥ ८५ ॥
सिद्धं मे वाञ्छितं कार्य-मिति ध्यायन् जहर्ष सः । स जगाम तदुद्यानं, मुनिपादपवित्रितम् ॥ ८६ ॥
अकारयदसौ यन्त्रं, महासत्रमिवैनसः । ऊचे च स्कन्दकाचार्य-मनार्यकरणोद्यतः ॥ ८७ ॥
अरे ! स्मरतरां देवं, विषादं मुञ्च मानसात् । त्वं तस्य मन्त्रिकारस्य, साम्प्रतं फलमाप्नुहि ॥ ८८ ॥
तिलैरिव भवत्साधु-शरीरैः पुरयाम्यदः । अथ ते जीवितं मत्तो, न कश्चिद्रक्षितुं क्षमः ॥ ८९ ॥



नवमो भवः

स्कन्दकाचार्य-कथानकम्



For Private and Personal Use Only

अथ सूरिर्विभोर्वाक्यं, भावयन्समुपस्थितम् । अवन्दयन् मुनीन् देवान्, शक्रस्तवनपूर्वकम् ॥ ९० ॥
तदा चाऽऽलोचनां सूरिः, पञ्चातिचारशोधिनीम् । व्रतान्युच्चारयामास, नर्मितानि शमोर्मिभिः ॥ ९१ ॥
अकारयत्समस्ताङ्गि-क्षामणां क्षमयोक्षितः । अपाठयन्नमस्कारं, द्वारं मुक्तिमहौकसः ॥ ९२ ॥
ददावनशनं सूरि-र्व्यसनं पापकर्मणाम् । चतुःशरणमूचे च, शरणं भववर्तिनाम् ॥ ९३ ॥
एवमेतत्स प्रत्येकं कारयन्मधुरध्वनिः । शमसाम्राज्यसौराज्यं, चकार भवभीतधीः ॥ ९४ ॥
यं यं महामुनिं यन्त्रे, चिक्षेपाक्षेपतो गुरु । तस्य तस्याऽधिको भावः, पीडाभिः सह वर्द्धितः ॥ ९५ ॥
अस्थिभिः सह कर्माणि, शातयन्मुनिसत्तमः । अन्तकृत्केवलीभूय, जगाम परमं पदम् ॥ ९६ ॥
तस्य तस्य मुनेर्भावः, स्पर्द्धयेथाऽपरे मुनौ । सङ्क्रामन्निवृतेश्चक्रे, प्रियत्वं बहुधाऽद्भुतम् ॥ ९७ ॥
एवमेषामनिष्टेऽपि, मुखरागो मनोहरः । रङ्गः पादोपमर्देन किं कुसुम्भस्य नैधते ? ॥ ९८ ॥
एकोनायां पञ्चशत्यां, हतायां तेन पापिना । तेजस्वी क्षुल्लको दध्रे, पाणिना जात्यरत्नवत् ॥ ९९ ॥
पार्वणेन्दुमुखं कम्बु-कम्रकण्ठं सदम्बकम् । लसद्देहप्रभापूरैः, स्फुरन्तमिव सुस्मितम् ॥ १०० ॥
आधारमिव नेत्राणां, प्रमोदस्येव जीवनम् । धृतेरिव कुलागारं, सन्तोषस्येव सेवधिम् ॥ १०१ ॥
राजवंशसमुत्पन्नं, बालर्षिं वीक्ष्य साधुराट् । उवाच पालकं भद्र !, पूर्वं मां मारय द्रुतम् ॥ १०२ ॥
॥ त्रिभिर्विशेषकम् ॥
अस्य प्राणान्तिकीपीडां, सोढा परिवृढोऽस्मि न । भविता हृदयं द्वेधा, पक्वेर्वारुफलं यथा ॥ १०३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





श्रुत्वेति पालको दध्यौ, वृथैते मारिता मया। नास्य पीडा क्वचिज्जज्ञे, विक्रीतान्तैरिवाऽखिलैः ॥१०४॥
अमुष्य मारणात्पीडा, क्रीडाद्य मम वीक्षणात् । एतस्य भाविताऽनिष्टे, बद्धः परिकरो मया ॥१०५॥
ध्यात्वेति पालको बालं, यन्त्रे चिक्षेप सुन्दरम्। दुर्जनः प्रार्थितं ह्यर्थं, किं विधत्ते मनीषिणाम्?॥१०६॥
धैर्यं सूरेर्दृढस्यापि, गलितं तद्विलोकनात्। अयःपिण्डो हि चण्डाग्नि-निमग्नो द्रवति द्रुतम् ॥१०७॥
आः पाप! तपसः किञ्चित्, फलं मेऽस्ति प्रथीयसः। तव राज्यस्य लोकस्य देशस्याऽपि पतत्रिणाम् ॥१०८॥
भवेयं जीवितान्ताय, व्याहरन्निति कोपतः। तेनाचार्योऽचिरात्क्षिप्तो, यन्त्रे यन्त्रितविग्रहः ॥ १०९ ॥
किञ्चित्कृतशुभध्यान-सूरिर्निधनमाप सः । देवो वह्निकुमारेषु, नाऽसत्यं जिनभाषितम् ॥११०॥
मुनीनां रुधिरप्लावै-र्भूरभूदरुणच्छविः । प्रेयोनिधनकौसुम्भ-प्रावृताङ्गी वधूरिव ॥ १११ ॥
गृध्राल्यो नभसि भ्रेमु-र्यमदूत्य इवाम्बरे। काकाः कलकलश्चक्रु-र्देशाऽरिष्टकथाकराः ॥ ११२ ॥
बभूव भूमिनिर्घातः सम्पात इव दुर्द्धियाम्। अविचारिशिरांसीव, न्यपेतुस्तोरणान्यपि ॥ ११३ ॥
विषयो निखिलोऽजस्रं, पूरितो रेणुवृष्टिभिः नारीणां विकृतिर्गर्भे, बभूव क्षयसूचिनी ॥ ११४ ॥
परिवेषच्छलाच्चक्रे, प्राकारं भास्करोऽम्बरे । अनुमण्डलमत्यन्तं, वव्रमन्तः स्वरक्षकाः ॥ ११५ ॥
प्रस्वेदच्छद्मनात्र स्या-द्देवानां दैवती कला। जहसुश्चित्ररूपाणि, पालकस्येव चेष्टितम् ॥ ११६ ॥
एवमुत्पातमालासु, प्रसरन्तीषु भूरिशः । रक्तरक्ताजिनभ्रान्त्या, गृध्रः कम्बलमग्रहीत् ॥ ११७ ॥
पुरन्दरयशादेव्याः, स्थिताया कुट्टिमोदरे । पुरः प्राभृतवन्मुक्त-मधृतेर्गृध्रपक्षिणा ॥ ११८ ॥

नवमो भवः

स्कन्दकाचार्य-कथानकम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तमालोक्योल्लसद्दृष्ट्या, देवी ध्यातवती हृदि । असकौ कम्बलश्चारु, यो दत्तो गुरवे पुरा ॥ ११९ ॥
कथमेषोऽसृजाकीर्णो, लाक्षारक्त इवाऽजनि । दृश्यन्ते न च ते वन्द्या, मुनयो नयचक्षुषः ॥ १२० ॥
वन्दितुं गत्वरीं साधून्, यद्राजा मां निषेधति । तदस्य पालकस्योच्चै-श्चिन्त्यते दुष्टचेष्टितम् ॥१२१॥
द्विजः स्वभावतो मिथ्या-ऽऽग्रहग्रहिलमानसः । मत्पतिस्त्वपरं कर्ण-दुर्बलो नवकुम्भवत् ॥ १२२ ॥
ध्यात्वेति राजमहिषी, जगाद क्षितिनायकम् । क्व मे बन्धुमुनिः सूरि-र्गुरुर्भूरि क्षमावताम् ॥१२३॥
अथाऽधः कृतवान्वक्त्रं, दण्डकी पापपातकी । दुर्गतेर्दुर्गसद्वारं, पश्यन्निव पुरःस्थितम् ॥ १२४ ॥
ततो रुरोद सुदती, तुदती करताडनैः । वक्षःस्थलं स्थलमिव, त्रोटयन्ती कचोच्चयम् ॥ १२५ ॥
हा! भ्रातश्चारुचारित्र-पवित्र! कुलभूषण! । अतर्कितां दशां यातः, कथं कमललोचन! ॥ १२६ ॥
इहाऽऽगच्छन्निषिद्धोऽसि, स्वामिना किन्तु सोदर! । अथवा भाविनं ह्यर्थं, निषेद्धुं क्षमते हि कः ? ॥१२७॥
अद्यापि प्राणिति भ्रातः!, सोदरी ते कृशोदर! । आकर्ण्यापि मृतेः कष्टं, हन्त! स्त्री वज्रनिर्मिता ॥१२८॥
किमनेन सुराज्येन, प्राज्येनाऽपि कलङ्किना । निष्कलङ्कं जिनेन्द्रस्य, शरणं मे पदाम्बुजम् ॥ १२९ ॥
शासनस्वामिनी श्रीमत्-सुव्रतस्याऽस्ति देवता । इतो मां विभुपादान्ते, मोचयेत्सपरिच्छदाम् ॥१३०॥
इत्यूर्ध्वबाहुर्दोर्वल्लीं, दधाना जितशत्रुसूः । सुव्रतस्वामिनं देवं, सस्मार स्मरशासनम् ॥ १३१ ॥
इतश्च शासनाधीशा, रामापञ्चशतीवृताम् । एनामुत्पाटयामास, सुव्रतस्वामिनं प्रति ॥ १३२ ॥
इतश्च स्कन्दकाऽऽसूरो, ज्ञातपूर्वभवोऽवधेः । कुपितो नगरं प्राप्य, कुम्भकाररघटाऽभिधम् ॥१३३॥

नवमो भवः

स्कन्दकाचार्य-कथानकम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स वात्यां रचयामास, पातयामास पादपान् । पुरञ्च पूरयामास, दूरादपहृतैस्तृणैः ॥ १३४ ॥
ज्वलनं ज्वालयामास, त्रुडत्त्रुडिति विब्रुवन् । कोपसप्तार्चिषोदाहे, नान्तरं किमपि स्फुटम् ॥१३५॥
रे ! रे ! पालक ! मद्वालो, यन्त्रे यन्निहितस्त्वया । तदिदानीं पुरं वह्नि-यन्त्रे निखिलमागतम् ॥१३६॥
रे ! रे ! दण्डकिभूपाल ! त्वं दण्ड्यः प्रथमं मया । नृशंसानामपात्राणां, स्थानं यच्छसि निर्घृण ! ॥१३७॥
मारणीया इमे पौरा, यदन्यायवतां पुरि । निवसन्ति न मे कश्चि-दपराधः प्रगल्भते ॥ १३८ ॥
एवं व्योमस्थितः क्रुद्धो, जजल्प स्कन्दकासुरः । कोपवह्नेर्महाज्वाला, इव वाचो बभुश्च ताः ॥ १३९ ॥
हा ! हा ! दण्डकिभूपाल ! पश्यतस्तव पत्तनम् । क्षणादुपद्रूयते स्म, निर्नाथमिव केनचित् ॥ १४० ॥
हा ! तात ! तात ! हा ! मात-रापदामुद्धृतिं मम । कुरुध्वमुपसर्गोऽयं, मारणान्तः समागतः ॥१४१॥
एकाऽपराधे नगरं, समग्रमपि मार्यते । इक्षवः करिभिर्भुक्ता, पीड्यते माहिषं मुखम् ॥ १४२ ॥
इति लोकार्त्तनिःस्वानै-र्मृत्योः पटहविभ्रमैः । पूरितो रोदसीकूपो, हा हा ! पालकजृम्भितम् ॥१४३॥
पूत्करोति पुरोलक्ष्मी, स्फुटद्वंशगणच्छलात् । विधेयं रोदनादन्य-न्नहि भीरुभिरुच्चकैः ॥१४४॥
सराजकं सराष्ट्रञ्च, सपौरञ्च सपादपम् । सपालकं सबालञ्च, सगजं सतुरङ्गमम् ॥ १४५ ॥
द्वादशयोजनायामं, तद्भूखण्डं महासुरः । चकार भस्मसात्कामं, स्वबोधिञ्च सुदुर्लभम् ॥ १४६ ॥युग्मम्॥
दण्डकारण्यमित्याख्या-ख्यातमद्याऽपि तत्त्वभूत् । यस्मिंस्तृणप्ररोहोऽपि, नाविर्भवति सर्वथा ॥१४७॥
कृत्वेति स्कन्दकासुरो, निजस्थानमशिश्रियत् । अर्जयामास कर्माणि, वेद्यानि भवकोटिभिः ॥१४८॥



For Private and Personal Use Only

इतश्च बोधयन्नुर्वीं, सर्वोर्वीशनिषेवितः । शत्रुञ्जयमहातीर्थे, सुव्रतः समवासरत् ॥ १४९ ॥
पुरन्दरयशा देवी, तयाऽमोचि विभोः पुरः । स्वाम्यप्युचे मा विषीद, संस्कारस्थितिरीदृशी ॥१५०॥
(यतः—) वज्रकायशरीराणा-मर्हतां यद्यनित्यता । कदलीसारतुल्येषु, का कथा शेषजन्तुषु ? ॥१५१॥
प्रभाते संस्कृतं सायं, नूनमन्नं विनश्यति । तदीयरससम्पुष्टे, काये का नाम नित्यता ? ॥ १५२ ॥
कृत्वाऽऽस्यैश्चरणैरलङ्कृतवपुर्यः षड्भिरुज्जृम्भितो, यः पक्षौ प्रवितत्य सन्ततमहो गच्छन्न विश्राम्यति ।
यः सारं जगदम्बुजस्य च पिबन् प्राप्तो न तृप्तिं क्वचित्,
तस्मै कालमधुव्रताय विहितोऽस्माभिः प्रणामाञ्जलिः ॥ १५३ ॥
वीतरागाश्रितो लोकः, स्यादशोकः किमद्भुतम् । यथा सुरसपर्यायां, पादपोऽप्यभवत्तथा ॥ १५४ ॥
श्रुत्वेत्युवाच सा नाथं, स्वामिन् ! कोऽप्यस्ति भारते ? । यो दुर्दशायामात्मानं, समुद्धरति तत्त्वतः ॥१५५॥
प्रत्युवाचाऽथ तीर्थेशः, सन्देहध्वान्तभास्करः । शृणु वत्से ! कथाऽऽख्यानं, सुकोशलमहामुनेः ॥१५६॥
तथाहि—मयि मोक्षपदं प्राप्ते, मम तीर्थे महीपतिः । साकेतनगरस्वामी, भविता विजयो जयी ॥१५७॥
पुष्पचूला प्रिया तस्य, पुष्पमालेव सद्गुणा । भविष्यतस्तयोः पुत्रौ, वज्रबाहु-पुरन्दरौ ॥ १५८ ॥
इतो नागपुरे राजा, दधिवाहनसञ्ज्ञकः । चूडामणी प्रिया तस्य, दुहिताऽस्ति मनोरमा ॥१५९॥
तामागत्य नृपादेशात् पुरे नागपुरे वरे । वज्रबाहुरुपायंस्त, प्रशस्तोदितलक्षणाम् ॥ १६० ॥
आबद्धकङ्कणभरौ, भवद्धवलमङ्गलौ । दम्पती तौ ववन्दाते, गृहचैत्यानि भावतः ॥ १६१ ॥

नवमो भवः

सुकोशल कथानकम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दशाहान्तान्महीपाल-नन्दनो ववले पुरात् । सहोदयसुन्दरेण, पत्नीभ्रात्रा शुभे दिने ॥ १६२ ॥
इतो वसन्तो राजेव, कोकिलाबन्दिसूचितः । कन्दर्पमन्त्रिणा साकं, जगज्जेतुमदीप्यत ॥ १६३ ॥
प्रतिवृक्षं विलोक्यन्ते, दोला लोलत्वशायिनः । पान्थसार्थाण्डजग्राहे, पाशा इव विनिर्मिताः ॥१६४॥
उपसर्पन्वज्रबाहु-र्मत्तकुञ्जरसङ्गतः । अद्राक्षीत्कञ्चनमुनिं, वसन्तं गिरिमस्तके ॥ १६५ ॥
उत्तीर्य कुञ्जरादेष, भवादिव महामतिः । मुनिं प्रति चचालोच्चै,-रोमाञ्चकवचं वहन् ॥ १६६ ॥
यथा यथा मुने रूप-मसरूपं विलोकते । तथा तथा भावलता, वर्द्धतेऽस्य मनःस्थले ॥ १६७ ॥
धन्योऽयं यौवनभरे, यश्चकार महाव्रतम् । अहं तु विषयोद्बोध-पङ्के मग्नोऽस्मि कोलवत् ॥ १६८ ॥
मनुष्यकल्पवृक्षस्या-ऽनेन प्राप्तं महत्फलम् । मया तु मानुषं जन्म, विषयैः कलुषीकृतम् ॥ १६९ ॥
एके विज्ञाततत्त्वार्था, जन्मना जन्म पावनम् । अर्जयन्तितरामन्ये, हारयन्ते मदान्धलाः ॥ १७० ॥
एवं भावपरं वज्र-बाहुमालोक्य दूरतः । उपहासपरोऽवादी-न्नवपत्नीसहोदरः ॥ १७१ ॥
तवाऽपि मानसं मन्ये, श्रामण्यं प्रति सत्वरम् । कथङ्करं करोषि त्वं, विलम्बं स्वार्थभञ्जनम् ॥ १७२ ॥
त्वामनुप्रव्रजिष्यामि, त्वन्मार्गे प्रेषितो यतः । स एव शस्यते पत्ति-र्यः स्वामिहितकारकः ॥ १७३ ॥
श्रुत्वेति शकुनग्रन्थिं, बध्नाति ( वि ) जयनन्दनः । विवाहभूषणैर्भुग्नो, भक्तिमग्नोऽनमन्मुनिम् ॥१७४॥
मुनिस्तद्भावमुद्दिश्य, धर्मलाभाऽऽशिषं ददौ । पुमर्थेष्वपि सर्वेषु, धर्म एवाऽऽदिमो यतः ॥१७५॥
वज्रबाहुरुवाचेदं, कथं जीवो भवार्णवे ? । परिभ्रमति सर्वत्र, भग्नपोतांशकाष्ठवत् ॥ १७६ ॥

नवमो भवः

सुकोशल
कथानकम्



For Private and Personal Use Only

अथोवाच महासत्त्वः, कर्मभिः स्वयमर्जितैः । रूपैर्नवनवैर्जीवः, परिभ्राम्यति संसृतौ ॥ १७७ ॥
केषाञ्चित्कर्मणां जाते, क्षयोपशमतागुणे । लभते श्रावकं जन्म, दुर्लभं तत्र दर्शनम् ॥ १७८ ॥
तन्मूलो गृहिणां धर्मो, यतिधर्मोऽपि सन्मते ! । तस्मिन् ध्येयो जिनो देवो, महाव्रतधरो गुरुः ॥१७९॥
ज्ञेयानि नवतत्त्वानि, हेयानि कुमतानि च । ततः करतलालीनं, जायते निर्वृतेः पदम् ॥ १८० ॥
विवेकी श्राद्धधर्म्मेण, क्रमान्मोक्षमुपैति च । त्वरितं यतिधर्म्मेण, यद्युक्तं तत्समाचर ॥ १८१ ॥
श्रुत्वेति मुनिनोदीर्णं, वैरङ्गिकमहामतिः । उज्झाञ्चकार नेपथ्यं, निर्मोकमिव पन्नगः ॥ १८२ ॥
इतो मनोरमादेवी वज्रपातसहोदरम् । तदाकूतं तदा ध्यात्वाऽऽगत्याऽरोदीदिति स्फुटम् ॥ १८३ ॥
प्राणनाथ ! कथङ्कारं, प्रव्रज्यां कर्तुमुत्सहे । रक्तां भक्ताञ्च मां त्यक्त्वा, नवोढां मूढधीरसि ॥ १८४ ॥
पत्नीभ्राताऽप्यथोवाच, हास्येनाऽभिहितं मया । त्वं तु गूढमना नेतः!, सत्यं कर्तुं समुद्यतः ॥ १८५ ॥
हास्येनाऽपि त्वया वत्स ! यदुक्तं तत्तथा मम । रसज्ञात्वेकदा सूते, जननी तु सहस्रशः ॥१८६॥
मनोरमाविलापान्स, मन्यमानः क्षणानिव । विच्छेद कबरीबन्धं, पञ्चभिर्मुष्टिभिः क्षणात् ॥ १८७ ॥
षड्त्रिंशत्या कुमाराणां, पत्नीभ्रात्रा सहाऽपि सः । सामायिकमहामन्त्र-मुच्चचार गुरोर्गिरा ॥ १८८ ॥
मनोरमाऽपि साध्वीत्वं, प्रपेदे पतिमार्गतः । कुलस्त्रियां समाचारः, पतिमार्गानुवर्त्तनम् ॥१८९॥
कौमारवृत्तमाकर्ण्य, विजयो ध्यातवानिदम् । अहं वृद्धो भवं श्राद्धः, प्रबुद्धाचारवञ्चितः ॥ १९० ॥
लघीयानपि पुत्रो मे, बृंहीयानिव भासते । दीप्तागारमिव त्वक्त्वा-ऽभवत्प्रव्रजितोऽधुना ॥ १९१ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विमृश्येति नृपो न्यस्य, राज्ये पुत्रं पुरन्दरम् । प्रव्रज्यामग्रहीत् पार्श्वे, तस्य ख्यातियशोमुनेः ॥१९२॥
पुरन्दररसानेतुः पुत्रः कीर्तिधरोऽजनि । पृथिवीकुक्षिसम्भूतः ख्यातकीर्तिरिलातले ॥ १९३ ॥
कुशस्थलपुरस्वामि-नन्दिनीं सहदेविकाम् । कीर्तिधर उपायंस्त, वैदर्भीमिव नैषधिः ॥१९४॥
राज्यं कीर्तिधरो राजा, यथानयमपालयत् । राहुग्रस्तं रवेर्बिम्ब-मन्येद्युर्वि निरैक्षत ॥ १९५ ॥
यत्तेजसा वितेजस्कं, ग्रहचक्रं करोति यः । स एव ग्रस्यते सूरो, हीनाङ्गेनाऽपि राहुणा ॥ १९६ ॥
अयं मे जीवमार्त्तण्डो, ग्रस्यमानः स्वकर्मणा । राहुणेव विना धर्मं, रक्ष्यते नैष केनचित् ॥ १९७ ॥
तस्माच्छाश्वतिके सौख्ये, ग्रहोपग्रहवर्जिते । यतिष्य इति संध्याय-न्नुवाच निजमन्त्रिणम् ॥ १९८ ॥
तेऽप्यूचुर्नाथ! मा वादी-रीदृग्वर्णविभेदनम् । त्वां विना पृथिवीपीठ-मनाथमिव सन्मते! ॥ १९९ ॥
यदि ते भववैराग्यं, गृहस्थोऽपि दिवाऽनिशम् । देहि दानं सुपात्रेभ्यो, धर्मदानपुरस्सरः ॥ २०० ॥
अनु त्वत्कर राजीव-मर्थिभिः स्वकराः कृताः । कथं दर्शनवेषस्थो, भिक्षाहेतोर्गमिष्यसि? ॥ २०१ ॥
निरपत्यः कथङ्कारं, त्यक्ष्यसि श्रियमात्मनः । जाते पुत्रे पुनर्धर्मं, कुर्याद्धर्मक्रियान्वितः ॥ २०२ ॥
तद्वचो मन्त्रवद्राजा, प्रतिपद्याऽनवद्यधीः । आनन्दनादहं राज्यं, कर्ताऽभिग्रहमभ्यधात् ॥ २०३ ॥
विषयान्सेवमानस्य, प्रजायै सहदेविभूः । अभूत्सुकोशलः पुत्रः, प्रत्याशातरुदोहदः ॥ २०४ ॥
नन्दने पक्षव्यतीते, न्यस्य राज्यं महामनाः । अभूत्कीर्तिधरः साधु-श्चक्रे वरतरं तपः ॥ २०५ ॥
शीतं शिशिरकालेऽपि, ग्रीष्मे ग्रीष्मं महाऽऽतपम् । वर्षासु वारिभृद्वृष्टिं, गिरिवत्सहते स्म सः ॥२०६॥

नवमो भवः
सुकोशल कथानकम्



For Private and Personal Use Only

साधुकीर्तिधरोऽन्येद्युः, साकेतपुरमभ्यगात् । भिक्षायै प्रविवेशाऽथ, युगमात्रेक्षणेक्षणः ॥ २०७ ॥
सहदेवी गवाक्षस्था, निरैक्षत मुनिं प्रियम् । अकुप्यदर्शनात्तस्मै, तं पुरान्निरवासयत् ॥ २०८ ॥
अन्येऽपि लिङ्गिनो जैना, हठान्निर्वासिता पुरात् । विप्लावयन्तु मा लोक-मिति ध्यात्वा तयाऽचिरम् ॥२०९॥
तं वृत्तान्तं समाकर्ण्य, सुकोशलनरेशितुः । रुरोद करुणं धात्री, रोदयन्ति परानपि ॥ २१० ॥
ऊचे सुकोशलो मातः !, कथं रोदिषि बालवत् । त्वद्विप्रियकरं हन्मि, हेतुमादिश रोदने ॥२११॥
अथोचे धात्रिका धात्री-धवपुङ्गव ! मां प्रति । न कोऽपि विप्रियं कर्ता, राजशासनभीतितः ॥ २१२ ॥
परं कीर्तिधरो राजा, गृहीतश्रमणव्रतः । अनाथ इव त्वत्पुर्यां, देव्या निर्वासितो हठात् ॥ २१३ ॥
न ममाऽपि सुतोऽमुष्य, दर्शनाद्भवभीरुधीः । गृह्णात्वत्र परिव्रज्यां, परलोकार्थसाधिनीम् ॥ २१४ ॥
ध्यात्वेति क्षुधितः साधुः, सहदेव्या दुराशयात् । निर्भर्त्स्यमानः पुरुषै-र्विमुक्तो नगरीबहिः ॥२१५॥
सत्पुत्र ! तव वंशे ये-ऽभवन्भूमिभुजः परे । ते सर्वेऽपि महीं भुक्त्वा, परिव्रज्यामुपागताः ॥ २१६ ॥
अनेन हेतुना देव !, तव माता पुरात्तव । न ह्यागन्तुं ददात्येषा, कृत्वा कूटोत्तरावलीम् ॥ २१७ ॥
विज्ञायेदं कुलीनात्मा, च्छन्नस्छन्नः सुकोशलः । अगान्मुनिपितुः पार्श्वे, ववन्दे परया मुदा ॥२१८॥
कीर्तिधरमुवाचाऽथ, भूमिनाथसुकोशलः । आदीप्ते भवसंस्त्याये, महामोहकृशानुना ॥ २१९ ॥
मां निक्षिप्य क्षमागार ! स्वयं नष्टोऽसि सत्वरम् । प्रवृष्टोऽसि परिव्रज्या-मयसौधे मनोहरे ॥ २२० ॥
तस्मादाकृष राजर्षे !, पिता चेदसि वत्सलः । भवेदपत्यं दुर्जातं, पितरौ हि प्रियङ्करौ ॥२२१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ततो विज्ञातवृत्तान्ता, भटी-चेटी-परीवृता । समागात्प्रेयसी तस्य, हारिणी हारकारिणी ॥ २२२ ॥
पतित्वा पादयो राज्ञः, तुदती रुदती भृशम् । ऊचे स्वामिन्ननाथां मां, कुरुषे पृथिवीमिव ॥ २२३ ॥
तवाऽपि वार्द्धके श्रेयो, भूयाच्चारित्रपालनम् । समये क्रियमाणं हि, शस्यते घनवृष्टिवत् ॥ २२४ ॥
वैरङ्गिको भवागारे, ततः प्रोचे सुकोशलः । तवाऽपि विद्यते गर्भ-स्ततः पुत्रो भविष्यति ॥ २२५ ॥
पितुः समक्षं स मयाऽऽ-भिषिक्तः सुकुलोद्भवे ! । इत्युक्त्वा मुकुटादींश्च, प्रियायाः समनार्प्पयत् ॥२२६॥
प्रवव्राज स्वयं राजा, सन्त एकाग्रहा शुभे । रत्नमुक्तावलीवर्ग-भद्रादिकं महातपः ॥ २२७ ॥
पाक्षिकं मासिकं पञ्च-मासिकं विविधं तपः । कुर्वाणौ सहमानौ च द्वाविंशतिपरीषहान् ॥ २२८ ॥
संयमेन पवित्राङ्गौ, तपःक्षामवपुर्धरौ । विहारश्चक्रतुर्भूमि-चक्रे चक्रत्ववर्जितौ ॥ २२९ ॥
सहदेवी तु विज्ञाय, सुतं संयममालिनम् । आर्त्त-रौद्र-ध्यानपरा, मृत्वा व्याघ्री गिरावभूत् ॥२३०॥
अन्यदाऽजनि वर्षे तु, गर्जितं च घनाघनैः । नर्तितं केकिभिः कामं, मुदितं कर्षकव्रजैः ॥ २३१ ॥
बद्धेन्दीवरपूज्ञेव, प्रोद्भिन्नवकन्दला । रक्ताम्बरं वसानेव, भूरभूद्रक्तजन्तुभिः ॥ २३२ ॥
तत एतौ महाटव्यां, शैलमौलौ समाहितौ । चतुर्मासीश्चक्रतुश्च, स्थण्डिले जन्तुवर्जिते ॥ २३३ ॥
पर्यङ्क-वीर-वज्राब्ज-गोदोहकासनानि च । कुर्वाणौ कर्मसङ्घातं, हतवन्तौ तपोधनौ ॥ २३४ ॥
पूर्णीकृत्य चतुर्मासीं, विहृतौ पारणादिने । इतो दृष्टौ च तौ व्याघ्र्या, सध्रीच्या नरकस्थितेः ॥२३५॥
व्यस्तारयन्मुखं व्याघ्री, संसारमिव दूरतः । निजनादवितानेन भाषमाणेव तौ मुनी ॥ २३६ ॥



For Private and Personal Use Only

ततः सुकोशलः साधु - र्निर्भीकः शमवल्गितः । चक्रे चतुर्विधाहार - प्रत्याख्यानं समाहितः ॥ २३७ ॥
यदि मे स्यात्तनोरस्य, प्रमादः प्राणसंहृतेः । मया त्यक्तस्तदा देह, - उच्छ्वासेनान्तिमेन च ॥ २३८ ॥
मया विरोधिता पूर्वं, प्रतिकरोति तन्मम । तस्मात्कुप्यामहे स्वस्मै, विदित्वा जिनशासनम् ॥ २३९ ॥
ध्यात्वेति तत्त्वमापूर्य, चतुःशरणमाश्रितः । एतस्याः सम्मुखं कायो - त्सर्गश्चक्रे महामुनिः ॥ २४० ॥
दंष्ट्राकराललपना, पुच्छाग्रेण महीतटम् । ताडयन्ती नखाग्रैश्च, त्रोटयन्ती मुनेस्तनुम् ॥ २४१ ॥
उत्पत्य मस्तकेऽमुष्य, वज्रदण्ड इवापतत् । मुनिश्च पातयामास, धात्र्यां तृणनरोपमम् ॥ २४२ ॥
बभञ्जाऽस्थीनि दन्ताग्रै - र्भृष्टपर्पटवच्च सा । जघास कोमलं मांसं, पपौ व्याघ्री रसासवम् ॥ २४३ ॥
सुकोशलो महासत्त्वः सत्त्वौघक्षामणापरः । अन्तकृत्केवलीभूय जगाम परमं पदम् ॥ २४४ ॥
यावत्तस्याऽऽनने दन्तान्, कुन्देन्दुकुमुदत्विषः । करौ च कमलाकारौ, नानालक्षणलक्षितौ ॥ २४५ ॥
श्रीवत्सलाञ्छनं वक्षो, मुखं प्रबललोचनम् । जानुदघ्नं भुजायुग्म - मूरू च कदलीकलौ ॥ २४६ ॥
पश्यति स्नेहसम्पूर्ण - दृशा भुक्ताऽशना भृशम् । तावदस्याः समुत्पेदे, जातिस्मरणमञ्जसा ॥ २४७ ॥
आः पातकवती पुत्र - मांसमद्मि दुराशया । अथवा बद्धनरका - युष्काणां भवतीदृशम् ॥ २४८ ॥
यन्मया नगरात्कीर्ति - धरो निर्वासितः पुरा । तत्समं सद्गतेरात्मा, स्वयं कलुषचेतसा ॥ २४९ ॥
संसारवासरक्तानां, जन्तूनां दुःखसम्भवः । ममैव जायते नूनं, व्याघ्रीत्वेन विडम्बितः ॥ २५० ॥
अपासरन्मुनेर्देहात्, पातकादिव सन्मतिः । रुरोद करुणं व्याघ्री, वीक्ष्यते स्म दयापरम् ॥ २५१ ॥

इतः कीर्तिधरस्याऽभूत्, केवलश्रीः समुज्ज्वला । व्याघ्रीदर्शनभीतैर्वा, कर्मभिस्तु पलायितम् ॥२५२॥
आगतास्त्रिदशाश्चक्रुः, सौवर्णं तत्र विष्टरम् । तत्र कीर्तिधरस्तस्थौ, मराल इव पङ्कजे ॥ २५३ ॥
ततः कीर्तिधरं प्रेक्ष्य, व्याघ्री सदयमानसा । स्वगिरा प्रणिपत्योचे, निस्तारय भवाम्बुधेः ॥ २५४ ॥
ततः कीर्तिधरः प्राह, कोपः संसारकारणम् । कोपः कल्याणकन्दल्या, भेदने परशुः शितः ॥२५५॥
कोपश्चण्डक्रियामल्लः, कोपः शल्यं शमश्रियः । कोपो ज्ञानलतावह्निः, कोपो निरयवर्त्मनीः ॥ २५६ ॥
विज्ञाताऽऽगमतत्त्वस्य, जन्तोः प्रशमशालिनः । कोपमुक्तेर्भवेद्भद्र-मचंकारितभट्टिवत् ॥ २५७ ॥
(तथाहि–)उज्जयिन्यामुज्जयिन्यां, सौराज्यस्थितितः पुरि । धनप्रवरनामाऽभून्, माहाजनिकभूषणम् ॥२५८॥
कमलश्रीः प्रिया तस्य, विस्मेरकमलानना । तयोः सुताऽष्टकं जातं, नवमी भट्टिकाङ्गजा ॥२५९॥
अतिस्नेहलचित्तेन, श्रेष्ठिनोचे जनानभि । न च चङ्कारिता सेयं, केनाऽप्यागसि भूयसि ॥ २६० ॥
तदाद्यभिदधे लोकै-रचंकारितभट्टिका । सा प्राप यौवनं काम-महेभस्य महावनम् ॥ २६१ ॥
अथ पौरा अयाचन्त, नैतामेष प्रदत्तवान् । अभाणीदिति यो नाज्ञा-मस्याः सन्धास्यतेऽन्यथा ॥२६२॥
तस्याऽहमेनां दास्यामि, भविष्यामि कृतार्थकृत् । को नाम गौरवं दत्ते, स्वकीयस्या न वस्तुनः ॥२६३॥
सवयोभिर्वयस्याभिः, खेलती साऽथ मन्दिरे । सुबुद्धिमन्त्रिणा दृष्टा, खेचरीव महीचरी ॥ २६४ ॥
चित्रं बाणैरनङ्गस्य, स विद्धो हृदयस्थले । कुतस्त्योऽस्मि कुतोऽप्यागा-मिति न स्म विवेद सः ॥२६५॥
स्वस्थीभूय स्वयं गत्वा, धनप्रवरमन्दिरम् । नत्वैनं रहसि स्माह, प्रीत्या विनयवामनः ॥ २६६ ॥

नवमो भवः
सुकोशल कथानकम्



For Private and Personal Use Only

धनप्रवर ! पुत्री मे, विवाहाय प्रदीयताम् । सुबुद्धिसचिवं विद्धि, राज्यभारधुरन्धरम् ॥ २६७ ॥
अवश्यमेव कस्येदं, दातव्या रूपवत्यपि । अहं याचे स्वयं विद्वन् !, कन्या परधनं यतः ॥२६८॥
ततः पूर्वोदितं श्रेष्ठी, यथातथमुवाच सः । सोऽप्याख्यदेवमस्तूच्चै-स्ततोऽसौ परिणायितः ॥ २६९ ॥
गुरुवाक्यमिवाऽमंस्त, तस्याः वाक्यं स धीसखा । व्यतिचक्राम नाऽप्याऽऽज्ञां, तुष्टदेवोपदेशवत् ॥२७०॥
अथ मन्त्र्यपि तद्रीत्या-ऽऽगारतं राजमन्दिरात् । सायमेति महीपाल-मापृच्छय निजमन्दिरम् ॥२७१॥
अन्येद्युर्भूभुजा पृष्टः, प्रष्टबुद्धे ! कुतो द्रुतम् ? । गमिष्यसि प्रदोषेऽपि, निदानमिति गद्यताम् ॥ २७२ ॥
ततः सद्भावनो मन्त्री, यथातथमुवाच सः । सुचिरं विधृतो राज्ञा, सर्वो हि परकौतुकी ॥ २७३ ॥
अथ मुक्तो नृपेणाऽगात्, स्वागारं भूरिसाध्वसः । तस्मिन् क्षणेऽस्या जज्वाल, कोपवह्निरनर्गलः ॥२७४॥
पिधाय सुदृढं द्वारं, शेते स्म श्रेष्ठिनन्दिनी । कोपत्रासादिवैतस्या, दूरं निद्रा पलायिता ॥ २७५ ॥
ततो बहिरसौ स्थित्वा, तेनाऽऽभाणि नतेन सा । उद्घाटय द्रुतं द्वार-मङ्कितस्तेऽस्मि किङ्करः ॥२७६॥
राजाग्रहान्मम कोस-द्वारा राजीवलोचने ! । राजाग्रहादिभिर्भद्रे ! व्रतभङ्गोऽपि नो भवेत् ॥ २७७ ॥
न भूयोऽपीदृशं कुर्वे, मन्तुमेकं क्षमस्व मे । प्रसीद पतितस्तेऽस्मि, पादयोः पत्तिलीलया ॥ २७८ ॥
इत्यादि तद्वचोवीची-वात्यया दूरया तया । एतस्याः कोपतूलोऽथ, प्रससार समन्ततः ॥ २७९ ॥
ही ! अस्माभिर्विजानद्भिः, कीदृक् पापमनुष्ठितम् ? । आत्मा परवशश्चक्रे, भूपालप्रिययोरपि ॥ २८० ॥
एतदाकर्ण्य तद्वाक्यं, हृदि निर्वेददीपकम् । गिरिदाहसमः कोप-स्तस्या ऐधत विग्रहे ॥ २८१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सहसा साहसाविष्टा, साऽश्वकारितभट्टिनी । निर्ययौ वासवेश्मान्त-द्वारं प्रोद्धाट्य पश्चिमम् ॥ २८२ ॥
तामनु प्रागमत्प्रेयान्दीनदीनो रुरुत्सया । मां विहाय क्व याताऽसि ?, त्वत्परायत्तमानसम् ॥ २८३ ॥
वञ्चयित्वाऽनुयान्तं तं, साऽशोकवनिकां ययौ । एषोऽपि तस्यावति हि, व्याकृष्टं त्रुट्यति स्फुटम् ॥२८४॥
यावद्गन्तुं प्रवृत्ताऽपि, पितृवेश्म महानिशि । असौ तावद्धृता चौरै-र्हन्त ! कोपदुरन्तता ! ॥ २८५ ॥
इमां पलायमानाश्च, क्रन्दन्तीं कुररीमिव । अरुन्धन्दस्यवो वेगात्, सापायं रात्रिसर्प्पणम् ॥२८६॥
पूत्करिष्यसि चेत्पापे !, छेत्स्यामस्ते शिरोधराम् । इत्युक्तवन्तो गृह्णन्ते, पाणिनाऽजामिव स्वयम् ॥२८७॥
अरे ! दारिद्र्यमुद्रां नो, विद्रोष्यति विभूषणैः । भविता प्राभृतमियं, पल्लीभर्तुरसंशयम् ॥ २८८ ॥
इत्युक्त्वा तैरथाऽऽनीता, निजपल्लीं सुलोचना । न भवेदन्यथाभावः, कृतं कर्मैव वेद्यते ॥ २८९ ॥
तत्राऽऽसीद्विजयो नाम, दस्युसेनाधिनायकः । त एनां प्राभृतीचक्रुः, स्त्रीरत्नमितिवादिनः ॥२९०॥
एनां रूपश्रिया हृद्यां, पुरुहूतप्रियामिव । वीक्ष्य वित्तं ददौ तेभ्यो, विजयः पल्लिनायकः ॥ २९१ ॥
एतान्विसृज्य रागान्धो, मातुरर्प्पितवानिमाम् । अम्ब ! बन्दीमिवेमां मे, प्रियां कारयत द्रुतम् ॥२९२॥
एकान्ते तां प्रविश्योच्चै-स्तया प्रीतितरङ्गितम् । अभाष्यत विशेषेण, माता पुत्रार्थकारिणी ॥२९३॥
अयं भद्रे ! मम सुतो, विजयः पल्लिनायकः । सूर्यवद्यो विराजिष्णुर्दुर्जयो स परैरपि ॥ २९४ ॥
तुष्टो यस्यैष सुभगे !, तुष्टस्तस्य धनाधिपः । क्रुद्धो यस्योपरि प्रायः, कृतान्तस्य स गोचरः ॥ २९५ ॥
एतद्भयाद्विलीयन्ते, गर्भा अपि मृगीदृशाम् । म्रियन्ते किमुतोत्पन्ना, नास्त्येष सदृशः क्षितौ ॥ २९६ ॥

नवमो भवः

सुकोशल कथानकम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिपद्यस्व पत्नीत्व-मस्य निःशङ्किताशया । भुङ्क्ष्व भोगांश्च साम्राज्यं, पल्ल्यैश्वर्यं यदृच्छया ॥२९७॥
अथाऽसौ स्माह चाम्बैतत्, घटकोटिं प्रयाति किम् ? । वचस्तासामिदं युक्तं, कुलं यासां मलीमसम् ॥२९८॥
(यतः–) पद्मिनी न निशानाथं, दिनेशं न कुमुद्वती । आकाङ्क्षति लताऽप्येवं, किं पुनः कुलयोषितः ? ॥२९९॥
कुलं यातु बलं यातु, यातु वित्तश्च सर्वथा । एकं शीलं तु मा यातु, मूलं सुगतिशाखिनः ॥ ३०० ॥
ऊचे पल्लिपमाताऽथ, सत्यमुक्तं त्वयेदृशम् । किञ्चित्कालं परं भद्रे !, ऽनुवर्तस्व ममात्मजम् ॥ ३०१ ॥
प्रायश्चित्तादिना शुद्धिं, भद्रे ! भूयो विधास्यसि । जीवन्प्राणी लभेतोच्चै-र्वाञ्छितार्थसमर्थनम् ॥३०२॥
अथाऽवादि तया भूयः, किं वाचोभिस्तवोदितैः ? । प्राणापहारतो दण्डो, भविता नाऽधिकः क्वचित् ॥३०३॥
सुशीलपावनामेना-मश्वकारितभट्टिकाम् । ज्ञात्वा पल्लिपतेर्माता, स्वपुत्राय न्यवेदयत् ॥ ३०४ ॥
तच्छ्रुत्वा भ्रुकुटीभङ्ग-भङ्गुरो नतकोटरः । एतस्या नाशयाम्यद्य, चिरोपात्तं सतीव्रतम् ॥ ३०५ ॥
ब्रुवन्निति कशाघातै-स्ताडयामास निर्दयम् । सा पपात महीपीठे, च्छिन्नवल्लीव मूलतः ॥ ३०६ ॥
ततो रुधिरसेकार्त्तां, रेणुकामण्डितामिव । विलोक्य जननी तस्य, जगादेति मिताक्षरम् ॥ ३०७ ॥
आः पाप ! पापिनामद्य, किमीदृक्षं विधास्यसि ? । नही दीनेषु हीनेषु, प्रहरन्ति मनीषिणः ॥३०८॥
इति ब्रुवाणया तस्य, कराभ्यां चर्मयष्टिका । एतया सा समाकृष्य, दूरतो विहिता क्षणात् ॥ ३०९ ॥
वीजिता व्यजनेनैषा, सीकरासारवर्षिणा । लब्धोच्छ्वासाऽभवद् वल्ली, शुष्काऽपि मधुना यथा ॥३१०॥
ततः पल्लिपतिर्भूयो, मात्राऽवाचि सुविस्मितम् । सतीनां सुत ! सामर्थ्यं, देशघाताय जायते ॥ ३११ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सच्चरित्रमतः पुत्र !, यदि सत्यं जिजीविषुः । कदर्थनीया नैवैषा, रेखा योषित्सु शीलतः ॥ ३१२ ॥
इत्युक्तो मातृवाङ्मन्त्रै-र्मुक्तरागविषोऽभवत् । अदान्मूल्येन कस्मैचित्, सार्थनाथाय गच्छते ॥३१३॥
तेनाऽपि तद्वदूचे सा, रागान्धीकृतचेतसा । नाऽनुमेने वचस्तस्य, यावदेषा सतीतमा ॥ ३१४ ॥
तावत्सा ताडिता तद्वत्, कसाघातैर्मुहुर्मुहुः । यत्र वा तत्र वा यातु, वेदनीयं तु वेद्यते ॥३१५॥
तयाऽप्यूचे गुणज्ञोऽसि, विरुद्धं किं प्रजल्पसि ? । लोकद्वयविरुद्धं हि, किं कुर्वन्ति विवेकिनः ?॥३१६॥
(यतः-) आदरः परदारेषु, स्वदाराणां विवर्जनम् । भवेत्पिपतिषोर्जन्तो-र्नरके नर ! केवलम् ॥३१७॥
वचस्तस्य तया सद्यः, किञ्चिन्न प्रत्यपद्यत । ततो गौरिव तेनायं, नीता द्वीपान्तरं निजम् ॥ ३१८ ॥
तस्मिन् कम्बलरत्नाख्य-वणिजा द्रविणादहो । विक्रीता सोऽपि तां दृष्ट्वा, विद्धो मन्मथमार्गणैः ॥३१९॥
अभाणि तेन तद्वत्सा, ही शीलं दुःखपालनम् । व्रतेषु शीलभूपालः, सत्त्वामात्यपरिस्कृतः ॥ ३२० ॥
तया कम्बलरत्नस्य, वचने वितथीकृते । व्यसनं यद्भूदस्या-स्तद्वाचामप्यगोचरम् ॥ ३२१ ॥
आकृष्याकृष्य तद्देहा-द्रक्तमेष नराधमः । अपूरिष्ट सदा कुण्डं कृमिरागविधित्सया ॥ ३२२ ॥
सखीं नरकदुःखस्य, स्मारिणीं क्रोधरक्षसः । सारिणीं मानकन्दल्या, सा पीडामन्वभूच्चिरम् ॥ ३२३ ॥
सातत्यं रुधिरस्रावात्, सञ्जाततनुपाण्डिमा । कौसुम्भशाटिकेवेयं, धौतरागाऽभवद् भृशम् ॥ ३२४ ॥
ततः कथानियोगेन, तद्भ्राता राजशासनात् । कूलं तत्पारसं नाम, प्रेमनुन्न इवाऽऽगमत् ॥ ३२५ ॥
काकतालीययोगेन, मलक्लिन्नकलेवराम् । एनामेष चकाराऽथ, बलाल्लोचनगोचराम् ॥ ३२६ ॥

नवमो भवः

सुकोशल
कथानकम्



For Private and Personal Use Only

किमियं ललना काऽपि, दृष्टपूर्वेव वर्तते । आमोदयति मामेषा, स्वमेव प्रीतिवीचिभिः ॥ ३२७ ॥
क सा स्वसा मम मत्ता, क्केदं कूलं भयङ्करम् । अथवा विधिवैवस्या-दुर्घटा घटना नहि ॥३२८॥
क सा कोपग्रहग्रस्ता, चिरं जीवति भूतले । यमभूपनिघातेसु, सत्सु कूपादिषु क्षितौ ॥ ३२९ ॥
विधिरेव प्रगल्भोऽस्ति, वियोगघटनाकृते । सुघटं यो विघटये-दघटं घटयेदपि ॥ ३३० ॥
किमेभिर्दुःखसाङ्कल्यै-र्विकल्पैः कल्पितैर्मम । इमामेव हि पृच्छामि, कङ्कणे दर्पणेन किम् ? ॥३३१॥
विचिन्त्येति जगादेनां, भद्रे ! का त्वं कुतः कृशा ? । कस्मादिदं विवर्णयन्ते, वपुस्तद् ब्रूहि मेऽखिलम् ॥३३२॥
ततो मन्युसरोत्पीडा, साश्रुपूर्णविलोचना । सङ्क्षेपात्कथयामास, चरित्रं सा सगद्गदम् ॥ ३३३ ॥
श्रुत्वैष व्याजहारोच्चै-र्बाष्पपूर्णविलोचनः । उज्जयिन्यामिह प्राप्तो, जामे ! भ्राताऽस्म्यहं तव ॥३३४॥
हा जामे ! किमिदं जातं, यन्न स्वप्नेऽपि वीक्षितम् । अथाऽऽपदः सम्पदश्चाऽरघट्टभ्रमवल्गितः ॥३३५॥
( यतः- ) समाहतं यस्य करैर्विसर्पिभि-स्तमो दिगन्तेष्वपि नावतिष्ठते ।
स एव सूर्यस्तमसाऽभिभूयते, स्पृशन्ति कं कालवशेन नापदाः ? ॥ ३३६ ॥
विलाप्येवं मोचयित्वा, वणिजो बहुभिर्धनैः । आनयित्वान्तिके जामि-महो ! कर्मविचित्रता ! ॥३३७॥
क्रमादवन्तीं सम्प्राप्ता, पितृभ्यां मिलिताऽसकौ । अवादीत्पूर्ववृत्तान्तं, दुःखोद्गिरणपूर्वकम् ॥ ३३८ ॥
तदिदं कोपमाहात्म्यं विज्ञाय भवभीतया । एतया सुगुरूपान्ते, श्राद्धधर्मोऽथ सुश्रुवे ॥ ३३९ ॥
तदिदं कोपमाहात्म्यं, विज्ञाय व्याघ्रि ! भावतः । कोपं त्यज भज क्षान्तिं, क्षान्तिः सर्वार्थसाधिनी ॥३४०॥

नवमो भवः

सुकोशल-कथानकम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नवमो भवः
सुकोशलकथानकम्

अथ स्वभाषया व्याघ्री, कोपत्यागं विधाय च । उवाचाऽऽराधनां नाथ!, ब्रूहि मे पापहारिणीम् ॥३४१॥
अथ कीर्तिधरः साधु-स्तस्या भावविवृद्धये । उवाचैनं मृदु ध्यानं, मोहपङ्कदिवाकरः ॥ ३४२ ॥
ऋषिपुत्रकभ्रूहत्या, पापमत्या कृता त्वया । तां शुभभावतीर्थस्था, मोचयाऽचलमानसे ! ॥ ३४३ ॥
यत्त्वया लिङ्गिनो जैनाः, पुरान्निर्वासिता पुरा । तदालोचय दुष्कर्म, दुष्कर्महननोद्यते ! ॥ ३४४ ॥
क्रूरतीर्यक्त्वसम्प्राप्तेः, सम्प्राप्या नरका गतिः । यथा दारिद्र्यविस्फूर्त्तेः, सुलभं स्वावमाननम् ॥ ३४५ ॥
यत्त्वया निहता जीवा, नित्यं मांसजिघांसया । तत्पापं पिशितत्यागात्, समुत्सृजतरां त्रिधा ॥ ३४६ ॥
ततो मुनिगिराऽऽकार्षी-दाहारत्यागमञ्जसा । दिनानि त्रीणि यावत्सा, जिजीवाऽद्भुतभावना ॥३४७॥
केवलज्ञानिवदना-दाप्य पञ्चनमस्कृतिम् । मृत्वा व्याघ्री सुरो जज्ञे, सौधर्मे प्रणिधानतः ॥ ३४८ ॥
केवली कीर्तिराजर्षिः, प्रतिबोध्य महीतलम् । महानन्दपदं प्राप, पुत्रसङ्गमवाञ्छया ॥ ३४९ ॥
श्रुत्वेदं विभुनोदीर्णं, जीर्णसंसारवासनम् । पुरन्दरयशादेवी, तीर्थनाथं व्यजिज्ञपत् ॥ ३५० ॥
भावि नाथ! कथावस्त्व—तीतकाले प्रकाशितम् । केवलज्ञानमाहात्म्यं, सर्वकालेषु गोचरम् ॥३५१॥
स्वामिन्! सुकोशलः साधुः, श्लाघ्यः-स्तुत्यो दिवाऽनिशम् ।
येनाऽऽत्मा साधितो वेगा-दुपसर्गेऽपि दुस्तरे ॥३५२॥
एके एवम्विधा नाथ!, समुत्तीर्णभवाब्धयः । एकेऽस्मद्भ्रातृसदृशा, लोकद्वयविरोधकाः ॥ ३५३ ॥
अचङ्कारितभट्टायाः, श्रावं श्रावं निदर्शनम् । कोपस्त्यक्तो मया नाथ!, कषाया अपरे पुनः ॥३५४॥
स्वामिन्! प्रसादमाधाय, चारित्रं देहि मेऽधुना । येन संसारदुःखेभ्यो, मोक्षो मम भवेत्तराम् ॥३५५॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवमुक्तवतीं साध्वीं, नारीपञ्चशतीयुताम् । प्राव्राजयदमूं नाथो, जिनाः परहिते रताः ॥ ३५६ ॥
शत्रुञ्जयमहातीर्था-दुत्ततार जगद्गुरुः । विजहाराऽपि भूपीठं, बोधयामास देहिनः ॥ ३५७ ॥
आकेवलाज्जगद्भर्तु-र्विहारं कुर्वतः सतः । एकादशमासन्यूनाऽ-द्धाष्टमाब्दसहरुयभूत् ॥ ३५८ ॥
त्रिंशत्सहस्राण्यभव-न्निर्ग्रन्थानां महात्मनाम् । सहस्राण्यपि पञ्चाशत्, साध्वीनां च समस्पृशाम् ॥३५९॥
सहस्रार्धं प्रभोर्जज्ञे, द्विग्रासप्तकपूर्विणाम् । अष्टादशशता जाता, अवधिज्ञानवेदिनाम् ॥ ३६० ॥
पञ्चदशशतान्यासन्, मनःपर्यायधारिणाम् । केवलज्ञानिसाधूनामष्टादशशतान्यपि ॥ ३६१ ॥
सहस्रद्वितयं जातं, वैक्रियलब्धिशालिनाम् । उत्पन्नवादलब्धीनां, सहस्रं द्विशतान्वितम् ॥ ३६२ ॥
लक्षमेकं श्रावकाणां, द्वासप्ततिसहस्रयुक् । त्रिलक्षी श्राविकाणां च, सार्द्धा विहरते विभौ ॥ ३६३ ॥
ज्ञात्वा निर्वाणकल्याण-मासन्नं जगताम्पतेः । साकं मुनिसहस्रेण, सम्मेतगिरिमभ्यगात् ॥ ३६४ ॥
ज्येष्ठकृष्णनवम्यां च, श्रवणस्थे निशाकरे । त्रैलोक्यवन्द्यपादाब्जो, लोकालोकप्रकाशकः ॥३६५॥
वाग्योगं बादरं सम्यग्, मनोयोगश्च बादरम् । रुरोध द्वितयं स्वामी, सारथिर्धुर्ययुग्मवत् ॥ ३६६ ॥
बादरं काययोगश्च, सूक्ष्मकायनिरोधनात् । अरौत्सीद्योगवान्नाथः, श्वासप्रश्वासवारणात् ॥ ३६७ ॥
अथ सूक्ष्माङ्गयोगस्थः, सूक्ष्मवाक्चित्तयोगयोः । रोधं स्वामी च तन्वानः, सूक्ष्मध्यानरतोऽभवत् ॥३६८॥
अथोत्सन्नक्रियं नाम, तुर्यध्यानमशिश्रियत् । पञ्चह्रस्वाक्षरोच्चार-प्रमाणं परमेश्वरः ॥ ३६९ ॥
क्षीणार्थो विगतकर्मा, सिद्धानन्तचतुष्टयः । सर्वक्लेशविनिर्मुक्तः, केवलज्ञानदर्शनः ॥ ३७० ॥
ऊर्ध्वगामी जगन्नाथो, लेपाभावादलाबुवत् । स्वभावादृजुमार्गेण, लोकाग्रमुपजग्मिवान् ॥ ३७१ ॥युग्मम्॥

For Private and Personal Use Only

निर्निष्टशर्मणां शर्म, नारकाणामपि क्षणम् । प्रभोर्निर्वाणकालेऽस्मि-न्नपूर्वं समजायत ॥ ३७२ ॥
मुनयोऽपि महासत्त्वा, विहिताऽनशनक्रियाः । सर्वकर्म्मविनिर्मुक्ता, लेभिरे पदमव्ययम् ॥ ३७३ ॥
क्षीराम्भोधिजलैर्गात्र-मिन्द्रोऽस्नपयदर्हतः । अङ्गरागेण दिव्येन, विलिलेप सुगन्धिना ॥ ३७४ ॥
परिधाय सिते वस्त्रे, शिबिकायां विमानवत् । स्वयं न्यधात् प्रभोर्देहं, वासवः साश्रुलोचनः ॥ ३७५ ॥
मूर्ध्नि मालामिवाऽधात्सी-च्छुरिशक्रस्ततोऽथ ताम् । धूपमुद्ग्राहयामास, पुरस्तस्या दिवौकसा ॥३७६॥
श्रावक-श्राविकौघेषु, शोकः शोकेष्विवाऽधिकम् । श्रीसुव्रतरवौ प्राप्ते, नयनानामगोचरम् ॥३७७॥
भणन्त्यो रासकान्देव्यः, प्रस्खलन्ति पदे पदे । स्मरन्त्यः स्वामिनः सौम्यान्, गुणग्रामाननेकधा ॥३७८॥
स्वामिनोऽङ्गं चितामध्ये, विदधेऽथ पुरन्दरः । अग्नीनग्निकुमाराश्च, विचक्रुस्तत्र वेगतः ॥ ३७९ ॥
वायुं वायुकुमाराश्च, तद्दीपनकृते व्यधुः । गोशीर्षचन्दनैधोभिः, ज्वालयामासुराशु ताम् ॥ ३८० ॥
गन्धधूपान्बहून्प्राज्य-घृतकुम्भांश्च नाकिनः । ज्वलन्त्यामथ चितायां, चिक्षिपुर्बहुमानतः ॥ ३८१ ॥
मांसादिकेषु दग्धेषु, जलैः क्षीरार्णवाहृतैः । स्तनितास्त्रिदशा विध्या-पयामासुश्चितां ततः ॥ ३८२ ॥
अन्येषामपि साधूनां, शरीराणि सुरेश्वराः । प्रतीचीनि चितामध्ये, निदधुः प्रथमेन्द्रवत् ॥ ३८३ ॥
दक्षिणादक्षिणे ऊर्ध्व-दंष्ट्रे त्रिजगताम्पतेः । अगृह्णीतांतरां भक्त्या, सौधर्मेशानवासवौ ॥ ३८४ ॥
शक्रौ चमरबल्ल्याख्या-वधो दंष्ट्रे जिनेशितुः । इन्द्रास्त्वन्ये सुराश्चान्ये, दन्तानस्थीनि च स्वयम् ॥३८५॥
प्रभोश्चित्योद्भवं भस्म, पुमांसो जगृहुस्ततः । पवित्रवन्द्यसार्वाणां, सर्वमेवाऽर्हतां शुचि ॥ ३८६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चितास्थाने प्रभोस्स्तूप-मकुर्वन्तो दिवौकसः । नानारत्नमयं रत्नाऽचलशृङ्गसहोदरम् ॥ ३८७ ॥
निर्वाणमहिमामेवं, कृत्वा श्रीसुव्रतेशितुः । ययुर्नन्दीश्वरद्वीपे, कर्तुमष्टाहिकोत्सवम् ॥ ३८८ ॥
गत्वा स्वमथ स्थानं ते, माणवस्तम्भमूर्धनि । स्वामिदंष्ट्रां न्यधुः शक्रा, भक्तिं मूर्तामिव प्रभोः ॥३८९॥
सार्द्धाः सप्ताब्दसहस्राः, कौमारव्रतयोः पृथक् । राज्ये पञ्चदशत्रिंश-दित्यायुः सुव्रतेशितुः ॥३९०॥
निर्वाणान्मल्लिनाथस्य, निर्वृतिः सुव्रतप्रभोः । चतुःपञ्चाशति समालक्षेष्वतिगतेष्वभूत् ॥ ३९१ ॥
प्रशमविमलनेत्रं कर्णपीयूषसत्रं, नवनवरसपात्रं सर्वसौख्यैकमित्रम् ।
नवभवसुपवित्रं सुव्रतस्यातिमात्रं, भवजलनिधिपात्रं नन्दतात्सच्चरित्रम् ॥ ३९२ ॥

नवमो भवः

स्तुपादिकरणं ग्रन्थसमाप्तिः

माद्यन्मुक्तिनितम्बिनीकुचयुगालङ्कारतारस्फुरत्कस्तूरीतिलको नवीनजलदच्छायं स्वकायं वहन् ।
स्वच्छश्रीभृगुकच्छपत्तनसरःशृङ्गारनीलोत्पलः कल्याणानि चिराय नः प्रथयतु श्रीसुव्रतः सुव्रतः ॥३९३॥
श्रीमत्सुव्रततीर्थनाथचरितं कल्याणमालावृतं, ये भव्या विनयेन नम्रशिरसः शृण्वन्ति शुद्धाशयाः ।
तेषां बोधिलता फलत्यविरतं सम्यक्त्वपुष्पा फलैः, कल्याणैः शुभकर्मपाकसरसैः सौहित्यभद्रङ्करैः ॥३९४॥

इत्याचार्य-श्रीविनयचन्द्रविरचिते श्रीमुनिसुव्रत-स्वामिचरिते महाकाव्ये विनयाङ्के कार्तिक-श्रेष्ठि-स्कन्दकाचार्य-सुकोशलकीर्तिधराऽ-चङ्कारितभट्टिका कथानकगर्भितो निर्वाण-भवव्यावर्णनो नामाऽष्टमः सर्गः समाप्तः ॥छा॥ शुभम् ॥ ग्रन्थाग्रम् ४५५२॥

*

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति श्रीविनयचन्द्रसूरिविरचितम्

# मुनिसुव्रतस्वामिचरितम्

समाप्तम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only